- नारीणां नैसर्गिका दोषाः १८६
- वेश्यासङ्गत्यागे सदुपदेशः १८७
- परस्त्रीत्यागे हितोपदेशः १८७
- विजातीयासक्तानामामुष्मीकपारलौकिकफलम् १८८
- ब्रह्मव्रतस्यैहिकपारलौकिकफलम् १८८
- अब्रह्मसेवनेऽनेकजीवसंघातवर्णनम् १८९
- शीलखण्डने फलम् १९०
- काययापि ब्रह्मव्रतपालने सद्गतिः १९१
- लज्जया भयेन वा शीलपालने सत्फलम् १९२
- शीलपालने भीष्मपितुर्लौकिकदृष्टान्तः १९३
- शीलदृढतायां सुरप्रियस्य कथानकम् १९४

१३-तपसो निरूपणम् १९७

- जिनेश्वराणामुत्कृष्टतपोवर्णनम् १९७
- कर्मक्षये तपधर्मस्य प्रधानता १९७
- शरीरेन्द्रियकषायदमने तपसः श्रेष्ठता १९७
- तपोभिस्तामलितापसस्येशानेन्द्रत्वम् १९९
- तामलितापसकथा १९९
- जीवेण गृहीताहारजलस्यापरिमितता १९९
- विरतिर्मनुष्यभवे एव सुलभा २००
- तपसो वह्निना सह तुला २००
- तपविषये हरिकेशबलर्षिकथा २००

१४-भावस्य स्वरूपम् **२०२**
- शुद्धभावविकला सकला क्रिया निष्फला २०२
- चतुर्विधधर्मे भावस्य गरिष्ठता २०२
- रसवत्यां लवणस्येव धर्मे भावस्य श्रेष्ठता २०३
- भावहीनधर्मैः शिवपदस्यालभ्यता २०३
- दृष्टान्तेन भावनायाः ज्येष्ठता २०३
- पञ्चविधावग्रहस्तदनुज्ञा च २०४
- मोक्षस्य प्रधानतमकारणं भावः २०५
- भावधर्मविषये सुकोशलमुनेर्दृष्टान्तः २०६

१५-स्वाध्यायस्य प्ररूपणम् **२०८**
- स्वाध्यायस्य फलं वैराग्यम् २०८
- कर्मक्षयेऽपूर्वयोगः स्वाध्यायः २०८
- स्वाध्यायेऽनुद्यमी ज्ञानकुशीलः २०८
- स्वाध्यायरतोऽनुसमयं कर्म क्षपयति २०९
- स्वाध्याये प्रमादत्यागोपदेशः २१०
- स्वाध्यायकर्तॄणां योग्यगुणाः २१०
- स्वाध्यायलाभे सेनश्राद्धस्य दृष्टान्तः २१०

१६-नमस्कारवर्णनम् **२१३**
- नमस्कारस्य गणयन्तमक्षरमपि महानिर्जराय पापनाशाय च २१३
- कल्पतरोरप्यधिकतरं नमस्कारस्य महिमा २१३
- लक्षनमस्कारजापे विधिः श्रीदेवकथा च २१४
- जिनेश्वराणां स्वरूपं नमस्कारं च २१६
- सिद्धानां सुखं तेभ्यः कृतो नमस्कारश्च बोधिलाभाय २१९
- आचार्यनमस्कारफलवर्णनम् २२०
- उपाध्यायपदव्याख्या तत्स्वरूपं लाभश्च २२१
- साधूनां गुणवर्णनं फलं च २२२
- नमस्कारफले रामलक्ष्मणसीतारावणसुग्रीवानां पूर्वभवकथा २२४
- नमस्कारेणानेकविधापायानामपगमः २२५

१७-परोपकारस्वरूपम् **२२६**
- परोपकाराय सतां विभूतयः २२६
- तीर्थङ्करांणां हितोपदेशोऽपि परोपकाराय २२७
- पूर्वाचार्याणामपि ग्रन्थरचना परोपकारमूलैव २२९
- उपकारस्य दुष्प्रतिकारिता २३०
- पुण्याङ्गं परोपकारः २३१
- परोपकारे श्रीकृष्ण-हरिभद्रसूरि-सिद्धर्षिगणिवराणां दृष्टान्ताः २३२

१८-यतनानिरूपणम् **२३६**
- श्रमण-श्राद्धानामाश्रित्य यतना २३६
- यतनायां चन्द्रोदयकथा २३९

१९-जिनपूजाकर्तव्यः **२४१**
- द्रव्यभावभेदैः श्रमणश्रावकाणां पूजा २४२
- पूजया मोक्षनिष्पत्तिः २४३
- पूजाविधिः २४४
- अष्टविधजिनपूजाफले कथा २४८
- द्वित्रिभैदैः जिनपूजा २४९
- पूजायामाशातनाः २५०
- अशौचदशायां कृतपूजाफले पुण्यसारकथा २५०
- सम्पूर्णपूजाऽभावे एकधादिप्रकारैरपि पूजा विधेया २५१

२०-जिनस्तवनम् **२५३**
- जिनस्तवेन शासनोन्नतिः २५३
- मानतुङ्गसूरिप्रबन्धः २५३
- इहामुत्र फलदायिनी जिनस्तुतिः वाक्पतेश्च सम्बन्धः २५५

२१-गुरुस्तुतिः **२५८**
- गुरोः तारकत्वम् २५८
- गुरुं विना धर्मयोगोऽपि दुर्बोधः २५८
- वटपत्र-यानपात्रोदाहारेन गुरुस्वरूपम् २५९
- सिद्धिफला श्रमणोपासना २५९
- सारणाद्यभावे दोषाः २६०
- गुरुविरहमानिनां मृतखण्डनम् २६१
- प्रदेशिराज्ञोऽयोग्यता गुरुयोगेन च योग्यता २६३
- गुरुप्रत्यनीकत्वे फलम् २६४
- गुरुभक्तिर्विविधफला २६४
- चण्डरुद्राचार्यसम्बन्धः २६५
- गुरुभक्तौ सुनक्षत्रमुनेः कथा २६५
- परलोकफलेऽऽम्रभट्ट-आमराजकथानकम् २६५

२२-साधर्मिकाणां वात्सल्यम् **२७१**
- साधर्मिकसम्बन्धस्य दुर्लभता २७१
- शुभकर्मबन्धकारणानि २७१
- साधर्मिकवात्सल्ये वज्रस्वामिकथा २७२

२३-व्यवहारशुद्धिः **२७६**
- व्यवहारशुद्ध्या धनस्थैर्यम् २७६
- धनोपार्जनेऽन्यायप्रकाराः २७६
- न्यायोपार्जितवित्तेन सद्बुद्धिः सद्वासना सत्कार्यकर्तृता च २७७
- व्यवहारशुद्धौ द्विजकथा २७७
- न्यायोपार्जितवित्ते देवयशसोः कथा लौकिकपुरोहितकथा च २७८
- श्राद्धानां बह्वारम्भत्यागोपदेशो जगडूकथा च २७९

२४-रथयात्रा **२८१**
- प्रभावकाः श्रावकाः २८१
- रथयात्राविधिः २८१
- रथयात्रायां विष्णुकुमारस्य सम्बन्धः २८२

२५-तीर्थयात्रा **२८४**
- तीर्थयात्राफलानि २८४
- सङ्घाधिपपदस्य ज्येष्ठता २८४
- पारासुत-पेथड-झांझण-आभू-कुमारपाल-विक्रमादित्य-वस्तुपालादीनां श्राद्धानां तीर्थयात्रावर्णनम् २८४

२६-उपशमवर्णनम् **२८८**
- कषायेण गुणहानिः २८८
- चतुर्गतिषु कषायप्रबलता २८९
- कषायनिग्रहस्वरूपम् २८९
- क्रोधेन दीर्घचारित्रनाशः २९०
- क्रोधमानविषयेऽङ्कारिभट्टाकथा २९०
- मायायां पाण्डुकार्याकथानकम् २९२
- लोभे आचार्यश्रीमङ्गुदृष्टान्तः २९३
- उपशमे कुम्भकारसम्बन्धः २९४

२७-विवेकनिरूपणम् **२९६**
- द्रव्यभावाभ्यां विवेकः २९६
- श्रीहेमचन्द्रसूरि-कुमारपालयोः पूर्वभवः २९६

२८-संवरप्ररूपणम् **३०२**
- इन्द्रियमनसोः संवरः ३०२
- दशमहाश्राद्धानां संवरः ३०३
- सूरनृप-सोममुनि सम्बन्धः ३०४

२९-भाषासमितिः **३०७**
- अनवद्यभाषयोपदेशः कर्तव्यः ३०७
- असत्यवचनस्य फलम् ३०८
- निष्ठुरवचनत्यागे महाशतकश्राद्धकथा ३०९
- विमलसहदेवसम्बन्धः ३०९

३०-जीवकरुणा ३११
- सर्वेषां व्रतानां जीवदयाङ्गभूतत्वम् ३११
- अष्टोत्तरशतभेदैर्जीवरक्षा ३१२
- त्रिचत्वारिंशदधिकद्विशतविधः प्राणिवधः ३१२
- लोकेऽपि त्रिविधवधकः ३१३
- हिंसालक्षणम् ३१३
- द्रव्यभावाभ्यां हिंसायाश्चतुर्भङ्गी ३१३
- पृथिव्यादीनां वेदना ३१४
- स्थूलप्राणितिपातविरमणनिरूपणम् ३१५
- प्राणातिपातविरमणे क्षेमामात्यकथा ३१६
- स्थूलप्रथमव्रतेऽतिचारत्यागोपदेशः ३१७
- प्रथमव्रते यतना व्रतभङ्गश्च ३१९
- एकेन्द्रियसङ्घट्टकृतकर्म ३२०
- जीवदयायां दृष्टान्तः ३२०

३१-धार्मिकजनसंसर्गः ३२४
- आयतनानायतनसेवनेन गुणदोषाः ३२४
- चतुर्विधा धर्मकथा ३२५
- धार्मिकाणां संसर्गेण सम्यक्त्वादि-प्राप्तिविषये वरुणश्राद्धकथा ३२७

३२-करणदमः ३३०
- अदान्तेन्द्रियाण्यहिताय ३३१
- इन्द्रियदमने रागद्वेषत्यागोपदेशः ३३१
- इन्द्रियपञ्चकसंवादः ३३१
- अजितेन्द्रियत्वे फलं दोषाश्च ३३२
- मनोदमने मन्त्रिदृष्टान्तः ३३३
- स्पर्शनेन्द्रिये मूलराजकथा ३३४
- इन्द्रियदमने चन्द्रशेखरराज्ञो दृष्टान्तः ३३५

३३-चरणपरिणामः ३३७
- श्रमणश्राद्धानां मनोरथाः ३३७
- पुण्डरीक-कण्डरीककथा ३३९
- श्रीस्कंदकमुनिसम्बन्धः ३४०

३४-सङ्घोपरि बहुमानः ३४२
- सङ्घस्य महत्ता ३४२
- सङ्घभक्त्युपरि वस्तुपालमन्त्रिणः सम्बन्धः ३४३
- साधर्मिक-सङ्घबहुमानेऽऽभूसम्बन्धः ३४४

३५-पुस्तकलेखनम् ३४५
- पुस्तकलेखनेनैहिकामुष्मिकलाभाः ३४५
- श्राद्धैः लेखितानां ग्रन्थानां संख्या ३४६

३६-प्रभावना तीर्थे ३४८
- तीर्थवृद्ध्या प्रवचनप्रभावना ३४९
- प्रभावनायाः स्वरूपम् ३४९
- अष्टप्रभावकाः ३५०
- श्रीजीवदेवसूरिसम्बन्धः ३५०
- श्रीवीराचार्यस्य दृष्टान्तः ३५५

ग्रन्थप्रशस्तिः ३५८

परिशिष्टाः ३५९
- परिशिष्टः १ प्राकृतपद्यानामकारादिक्रमः ३५९
- परिशिष्टः २ संस्कृतपद्यानामकारादिक्रमः ३८८
- परिशिष्टः ३ वृत्यन्तर्गतकथानामकारादिक्रमः ३९७
- परिशिष्टः ४ 'मन्नह जिणाण आणं' मूलसूत्रस्य पाठभेदाः ४००
- परिशिष्टः ५ कुतुबपुरशाखा-निगममतवर्णनम् ४०२
- परिशिष्टः ६ श्रावककरणीयस्वाध्यायः ४०७

।। 'मन्नह जिणाण आणं' स्वाध्यायः ।।

।। मूल ग्रन्थः ।।

(श्राद्धदिनकृत्यस्वाध्यायकुलकम्)

मन्नह[१] जिणाण[२] आणं, मिच्छं परिहरह[३] धरह[४] सम्मत्तं।
छव्विहआवस्सयंमि[५], उज्जुत्ता[६] होह[७] पइदिवसं[८] ।।१।।

पव्वेसु पोसहवयं[९], दाणं सीलं तवो अ भावो अ ।
सज्झायनमुक्कारो[१०], परोवयारो अ जयणा य ।।२।।

जिणपूआ[११] जिणथुणणं, गुरुथुइ[१२], साहम्मिआण[१३] वच्छल्लं ।
ववहारस्स[१४] य सुद्धी, रहजत्ता[१५] तित्थजत्ता[१६] य ।।३।।

उवसमविवेगसंवर[१७], भासासमिई अ[१८] जीवकरुणा य ।
धम्मिअजणसंसग्गो[१९], करणदमो चरणपरिणामो ।।४।।

संघोवरि बहुमाणो, पुत्थयलिहणं[२०] पभावणा तित्थे[२१] ।
सड्ढाण[२२] किच्चमेअं, निच्चं सुगुरूवएसेणं ।।५।।

---

१. 'मन्नइ' मुद्रितसम्बोधप्रकरणे, 'मन्नह' उपदेशकल्पवल्ली, K हस्त० । २. 'जिणाणमाणं' प्रबोधटीकायां, G हस्त० । 'जिणाणं आणं' उपदेशकल्पवल्ली, H, K हस्त० । ३. 'हरइ' मुद्रितसम्बोध प्रकरणे, । ४. 'धरइ' मुद्रितसम्बोध प्रकरणे, 'धर' K हस्त० । ५. 'आवसयंमी' मुद्रितसम्बोध प्रकरणे, A, B, C । 'आवसयंमि' D, E । 'आवस्सयंमी' H, I, J । 'आवस्सएमिं' G हस्त० । ६. 'उज्जुत्तो' मुद्रितसम्बोध प्रकरणे, F, K हस्त० । ७. 'होइ' मुद्रितसम्बोध प्रकरण, विचार सप्ततिका, K, हस्त० । ८. 'पयदिवसं' G हस्त० । 'पइदिअहं' विचारसप्ततिकायां। 'पइदिसं' J हस्त० । ९. 'पोसहविहिं' D, E हस्त० । 'पोसहविहं' F हस्त० । १०.'नमोक्कारो' G हस्त० । 'नमुक्कारो' E, F हस्त० । ११. 'जिणपूया' सम्बोध प्रकरणे, G हस्त० । 'जिणपूअ' उपदेशकल्पवल्ली । १२. 'गुरुथुअ' प्रबोधटीकायां, D, E, F, K हस्त० । १३. 'साहम्मियाण' मुद्रितसम्बोध प्रकरणे, H, I, J हस्त० । 'साहम्मीआण' G हस्त० । १४. 'ववहरस्स' E हस्त० । १५. 'रहजुत्ता' K हस्त० । 'रहत्ता' E हस्त० । १६. 'तित्थजुत्ता' K हस्त० । १७. चतुर्थ-पञ्चमीगाथास्थाने विचारसप्ततिकायां
संघोवरि बहुमाणो, धम्मिअमित्तो प्रभावणा तित्थे । नवखित्ते धणववणं, पुत्थयलिहणं विसेसेण ।।४।।
परिगहमाणऽभिग्गह, इक्कारससड्ढपडिमफासणया। सव्वविरई मणोरह, एमाई सड्ढकिच्चाइं ।।५।।
१८.'छज्जीव' मुद्रितसम्बोधप्रकरणे, प्रबोधटीकायां, K हस्त० । १९. 'धम्मीजिण' D हस्त० । 'धम्मिजिणसंसगो' F हस्त० । 'धम्मीजणसंसग्गौ' G हस्त० । २०. 'पुत्थइ' E हस्त० । 'पुथय' K हस्त० । २१. 'तीत्थे' G, H हस्त० । २२. 'जिनसासणंमि राओ णिच्चं सुगुरूण विणयपरो' सम्बोधप्रकरणे ।

શ્રાવક આટલું તો રોજ કરે જ....

૧	मन्नह जिणाण आणं	=	જિનેશ્વરની આજ્ઞાને માનો !
૨	मिच्छं परिहरह	=	મિથ્યાત્વનો ત્યાગ કરો !
૩	धरह सम्मत्तं	=	સમ્યક્ત્વને ધારણ કરો !
૪ થી ૯	छव्विहआवस्सयंमि	=	ષડ્ આવશ્યકમાં રોજ
	उज्जुत्ता होह पइदिवसं	=	ઉધમશીલ થાઓ !
૧૦	पव्वेसु पोसहवयं	=	પર્વ દિવસોમાં પૌષધવ્રત કરવું
૧૧	दाणं	=	દાન આપવું
૧૨	सीलं	=	શીલ પાળવું
૧૩	तवो अ	=	તપ કરવો
૧૪	भावो अ	=	ભાવ ભાવવો
૧૫	सज्झाय	=	સ્વાધ્યાય કરવો
૧૬	नमुक्कारो	=	નમસ્કાર મંત્રનો જાપ કરવો
૧૭	परोवयारो अ	=	પરોપકાર કરવો
૧૮	जयणा अ	=	યતના કરવી
૧૯	जिणपूआ	=	જિનપૂજા કરવી
૨૦	जिणथुणणं	=	જિનસ્તુતિ કરવી
૨૧	गुरुथुइ	=	ગુરુસ્તુતિ કરવી
૨૨	साहम्मिआण वच्छल्लं	=	સાધર્મિકોનું વાત્સલ્ય કરવું
૨૩	ववहारस्स य सुद्धी	=	વ્યવહારની શુદ્ધિ કરવી
૨૪	रहजत्ता	=	રથયાત્રા આયોજવી
૨૫	तित्थजत्ता य	=	તીર્થયાત્રા કરવી
૨૬	उवसम	=	ઉપશમ (સમતા) ધરવો
૨૭	विवेग	=	વિવેક (હેયનો ત્યાગ ઉપાદેયનો સ્વીકાર) કરવો.
૨૮	संवर	=	સંવર સાધવો
૨૯	भासासमिई अ	=	ભાષાસમિતિ કેળવવી
૩૦	जीवकरुणा य	=	જીવો ઉપર દયા રાખવી
૩૧	धम्मिअजणसंसग्गो	=	ધાર્મિક માણસોનો સંસર્ગ કરવો.

૩૨	करणदमो	=	ઈન્દ્રિયો ઉપર કાબુ (ઈન્દ્રિયોનું દમન) રાખવો.
૩૩	चरणपरिणामो	=	ચારિત્રનો પરિણામ (ચારિત્ર લેવાની ઈચ્છા)કેળવવો.
૩૪	संघोवरि बहुमाणो	=	શ્રીસંઘ ઉપર બહુમાન ધરવું
૩૫	पुत्थयलिहणं	=	પુસ્તકો (જિનાગમ) લખવાં-લખાવવાં.
૩૬	पभावणा तित्थे	=	શાસનની પ્રભાવના પ્રવર્તાવવી.
	सड्ढाण किच्चमेअं		શ્રાવકોના આ (છત્રીશ) કર્તવ્યો છે;
	निच्चं सुगुरूवएसेणं		જે હંમેશા સદ્‌ગુરુના ઉપદેશથી કરવાં.

શ્રાવકનાં ૩૬ કર્તવ્યોની સજ્ઝાય

(રાગ : પ્રભાતી, વૈષ્ણવજન તો... વગેરે શાસ્ત્રીય)

જૈન શ્રાવક તો તેને રે કહીએ, જે જિન આણા માને[૧] રે.
મિથ્યા-મત-મમતાને ત્યાગે,[૨] સમકિત શુદ્ધ પ્રમાણે[૩] રે....૧

પ્રતિદિન ષટ્ આવશ્યક [૪-૯]કરતો, પર્વે પોષધ [૧૦]ધરતો રે,
દાન[૧૧], શીઅલ[૧૨] તપ[૧૩] ભાવને[૧૪] વરતો, સ્વાધ્યાયને[૧૫] સુમરતો રે....૨

મહામંત્ર નવકારને [૧૬]ગણતો, પર-ઉપકારમાં [૧૭]રમતો રે,
જીવ-અજીવની જયણા[૧૮] કરતો, જિન [૧૯]પૂજીને સ્તવતો[૨૦] રે....૩

ગુરુજનની[૨૧] સ્તવના કરે ભાવે, વળી સાધર્મિક-[૨૨]વત્સલ રે,
વ્યવહારની[૨૩] શુદ્ધિ અતિ સુંદર, [૨૪]રથ-તીર્થ-જત્તા-કુશળ[૨૫] રે....૪

શ્રી [૨૬]ઉપશમ-વિવેક[૨૭]-ને [૨૮]સંવર, ગુણ-સમુદાય મનગમતો રે,
ભાષાસમિતિ[૨૯] છજ્જીવકરુણા[૩૦] ધાર્મિકજન[૩૧] સંગ રહેતો રે....૫

પંચેન્દ્રિય[૩૨] નિજ અશ્વને દમતો, સંયમ લેવા[૩૩] થનગનતો રે,
સંઘ ઉપર [૩૪]બહુમાનને ધરતો, પ્રવચન-શ્રુત [૩૫]લેખંતો રે....૬

ભવજલ તારક જંગમ-સ્થાવર, તીર્થની[૩૬] ઉન્નતિ કરતો રે,
સદ્‌ગુરુદેવ તણા ઉપદેશે, ઉજવી 'શ્રાવક' બનતો રે....૭

રામચંદ્ર-ગુણ-કીર્તિયશસૂરિ, સદ્‌ગુરુ શ્રવણે સુણતો રે,
શ્રાવકનાં કર્તવ્યો છત્રીશ, 'રત્નયશમુનિ' ભણતો રે....૮

।। अर्हम् ।।

तपागच्छाधिपति पू.आ.श्रीमुनिसुन्दरसूरिशिष्य पू.आ. श्रीरत्नशेखरसूरिशिष्य-
पू.आ.श्रीजिनहंससूरिशिष्यपूज्यपंन्यासप्रवर-श्रीराजमाणिक्यगणिविरचितः
प्रबोधदीपिकावृत्तिसमलङ्कृतः पूर्वाचार्यविरचितः

"मन्नह जिणाण आणं" स्वाध्यायः

प्रथमान्तिम-जिनहंसानभिनम्य, सुलच्छिसलिलजलराशीन् ।
श्रीपुण्डरीक-गौतममुख्या-नखिलान् गणधरांश्च ।।१।।

श्रीअर्हदादिपदवीमदवीयसीं; येऽर्हत्सिद्ध-सूरिवर-वाचक-साधुमुख्याः ।
आराधिताः प्रददते भविकाङ्गभाजां; सर्वात्मना प्रमदतः प्रणिदध्महे तान् ।।२।।

प्राचीन-प्रविचक्षण-प्रगदित-ग्रन्थोक्त-युक्तिप्रथा-
नानोदारकथाभिरेव विलिखे न प्रज्ञया स्वीयया ।
स्मृत्वा श्रीगुरुनामधामधिषणायाः संयत-श्राद्धयो-
राचारस्य सुवृत्तिमात्मकुतुकादन्योपकाराय च ।।३।।

[1]मिच्छत्तविसपसुत्ता, सचेअणा वि न हुंति किं जीविणो ।
कन्नंमि कमइ जइ, कित्तियं पि तुह वयणमंतस्स ।।८।। इत्युक्तेः -

---

1. मिथ्यात्वविषप्रसुप्ताः सचेतना अपि न भवन्ति किं जीविनः ? कर्णे क्रमति यदि कीर्त्तितमपि तव वचनमन्त्रम् ।।

।। अथ प्रथमगाथाव्याख्याने प्रबोधदीपिकायां प्रथमः प्रस्तावः ।।

मन्नह जिणाण आणं, मिच्छं परिहरह धरह सम्मत्तं ।
छव्विह-आवस्सयंमि, उज्जुत्ता होह पइदिवसं ।।१।।

[मन्यध्वं जिनानाम् आज्ञां मिथ्यात्वं परिहरत धारयत सम्यक्त्वम् ।
षड्विधाऽऽवश्यके उद्युक्ता भवत प्रतिदिवसम् ।।]

[मन्नह जिणाण आणं]

[१ - जिनाज्ञा]

मन्यध्वं जिनानाम् आज्ञाम् अहो भव्याः । जिनानामाज्ञया यत्तदप्यनुष्ठानं विधीयमानं श्रेयस्करं स्यात् पापभरप्रणाशनं च स्यात् । यतः -

"[1]थोवंपि अणुट्ठाणं, आणपहाणं हणेइ पावभरं ।
लहुओ रविकर-पसरो, दहदिसि तिमिरं पणासेइ ।।१।।" [आगम -अष्टोत्तरी-३०]

आज्ञामुल्लंघ्य यदि षष्टाष्टमाद्यनेकविधमपि बहुतरतमकष्टानुष्ठानं विधीयते तदपि स्वमनोऽभीष्टकार्यसाधकं केवलं न स्यात् प्रत्युत संसारानन्तताहेतुश्च स्यात् । यतः -

"[2]आणं सव्वजिणाणं, भंजइ दुविहं पहं अइक्कंतो ।
आणं च अइक्कंतो, भमइ जरामरणदुग्गंमि ।।२।।" [उपदेशमाला-४९९]

---

1. स्तोकमपि अनुष्ठानम् आज्ञाप्रधानं हन्ति पापभरम् । लघुको रविकरप्रसरो दशदिशि तिमिरं प्रणश्यति ।।
2. आज्ञां सर्वजिनानां भनक्ति द्विविधं पथमतिक्रान्तः । आज्ञां चातिक्रान्तो भ्रमति जरामरणदुर्गे ।।

मन्नह जिणाण आणं ~~~

[9]तं पुण्णं पडिपुण्णं तं मइनिउणं अणोवमं सामि ! ।
जेण जिणनाह ! सम्मं जाणिज्ज जहट्ठिआ आणा ।।५।।

[10]नरयगई वि हु सग्गो तुह आणाभाविआण भविआणं ।
सग्गोवि नरयअहिओ जिणवरआणाविमुत्ताणं ।।६।।

[11]तुह आणाभट्ठाणं तिलोयलच्छीइ नाह ! न हु सुक्खं ।
आणाजुत्ताण पुणो न देइ दुक्खं दरिद्दंपि ।।७।।

[12]तुह जिणवरिंद ! आणा विराहिआ जं पमायदोसेण ।
भवं भमंतेण मए तं मिच्छादुक्कडं होउ ।।८।।

[13]निउणमईगम्माणा ववहारेणं न निज्जए सम्मं ।
निच्छयओ पुण नियमा तुह जिण ! भणिअं पमाणं मे ।।९।।

[14]मिच्छत्ततावतत्तो पत्तो तुह आणतरुवरच्छायं ।
ता तत्थ कुण पसायं सामी विस्सामदाणेण ।।१०।।

[15]इह विण्णत्तो जिणपहु ! जिणपहसूरीहि जगगुरू पढमो !
विण्णत्तीइ पसायं निव्विग्घं कुणउ अम्हाणं ।।११।।] [जैनस्तोत्रसन्दोह-८८/१]

इत्यादिस्तोत्रं भाव्यम् ।

सामान्यतया द्वि-त्रि-पञ्च-षड्देशादिसाम्राज्यभाग्राज्ञोऽपि स्वल्पतराज्ञाखण्डनेऽपि यथा वध-बन्ध-मारण-कारागृहनिवासाद्यापत्प्राप्तिः स्यात् तथा श्रीजिनाज्ञाखण्डने ततोऽप्यधिकतर-तमो नरक-तिर्यग्गति-संसारानन्तताद्दिण्डः समाढौकते । यतः -

---

9. तद्पुर्णं प्रतिपूर्णं तद् मतिनिपुणमनुपमं स्वामिन् !। येन जिननाथ ! सम्यग् ज्ञायते यथास्थिताऽऽज्ञा ।।५।।
10. नरकगतिरपि खु स्वर्गस्तवाज्ञाभावितानां भविकानाम् । स्वर्गोऽपि नरकाधिको जिनवराज्ञाविमुक्तानाम् ।।६।।
11. तवाज्ञाभ्रष्टानां त्रिलोकलक्ष्म्या नाथ ! न तु सुखम् । आज्ञायुक्तानां पुनर्न ददाति दुःखं दारिद्र्यमपि ।।७।।
12. तव जिनवरेन्द्र ! आज्ञा विराधिता यत्प्रमाददोषेण । भवं भ्रमता मया तन्मिथ्यादृष्कृतं भवतु ।।८।।
13. निपुणमतिगम्याऽऽज्ञा व्यवहारेण न ज्ञायते सम्यक् । निश्चयतः पुनर्नियमात् तव जिन ! भणितं प्रमाणं माम् ।।९।।
14. मिथ्यात्वतापतप्तः प्राप्तस्तवाऽऽज्ञातरुवरच्छायाम् । तस्मात्तत्र कुरु प्रसादं स्वामिन् ! विश्रामदानेन ।।१०।।
15. इति विज्ञप्तो जिनप्रभो ! जिनप्रभसूरिभिर्जगद्गुरो ! प्रथम ! । विज्ञप्त्या प्रसादं निर्विघ्नं करोत्वस्माकम् ।।११।।

"[16]**रन्नो आणाभंगे, इक्कुच्चिय होइ निग्गहो लोए ।**
सव्वन्नुआणाभंगे, अणंतसो निग्गहं लहए ।। *[सम्बोधसित्तरी - ४२]*

श्रीउपदेशमालायामपि -

"[17]**सव्वाओगे जह कोइ, अमच्चो नरवइस्स घित्तूणं ।**
आणाहरणे पावइ, वहबंधणदव्वहरणं च ।।

[18]**तह छक्कायमहव्वय-सव्वनिवित्तीउ गिण्हिऊण जई ।**
एगमवि विराहंतो, अमच्चरन्नो हणइ बोहिं ।। [उपदेशमाला - ४३०-४३१]

श्रीजिनाज्ञा सम्यगेकाग्रचित्ततया प्रतिपाल्यमानाऽस्मिन्नपि जन्मनि भूत-प्रेत-शाकिन्याद्युपद्रवविद्रावणे जीवानां मन्त्राक्षरसमतां बिभर्त्ति । यदुक्तं श्रीअभयदेवसूरिपादैः -

"[19]**तुह आणा थंभेइ भीमदप्पुद्धुरसुरवर-;**
रक्खसजक्खफणिंदविंदचोराऽनलजलहर ।
जलथलचारि-रउद्द-खुद्द-पसु-जोइणि-जोइय;
इय तिहुअणअविलंघिआण ! जय पास ! सुसामि ! य ।।९।।" [जय. -६]

श्रीजिनाज्ञा अतिगहनस्वरूपा सूक्ष्मशेमुषीगम्या न स्वल्पहार्दमतिग्राह्या । तेन तज्ज्ञातारः सम्यक्तया स्तोका एव पुमांसोऽस्मिन् काले । ततोऽज्ञाता सती कथमाराध्यते निषेव्यते प्रतिपाल्यते च जनैः ? तदनाराधकाश्च किमप्यैहिकं पारलौकिकं च कर्म्म न साधयन्ति, येन सकलजनश्लाघ्याः स्तोष्याश्च स्युः, किन्तु सर्वेषां शोचनीयाः, निन्दनीयाः, गर्हणीया एव भवन्ति । ज्ञात्वा पुनः सम्यग् नाराधयन्ति तेऽपि तथाविधा एव ज्ञेयाः । यदवाद्युपदेशमालायाम् -

---

16. राज्ञ आज्ञाभङ्गे एक एव भवति निग्रहो लोके । सर्वज्ञाज्ञाभङ्गे अनन्तशो निग्रहं लभते ।।
17. सर्वयोगान् यथा कश्चिदमात्यो नरपतेर्गृहीत्वा । आज्ञाहरणे प्राप्नोति वध-बन्धन-द्रव्यहरणं च ।।
18. तथा षट्कायमहाव्रतसर्वनिवृत्तीः गृहीत्वा यतिः । एकमपि विराधयन् अमर्त्यराज्ञो हन्ति बोधिम् ।।
19. तव आज्ञा स्तम्भयेद् भीम-दर्प्पोद्धुरसुरवर-राक्षस-यक्ष-फणीन्द्रवृन्द-चौराऽनल-जलधर- ।
जलस्थलचारि-रुद्रक्षुद्र-पशु-योगिनी-योगिनः; इति त्रिभुवनाविलङ्घिताज्ञ ! जय पार्श्व ! सुस्वामिन् ! च ।।

[20]सुच्चा ते जिअलोए, जिणवयणं जे नरा न याणंति ।
सुच्चाण वि ते सुच्चा, जे नाऊणं न वि करंति ।।१०।। [उपदेशमाला - २५९]

केचन श्रीजिनाज्ञां शुद्धां जानन्तोऽपि महाभिनिवेशग्रहग्रस्ताः स्वमतोद्भावन-प्रवर्त्तनत्वेन निजमत्यैवान्यथा हीनमधिकं वा प्ररूपयन्ति, तेऽपि च कथं पारलौकिक-मात्महितं प्राप्नुयुः ? यदुक्तम् -

[21]निअगमइविगप्पिअचिंतिएण सच्छंदबुद्धिरइएण ।
कत्तो पारत्तहिअं, कीरइ गुरुअणुवएसेणं ।।११।।" [उपदेशमाला - २५]

श्रीमहानिशीथपञ्चमाध्ययनेऽपि -

"[22]जे भिक्खू [२]दुवालसंगस्स णं सुयनाणस्स [असई चुक्कखलियपमायासंकादी-सभयत्तेण] पयक्खरमत्ताबिंदुमवि इक्कं परुविज्जा अन्नहा वा पन्नवेज्जा संदिद्धं वा सुत्तत्थं वक्खाणेज्जा अविहीए अओग्गस्स वा वक्खाणेज्जा, से भिक्खू अणंतसंसारी भवेज्जा ।"

स्वदुष्कृतनिन्दा-गर्हा-प्रतिक्रमणाधिकारे चतुःशरणेऽपि -

"[23]मिच्छत्ततमंधेणं अरिहंताइसु अवन्नवयणं जं ।
अन्नाणेण [३]विरइअं इण्हिं गरिहामि तं पावं ।।१३।।
[24]सुअ-धम्म-संघ-साहुसु पावं पडिणीअयाइ जं रइअं ।
अन्नेसुं [४]य पावेसुं इण्हिं गरिहामि तं पावं ।।१४।।" [चउसरणपयन्ना - ५१/५२]

---

२. 'दुवालसणं' हस्तप्रतौ । ३. 'विरईअं' हस्तप्रतौ । ४. 'अन्नेसुं पावेसुं' हस्तप्रतौ ।

20. शोच्यास्ते जीवलोके, जिनवचनं ये नराः न जानन्ति । शोच्यानामपि ते शोच्या ये ज्ञात्वा नापि कुर्वन्ति ।।

21. निजकमतिविकल्पितचिन्तितेन स्वच्छन्दबुद्धिरचितेन । कुतः पारत्रहितं क्रियते ? गुर्वनुपदेशेन ।।

22. यो भिक्षुर्द्वादशाङ्गस्य श्रुतज्ञानस्यासद् च्यूत-स्खलित-प्रमादाऽऽशंकादि-सभयत्वेन पदाक्षरमात्राबिन्दुमप्येकं प्ररूपयेत् अन्यथा वा प्रज्ञापयेत् संदिग्धं वा सूत्रार्थं व्याख्यायेत् अविधिनाऽयोग्येभ्यो वा व्याख्यायेत् स भिक्षुरनन्तसंसारी भवेत् ।

23. मिथ्यात्वतमोऽन्धेनार्हदादिष्ववर्णवचनं यत् । अज्ञानेन विरचितमिदानीं गर्हामि तत्पापम् ।।

24. श्रुत-धर्म-सङ्घ-साधुषु पापं प्रत्यनीकतया यद्रचितम् । अन्येषु च पापेष्विदानीं गर्हामि तत्पापम् ।।

मन्नह जिणाण आणं ~~~

31 तत्थ य मइदुब्बलेणं तव्विहाऽऽयरिअविरहओ[८] वावि ।
नेअगहणत्तणेण य नाणावरणोदएणं च ।।२१।।
32 हेऊदाहरणासंभवे अ सइ सुट्ठु जं न बुज्झेज्जा[९] ।
सव्वन्नुमयमवितहं तहा वि तं चिंतए मइमं ।।२२।।
33 अणुवकयपराणुग्गहपरायणा जं जिणा जगप्पवरा ।
जिअरागदोसमोहा य नन्नहावाइणो[१०] तेणं ।।२३।।" [ध्यानशतक - ४५-४९]

श्रीभगवत्यामपि - 'तमेव सच्चं णीसंकं जं जिणेहिं पवेइयं ।' इत्युक्तेः श्रीजिनवचनोक्तं जिनवचनानुसारि च सर्वमाज्ञारूपत्वेन प्रतिपत्तव्यम् । एवंविधाज्ञाविकला याः क्रियाः क्रियन्ते तास्तामल्यादीनामिव त्र्युत्तरपञ्चदशशततापसादीनामिव चाज्ञानकष्टताख्यातिमाप्नुवन्ति । अत्र श्रीजिनप्रज्ञप्तधर्माराधने सम्बन्धः -

34 "सामग्गिअभावे वि हु, वसणे वि सुहे वि तह कुसंगे वि ।
जस्स न हायइ धम्मो, निच्छयओ जाण तं सड्ढं ।।२४।।"

।। अथ ब्रह्मसेनकथा ।।

वसन्तपुरे क्षेमङ्करः श्राद्धो बहुसिद्धान्तार्थविद् नवतत्त्ववेत्ता प्रायः पर्वतिथौ पौषधागारे श्राद्धैः पौषधे गृहीते धर्मविचारं कथयति । अन्यदा पौषधे गृहीते बहुश्रावकसभायां धर्मं कथयतस्तस्यावधिज्ञानं [११]समुत्पद्यते। ततो निजभ्रातुराभङ्करनाम्नस्तत्रोपविष्टस्य षण्मासावधिरायुर्दृष्टम् । ततः कथयति तस्य, 'हे भ्रातः ! प्रत्यहं पौषधमेव [१२]गृहाण ।' पुनः पुनर्बाढं कथयन् पौषधस्थेन केनाऽपि श्राद्धेन ब्रह्मसेननाम्ना स क्षेमङ्कर उक्तः - 'हे क्षेमङ्कर ! तव भ्राता पुराऽपि उभयकालं षड्विधावश्यक-पर्वपौषधादि बहु कुर्वन्नस्ति । किं बाढं प्रत्यहमेवं कारयसि ? प्रत्यहमित्थं करणेऽस्य कुटुम्बस्य निर्वाहोऽपि कथं भवेत् ?' ततः क्षेमङ्करः प्राह - 'भो ब्रह्मसेन ! अस्यायुः षण्मासा एव सन्ति, तेन बाढं पुण्यं कारयन्नस्मि । यतः पुण्यमेव

---

८. '०हारिअविरहओ' हस्त० । ९. 'बुज्झिज्जा' हस्त० । १०. '०हावइणो' हस्त० । ११. 'समुत्पद्यत' हस्त० । १२. 'गृह्णाहि' हस्त० ।

31. तत्र च मतिदौर्बल्येन तद्विधाचार्यविरहतश्चापि । ज्ञेयगहनत्वेन च ज्ञानावरणोदयेन च ।।
32. हेतूदाहरणासम्भवे च सति सुष्ठु यन्न बुध्येत । सर्वज्ञमतमवितथं तथापि तच्चिन्तयेत् मतिमान् ।।
33. अनुपकृतपरानुग्रहपरायणा यज्जिना जगत्प्रवराः । जितरागद्वेषमोहाश्च नान्यथावादिनस्तेन ।।
34. सामग्र्यभावेऽपि तु व्यसनेऽपि सुखेऽपि तथा कुसङ्गेऽपि । यस्य न क्षिणोति धर्मो निश्चयतो जानीहि तं श्राद्धम् ।।

श्रेयस्करं जन्तुनाम् ।' ब्रह्मसेनेनोक्तम् - 'भोः ! कथं वेत्सि ?' स प्राह - 'अवधिज्ञानादहं वेद्मि ।' ब्रह्मसेनेन पृष्टम् - 'हे उत्तम ! कदा उत्पन्नम् ?' क्षेमङ्करः प्राह - 'अधुनैव ।' ततो विस्मितो ब्रह्मसेनः, 'अहो ! धर्मस्य माहात्म्यम्,' पुनश्चिन्तयति 'किं श्राद्धानामपि एवं ज्ञानमुत्पद्यते ?' कौतुकं महत् । तत आह - 'षण्मासान्ते तव भ्रातुर्मरणं भविष्यतीति तत्सत्यं भविष्यति तदाऽहं पर्वतिथौ पौषधं निश्चयेन गृहीष्ये एव, कथमपि न मोक्ष्ये ।' मृतो भ्राता षण्मासान्ते । क्षेमङ्करस्य न शोको मनागपि ।

"किं देवः किमु देवता, किमगदो विद्यास्ति किं किं मणिः ;
किं मन्त्रः किमुताश्रयः किमु सुहृत् किं वास्ति गन्धोऽस्ति सः ।
अन्ये वा किमु भूपतिप्रभृतयः सन्त्यऽत्र लोकत्रये;
यैः सर्वैरपि देहिनः स्वसमये कर्मोदितं वार्यते ।।१।।"

पुनरपि -

"आपद्मयसंसारे क्रियते विदुषा किमापदि विषादः ।
कस्त्रस्यति लङ्घनतः प्रविधाय चतुष्पथे सदनम् ।।२।।"

पुनरासन्नायां पर्वतिथौ तथैव पौषधं गृहीत्वा धर्ममुपदिशति । ततो ब्रह्मसेनेन पृष्टम् - 'भो क्षेमङ्कर ! तव शोकः किं न ?' स आह - 'शोकः कस्मात् क्रियते ? यतोऽयं देवलोके महान् देव उत्पन्नः सुखैकभाजनं यतोऽनेन रुचिरो धर्माराधितः, तेन न शोकः ।' ब्रह्मसेन आह - 'देवलोकगमने कः प्रत्ययः ?' क्षेमङ्करेणोक्तम् - 'अधुनैव स देव आगमिष्यति, मां नत्वा स्वर्णवृष्टिं करिष्यति मद्गृहे ।' एवं वदतामेव[१३] सुरस्तत्रागत्य नमस्करोति क्षेमङ्करपादान्, वक्ति च 'हे बान्धव ! त्वमेव सत्यबान्धवः, येन त्वया अहं बाढं धर्मक्रियां कारितः तत्प्रभावादहं देवलोके गतः ।' सर्वैरपि दृष्ट उपलक्षितश्च । ब्रह्मसेनस्य द्विःप्रत्ययात्पौषधे निश्चयोऽजनि गृह्णाति च पर्वतिथौ पौषधम् । ततः कालक्रमेणान्तरायकर्मोदयान्निर्धनो जातो ब्रह्मसेनः, निर्वाहोऽपि दुष्करोऽभूत्। लज्जते स्वजनादिमध्ये चिन्तयति च -

"वरं प्रविष्टं ज्वलिते हुताशने द्रुमालये पुष्पफलादिभोजनम् ।
तृणेषु शय्या वरं जीर्णवल्कलं न बन्धुमध्ये धनहीनजीवितम् ।।३।।"

ततः पुरे निर्वाहं कर्तुमक्षमः पल्लीं गत्वा वसति स्म । पल्लीशस्तस्य मानं ददाति । तत्र व्यवसायं कुर्वन् धनाढ्यो बभूव । ब्रह्मसेनः साध्वादिसामग्र्यभावेऽपि धर्मक्रियां पौषधं च न मुञ्चति । पौषधदिने हट्टे किमपि क्रयाणकं न लभन्ते लोकाः । ततो जनैरप्यवगतं यदयं पर्वतिथौ व्यवसायं न करोति, तेन [लोकाः] पर्वतिथिपूर्वदिने व्यवसायं कृत्वा तिष्ठन्ति । इतश्च केऽपि राज्ञः पुत्राश्चत्वारो दायादकर्षिता नंष्ट्वा तत्र पल्ल्यां समाजग्मुः । तेऽपि

---

१३. '....मेवांगांनमस्करोति' हस्त० ।

तस्य हट्टे व्यवसायं कुर्वन्ति । ते तु स्वदेशादिमध्ये चौर्य-बन्दिग्रहणादि कृत्वा तस्य द्युम्नं पूरयन्ति । ब्रह्मसेनोऽपि तेषां सर्ववस्तुनि उद्धारके पूरयति । तैरपि ज्ञातं, पर्वदिने [असौ] न वक्ति न व्यवसायं गृहव्यापारं [च] करोति, चिन्तामपि न विधत्ते कस्यापि किन्तु मौनव्रतस्थो धर्मध्यानमेवातनोति । ततस्तैः कूटबुद्धिचतुरैश्चतुर्भिर्मन्त्रितम् - 'यदेष वणिग् धनवान् कस्मान्न मुष्यते ?' ततः पौषधे गृहीते रात्रौ चत्वारोऽपि ते तद्गृहे खात्रं दत्वा प्रविष्टाः । गृह्णन्ति नानाविधदुकूलाभरणस्वर्णादिवस्तूनि । पश्यति ब्रह्मसेनश्चिन्तयति च 'अहो ! एते दुष्टा मम हट्टे व्यवहरन्ति, अहं तु एतेषां यथेच्छं पूरयामि तथाप्यधुना खात्रेण मद्गृहं मुष्णन्तः सन्ति ।' ततः पुनरपि चिन्तितं तेन, 'अरे आत्मन् ! किमार्त्तध्यानं करोषि मुधा ?' यतः -

"भवन्त्येके महासत्वा देहनाशेऽपि नीरुषः ।
गत्वरद्रव्यनाशेऽपि तत्किं रे जीव ! कुप्यसि ? ।।४।।"

"[35]गय-मेअज्जमहामुणि-खंदगसीसाण साहुचरिआइं ।
समरंतो कह कुप्पसि इत्तिय मित्ते वि रे जीव ! ।।५।।"

एते गृहीत्वा गृहीत्वा सहस्रादिप्रमाणं द्रव्यं गृहीष्यन्ति, पौषधस्त्वनेकस्वर्णकोटिभिरप्यलभ्यः, तत आर्त्तध्यानेन न विराधयिष्यामि, यदि कलकलं करोमि तदा एते तलारक्षकैर्बध्यन्ते मार्यन्ते च, यदि वा नश्यन्ति तदा नश्यन्तो विराधनां कुर्वन्ति, तदा मे पौषधविराधना भवेत् । ततो बाढस्वरेण स्वाध्यायं करोमि । अत उच्चैः स्वरेण नमस्कारान् गुणयति । तैश्चिन्तितम् - 'एष किं कथयन्नस्ति ? कर्णं दत्वा श्रृण्वन्ति, किमस्माकं स्तम्भनाद्यर्थमेष किमपि पठन्नस्ति ।' इति निश्चित्य सावधानीभूय श्रृण्वन्परास्तस्थुस्तावत्ते पञ्चनमस्कारं श्रुतवन्तः । ततस्ते चिन्तयन्ति 'क्वाप्येवं श्रुतमस्ति पुरापि ।' इति चिन्तयतां तेषां चतुर्णामपि जातिस्मरणं बभूव । पूर्वभवस्मरणादात्मनिन्दां कुर्वन्तस्तदैव ते देवार्प्पितवेषास्तपस्यां प्रत्यपद्यन्त, रात्रौ साधूनां गमनागमनेऽतीवदोष इति हेतोस्तत्रैव ध्यानलीनास्तस्थुः । अरुणोदयेऽपि एते चौरा न गच्छन्ति । 'हहा ! मरणं भविष्यत्येषामि'ति श्रेष्ठी चिन्तयति । बहुप्रकाशे साधवो दृष्टास्ततः श्रेष्ठी चिन्तितवान् - 'आः ! पापाः साधुवेषेणैते चौर्यं कुर्वन्त्युड्डाहकारकाः श्रीजिनशासनेऽमी ।' दिनोदये श्रेष्ठी तानाह -

'के भोः ! यूयं महाभागाः ? विरुद्धचरितं ननु । तवेदृक् चरितं दृष्ट्वा विरुद्धाचरणं पुनः ।।'

ततः श्रेष्ठिना पृष्टं सम्यक् स्वरूपं तेप्यूचुः- 'तव शिष्या वयम्,' श्रेष्ठी प्राह - कथं मम शिष्याः ? तैरादितो दीक्षादानाऽवधिस्वरूपं प्रोक्तम्, पुनः श्रेष्ठिना तेषां [१४]पूर्वभवस्वरूपं पृष्टम्, कीदृशाः पूर्वभवे भवन्तोऽभूवन्। तेऽपि स्वपूर्वभववृत्तान्तं कथयन्ति । यथा...

विशालापूर्यां केसरी विप्रः, तस्य चत्वारो पुत्राः । एकदा गङ्गायां स्वपितृ-अस्थिक्षेपार्थं गताः ।

---

१४. 'पूर्वस्वरूपं' हस्त० ।

35. गज-मेतार्यमहामुनि-स्कन्दकशिष्याणां साधुचरित्राणि । स्मरन् कथं कुप्यसि एतावन्मात्रेऽपि रे जीव ! ।।

मन्नह जिणाण आणं ~~~

जनकादीनामप्याज्ञा प्रतिपालिता सुखाय चेत्स्यात्तर्हि श्रीजिनाज्ञा प्रतिपालिता कथं सुखदा न स्यादित्यर्थे दत्तश्रेष्ठिसम्बन्धः -

।। अथ पितुराज्ञापालने दत्तश्रेष्ठिकथा ।।

गोब्बरवणिएणेत्थं दिट्ठंतो सिरिमई तओ आह । को सो गोब्बरवणिओ, जो दिट्ठंतो कओ तुमए ।।१।।
36
पडिभणइ इमा निसुणिसु, सगब्भिए अत्थि कोउअं जुइए । अत्थं अत्थि पयडा, वीसपुरी नाम वरनयरी ।।२।।
37
बोहित्थवाणिओ तत्थ, आसदत्तोत्ति नामविक्खाओ । दुत्थिअजणोवयारी, महिड्ढिओ बुद्धिसंपन्नो ।।३।।
38
कालंतरे तहाविह-कम्मोदयओ सिमं[त]स्स संजाओ । विहवक्खओ सिरीए, अहवा चवलत्तणं पयडं ।।४।।
39
जओ भणिअं -

40 चंचलचित्तीए हवइ, मइपरिआणिअलच्छि ।
कोत्थुहकिरणकरंबिअ-इथिर कन्हस्स वि नत्थि ।।१।।

41 खीरोअजलविणिग्गमए, अंचिअसिक्खियंहयासाए ।
चवलत्तणं सिरीए, तरलतरं गुणुमाउव्वं ।।२।। अविअ -

42 कमलवणभमणसंलग्ग, नालकंठयपविद्धचरणुव्व ।
अखलिअपयविन्नासं, कत्थवि न हु कुणइ पेत्थसिरी ।।३।।

43 इत्तोच्चिअ अच्चब्भुअ, लच्छिभरालंकिआ वि सुप्पुरिसा ।
न कुणंति कहवि गव्वं, जाणंता तीइ चवलत्तं ।।४।।

---

36. गोब्बरवणिजेनाऽत्र दृष्टान्तः श्रीमतिस्तत आह । कः सः गोब्बरवणिजो यो दृष्टान्तः कृतस्त्वया ।।१।।

37. प्रतिभणतीयं निश्रृणु सगर्भितेऽस्ति कौतुकं युक्त्या । अत्रास्ति प्रकटा वीशपुरी नाम वरनगरी ।।२।।

38. प्रवहणवाणिजस्तत्र, अश्वदत्त इति नामविख्यातः । दुःस्थितजनोपकारी महर्द्धिको बुद्धिसम्पन्नः ।।३।।

39. कालान्तरे तथाविध-कर्मोदयात्श्रीमतः सञ्जातः । विभवक्षयः श्रिया अथवा चपलत्वं प्रकटम् ।।४।। यतः भणितम्-

40. चञ्चलचित्तौ भवति मतिप्रत्यानीता लक्ष्मीः । कौस्तुभकिरणकरम्बिताऽतिस्थिरा कृष्णस्यापि नास्ति ।।१।।

41. क्षीरोदजलविनिर्गमेऽञ्चितशिक्षिताऽऽशाहयैः । चपलत्वं श्रियाः तरलतरं गुणमापूर्व्यम् ।।२।। अपि च-

42. कमलवनभ्रमणसंलग्न-नालकण्ठपविद्धचरणमिव । अस्खलितपदविन्यासं कुत्रापि न खलु करोति प्रेत्यश्रीः ।।३।।

43. अत एवात्यद्भुत-लक्ष्मीभारालङ्कृतारपि सत्पुरुषाः । न कुर्वन्ति कदापि गर्वं जानन्तस्तस्याश्चपलत्वम् ।।४।।

मन्नह जिणाण आणं ~~~

57
एवं च तिअचउप्पह- चच्चररायप्पहाइठाणेसु । एवं पयंपमाणो, भणिओ सद्दाविऊण तओ ।।१८।।
58
भो दत्तसेट्ठि ! जित्तिअ धणेण कज्जं उ अत्थि तावईअं । कहिऊण महमहासा, साहसु निअहिअयअभिरुइयं ।।१९।।
59
एवं जओ पयंपसि, तं अत्थि मई न अत्थि महविहवो । तो देमि तुब्भ तमहं, जत्तिअमित्तेण तुह कज्जं ।।२०।।
60
तो वणिएणं भणिअं, नरिंद ! जइ अत्थि चेव अणुकंपा । मह उवरि तुम्ह ता मे दावह दिन्नारलक्खं ति ।।२१।।
61
तो आइट्ठो रन्ना, अप्पाहेऊण निअयसिरिहरिओ । दीणार लक्खमेअस्स, देहि दिन्नं च तेण तयं ।।२२।।
62
गहिअं इमेण काराविअं च, अइगुरुअ पवहणं तयणु । उक्कुरुडिआण कयवरमाणाविअ तं भरावेइ ।।२३।।
63
जं मग्गिअ विहवेणं, वसीकरेऊण तह य निज्जामे । गोयमदीवपहन्नू, पसत्थदिअहे तओ चलिओ ।।२४।।
64
लोओ अ हसइ हा सोहणं, खु भंडं गहाय चलिओसि । एएण तुज्झ लाभो, कोडिगुणो सेट्ठि ! संभविही ।।२५।।
65
उवहासेण वि एवं, जणस्स सोऊण सुंदरं वयणं । बंधित्तु स उण गंठिं संचलिओ जलहिमग्गेण ।।२६।।
66
पत्तो कमेण गोअम-दीवं तं विक्खरावई तत्थ । सव्वंपि कयवरं, पवहणाउ कम्मारएहिंतो ।।२७।।
67
तो उवहसंति निज्जामगाइआ, तस्स चिट्ठिअं दट्ठुं । इअरो वि अवगणंतो, उवहासं ताण तत्थ ठिओ ।।२८।।
68
जावगयाउ तव्वासिणीउ गावीउ चरिअचारीओ । उवविट्ठाओ तहिअं, ओग्गालेउं पवत्ताओ ।।२९।।
69
रयणी अवसाणे उट्ठित्ता, गोमयाइ उज्झित्ता । पुरा गविचारिनिमित्तं, कत्थवि अन्नत्थग्गावीउ गया ।।३०।।

---

57. एवं च त्रिक-चतुष्पथ-चत्वर-राजपथादिस्थानेषु । एवं प्रजल्पमानो भणितः शब्दाययित्वा ततः ।।१८।।
58. भो दत्तश्रेष्ठिन् ! यावता धनेन कार्यं त्वस्ति तावत्कम् । कथयित्वा महमहाशा साधय निजहृदयामभिरुचितम् ।।१९।।
59. एवं यतः प्रजल्पसि त्वस्ति मतिर्नास्ति महाविभवः । ततो ददामि तुभ्यं तदहं यावन्मात्रेण तव कार्यम् ।।२०।।
60. ततो वणिजेन भणितं नरेन्द्र ! यद्यस्ति चैवानुकम्पा । ममोपरि तव ततो मम दापय दीनारलक्षमिति ।।२१।।
61. तत आदिष्टो राज्ञा संदिश्य निजकश्रीगृहिकः । दीनारलक्षमेतस्य देहि दत्तं च तेन तकम् ।।२२।।
62. गृहीतमनेन कारितं चातिगुरुकं प्रवहणं तदनु । उत्करुटिकानां कचवरमानाय्य तं भारयति ।।२३।।
63. यन्मार्गित-वैभवेन वशीकृत्वा तथा च निर्यामकान् । गौतमद्वीपपथज्ञान् प्रशस्तदिवसे ततश्चलितः ।।२४।।
64. लोकश्च हसति हा ! शोभनं खलु भाण्डं गृहीत्वा चलितोऽसि । एतेन तव लाभः कोटीगुणः श्रेष्ठिन् ! सम्भविष्यति ।।२५।।
65. उपहासेनाप्येवं जनस्य श्रुत्वा सुन्दरं वचनम् । बद्ध्वा स पुनर्ग्रन्थिं सञ्चलितो जलधिमार्गेण ।।२६।।
66. प्राप्तः क्रमेण गौतमद्वीपं तं विकारयति तत्र । सर्वमपि कचवरं प्रवहणात् कर्मकारेभ्यः ।।२७।।
67. तत उपहसन्ति निर्यामकादिकास्तस्य चेष्टितं दृष्ट्वा । इतरोऽप्यवगणयन्नुपहासं तेषां तत्र स्थितः ।।२८।।
68. यावदागतास्तद्वासिन्यो गावश्चरितचारयः । उपविष्टास्तत्र रोमन्थयितुं प्रवृत्ताः ।।२९।।
69. रजन्यवसाने उत्थाय गोमयादिमुज्झित्वा । पुरा गोचारिनिमित्तं कुत्राऽप्यन्यत्र गावो गताः ।।३०।।

मन्नह जिणाण आणं ~~~

यतः -

"[81]रूसउ सज्जण हसउ, जण निन्दउ दुज्जणलोअ ।
जिणवरआण वहंतडा, जं भावइ तं होउ ।।१७।।" [ ]

दत्तो यथा महेभ्योऽतीव सुखी जातः, एवमन्योऽपि द्रव्यभावाभ्यां सुखी भवतीह लोकेऽपि ।

इत्थं च मुग्धहसितेष्ववधीरणाकृद्दत्तो बभूव भवनं विभवोच्चयस्य ।

तत्सत्क्रियां विदधतो निरवद्यरूपां मा तान्यजीगणत भव्यजनाः ! कदाचित् ।।

।। इति पितुराज्ञापालने श्रेष्ठिकथा ।।

श्रीजिनाज्ञाविराधका ये स्युस्ते सर्वत्र सकलदुःखभाजो भवन्तीत्यर्थे श्रीसावद्याचार्यसम्बन्धः ।

।। अथ जिनाज्ञाभङ्गे श्रीसावद्याचार्यकथा ।।

श्रीवीरेणोक्तं श्रीगौतमस्य, हे गौतम ! अन्यथा प्ररूपणे, अस्या ऋषभादि-चतुर्विंशतिकायाः प्रागनन्तकालेन याऽतीता चतुर्विंशतिका तस्यां मत्सदृशः सप्तहस्ततनुर्धर्मश्रीनामा चरमतीर्थंकरो बभूव, तत्तीर्थे सप्ताश्चर्याण्यभूवन् । असंयतपूजायामनेकश्राद्धेभ्यो गृहीतद्रव्येण स्वस्वकारितचैत्यनिवासिनोऽभूवन् । तत्रैको मरकतच्छविः कुवलयप्रभो नामाऽनगार उग्रविहारी महातपस्वी शिष्यगणवृतः समागात् । तैश्चैत्यवासिभिर्वन्दित्वोक्तम्, 'अत्रैकं वर्षारात्रिकं चतुर्मासकं तिष्ठन्तु, यथा त्वदाज्ञयानेके चैत्यालया भवन्ति । कुर्वस्माकमनुग्रहम् ।' तेनोक्तं, 'सावद्यमिदं नाहं वाग्मात्रेणाऽपि कुर्व्वे ।' तदैवं तेन भणता तीर्थंकरनामकर्म्मार्जितमेक-भवावशेषीकृतश्च भवोदधिः, ततस्तैः सर्वैर्लिङ्गिभिरेकमतं कृत्वा तस्य सावद्याचार्य इति नाम कृतम् । तथापि न तस्येषदपि कोपोऽभूत् । अन्यदा तेषां लिङ्गमात्रप्रव्रजितानां मिथ आगमविचारो बभूव । यथा-'श्राद्धानामभावे संयता एव मठदेवकुलानि रक्षन्ति पतितानि च समारचयन्ति । अन्यदपि यत्तत्र करणीयं तदारम्भे क्रियमाणे यतेरपि न दोषः।' केऽप्याहुः - 'संयमो मोक्षनेता,' केचिदूचुः- 'प्रासादावतंसके पूजासत्कारबलिविधानादिना तीर्थोत्सर्प्पणयैव मोक्षगमनम्।' एवं तेषां यथेच्छं प्रलपतां विवादेऽन्य आगमकुशलः कोऽपि नास्ति, यो विवादं भनक्ति। सर्वैः सावद्याचार्य एव प्रमाणीकृतः । आकारितो दूरदेशात् । सप्तमासैर्विहरन् समागात् । एकयाऽऽर्यकया श्रद्धावशात्प्रदक्षिणीकृत्य झटिति पादयोर्मस्तकेन संघट्टयन्त्या ववन्दे । दृष्टस्तैर्लिङ्गिभिर्वन्द्यमानः । अन्यदा तेन तेषामग्रे श्रुतार्थकथनेऽस्यैव महानिशीथपञ्चमाध्ययनस्य व्याख्यान आगतेयं गाथा -

[82]जत्थित्थीकरफरिसं, अंतरिअं कारणे वि उप्पन्ने ।
अरहा वि करिज्ज सयं, तं गच्छं मूलगुणमुक्कं ।।१८।।"

81. रुषतु सज्जनो हसतु जनो निन्दतु दुर्जनलोकः । जिनवराज्ञां वहतो यद् भावि तद् भवतु ।।

82. यत्र स्त्रीकरस्पर्शम्, आन्तरिकं कारणेऽपि उत्पन्ने । अर्हनपि कुर्यात् स्वयं, तद् गच्छं मूलगुणमुक्तम् ।।

मन्नह जिणाण आणं ~~~

प्रव्रज्य सिद्धश्चात्र त्रयोविंशतितमश्रीजिनपार्श्वनाथस्य तीर्थे । इत्यादि श्रीमहावीरमुखाम्बुजाच्छ्रुत्वा गौतमोऽप्राक्षीत्- 'हे भगवन् ! किं निमित्तमनेन सावद्याचार्येण दुःखमनुभूतम् ?' श्रीमहावीरेणोक्तम् 'हे गौतम ! तेन आचार्येण उत्सर्गापवादैरागमः स्थित इत्यादि यद्भणितं तन्निमित्तम् । यद्यपि प्रवचने उत्सर्गापवादावनेकान्तश्च प्रज्ञाप्यन्ते, तथाप्यप्कायपरिभोगस्तेजःकायसमारम्भो मैथुनसेवनं चैकान्तेन निषिद्धानि । इत्थं सूत्रातिक्रमादुन्मार्गप्रकटनं स्यात् । ततश्चाज्ञाभङ्गो भवति । तस्मादाज्ञाभङ्गादनन्तसंसारित्वं स्यात् ।' ततो गौतमोऽप्राक्षीत्-'किं तेन सावद्याचार्येण मैथुनमासेवितम्?' ततः श्रीवीरेणोक्तम् - 'हे गौतम ! नो सेवितम्, किन्तु तेन वन्दमानार्यास्पर्शे पादौ न सङ्कुचितौ ।

'हे भगवन् ! तेन तीर्थंकरनामार्जितम्, एकभवावशेषीकृत आसीद्भवोदधिः, ततः कथमनन्तसंसारः ? वीरेणोक्तम् - 'हे गौतम ! निजप्रमाददोषात् तीर्थंकरनामकर्मार्जितमपि गतं तस्य, तस्मात् गच्छाधिपतिना सर्वदा सर्वार्थेष्वप्रमत्तेन भाव्यमिति । इति श्रीमहानिशीथपञ्चमाध्ययनाल्लिखितम् ।।

।। इति जिनाज्ञाभङ्गे सावद्याचार्यकथानकम् ।।

[इइ मन्नह जिणाण आणं]

[मिच्छं परिहरह]

[२ - मिथ्यात्वम्]

"[1]तं ठाणं सो देसो सा य गई सा य जोणिआ नत्थि ।
भव्वाणमभव्वाणं जीआणं नत्थि मिच्छत्तं ।।१।।"

"[2]एस विसेसो नेओ, भव्वाणमणाइसंतयं होइ ।
अभविअ-जीआणं पुण होइ अणाईअमणंतं च ।।२।।" [ ]

श्रीआगमेऽप्युक्तम् –

"[3]मिच्छं अणाइऽनिहणं, [१]अभव्वे भव्वे अ सिवगमाजुग्गे ।
सिवगे अणाइसंतं, साइ-संतंपि तं एवं ।।३।।" [विचारसप्ततिका-७३]

अतो भविकाः ! प्रतिभवं प्रतिभवं परिशीलितमनादिकालाभ्यस्तं चिरपरिचितमपि **मिथ्यात्वं परिहरत** त्यजत। एतत्त्वनिष्टवियोगमिव त्यक्तमेव सकलजीवानां सुख-समृद्धि-धर्मवृद्धिहेतुर्भवति, नान्यथा । यदुक्तं श्रीउपासकदशाङ्गे सप्तमे श्रीआवश्यके च ।

"[4]समणोवासओ पुव्वामेव मिच्छत्ताओ पडिक्कमइ ।।४।।"

ननु [२]यद्येवंविधं मिथ्यात्वमनिष्टतरं सर्वेषां त्याज्यत्वेनोक्तत्वात्ततर्हि चतुर्दश-गुणस्थानमध्ये गुणस्थानतया कथं गृहीतम् ?

"यस्य यत्र प्रभा नास्ति, पौरुषं तत्र तस्य किम् ।
हिमाचलप्रदेशेषु, शीतलाः किरणा रवेः ।।५।।"

सत्यम्, उच्यते - जीवेऽव्यवहारराशिवर्त्तिन्यनाद्यव्यक्तं मिथ्यात्वं सर्वदाप्यस्ति । यत्र यत्रापूर्व-अप्राप्त-गुणविशेषाविर्भावो भवति तत्तद्गुणस्थानमुच्यते । इत्युक्तेर्यद्यपि

---

१. 'अभव्वि' हस्तप्रतौ । २. 'यद्देवंविधं' हस्तप्रतौ ।

1. तत्स्थानं स देशः सा च गतिः सा च योनिका नास्ति । यत्र भव्यानामभव्यानां जीवानां नास्ति मिथ्यात्वम् ।।
2. एषो विशेषो ज्ञेयो भव्यानामनादिसान्तकं भवति । अभविकजीवानां पुनः भवत्यनादिकमनन्तं च ।।
3. मिथ्यात्वमनाद्यनिधनमभव्ये भव्ये च शिवगमनायोग्ये । शिवगेऽनादिसान्तं सादिसान्तमपि तदेवम् ।।
4. श्रमणोपासकः पूर्वमेव मिथ्यात्वात् प्रतिक्रमति ।

सर्वथाऽतिप्रबलमिथ्यात्वमोहनीयोदयादर्हत्प्रणीतवस्तुप्रतिपत्तिरूपा दृष्टिरसुमतो विपर्यस्ता, तथापि काचिन्मनुष्य-पश्वादिप्रतिपत्तिरविपर्यस्ता, ततो निगोदावस्थायामपि तथाभूताव्यक्त-स्पर्शमात्रप्रतिपत्तिरविपर्यस्ताऽपि स्यादन्यथाऽजीवत्वप्रसङ्गः । यदागमः -

"[5]सव्वजीवाणं पि अ णं अक्खरस्स अणंतभागो निच्चुग्घाडिओ चिट्ठइ,
जइ पुण सो वि आवरिज्जिज्जा, तो णं जीवो अजीवत्तणं पाविज्ज त्ति ।।६।।"

तथाहि, [समुन्नतातिबहलजीमूतपटलेन दिनकररजनिकरकरनिकरतिरस्कारेऽपि नैकान्तेन तत्प्रभानाशः सम्पद्यते] उक्तं च -

"[6]सुट्ठु वि मेहसमुदए होइ पभा चंदसूराणं" इति । [नन्दीसूत्र पृ.१९५-२]

अन्यथा दिनरजनिविभागाभावप्रसङ्गः । एवमिहाऽपि प्रबलमिथ्यात्वोदयेऽपि काचिदविपर्यस्ताऽपि दृष्टिः स्यादिति तदपेक्षया मिथ्यात्वस्याऽपि गुणस्थानत्वम् । यद्येवं ततः कथमसौ मिथ्यादृष्टिरेव मनुष्यपश्वादिप्रतिपत्त्यान्ततो निगोदावस्थायामपि तथाभूताव्यक्तस्पर्शमात्रप्रतिपत्त्यपेक्षया वा सम्यग्दृष्टित्वादपि, नैष दोषः, यतो भगवत्प्रणीतं सकलमपि द्वादशाङ्गार्थमभिरोचयमानोऽपि यदि [३]तद्गदितमेकमप्यक्षरं न रोचयति तदानीमप्येष मिथ्यादृष्टिरेवोच्यते, तस्य भगवति प्रत्ययनाशात् । तदुक्तम् -

"[7]पयमक्खरं पि एक्कं पि जो न रोएइ सुत्तनिद्दिट्ठं ।
सेसं रोअंतो वि हु मिच्छद्दिट्ठी जमालिव्व [४] ।।७।।" [बृ.भा.-१६७, रत्न-५०४]

किं पुनर्भगवदर्हदभिहितसकलजीवाजीवादिवस्तुप्रतिपत्तिविकल इति । बृहत्संग्रहिण्यामपि -

---

३. 'तदेकमप्य०' हस्तप्रतौ । ४. बृहत्संग्रहिण्यां चतुर्थपादः 'मिच्छदिट्ठी मुणेयव्वो ।' इति दृश्यते ।

5. **सर्वजीवानामपि चाक्षरस्यानन्तभागो नित्योद्घाटितस्तिष्ठति, यदि पुनः सोऽप्यावियेत, ततो जीवोऽजीवत्वं प्राप्नुयाद् इति ।**
6. **सुष्ठ्वपि मेघसमुदाये भवति प्रभा चन्द्रसूर्ययोः ।**
7. **पदमक्षरमप्येकमपि यो न रोचयति सूत्रनिर्दिष्टम् । शेषं रोचयमानोऽपि हि मिथ्यादृष्टिर्जमालिरिव ।।**

मिच्छं परिहरह ~~~

क्षयो नान्यथा । यतः श्रीदशाध्ययने -

"[11]जहा मत्थय सूईए हम्माए हम्मए तालो ।
एवं कम्मा हणिज्जंति मोहणिज्जे खयं गए ।।११।।

[12]सेणावइंमि पहए जहा सेणा पणस्सइ ।
एवं कम्मा पणस्संति मोहणिज्जे खयं गए ।।१२।।

[धूमहीणो जहा अग्गी, खीयइ से निरिंधणे ।
एवं कम्माणि खीयंति, मोहणिज्जे खयं गए ।।१३।।]

[13]सुक्के मूले जहा रुक्खो सिच्चमाणो न रोहइ ।
एवं कम्मा न रोहंति मोहणिज्जे खयं गए ।।१४।।"[दशाध्ययन-५/११-१४]

मिथ्यात्वे सत्यनन्तानुबन्धिकषायाणामुदयः, अनन्तानुबन्धिकषायाणां चोदये मिथ्यात्वोदय इति हेतुमद्भावोऽप्यवगन्तव्यः । अनन्तानुबन्धिनश्चाक्षिप्ता अनन्तसंसारदायकाः, बहुतरतमोपार्जिता हानिकराश्च ।

यत उक्तं श्रीजिनागमे -

"यस्मादनन्तं संसार-मनुबध्नन्ति देहिनाम् ।
ततोऽनन्तानुबन्धीति संज्ञाऽऽद्येषु निवेशिता ।।१५।।" [ ]

"[14]पढमिल्लुआण उदये, निअमा संजोअणाकसायाणं ।
सम्मद्दंसणलंभं, भवसिद्धीआ वि न लहंति ।।१६।।"[आ.नि. १०८, वि.भा.-१२२६]

---

11. यथा मस्तके सूच्या हते हन्यते तलः । एवं कर्माणि घ्नन्ति मोहनीये क्षयं गते ।।

12. सेनापतौ प्रहते यथा सेना प्रणश्यति । एवं कर्माणि प्रणश्यन्ति मोहनीये क्षयं गते ।।
[धूमहीनो यथाग्निः क्षीयतेऽसौ निरिन्धनः । एवं कर्माणि क्षीयन्ते मोहनीये क्षयं गते ।।]

13. सुष्के मूले यथा वृक्षस्सिच्यमानो न रोहति । एवं कर्माणि न रोहन्ति मोहनीये क्षयं गते ।।

14. प्रथमानामुदये नियमात् संयोजनाकषायाणाम् । सम्यग्दर्शनलाभं भवसिद्धिका अपि न लभन्ते ।।

मिच्छं परिहरह ~~~

तथा -

[19] "जीवाइपयत्थेसुं, जिणोवइट्ठेसु जा असद्दहणा ।
सद्दहणा वि अ मिच्छा, विवरीअपरूवणा जा य ।।२१।।
[20] संसयकरणं जं पि अ, जो तेसु अणायरो पयत्थेसु ।
तं पंचविहं मिच्छं, तद्दिट्ठी मिच्छदिट्ठी अ ।।२२।।" [शतकप्रकरणभाष्य-८२, ८३,]

तथा -

"पदार्थाना जिनोक्तानां, तदश्रद्धानलक्षणम् ।
एकान्तिकादिभेदेन, सप्तभेदमुदाहृतम् ।।२३।।

क्षणिकोऽक्षणिको जीवः, सर्वथा सगुणोऽगुणः ।
इत्यादि भाषमाणस्य, तदैकान्तिकमुच्यते ।।२४।।

सर्वज्ञेन विरागेण, जीवाजीवादिभाषितम् ।
तथ्यं न वेति संकल्पे, दृष्टिः सांशयिकी मता ।।२५।।

आगमा लिङ्गिनो देवा, धर्म्माः सर्वे सदा समाः ।
इत्येषा कथ्यते बुद्धिः, पुंसो वैनयिकी जिनैः ।।२६।।

पूर्णः कुहेतु-दृष्टान्तै-र्न तत्त्वं प्रतिपद्यते ।
मण्डलश्चर्मकारस्य, भोज्यं चर्मलवैरिव ।।२७।।

अतथ्यं मन्यते तथ्यं, विपरीतरुचिर्जनः ।
दोषातुरमनास्तिक्यं, ज्वरीव मधुरं रसम् ।।२८।।

दीनो निसर्गमिथ्यात्व-स्तत्त्वातत्त्वं न बुध्यते ।
सुन्दरासुन्दरं रूपं, जात्यन्ध इव सर्वथा ।।२९।।

---

19. जीवादिपदार्थेषु जिनोपदिष्टेषु याऽश्रद्धा । श्रद्धाऽपि च मिथ्या, विपरीतप्ररूपणा या च ।।

20. संशयकरणं यदपि च यस्तेषु अनादरः पदार्थेषु । तत्पञ्चविधं मिथ्यात्वं तद्दृष्टिः मिथ्यादृष्टिश्च ।।

मिच्छं परिहरह ~~~

वा अजाणंतो वा भावत्थं [७]परूवेइ, वारिओ वा न चिट्ठइ, एएसिं जीवाणं अभिनिवेसिअं मिच्छत्तं ।।३।।

संसइअं पुण सुत्ते वा अत्थे वा उभयम्मि वा संकिओ परूवेइ । सो अ अन्नं न पुच्छेइ । कहमहमेद्दहपरिवारो वि अन्नं पुच्छामि । पुच्छिज्जमाणो वा जाणिआ, एस एअं न जाणइ त्ति । अहवा जे मम भत्ता ते जाणिज्जा, एआहिंतो वि एस वरतरो, तओ पुच्छिज्जइ, तओ ममं मुत्तूण एए एअं भइस्संति, तओ अन्नं न पुच्छइ । तस्स संसइअं मिच्छत्तं ।।४।।

[24] अणाभोगं एगिंदिआइणं । जम्हा आभोगो [८]नाणमुवओगो भन्नइ । एअं केरिसं? एअं एवं ति, एरिसो पुण तेसिं नत्थि, तेण तेसिमणाभोगं मिच्छत्तं । अहवा सुद्धं परूवइस्सामि अणुवओगाओ असुद्धं परूविअं तं पि अणाभोगं परेसिं मिच्छत्त-कारणत्तणेण ।।५।।

एअं पुण पंचविहं पि मिच्छत्तं थूलभावेण । परमत्थओ विवज्जासो सो पुण एअं न मए मम पुव्वपुरिसेहिं वा कारिअं एअं जिणाययणं; किं मम इत्थ पूअसक्काराइ-

७. 'पन्नवेइ' मुद्रितकर्मग्रन्थे । ८. 'ताव उवओगो' कथाकोश प्रकरण-गा. २१ कथायाम् ।

ज्ञातेऽपि वस्तुतत्त्वे स्वभणितप्रतिप्रवेशेन वाऽजानन् वा भावार्थं प्ररूपयति वारितो वा न तिष्ठति, एतेषां जीवानामाभिनिवेशिकं मिथ्यात्वम् ।।३।।

सांशयिकं पुनः सूत्रे वाऽर्थे वोभये वा शङ्कितः प्ररूपयति । स चान्यं न पृच्छति । कथमहं एतावत् परिवारोऽप्यन्यं पृच्छामि । पृच्छमाणो वा जानीत, एष एतन्न जानाति इति । अथवा ये मम भक्ताः ते जानीरन्, एतेभ्योऽपि एषो वरतरो, ततः पृच्छेत्, ततो मां मुक्त्वा एते एतं भजिष्यन्ति, ततोऽन्यं न पृच्छति । तस्य सांशयिकं मिथ्यात्वम् ।।४।।

अनाभोगमेकेन्द्रियादीनाम्, यस्मादाभोगो ज्ञानोपयोगो भण्यते । एतत्कीदृशम् ? एतदेवमिति, एतादृशः पुनः तेषां नास्ति, तेन तेषामनाभोगं मिथ्यात्वम् । अथवा शुद्धं प्ररूपयिष्यामि अनुपयोगतोऽशुद्धं प्ररूपितं तदप्यनाभोगं परेषां मिथ्यात्वकारणत्वेन ।।५।।

24. एतत्पुनः पञ्चविधमपि मिथ्यात्वं स्थूलभावेन । परमार्थतो विपर्यासः, स पुनरेतन्न मया मम पूर्वपुरुषैर्वा कारितमेतज्जिनायतनम्, किं ममात्र पूजासत्काराद्यादरेण । अथवा मया एतज्जिनबिम्बं कारितं मम पूर्वपुरुषैर्वा तस्मादत्र पूजादिकं प्रवर्ते । किं मम परकीयेषु अत्याऽऽदरेण । एवं च तस्य न सर्वज्ञप्रत्यया प्रवृत्तिः; अन्यथा सर्वेष्वपि बिम्बेष्वर्हन्नेव व्यपदिश्यते, सोऽर्हन् यदि परकीयस्तस्मात् पत्थरलेप्यपित्तलादिकमात्मीयम्, न पुनः पत्थरादिषु वन्द्यमानेषु कर्मक्षयो भवेत्, किन्तु तीर्थंकरगुणपक्षपातेन; अन्यथा शङ्करादिबिम्बेषु पाषाणादिसद्भाव-स्तेष्वपि वन्द्यमानेषु कर्मक्षयो भवेत्;

मिच्छं परिहरह ~~~

मुसावायाइवज्जणं करंतो वि अविरओ कहिज्जइ, पंचमगुणठाणे देसविरई, छट्ठगुणठाणे सव्वविरई, न पढमगुणट्ठाणे, तस्स य अणंताणुबंधिपमुहा सोलस वि कसाया बज्झंति उइज्जंति अ । तन्निमित्ताओ असुहाओ दीहट्ठिईओ तिव्वाणुभागाओ कम्मपयडीओ बज्झंति । तासिं च उदयेण नरय-तिरिय-कुमाणुसत्त-कुदेवगइरूवो संसारो, तन्निबंधणाणि अ दुक्खाणि पिट्ठओ अणुसज्जंति । एअं नाऊण भो भो महाणुभावा ! समत्त-नाणं-चरणेसु जइअव्वं, तेसु बहुमाणो कायव्वो ।।३४।।"

इति मिथ्यात्वं पञ्चभेदम्, सप्तभेदमतोप्यधिकभेदमपि श्रीजिनधर्माराधकैस्त्याज्य-मेव । यतः श्रीपाक्षिकसूत्रे -

"[26]**सावज्जजोगमेगं, मिच्छत्तं एगमेव अन्नाणं ।**
परिवज्जंतो गुत्तो, रक्खामि महव्वए पंच ।।३५।।" [पाक्षिकसूत्र-गा. २०]

साधुप्रतिक्रमणसूत्रेऽपि - [27]'मिच्छत्तं परिआणामी'त्यादिसिद्धान्तवचनैस्त्या-ज्यत्वेनोक्तेः। यथा दुष्टादृष्टवशगस्य पुंसो धनं भूमध्यन्यस्तं स्वायत्तमपि महाभूतैः स्वायत्तं विधायाधोऽधः क्षिप्यते, यथा वा महालोहभारो वहन्तं पुमांसं पंकाकुलभूमा-वधोऽधः क्षिपति, यथा वा सागरादिजलं तरीतुकाममपि पुमांसं कण्ठबद्धा शिलाऽधोऽधः प्रक्षिपति तथैतन्मिथ्यात्वं परिशील्यमानं सकलजीवानां सप्तनरकरूपामधोगतिमेव दत्ते, नान्यत्किमपि, तेन तद्वर्जनमेव श्रेयस्करमात्मनः, परेषामपि तेन मिथ्यात्वारोपणो-पदेशोऽपि न दातव्यः । यश्च गृहकुटुम्बमध्ये मुख्यः प्रवर्त्तकः सन्नपरेषां मिथ्यात्वरोपणं कुर्यात्, न स तेषां हितकारी आत्मनश्चापि । यतः -

"[28]**जो गिहकुडुंबसामी, संतो मिच्छत्तरोवणं कुणइ ।**
तेण सयलो वि वंसो, पक्खित्तो भवसमुद्दम्मि ।।३६।।"[सम्यक्त्वरहस्यप्रकरण-३४]

---

26. सावद्ययोगमेकं मिथ्यात्वमेकमेव अज्ञानम् । परिवर्जयन् गुप्तः रक्षामि महाव्रतानि पञ्चानि ।।

27. मिथ्यात्वं प्रत्याख्यामि ।

28. यो गृहकुटुम्बस्वामी सन् मिथ्यात्वरोपणं करोति । तेन सकलोऽपि वंशः प्रक्षिप्तो भवसमुद्रे ।।

मिच्छं परिहरह ~~~

भो भव्याः ! विलोक्यतां मिथ्यात्वमहादोषस्यैकस्यैव प्रबलबलवत्ताम् । यथैकेनैव प्रचण्डसुभटेन महौजस्विना तेजस्विना दुर्धर्ष-स्कन्धबलभृता बहुतुरग-मातङ्ग-पत्ति-दलकलितोऽपि भूपालो निरुध्यते तथैकेनैव मिथ्यात्वदोषेण ज्ञान-दर्शन-चारित्र-दान-शील-तपो-भावनादिसाध्याऽनन्तज्ञान-दर्शन-सुख-वीर्यमयी सिद्धिरागच्छन्ती हेलयैव निरुध्यते ।

[33]
"अंतिमकोडाकोडीइ, सव्वकम्माण आउवज्जाणं ।
पलिआसंखिज्जइमे, भागे खीणे हवइ गंठी ।।४२।।
[34]
गंठि त्ति सुदुब्भेओ, कक्खड-घण-रूढ-गूढगंठि व्व ।
जीवाण कम्मजणिओ, घणराग-द्दोसपरिणामो ।।४३।।"

[वि. भा.-११९४, ११९५,]

[35]
"इत्तिअरूवं च इमे पत्ता, सव्वे अणंतसो जीवा ।
किं तु· अउन्ना पुणरवि, परिवडिऊणं गया मूले ।।४४।।
[36]
बद्धा(बंधिउं ?) उक्कोसठिई, कम्माण पुणो वि संकिलट्ठेहिं ।
भमिहं(हिं?)ति भवमभव्वा, एवं पुरओ वि सयकालं ।।४५।।"

यद् बहुशोऽप्यनन्तशोऽपि इतीमं ग्रन्थिं यथाप्रवृत्तिकरणेन कर्म क्षपयित्वा जीवाः समागच्छन्ति, ततश्च मिथ्यात्वप्राबल्यात्प्रतिनिवृत्ताः सिद्धिपुर्यगोचरा भवन्ति । अनादिकालपरिचितमागामिकालसुखधर्मप्रत्यूहविधाय्यपि गुर्वादिभिस्त्याजिना अपि कथमपि न त्यजन्ति जीवाः । आजन्मावधिमहादारिद्रबलप्राप्तद्रमकखर्प्परमिव ।

---

33. अन्त्यकोटीकोट्याः सर्वकर्माणामायुर्वर्जानाम् । पल्यासंख्याततमे भागे क्षीणे भवति ग्रन्थिः ।।

34. ग्रन्थिरिति सुदुर्भेदः कर्कश-घन-रूढ-गूढग्रन्थिरिव । जीवानां कर्मजनितो घनरागद्वेषपरिणामः ।।

35. एतावद् रूपं च इमे प्राप्ताः, सर्वेऽनन्तशो जीवाः । किन्तु अपुण्याः पुनरपि, परिपत्य गता मूले ।।

36. बद्ध्वा उत्कृष्टस्थितीः, कर्माणां पुनरपि संक्लिष्टैः । भमिष्यन्ति भवमभव्याः, एवं पुरतोऽपि सदाकालः ।।

मिच्छं परिहरह ~~~

अत्र मिथ्यात्वोपरिजमालिसम्बन्धः श्रीभगवतीप्रसिद्धः -

39 तस्स णं माहणकुंडग्गामस्स[१] नगरस्स पच्चित्थिमे णं एत्थ णं खत्तियकुंडग्गामे नामं नगरे होत्था वण्णओ, तत्थ णं खत्तियकुंडग्गामे नयरे जमाली नामं खत्तियकुमारे परिवसति अड्ढे दित्ते जाव अपरिभूते उप्पिं पासायवरगए फुट्टमाणेहिं[२] मुइंगमत्थएहिं बत्तीसतिबद्धेहिं नाडएहिं णाणाविहवरतरुणीसंपउत्तेहिं उवनच्चिज्जमाणे[३] उवनच्चिज्जमाणे, उवगिज्जमाणे उवगिज्जमाणे, उवलालिज्जमाणे उवलालिज्जमाणे पाउस-वासारत्त-सरद-हेमंत-वसंत-गिम्ह-पज्जंते छप्पि उऊ जहाविभवेणं माणेमाणे कालं गालेमाणे इट्ठे सद्द-फरिस-रस-रूव-गंधे पंचविहे माणुस्सए कामभोगे पच्चणुब्भवमाणे विहरइ ।

40 तते णं खत्तियकुंडग्गामे नगरे सिंघाडगतियचउक्कचच्चर जाव बहुजणसद्दे इ वा जहा उववातिए जाव एवं पण्णवेति एवं परूवेइ-एवं खलु देवाणुप्पिया ! समणे भगवं महावीरे आदिगरे जाव सव्वण्णू सव्वदरिसी माहणकुंडग्गामस्स नगरस्स बहिया बहुसालए चेइए अहापडिरूवं जाव विहरइ, तं महप्फलं खलु देवाणुप्पिया ! तहारूवाणं अरहंताणं भगवंताणं जहा उववाइए जाव एगाभिमुहे खत्तियकुंडग्गामं नगरं मज्झंमज्झेणं निग्गच्छंति, निग्गच्छित्ता जेणेव माहणकुंडग्गामे नगरे जेणेव बहुसालए चेइए, एवं जहा उववाइए जाव तिविहाए पज्जुवासणाए पज्जुवासंति ।

---

१. अयं कथानके 'ग्गाम' स्थाने 'ग्राम', 'न्न' स्थाने 'ण्ण', 'न' स्थाने 'ण' 'ए' स्थाने 'ते', 'इ' स्थाने 'ति', 'या' स्थाने 'आ' हस्तप्रतौ ।

२. 'फुट्टमाणेहिं'ति अतिरभसाऽऽस्फालनात्स्फुटद्भिरिव विदलद्भिरिवेत्यर्थः ।

३. 'उवनच्चिज्जमाणे'त्ति उपनृत्यमानः तमुपश्रित्य नर्त्तनात् 'उवगिज्जमाणे'त्ति तद्गुणगानात् 'उवलालिज्जमाणे'त्ति उपलाल्यमान ईप्सितार्थसम्पादनात् ।

39. तस्य माहनकुण्डग्रामस्य नगरस्य पाश्चात्ये अत्र क्षत्रियकुण्डग्रामः नाम नगरमासीत् वर्णकः । तत्र क्षत्रियकुण्डग्रामे नगरे जमालिः नाम क्षत्रियकुमारः परिवसति आढ्यः दीप्तः यावत् अपरिभूतः, उपरि प्रासादवरगतः स्फुटद्भिः मृदङ्गमस्तकैः द्वात्रिंशद्बद्धैः नाटकैः नानाविध-वरतरुणीसम्प्रयुक्तैः उपनृत्यमानः उपनृत्यमानः, उपगीयमानः उपगीयमानः, उपलाल्यमानः उपलाल्यमानः, प्रावृट्-वर्षारात्र-शरद-हेमन्त-वसन्त-ग्रीष्मपर्यन्तान् षडपि ऋतून् यथाविभवेन मानयन्, कालं गालयन्, इष्टान् शब्द-स्पर्श-रस-रूप-गन्धान् पञ्चविधान् मानुष्यकान् कामभोगान् प्रत्यनुभवन् विहरति ।

40. ततः क्षत्रियकुण्डग्रामे नगरे शृङ्गाटकत्रिक-चतुष्क-चत्वरः यावत् बहुजनशब्दः इति वा यथा औपपातिके यावत् एवं प्रज्ञापयति, एवं प्ररूपयति, एवं खलु देवानुप्रियाः ! श्रमणः भगवान् महावीरः आदिकरः यावत् सर्वज्ञः सर्वदर्शी माहनकुण्डग्रामस्य नगरस्य बहिः बहुशालके चैत्ये यथाप्रतिरूपं यावत् विहरति । तत् महत्फलं खलु देवानुप्रियाः ! तथारूपाणां अर्हतां भगवतां यथा औपपातिके यावत् एकाभिमुखाः क्षत्रियकुण्डग्रामं नगरं मध्यं मध्येन निर्गच्छन्ति, निर्गत्य यत्रैव माहनकुण्डग्रामः नगरं यत्रैव बहुशालकं चैत्यम्, एवं यथा औपपातिके यावत् त्रिविधया पर्युपासनया पर्युपासते ।

मिच्छं परिहरह ~~~

43. तते णं से जमालि य खत्तियकुमारे कंचुइज्जपुरिसस्स अंतिए एयमट्ठं सोच्चा निसम्म हट्ठतुट्ठे० कोडुंबियपुरिसे सद्दावेइ कोडुंबियपुरिसे सद्दावइत्ता एवं वयासी-खिप्पामेव भो देवाणुप्पिया ! चाउग्घंटं आसरहं जुत्तामेव उवट्ठवेह उवट्ठवेत्ता मम एयमाणत्तियं पच्चप्पिणह । तते णं ते कोडुंबियपुरिसा जमालिणा खत्तियकुमारेणं एवं वुत्ता समाणा जाव पच्चप्पिणंति । तते णं से जमालियखत्तियकुमारे जेणेव मज्जणघरे तेणेव उवागच्छइ, तेणेव उवागच्छित्ता ण्हाए कयबलिकम्मे जहा उववाइए परिसावन्नओ तहा भाणियव्वं जाव चंदणाकिन्नगायसरीरे सव्वालंकारविभूसिए मज्जणघराओ पडिनिक्खमइ, मज्जणघराओ पडिनिक्खमित्ता जेणेव बाहिरिया उवट्ठाणसाला, जेणेव चाउग्घंटे आसरहे तेणेव उवागच्छइ, तेणेव उवागच्छित्ता चाउग्घंटं आसरहं दुरूहेइ चाउ० २ दुरुहित्ता सकोरिंटमल्लदामेणं छत्तेणं धरिज्जमाणेणं, महया [४]भडचडकरपह-करवंदपरिक्खित्ते खत्तियकुंडग्गामं नगरं मज्झंमज्झेणं निग्गच्छइ, निग्गच्छित्ता जेणेव माहणकुंडग्गामे नगरे जेणेव बहुसालए चेइए तेणेव उवागच्छइ, तेणेव उवागच्छित्ता तुरए निगिण्हेइ, तुरए निगिण्हेत्ता रहं ठवेइ, रहं ठवेत्ता रहाओ पच्चोरुहति, रहाओ पच्चोरुहित्ता पुप्फतंबोलाउहमादीयं वाणहाओ य विसज्जेइ, विसज्जेत्ता एगसाडियं उत्तरासंगं करेइ, उत्तरासंगं करेत्ता [५]आयंते चोक्खे परमसुइब्भूए अंजलिमउलियहत्थे जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ, तेणेव उवागच्छित्ता समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करेइ २ तिक्खुत्तो २ जाव तिविहाए पज्जुवासणाए पज्जुवासइ ।

---

४. भटानां प्राकृतत्वान्महाभटानां वा 'चडगर'त्ति चटकरवन्तो-विस्तरवन्तः 'पहकर'त्ति समूहास्तेषां यद्वृन्दं तेन परिक्षिप्तो यः स तथा । ५. 'आयंते'त्ति शौचार्थं कृतजलस्पर्शः 'चोक्खे'त्ति आचमनादपनीताशुचिद्रव्यः ।

43. ततः स जमालिः च क्षत्रियकुमारः कञ्चुकिपुरुषस्य अन्तिकं एतदर्थं श्रुत्वा निशम्य हृष्टतुष्टः० कौटुम्बिकपुरुषान् शब्दयति, कौटुम्बिकपुरुषान् शब्दयित्वा एवं अवादीत् - क्षिप्रमेव भो देवानुप्रियाः ! चतुर्घण्टं अश्वरथं युक्तमेव उपस्थापयथ उपस्थाप्य मां एतां आज्ञप्तिकां प्रत्यर्पयथ । ततः ते कौटुम्बिकपुरुषाः जमालिना क्षत्रियकुमारेण एवं उक्ताः सन्तः यावत् प्रत्यर्पयन्ति । ततः स जमालिः क्षत्रियकुमारः यत्रैव मज्जनगृहं तत्रैव उपागच्छति, तत्रैव उपागम्य स्नातः कृतबलिकर्मा यथा औपपातिके परिसामान्यतस्तथा भणितव्यं यावत् चन्दनाकिर्णगात्रशरीरः सर्वालङ्कारविभूषितः मज्जनगृहात् प्रतिनिष्क्राम्यति, मज्जनगृहात् प्रतिनिष्क्रम्य यत्रैव बाहिरिका उपस्थानशाला, यत्रैव चतुर्घण्टः अश्वरथः तत्रैव उपागच्छति, तत्रैव उपागम्य चतुर्घण्टं अश्वरथं आरोहति, चतु० आरुह्य सकोरेण्टमाल्यदाम्ना छत्रेण धार्यमाणेन महाभट - 'चडकर' 'पहकर'वृन्दपरिक्षिप्तः क्षत्रियकुण्डग्रामं नगरं मध्यंमध्येन निर्गच्छति, निर्गत्य यत्रैव माहनकुण्डग्रामः नगरं यत्रैव बहुशालकं चैत्यं तत्रैव उपागच्छति, तत्रैव उपागम्य तुरगान् निगृह्णति, तुरगान् निगृह्य रथं स्थापयति, रथं स्थापयित्वा रथात् प्रत्यारोहति, रथात् प्रत्यारुह्य पुष्पताम्बूलायुधादिकं उपानहः च विसृजति, विसृज्य एकशाटिकं उत्तरासङ्गं करोति, उत्तरासङ्गं कृत्वा आचान्तः चोक्षः परमशुचीभूतः अञ्जलिमुकुलितहस्तः यत्रैव श्रमणः भगवान् महावीरः तत्रैव उपागच्छति, तत्रैव उपागम्य श्रमणं भगवन्तं महावीरं त्रिः आदक्षिणप्रदक्षिणां करोति, कृत्वा त्रिः २ यावत् त्रिविधया पर्युपासनया पर्युपास्ते ।

मिच्छं परिहरह ~~~

अम्मापियरो जएणं विजएणं वद्धावेइ, वद्धावेत्ता एवं वदासी–एवं खलु अम्मताओ ! मए समणस्स भगवओ महावीरस्स अंतियं धम्मे णिसंते, से वि य मे धम्मे इच्छिए, पडिच्छिए, अभिरुइए । तए णं तं जमालिं खत्तियकुमारं अम्मापियरो एवं वदासी–धन्ने सि णं तुमं जाया ! कयत्थे सि णं तुमं जाया ! कयपुन्ने सि णं तुमं जाया! कयलक्खणे सि णं तुमं जाया ! जन्नं तुमे समणस्स भगवओ महावीरस्स अंतिय धम्मे निसंते, से वि य ते धम्मे इच्छिए, पडिच्छिए, अभिरुइए ।

[18]पावयणी धम्मकही, वाई नेमित्तिओ तवस्सी अ ।
विज्जासिद्धो अ कई अट्ठेव पभावगा भणिआ ।।१९।। [प्रवचनसारोद्धार-९३४]

---

१. 'लक्खण' इति मुद्रितसम्यक्त्वसप्ततिकायाम् ।

11. सत्क्रियं कारकमिह तत्त्वरुचि रोचकं तु सम्यक्त्वम् । मिथ्यादृष्टिस्तत्त्वानि [दीपयन्] दीपकं तं तु ।।
12. चतुर्विधश्रद्धानत्रिलिङ्गं दशविनयत्रिशुद्धिपञ्चगतदोषम् । अष्टप्रभावक-भूषण-लक्षणपञ्चविधसंयुक्तम् ।।
13. षड्विध-यतनाऽऽकारं षड्भावनाभावितं च षट्स्थानम् । इति सप्तषष्ठि-दर्शनभेदविशुद्धं तु सम्यक्त्वम्।।
14. जानतोऽपि आगमाभ्यासो गीतजननिसेवा । व्यापन्न-कुदर्शनवर्जनं च सम्यक्त्वश्रद्धानम् ।।
15. लिङ्गत्रिकं शुश्रूषा श्रुतस्य क्षुधितस्य यथा च । तथानुष्ठाने गुरुजनवैयावृत्योद्यमः सम्यक् ।।
16. जिन-सिद्ध-प्रतिमा-श्रुत-धर्म-सङ्घ-गुरूपाध्याय-साधु-सम्यक्त्वे ।
विनयोऽवर्णाशातना नाशः स्तुति-भक्ति-बहुमानः ।।
17. मन-वचन-तनुशुद्धयो दोषा शङ्का च काङ्क्षा विचिकित्सा । परतीर्थिकप्रशंसा तैः सह संस्तवस्तथा च।।
18. प्रावचनिको धर्मकथिको वादी नैमित्तिकस्तपस्वी च । विद्यावान् सिद्धश्च कवि अष्टैव प्रभावका भणिताः ।।

भूषणम्- [19]पवयणथिज्ज पभावणा भत्ती कोसल्ल तित्थसेवा य ।

लक्षणम्- उवसम-संवेगो वि य निव्वेअणुकंप-अत्थिक्कं ।।२०।।

[20]जयणा वंदण-नमणं दाणाणुपयाण-भास-संभासं ।

परतित्थिअदेवाणं, न करइ तग्गहिअपडिमाणं ।।२१।।

[21]राय-गण-बल-[२]सुरअक्कम-गुरुनिग्गह-वित्ति छच्च आगारा ।

भावण मूलं दारं पइट्ठआहारभायणनिही ।।२२।।

[22]अत्थि जिओ तह निच्चो कत्ता, भुत्ता य पुण्णपावाणं ।

अत्थि [३]सिवं सदुवाओ नाणाई ईअ छ ठाणाइं ।।२३।।" [श्राद्धविधि-६ वृत्ति]

अन्यत्र -

"[23]सव्वत्थ उचिअकरणं, गुणाणुराओ रई अ जिणवयणे ।

अगुणेसु अ मज्झत्थं, सम्मद्दिट्ठिस्स लिंगाइं ।।२४।।" [पुष्पचूलिका-१११]

इति सम्यक्त्वभेद-भूषण-लक्षण-दोष-लिङ्गस्वरूपम् ।

सम्यक्त्वं किं स्वरूपम् ?

"[24]से अ सम्मत्ते पसत्थसम्मत्तमोहणीयकम्माणुवेअणोवसमखयसमुत्थे पसमसंवेगाइलिंगे सुहे आयपरिणामे पन्नत्ते ।।२५।।" इत्यावश्यके ।

---

२. 'सुरकम्म' हस्त० । ३. 'धुवं निव्वाणं-५ तस्सोवाओ ६ अ छ ठाणा' सम्यक्त्वसप्ततिका-५९, श्राद्धप्रतिक्रमण-६ वृत्तौ अयं पाठः ।

19. प्रवचनस्थैर्य-प्रभावना-भक्ति-कौशल्य-तीर्थसेवाश्च । उपशम-संवेगावपि च निर्वेदाऽनु-कम्पाऽऽस्तिक्यम्।।

20. यतना वन्दन-नमनं दानानुप्रदान-भाष-संभाषणम् । परतिर्थिकदेवानां न करोति तद् गृहीतप्रतिमानाम्।।

21. राजगणबलसुराऽऽक्रम-गुरुनिग्रह-वृत्तिः षट् चाकाराः । भावना मूलं द्वारं प्रतिष्ठ-आधार-भाजन-निधिः ।।

22. अस्ति जीवस्तथा नित्यः कर्ता भोक्ता च पुण्यपापानाम् । अस्ति शिवं तदुपायो ज्ञानादि एतानि षट्स्थानानि।।

23. सर्वत्रोचितकरणं गुणानुरागो रतिश्च जिनवचने । अगुणेसु च माध्यस्थ्यं सम्यग्दृष्टेः लिङ्गानि ।।

24. स च सम्यक्त्वः प्रशस्तसम्यक्त्वमोहनीयकर्मानुवेदनोपशमक्षयसमुत्थः प्रशमसंवेगादिलिङ्गः शुभोऽऽत्मपरिणामः प्रज्ञप्तः ।

सम्यग्दर्शनं तु यज्जैनेषु पदार्थेषु स्वतः परतो वा रुचिमात्रम् ।

"[25]**तमेव सच्चं निस्संकं जं जिणेहिं पवेईअं ।।२६।।**" विशेषावश्यकवृत्तौ ।

सम्यक्त्वे प्राप्ते के गुणा इत्याह –

"[26]**सुस्सूस धम्मराओ, गुरुदेवाणं जहासमाहीए ।**
वेआवच्चे नियमो, [4]वयपडिवत्तीए[5] भयणा उ ।।२७।।"[श्रावकधर्मपञ्चाशक-४]

श्रीदर्शनस्य माहात्म्यमवगन्तव्यम् -

"[27]**सम्मदिट्ठी जीवो, जइ वि हु पावं समायरे किंचि ।**
अप्पो सि होइ बंधो, जेण न निद्धंधसं कुणइ ।।२८।।" [सावगपडिक्कमणसुत्तं-३६]

इत्यादि । नरकेऽपि नारकाणामक्षिनिमीलनोन्मीलनमात्रसुखास्पृशामपि सम्यग्दृष्टीनां [6]तथाविधशरीरवेदनाया अभावात्[वेऽपि?] मानसपीडा तु सम्यग्दृष्टीनां बहुतरा स्यात् । यदुक्तं श्रीभगवत्याम् -

"[28]**णेरइआ णं भंते ! सव्वे समवेअणा ? गोयमा ! नो इणट्ठे समट्ठे । से केणट्ठेणं ? गोयमा ! नेरइआ दुविहा पण्णत्ता तं जहा-सण्णिभूआ य असण्णिभूआ य । तत्थ णं जे ते सण्णिभूआ ते णं महावेयणा, तत्थ णं जे असण्णिभूआ ते णं अप्पवेअणतरागा ।।२९।।**"

समवेदनाः समानपीडाः, सञ्ज्ञा-सम्यग्दर्शनं तद्वन्तः सञ्ज्ञिनः, तेषां पूर्वकृत-

---

४. अस्या गाथायाश्चतुर्थपादो विविधग्रन्थेषु भिन्नो दृश्यते तद्यथा-'दंसणपडिमा भवे एसा ।।' विंशतिविंशिका-१०/४, 'हवंति सम्मत्त लिंगाइं ।।' श्रावकधर्मविधिप्रकरण-६९, 'वयपडिवत्तीइ भयणा उ ।।' श्रावकधर्मपञ्चाशक-४। ५.'वयपडिवत्ती भयणाओ' हस्त० । ६. 'देवप्रतिकारकरणेन मिथ्यादृशां नारकाणां यथाविधा शरीरवेदना भवति, न तथाविधा शरीरवेदना सम्यग्दृशां नारकाणामि' ति सम्भाव्यते । - सम्पा० ।

25. तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदितम् ।

26. शुश्रूषा धर्मरागो गुरुदेवानां यथासमाधौ । वैयावृत्ये नियमो व्रतप्रतिपत्तौ भजना तु ।।

27. सम्यग्दृष्टिः जीवो यद्यपि खलु पापं समाचरेत् किञ्चित् । अल्पस्तस्य भवति बन्धो येन न निर्दयं कुरुते ।।

28. नैरयिका भगवन् ! सर्वे समवेदनाः ? गौतम ! नायमर्थः समर्थः । स केनार्थेन ? गौतम ! नैरयिका द्विविधाः प्रज्ञप्तास्तद् यथा-सञ्ज्ञिभूताश्चासञ्ज्ञिभूताश्च । तत्र ये ते सञ्ज्ञिभूतास्तेषां महावेदनाः, तत्र ये तेऽसञ्ज्ञिभूतास्तेषामल्पवेदनाः ।

कर्मविपाकमनुस्मरतामहो महद्दुःखसङ्कटमिदमकस्मादस्माकमापतितम्, न कृतो भगवदर्हत्प्रणीतः सकलदुःखक्षयकरो विषयविषम-विष[परिभोग]विप्रलु[ल]ब्धचेतोभिर्धर्म इत्यतो महद्दुःखं मानसमुपजायतेऽतो महावेँदनास्ते ।

ये केचन यतयः श्राद्धाश्च मतिभ्रान्तिकलिताः 'सम्यक्त्वमाचारवतामेव स्यादि'ति यत्प्ररूपयन्ति प्रतिपद्यन्ते च तन्न श्रीजिनागमोक्तयुक्त्या विचार्यमाणं विचारक्षमम्, यतो जीवानाश्रित्य श्रीआवश्यके उपोद्घातनिर्युक्तौ -

[29] भवसिद्धिओ अ जीवो, पडिवज्जइ सो चउण्हमण्णयरं ।
पडिसेहो पुण असण्णि-मीसए सण्णि पडिवज्जे ।।३०।। [आवश्यकनिर्युक्ति-८१३]

भवाद् भाविनी सिद्धिर्यस्य स भवसिद्धिकः, इत्युक्ते भवसिद्धिकाः सर्वासु योनिषु सर्वासु जातिषु च प्राप्यन्ते, ते सर्वे आचारवन्त एव न सम्भाव्यन्ते । तेषां सम्यक्त्वप्रतिपत्तिषु श्रीजिनागमबलेन निश्चीयमानास्तिकालमाश्रित्यापि सम्यक्त्व-श्रुतयोः प्रतिपद्यमानकः षड्विधेऽपि सुषमसुषमादिलक्षणे काले सम्भवति, स च प्रतिपत्ता सुषमसुषमादिषु देशन्यूनपूर्वकोट्यायुष्क एव प्रतिपद्यते । न च दुष्षम-दुष्षमायामत्यन्तसंक्लिष्टत्वाद्बिलवासिषु सामायिकादिभावः शङ्कनीयः । यतः प्रज्ञप्त्यामप्युक्तम् - 'ओसन्न परिवज्जिअत्ति ।' अत्र ओसन्नमिति प्रायो ग्रहणात्सम्यक्त्वमात्रप्रतिपत्ता कश्चिद् भवत्यपीति ।

देशसर्वविरत्योः प्रतिपत्ता उत्सर्पिण्यां द्वयोर्दुष्षमसुषमसुषमदुष्षमयोः सम्भवति, अवसर्पिण्यां तु त्रिषु सुषमदुष्षम-दुष्षमसुषम-दुष्षमासु । एतावता महानिम्नकालेऽपि यत्र खाद्याखाद्य-पेयापेय-कार्याकार्यविवेकविकला मत्स्याहारिणा एव स्युस्तेषामपि श्रीसम्यक्त्वप्राप्तेरुक्तत्वाद् आचारानाचार-विरत्यविरतिचिन्ताचिन्त्यमानाः कथं विशरारुतां नाप्नोति ? चतुर्षु गतिष्वऽपि सम्यक्त्वप्रतिपत्तिः श्रीजिनागमेन स्पष्टमेव निष्टंक्यमानाऽपि यैः कैश्चित् पण्डितंमन्यैरेवाचारानाचारविचारणया निषिध्य-

७. *'वेदनास्ते । असञ्ज्ञिभूतास्तु मिथ्यादृष्टयः, ते तु स्वकृतकर्मफलमिदमजानन्तोऽनुपतप्तमानसा अल्पवेदनाः स्युरित्येके ।'*

29. भवसिद्धिकश्च जीवः, प्रतिपद्यते स चतुर्णामन्यतरत् । प्रतिषेधः पुनरसंज्ञिमिश्रके संज्ञी प्रतिपद्यते ।।

मानाप्यधिकतरचातुरिमाविवक्षणात् सकलजन्तुषु च निर्भीकधीरतया साहसमवलम्ब्य प्रौढप्रवृत्तिमारोप्यमाणास्ति तेषां दुरन्तसंसारता समायान्ती कथं केन निवारयितुं शक्यते ? यतः –

चउसुवि गईसु[30] नियमा सम्मत्तसुअस्स होइ पडिवत्ती ।
मणुएसु होइ विरई, विरयाविरई अ तिरिएसु ।।३१।। [आवश्यकनिर्युक्ति-८१२]

इत्यावश्यकादिषु । सम्यक्त्ववतां जन्तूनां केचन विरतिसत्तां प्रख्यापयन्तः सन्ति, ते प्रष्टव्याः सम्यक्त्ववत्सु जन्तुषु केषां कषायाणां [उदयः] स्यात् ? ते च जानन्तोऽपि द्वितीयाप्रत्याख्याननामकषायसद्भावं विरतिनिषेधकं कथं विरतिप्ररूपका भवेयुः ? यतः श्रीकर्मस्तववृत्तौ -

नाल्पमप्युत्सहेद्येषां, प्रत्याख्यानमिहोदयात् ।
अप्रत्याख्यानसञ्ज्ञाऽतो, द्वितीयेषु निवेशिता ।।३२।।

श्रीश्रेणिकादीनां सम्यक्त्वे सत्यपि द्वितीयकषायोदयेनैव विरतेरभावप्रज्ञापनेनाविरतसम्यग्दृष्टित्वं कस्मान्नाङ्गीक्रियते ? अविरतसम्यग्दृष्टिलक्षणं चैवम् -

"तिविहे वि हु सम्मत्ते[31], थोवावि न विरई जस्स कम्मवसा ।
सो अविरइत्ति भण्णइ, देसे पुण देसविरईओ ।।३३।।" [ष.भा.-५, श.भा.-८६,]

श्रीआवश्यकेऽपि -

"बीअकसायाणुदए[32] अपच्चक्खाणनामधेज्जाणं ।
सम्मद्दंसणलंभं विरयाविरइं न उ लहंति ।।३४।।"[आवश्यकनिर्युक्ति-१०९,]

---

30. चतसृष्वपि गतिषु नियमात् सम्यक्त्वश्रुतयोर्भवति प्रतिपत्तिः ।
मनुष्येषु भवति विरतिः विरता-विरतिश्च तिर्यक्षु ।।

31. त्रिविधेऽपि खलु सम्यक्त्वे, स्तोकाऽपि न विरतिः यस्य कर्मवशात् । स अविरतिः इति भण्यते, देशे पुनः देशविरतिकः ।।

32. द्वितीयकषायाणामुदयेऽप्रत्याख्याननामधेयानाम् । सम्यग्दर्शनलाभं विरताविरतिं न तु लभन्ते ।।

दानाधिकारे च पात्रव्यक्तौ -

"[33]उत्तमपत्तं साहू, मज्झिमपत्तं च सावया भणिआ ।
अविरयसम्मदिट्ठी, जहण्णपत्तं मुणेअव्वं ।।३५।।" [गाथासहस्त्री-१४४]

कर्मनिर्जराधिकारे च -

यावती निर्जराऽज्ञानिनः पूर्वकोटिभिस्तावती ज्ञानिनः सम्यक्त्वधारिणस्त्रिभिर्गुप्तिभिर्गुप्तस्य श्वासोच्छ्वासमात्रेण, यावती तस्य ततोऽसंख्यात[गुणाधिका] देशविरतस्य, यावती देशविरतस्य ततोऽसंख्य[गुणाधिका] प्रमत्तचारित्रिणः, ततोऽप्रमत्तचारित्रिणोऽसंख्यातगुणाधिका, ततोऽप्यसंख्याताधिका यथाख्यातचारित्रिणः, ततोऽप्युपशमकस्य श्रेणिगतस्येत्यर्थः, ततोऽप्यनन्तगुणा क्षपकश्रेणिमारूढस्य । चतुःशरण- प्रकीर्णकेऽप्यनुमोदनाधिकारे -

"[34]अरिहत्तं अरिहंतेसु, जं च सिद्धत्तणं च सिद्धेसु ।
आयारं आयरिएसु, उवज्झायत्तं उवज्झाएसु ।।३६।।"
[35]साहूण साहुकिरिअं, देसविरइं च सावयजणाणं ।
अणुमन्ने सव्वेसिं, सम्मत्तं सम्मदिट्ठीणं ।।३७।।" [चतुःशरणप्रकीर्णक-५६, ५७]

श्रीआवश्यके प्रत्याख्याननिर्युक्तौ श्राद्धविध्यधिकारे -

"[36]सावगधम्मस्स विहिं वुच्छामी धीरपुरिसपन्नत्तं ।
जं चरिऊण सुविहिआ गिहिणो वि सुहाइं पावंति ।।३८।।
[37]साभिग्गहा य निरभिग्गहा य, ओहेण सावया दुविहा ।
ते पुण विभज्जमाणा, अट्ठविहा हुंति नायव्वा ।।३९।।

---

33. उत्तमपात्रं साधवो मध्यमपात्रं च श्रावका भणिताः । अविरतसम्यग्दृष्टयो जघन्यपात्रं ज्ञातव्यम् ।।
34. अर्हत्त्वमर्हत्सु, यच्च सिद्धत्वं च सिद्धेषु । आचारमाचार्येषु, उपाध्यायत्वमुपाध्यायेषु ।।
35. साधूनां साधुक्रियां, देशविरतिं च श्रावकजनानाम् । अनुमन्ये सर्वेषाम्, सम्यक्त्वं सम्यग्दृष्टीनाम् ।।
36. श्रावकधर्मस्य विधिं वक्ष्ये धीरपुरुषप्रज्ञप्तम् । यं चरित्वा सुविहिता गृहिणोऽपि सुखानि प्राप्नुवन्ति ।।
37. साभिग्रहाश्च निरभिग्रहाश्च, ओघेन श्रावका द्विधा । ते पुनर्विभज्यमानाः, अष्टविधा भवन्ति ज्ञातव्याः ।।

[38]दुविहतिविहेण पढमो, दुविहं दुविहेण बीअओ होइ ।
दुविहं एगविहेणं, एगविहं चेव तिविहेणं ।।४०।।

[39]एगविहं दुविहेणं, इक्किक्कविहेण छट्ठओ होइ ।
उत्तरगुण सत्तमओ, अविर(य)ओ चेव अट्ठमओ ।।४१।।" [आ.नि.-१५५६-१५५९]

गुणस्थानकेष्वऽप्यविरतगुणस्थानं चतुर्थं प्रोक्तमस्ति । केषाञ्चिच्चतुर्थं यावत् प्रतिपत्तिः केषां च पंचमं केषां च षष्ठादिगुणस्थानानि यथासम्भवं स्युः । 'येषां गुणस्थानं सत्स्यात्तेषां सम्यक्त्वमेवैकं नान्यो विरत्यादिगुणो युज्यते' इत्यादिस्थानेषु पुरातनैः श्रीगणधरादिभिरविरतसम्यग्दृष्टिधर्म्मगुणप्रकारं पृथक्तयैव दर्श्यमानमपि सर्वैः शास्त्रावलोकनयोगेन ज्ञायमानमपि नाङ्गीक्रियमाणमस्ति, तेषां महासाहसिकता संसारनिर्भीकता च ज्ञायते ।

एवमप्येकान्तो नास्ति यत्सम्यक्त्वं विरतिरहितं न स्यात् विरतिर्वा सम्यक्त्वरहिता न स्यात् । यदुक्तम् -

"[40]उवसमसम्मदिट्ठी अंतरकरणे, ठिए कोइ देसविरइंपि लभेइ ।
कोइ पमत्तापमत्तभावंपि, सासायणो पुण न किंपि लभेइ ।।४२।।"

[शतकबृहच्चूर्णि.]

"[41]सम्मत्तंमि उ लद्धे, पलिअपुहुत्तेण सावओ हुज्जा ।
चरणो-वसम-खयाणं, सागरसंखंतरा हुंति ।।४३।।"

[पञ्चवस्तु-९१९, श्रावकप्रज्ञप्ति ३९०]

यावत्यां कर्मस्थितौ सम्यक्त्वं लब्धं तन्मध्यात् पल्योपमपृथक्त्वलक्षणस्थितिखण्डे क्षपिते श्रावको देशविरतो भवेत् । तदनन्तरं संख्यातेषु सागरोपमेषु क्षपितेषु चारित्रं

---

38. द्विविधत्रिविधेन प्रथमः, द्विविधं द्विविधेन द्वितीयः भवति । द्विविधमेकविधेन, एकविधं चैव त्रिविधेन ।।
39. एकविधं द्विविधेन, एकविधमेकविधेन षष्ठो भवति । उत्तरगुणः सप्तमः, अविरतश्चैवाष्टमः ।।
40. उपशमसम्यग्दृष्टिः अन्तःकरणे स्थितः कोऽपि देशविरतिमपि लभते ।
कोऽपि प्रमत्ताप्रमत्तभावमपि सास्वादनः पुनः न किमपि लभते ।।
41. सम्यक्त्वे तु लब्धे पल्यपृथक्त्वेन श्रावको भवति। चारित्रोपशमक्षयाणां सागरसंख्यान्तरा भवन्ति।।

लभते । ततोऽपि संख्यातसागरोपमक्षय उपशमश्रेणीं प्रतिपद्यते, ततोऽपि संख्यातेषु क्षपितेषु क्षपकश्रेणिम्, ततस्तद्भवो मोक्षः । एवमप्रतिपतितसम्यक्त्वस्य नानाभवेषु तद्भवे वा गुणप्राप्तिः स्यात् । सम्यक्त्वं यम् -

[भासामइबुद्धिविवेगविणयकुसलो जियक्ख गंभीरो[42] ।
उवसमगुणेहिं जुत्तो निच्छयववहारनयनिउणो ।।४४।।]

"जिणगुरुसुअभत्तिरओ, हिअमिअपिअवयणजंपिरो धीरो[43] ।
संकाइदोसरहिओ, अरिहो सम्मत्तरयणस्स ।।४५।।"

[दर्शनशुद्धिप्रकरण-२५०, २५१]

यथा सशिरजलस्थाननिर्मितसरःकूपादिषु कदापि जलं न क्षीयते तथा श्रीसम्यक्त्वे विद्यमान एव नापरधर्मगुणक्षतिः किन्तु प्रत्युत वृद्धिः । यदुक्तं श्रीआवश्यके -

[44]भट्ठेण चरित्ताओ, सुट्ठुअरं दंसणं गहेअव्वं ।
सिज्झंति चरणरहिआ, दंसणरहिआ न सिज्झंति ।।४६।।

[आवश्यकनिर्युक्ति-११५९]

पूर्वमबद्धायुर्जीवः सम्यक्त्वप्राप्तावायुर्बन्धे 'विमाणवज्जं न बंधए आउं' इति वचनाद्वैमानिकेष्वेव [उत्पद्यते], नान्यत्र । अविरतगुणस्थानवर्तिनो जीवस्य कृत्यमाह-

देवे गुरौ च सङ्घे च, सद्भक्तिं शासनोन्नतिम् ।
अव्रतोऽपि करोत्येव, स्थितस्तुर्ये गुणालये ।।४७।।

[45]जो अविरओऽवि संघे, भत्तिं तित्थुन्नइं सया कुणइ ।
अविरयसम्मदिट्ठी, पभावगो सावगो सोऽवि ।।४८।।[गुणस्थानकक्रमारोह-२३ वृत्ति]

सम्यक्त्व-देशविरत्योः पुनरप्यन्तरं दर्शयन्नाह -

---

42. भाषामतिबुद्धिविवेकविनयकुशलो जिताक्षो गम्भीरः । उपशमगुणैर्युक्तो निश्चय-व्यवहारनयनिपुणः ।।
43. जिनगुरुश्रुतभक्तिरतो हितमितप्रियवचनजल्पको धीरः । शङ्कादिदोषरहितोऽर्हः सम्यक्त्वरत्नस्य ।।
44. भ्रष्टेन चारित्रात्, सुष्ठुतरं दर्शनं ग्रहीतव्यम् । सिध्यन्ति चरणरहिताः, दर्शनरहिता न सिध्यन्ति ।।
45. योऽविरतोऽपि सङ्घे भक्तिं तीर्थोन्नतिं सदा करोति । अविरतिसम्यग्दृष्टिः प्रभावकः श्रावकः सोऽपि ।।

जीवस्य [सम्यक्त्वावबोधजनितवैराग्योपचयात्] सर्वविरतिवाञ्छां कुर्वतोऽपि सर्वविरतिघातकप्रत्याख्यान[-आवरणाख्य-] कषायाणामुदयाज्जघन्य-मध्यमोत्कृष्टरूपा देशविरतिरेव जायते । तत्र जघन्या विरतिः -

[46]आउट्टिथूलहिंसाइ-मज्जमंसाइचायओ ।
जहन्नो सावओ होइ, जो नमुक्कारधारओ ।।४९।। [गाथासहस्री-४०५]

मध्यमा विरतिः -

[47]धम्मजुग्गगुणाइन्नो, छक्कम्मो बारसव्वओ ।
गिहत्थो अ सयायारो, सावओ होइ मज्झिमो ।। ५०।। [गाथासहस्री-४०६,]

उत्तमा विरतिः -

सचित्ताहारवर्जकस्य सदैव कृतैकभक्तस्याजिह्मब्रह्मव्रतपालकस्य महाव्रताङ्गीकार-स्पृहालुतया त्यक्तसर्वगृहद्वन्द्वस्य श्रमणोपासकस्य भवति, यदाह-

"[48]उक्कोसेणं तु सड्ढो अ, सचित्ताहारवज्जओ ।
एगासणगभोई अ, बंभयारी तहेव य ।।५१।।" [श्राद्धदिनकृत्यावचूरि-२२६]

सम्यग्दर्शनादिलाभो जन्तुनां कैर्गुणैः स्यादिति दर्शयति श्रीआवश्यकोक्तगाथया-

"[49]अब्भुट्ठाणे विणये परक्कमे साहुसेवणाए अ ।
संमद्दंसणलंभो विरयाविरईइ विरईए ।।५२।।" [आवश्यकनिर्युक्ति-८४८]

---

८. 'मुदयात्सर्वविरतिप्रतिपत्तिशक्तिर्न समुत्पद्यते, किन्तु जघन्य...' इति गुणस्थानकक्रमारोह २४ वृत्तौ ।

९. '...स्यानिंद्यबह्मव्रत...' इति गुणस्थानकक्रमारोहे ।

46. आकुट्टीस्थूलहिंसादिमद्यमांसादित्यागतः । जघन्यः श्रावको भवति, यो नमस्कारधारकः ।।

47. धर्मयोग्यगुणाकीर्णः षट्कर्मा द्वादशव्रतः । गृहस्थश्च सदाचारः श्रावको भवति मध्यमः ।।

48. उत्कृष्टेन तु श्राद्धश्च सचित्ताहारवर्जकः । एकासनकभोजी च ब्रह्मचारी तथैव च ।।

49. अभ्युत्थाने विनये पराक्रमे साधुसेवनायां च । सम्यग्दर्शनलाभो विरताविरतेः विरतेः ।।

अत्र सम्यक्त्वोपरि विक्रमसम्बन्धः प्रतिभाव्यः ।

।। अथ विक्रमराजसम्बन्धः ।।

अथ प्रतस्थे पृथिवीं, पावयन्स्वपदैः प्रभुः । अन्वीयमानो मुनिभिर्विनयः सद्गुणैरिव ।।१।।

जघन्यतोऽप्यभूत्कोटिः, प्रभोः पार्श्वे सुपर्वणाम् । ऋतुवातेन्द्रियार्थाश्चाऽनुकूलाः सर्वतोन्वहम् ।।२।।

द्रुमाः [१]कल्पद्रुमस्यास्य गच्छतो नतशीर्षकाः । अजायन्त जगद्भर्तुः शकुनाश्च प्रदक्षिणाः ।।३।। युग्मम्

स्वदुर्मुखत्वं जानन्तो, लज्जिता इव कण्टकाः । अधोमुखत्वमभजन्, पथि प्रचलतः प्रभोः ।।४।।

यत्रेशोऽगान्न तत्राऽतिवृष्ट्यवृष्टिरुजः क्वचित् । मारिवैरेतिदुर्भिक्षस्वान्यचक्रभयान्यपि ।।५।।

अप्रवृद्धनखश्मश्रुकेशो देशेषु सञ्चरन् । स्याद्वादी द्वारिकापुर्याः, पर्यन्तोर्वीं क्रमादगात् ।।६।।

अस्यां सुरौघैः समवसरणे विहिते क्षणात् । तत्र प्राग्वत्प्रविश्यालञ्चक्रे सिंहासनं जिनः ।।७।।

राजमान्या द्विपृष्ठस्य, तन्नरा द्वारिकापतेः । तदा समवसृत्याद्यं, मनःस्वाद्यं न्यवेदयन् ।।८।।

सार्धाद्वादश रूप्यस्य, कोटीस्तेभ्यो मुदा ददौ । प्रभोः समवसृत्यां च, नृपः सविजयो ययौ ।।९।।

प्रभुं प्रदक्षिणीकृत्य कृतीन्दुः प्रणिपत्य च । द्विपृष्ठो बन्धुना सार्धमाऽऽसामासाऽनुवासवम् ।।१०।।

अथ विश्वत्रयीनाथो विश्वभाषानुगामिनीम् । विश्वलोकप्रबोधार्थं विदधे धर्मदेशनाम् ।।११।।

भवा जन्तोरनन्ताः स्युर्नृभवः शस्यते परम् । यदर्ज्यन्तेऽमुना स्वर्गापवर्गाद्याः सुखश्रियः ।।१२।।

एषोऽपि पुरुषार्थानां, कर्त्तृत्वेन विदां मुदे । तान् विना तेन किं जन्मसंख्यापूरणहेतुना ।।१३।।

स श्लाघ्यः पुरुषो यस्मिन् पुरुषार्थाः स्फुरन्त्यलम् । सरस्तदेव सेव्यं हि यत्रापः प्रापुरास्पदम् ।।१४।।

धर्मार्थकाममोक्षाख्या-श्चत्वारस्ते जने श्रुताः । किंत्वर्थकाममोक्षाणां धर्म एव निबन्धनम् ।।१५।।

तस्माद्विश्वार्थवृक्षाणां धर्मो बीजमिति ध्रुवम् । मन्वानैरमलज्ञानैर्जनैः सेव्योऽयमन्वहम् ।।१६।।

एतस्य वृद्धये शुद्ध-बुद्धिभिर्गृहमेधिभिः । विज्ञाय सेवनीयानि व्रतानि द्वादशान्यपि ।।१७।।

तत्राहिंसा च सत्यं चास्तेय-ब्रह्मापरिग्रहाः । यतेर्महाव्रतानि स्युः पञ्चैतानि तु सर्वतः ।।१८।।

देशतोऽमूनि पञ्चाणुव्रतानि गृहशालिनाम् । दिग्भोगानर्थदण्डाख्यं त्रिधा ज्ञेयं गुणव्रतम् ।।१९।।

सामायिकं च देशावकाशः, षौषधसेवनम् । संविभागोऽतिथेश्चत्वार्येवं शिक्षाव्रतान्यपि ।।२०।।

द्वादशानां व्रतानां तु, सम्यक्त्वं जीवितं परम् । यथा गुणानामौदार्यं तपसां वा क्षमोच्चयः ।।२१।।

सर्वज्ञे सद्गुरौ धर्मे, या श्रद्धा हृदि निश्चला । सम्यक्त्वमिति तत्वज्ञै-र्विज्ञेयं हितमात्मनः ।।२२।।

---

१. 'कल्पद्रुमास्यास्य गतौ' हस्त० ।

अस्य प्रभावाज्जायन्ते, देवाः सेवाभृतो नृणाम् । विस्तारिण्यः श्रियः सर्वा यथा विक्रमभूपतेः ।।२३।।

तथाहि - जम्बूद्वीपेऽस्ति कुसुमपुरं कुसुमसन्निभम् । यत्र स्वर्णमयावास-भासः केसरतां दधुः ।।२४।।

राजास्मिन् हरितिलको भूवधूतिलकोऽजनि । नाम्ना गौरीति कान्ताऽस्य, गौरी कान्तगुणैरभूत् ।।२५।।

उपयाचितलक्षाभि- र्दक्षलक्ष्यसुलक्षणः । तयोरपुत्रतादोषच्छेदनो नन्दनोऽभवत् ।।२६।।

अस्मिन् गर्भस्थिते राज्ञा जिता विक्रमतोऽरयः । अतो 'विक्रम' इत्याख्या-मस्याऽम्बा कारयन्महैः ।।२७।।

समये विनयी सोऽयमुपाध्यायवशंवदः । अधीती सर्वशास्त्रेषु, निष्णः कृत्स्नकलास्वभूत् ।।२८।।

कामेभक्रीडनारण्ये, तारुण्ये यातुमुद्यतम् । द्वात्रिंशन्नृपकन्याभि-र्नृपस्तं पर्यणाययत् ।।२९।।

यावद्दिव्येष्वसौ ताभि-र्द्वात्रिंशद्वासवेश्मसु । रन्तुं प्रववृते तावद-कस्माद्व्याधिभिर्वृतः ।।३०।।

कुष्ठ-कास-ज्वर-श्वास-शोफ-शूल-जलोदरैः । शिरोर्ति-गडु-दृक्पीडा-वान्ति-वातैश्च सोऽर्दितः ।।३१।।

उपयाचितबस्त्यादि-कर्ममन्त्रौषधक्रियाः । सर्वं व्यर्थमभूदस्मिन् हितं वाक्यं जडे यथा ।।३२।।

शीर्णनासोष्ठहस्ताङ्घ्रिरत्यर्थं व्यथितोऽर्त्तिभिः । अनल्पं तल्पगः कष्टं रारटीति स्म सोऽनिशम् ।।३३।।

ततः पुरबहिःस्थस्य, प्रसिद्धस्यार्तिशान्तये । धनञ्जयस्य यक्षस्य, स मेने महिषान् शतम् ।।३४।।

तदा विमलकीर्त्याख्यः, केवली केलिकानने । दुःकर्मतिमिरत्रास-वासरः समवासरत् ।।३५।।

ततः केवलिनं नन्तुं भूभर्त्ता भूरिभक्तिभाक् । चचालानन्दसन्दर्भोज्जागरैर्नागरैर्वृतः ।।३६।।

तद्विज्ञाय तदा विज्ञो विक्रमोऽपि व्यचिन्तयत् । लाभैर्लाभा इव रुजो हा ! वर्धन्ते ममौषधैः ।।३७।।

मुद्रामण्डलमन्त्रैस्तै-रौषधैरुपयाचितैः । भग्नं मद्व्याधिषूदग्रैर्दन्तिदन्तैरिवाद्रिषु ।।३८।।

तन्मे दर्प्पादमी रोग- सर्प्पाः सर्पन्ति यद्बलात् । तत्तमः शमयाम्यद्य, ज्ञानभानुं भजे मुनिम् ।।३९।।

अथ व्यजिज्ञपद्भूप-मसावुद्यमसाहसी । शमराशिं नमस्कर्तुं समं नयत मामिति ।।४०।।

मुक्तालिखचितश्मश्रु-मुखमश्रुकणैः सृजन् । नृपोऽथ नृविमानेन समं तमनयत्सुखम् ।।४१।।

स्वर्णाब्जविष्टरक्रोड-निविष्टं कलभाषिणम् । नृपः समं कुमारेण, मुनिहंसं ननाम तम् ।।४२।।

ततो मुनिर्मनुष्याणां हरन् पापमिषं विषम् । वाचा सुधाद्रवाचार-धारिण्या धर्ममादिशत् ।।४३।।

प्रपच्छ देशनान्तेऽथ, विक्रमोक्त्या मुनिं नृपः। किं कुमारोऽयमारोग्य-मारोहति न सर्वथा ।।४४।।

व्यक्तदृश्यस्फुरद्धर्म इवास्ये दशनांशुभिः । ऊचेऽथ केवली ज्ञान-कवलीकृतसंशयः ।।४५।।

पुरेऽपरविदेहोर्वी-रत्ने रत्नस्थलाभिधे । पद्माख्यश्छद्मनां सद्म, कुराजन्यः पुराऽजनि ।।४६।।

स मृगव्यरसव्यग्रो भूतलं वन्यमन्यदा । ययौ सुयशसं साधुं कायोत्सर्गे ददर्श च ।।४७।।

स धर्मज्ञानयोर्वैरी, धर्मज्ञानसमाश्रये । साधोरुरसि निःशङ्कः, कङ्कपत्रं निपातवान् ।।४८।।

मिथ्यादुःकृतवाक्साधुः, स्वव्यलीकविशङ्कया । पपात घातव्यग्रोऽथ धर्माधारतरुर्धराम् ।।४९।।

जनं धिगिति जल्पन्तं निघ्नन् भूपोऽथ मन्त्रिभिः ।पापश्री-कौतुकशुकः, कृतः क्षिप्त्वाशु पञ्जरे ।।५०।।

न्यस्य तस्य सुतं राज्ये, पुण्डरीकं स भूपतिः। सचिवैः पञ्जराद्युक्त-ममोचि निरयोचितः ।।५१।।

सुयशा मुनिराजस्तु, स्मरन् पञ्चनमस्कृतीः । षट्जीववर्गान् क्षमयन्, सुरोऽभूल्लवसत्तमः ।।५२।।

स तु राजा वहन् वैरं, साधुवर्गे निरर्गलम् । न जनैर्निन्द्यमानोऽपि, तत्पुरोद्यानमत्यजत् ।।५३।।

ध्यानाधीनो यशोधौत-व्योमा सोमाभिधो मुनिः । तेनोर्व्यां दण्डघातेना-पाति स्वात्मेव दुर्गतौ ।।५४।।

क्ष्माजन्तून् क्षमयित्वाङ्गं सम्मार्ज्य प्रतिमा स्थितः । मुनिस्तथैव घातेना-पाति पातकिनामुना ।।५५।।

इत्येष पौनःपुन्येन, कुर्वन् पुण्येन साधुना । अवधिज्ञानविज्ञात-तद्भावेनेति भर्त्सितः।।५६।।

निघ्नन् साधून् शमागाधान्, रे रे दुष्ट ! स्वतुष्टये।न चेद् भीतोऽस्यघात्तत्किं, मादृग्भ्योऽपि बिभेषि न।।५७।।

शमिनः सुयशोमुख्या, हन्त ! त्वामसहन्त रे ।नाऽहं सहिष्ये हन्म्येष, स्वाभीष्टं स्मर दैवतम् ।।५८।।

इत्युक्त्वा तडितेव द्रुं तं तेजोलेश्यया मुनिः । भस्मीकृत्य द्रुतं प्राप, पयोद इव शान्तताम् ।।५९।।

भूपोऽथ पापभारेण, समुत्पतितुमक्षमः । अधोगतीनामवधिं सप्तमीं दुर्गतिं गतः ।।६०।।

सोऽप्यालोच्य प्रतिक्रम्य, तदतिक्रम्य पातकम् । मुनिस्तीव्रं तपस्तप्त्वा, दिवमायुःक्षयादगात् ।।६१।।

स भूरमणजीवस्तु, स्वयम्भूरमणार्णवे । अप्रतिष्ठाननरका-दुद्धृत्तस्तिमितां गतः ।।६२।।

स तिमिः सप्तमीमेव, जगाम जगतीं ततः । ततोऽप्युद्धृत्य मत्स्योऽभूद्, गतः षष्ठीं च दुर्गतिम्।।६३।।

चण्डालस्त्रीभवं प्राप्य, पुनस्तत्रैव यातवान् । ततः कुम्भीनसो भूत्वा, स भूमीं पञ्चमीं गतः ।।६४।।

पुनर्जगाम तामेव, भुवं मीनभवान्तरः । मृगनाथः स भूत्वाऽथ, तुरीयं निरयं गतः ।।६५।।

पुनस्तत्रैव पाठीन-शरीरान्तरितोऽगमत् । श्येनीभूय तृतीयं स इयाय निरयं ततः ।।६६।।

गृध्रदेहं गृहीत्वाऽथ, गतस्तामेव दुर्गतिम् । द्वितीयां भुजगो भूत्वा, जगाम जगतीं च सः ।।६७।।

सोऽगमद्भोगभृद्भूय तत्र भूयोऽपि दुर्गतौ । तिमीभूयाऽगमदसौ, प्रथमां पृथिवीमथ ।।६८।।

अजायत स जीवोऽथ, पक्ष्येको विकलेन्द्रियः । हीनेन्द्रियश्च यस्तिर्यग्, नीचजातिर्नरः सुरः ।।६९।।

[२]नारकश्चेति शतशः, सोऽभूद् भवचरश्चिरम् । नानायोनिभवां भूरि-पराभूतिं समाश्रयत् ।।७०।।

आकुलः कष्टकोटीभिर्बन्धव्यथवधादिभिः । भवे भवे स पञ्चत्व-मवाप व्यापदां पदम् ।।७१।।

इत्यापदोऽतिगहनाः, सहमानेन संसृतौ । तेन बह्व्योऽवसर्पिण्य उत्सर्पिण्यश्च निन्यिरे ।।७२।।

सोऽकामनिर्जराक्षाम-कर्माथ तनुभूरभूत् । गृहिणः सिंहदत्तस्य, वसन्तपुरवासिनः ।।७३।।

तारुण्ये तापसीभूय, तपस्तप्त्वा स दुस्तपम् । फलं त्वज्ञानकष्टस्य, प्राप त्वत्पुत्रतामयम् ।।७४।।

ऋषिघातप्रवचन-द्वेषजं पापमेष तत् । तीव्राभिः कष्टकोटीभि-स्ताभिस्ताभिरशोषयत् ।।७५।।

तेन शोषितशेषेण, दुरितेन तवात्मजः । अयं बभूव भूपाल रोगजालस्य भाजनम् ।।७६।।

इत्युक्तिं दुःश्रवां श्रुत्वा, चकम्पे चकितो नृपः । स विक्रमकुमारस्तु, जातजातिस्मृतिर्जगौ ।।७७।।

विवेकदीपमप्राप्य, प्रभो ! मोहतमोहतः । हा हा कष्टमहासिन्धौ, मार्गभ्रष्टः पुरापतम् ।।७८।।

इतश्चेतश्च चण्डाभि-स्ताड्यमानस्तदूर्मिभिः । दैवात्तत्तीरमेत्यास्मिन्, मग्नो रुक्पङ्कसंकटे ।।७९।।

जगद्गुरो करालम्बं तद्यच्छानवलम्बितम् । आकर्ष मामितः स्वामिन्, निरीह करुणां कुरु ।।८०।।

सम्यक्त्वैकगुणप्रोत-द्वादशव्रतभूषणम् । श्राद्धधर्ममथो हस्त-मिव व्यस्तारयद्विभुः ।।८१।।

रोमहर्षांकुराकीर्णो, हर्षाश्रुकणमिश्रदृक् । जग्राह श्रावकं धर्मं विक्रमोऽथ यथाविधिम् ।।८२।।

भूपोऽभूद्भद्रको नत्वा, तौ मुनिं परमीयतुः । व्यहरद्वसुधां बोधि-सुधाम्भोधिस्ततो मुनिः ।।८३।।

धर्मद्रुमूलसम्यक्त्व-रसास्वादकृतादरः । छिन्नाघकन्दैर्मुमुचे व्याधिभिर्विक्रमः क्रमात् ।।८४।।

नवोल्लासितलावण्य - पुण्यसर्वाङ्गचङ्गिमा । धर्मालङ्करणः सोऽभून्मुक्तेरपि मनोरमः ।।८५।।

---

२. सुरनारकयोरन्तरे भवान्तरं ज्ञेयम् अन्यथा सुरो मृत्वा नारको न जायत एव । संपा०

निशाशेषेऽन्यदा यक्षः, प्रत्यक्षः स जगाद तम् । मच्छक्त्या सज्जदेहोऽसि, देहि मे महिषान् शतम् ।।८६।।

तमूचे विक्रमो याचन्, लूलायान् किं न लज्जसे । जज्ञेऽङ्गं मुनिदिष्टेन सज्जं धर्मौषधेन मे ।।८७।

धर्माख्यमौषधं दृष्ट - प्रत्ययं कष्टतोऽर्जितम् । जीवव्यापादपापाब्धौ यक्ष ! कः क्षिपति प्रधीः ।।८८।।

आचचक्षे च यक्षेशो ददास्यन्यस्य मद्यशः । ततस्तत्ते करिष्यामि, कामं येनानुतप्यसे ।।८९।।

इत्युदित्वा तिरोभूते, यक्षे दक्षैकशेखरः । अनाकुलमनाश्चक्रे, कृत्यकर्माणि विक्रमः ।।९०।।

तत्रामरनिकेताख्यो-द्यानश्रीशेखरेऽन्यदा । जिनागारे कुमारेन्दुर्ययौ, कल्याणकोत्सवे ।।९१।।

ततः स्नात्रविलेपार्चा-प्रेक्षणीयस्तवक्षणैः । जिनेन्दोर्जनयित्वैष, यात्रां यावन्न्यवर्त्तत ।।९२।।

अस्तम्भयद्भयव्यग्रं, तावत्तस्याऽखिलं बलम् । निजक्रीडावनक्रोडे, स धनञ्जयगुह्यकः ।।९३।। युग्मं।।

यमाग्निकौणपध्वा-कोटिक्लृप्ता मिवाथ सः । हताम्बरचरस्फूर्तिं मूर्तिं निर्माय मायया ।।९४।।

रोषप्लोषितया भीष्म-घनघर्घरघोषया । तं क्षोणिपसुतं यक्षः, साक्षेपमिदमब्रवीत् ।।९५।। युग्मं।।

न रे नराधम ! कथं, ददासि मम कासरान् । आयुः काण्डमकाण्डेऽपि, समापयसि किं स्वकम् ।।९६।।

स्मितधौताधरोऽधत्त, कुमारो भारतीमथ । भो यक्ष ! न क्षिपामि स्वं तनुमद्घातपातके ।।९७।।

अप्यारब्धबहुत्राणाः प्राणाः कस्यापि न स्थिराः । तत्कृत्याकृत्यवित् कुर्यादकृत्यं तत्कृतेऽपि कः ।।९८।।

इत्याकर्ण्य क्रुधा यक्षो विक्रमं क्रमसङ्ग्रहात् । उत्पाट्यास्फालयद्वीची-मिवाभ्यर्णाचलेऽर्णवः ।।९९।।

मूर्छामुच्छिद्य यक्षस्तं क्रुधान्धः पुनरभ्यधात् । रे ! रे ! ददासि नाद्यापि, किं मद्देयमदेयवत् ।।१००।।

कृपां करोषि जीवेषु, स्वजीवे न करोषि किम् । मद्वध्यतां गतेऽमुष्मिन्, धर्माविष्कारकारणे ।।१०१।।

धर्माधारः कुमारोऽथ, गिरं जग्राह साहसी । स्वैकजीवकृते जीव-शतं को हन्ति धर्मवित् ।।१०२।।

फलं तवापि धिग् यक्ष ! जीवलक्षनिपातनैः । इहामगन्धिकं धाम, परत्र नरकव्यथा ।।१०३।।

त्वं धर्मादेव देवत्वं यातोऽसि प्राग्भवं स्मर । पातके जातकेलिस्तत्किमसि ज्ञानवानपि ।।१०४।।

पुण्यैकपरिणामेन, जगदुल्लासहेतुना । तवापि युज्यते धर्तुमानन्दं वन्दनादिना ।।१०५।।

इति तस्योक्तिभिर्युक्ति-भिन्नाभिर्भिन्नमानसः । यक्षोऽभ्यधादहो साधु, त्वयाऽहं प्रतिबोधितः ।।१०६।।

ततो नाद्यादि माद्यामि, पापार्हैरङ्गिनां वधैः । नृणां प्रणाममात्रेण, गमिष्यामि प्रसन्नताम् ।।१०७।।

कुरु त्वमपि मे नाम प्रणाममलाशया । तेनैव तेऽनुमंस्येऽहं संपूर्णमखिलं खलु ।।१०८।।

कुमारोऽथ जगौ यक्ष ! नमस्कारो हि पञ्चधा । प्रहास-विनय-प्रेम-प्रभु-भावप्रभेदभाक् ।।१०९।।

स प्रहासप्रणामः स्याच्चित्तोत्सङ्गितमत्सरैः । यः क्रियेत परिज्ञात-विक्रियेभ्योऽपि सत्क्रियैः ।।११०।।

तमामनन्ति विनय-प्रणामं नयपण्डिताः । पित्रादिभ्यो विधीयेत, पुत्राद्यैर्विनयेन यः ।।१११।।

प्राहुः प्रेमप्रणामं तं प्रणयिभ्यः क्रियेत यः । कामं सप्रेमकोपेभ्यो मित्रादिभ्यः प्रसत्तये ।।११२।।

यस्तु स्वामिनि संमान-मानश्रीदानशालिनि । ऐहिकः क्रियते स्वामिन्नमस्कारमुशन्ति तम् ।।११३।।

यः सद्गुरौ च देवे च, वीतरागे विरच्यते । तं तु भावनमस्कारं निर्दिशन्ति विशारदाः ।।११४।।

विचारय त्वमेतेषु कं नमस्कारमर्हसि । इत्याकर्ण्य कुमारोक्ति-मभ्यधत्त धनञ्जयः ।।११५।।

त्वं कुमार ! नमस्कारं कुरु भावमयं मयि । यद्देवोऽस्मि जगत्कार-संहारोद्धारकारणम् ।।११६।।

भवार्णवसमुत्तार-तरीभूतविभूतयः । मदंशा एव भासन्ते, सर्वदर्शनदेवताः ।।११७।।

मन्त्रमस्कारमात्रेण, तव संसारसागरः । विक्रम क्रमलंघ्यत्व-मनुल्लंघ्यो गमिष्यति ।।११८।।

अथाब्रूत स्मितस्यूत-वदनो नृपनन्दनः । मयाकृष्टः क्रियापापाद्वाक्पापे यक्ष ! मा पत ।।११९।।

जगतां सृष्टिसंहारोद्धाराः सन्ति न सन्ति वा । इति सम्यग् न जानासि, स्वमाख्यासि च तत्क्षमम् ।।१२०।।

यदङ्गमहसा दृष्टिः, सहसा तव लुप्यते । तैः सुरेन्द्रैः स्तुतान्ख्यासि स्वांशान्दर्शनदेवताः ।।१२१।।

स्वयं भवाब्धौ मत्स्यस्त्वं, चापलेनोपलक्ष्यसे । नमस्कारात्तदुत्तारं कुतो दिशसि मे ततः ।।१२२।।

वचसा निष्फलेनैव, तत्पापं मा वृथा कृथाः । भवेन्मम नमस्कारो भवेऽस्मिन्न जिनं विना ।।१२३।।

इति वादिनि यक्षेन्दुर्मेदिनीनाथनन्दने । गिरं जागरयामास, विवेकविमलामिमाम् ।।१२४।।

ददृशे त्वादृशः कोऽपि पुमाननुपमाकृतिः । धीरो धर्मी च वाग्मी च, राजपुत्र ! न कुत्रचित् ।।१२५।।

जितस्त्वयाहं वचनै-स्तेनास्मि तव किङ्करः । शुद्धधर्मोपदेशाच्च, मम त्वमसि सद्गुरुः ।।१२६।।

स्वचित्तकोणं वासाय, निजदासाय यच्छ मे । त्वच्छिष्यो यदि जानामि, तद्गतां त्वद्गुणावलीम् ।।१२७।।

विभो ! विरहयिष्यामि, निजं चेतो न च त्वया । कदापि यदि वेत्तीदं जिनसेवोत्सवं तव ।।१२८।।

भर्त्तः ! स्मर्त्तव्य एवाहमुत्कटे संकटे क्वचित्। अयमेव हि भृत्यानां स्वामिन्यवसरः परः ।।१२९।।

इत्युदित्वैनमापृच्छ्यावगूह्य च स गुह्यकः । ययौ निजाश्रयं चित्र - तच्चरित्रचमत्कृतः ।।१३०।।

ततः प्रत्यूषशेषायां रजन्यां राजपुङ्गवः । द्रुतं विज्ञातवृत्तान्तः, कुमारोपान्तमापतत् ।।१३१।।

मुदा कुमारमालिंग्य, पत्तनाय निनाय सः । बालार्करश्मिकाश्मीर-नीरश्रीरम्यया भुवा ।।१३२।।

प्रत्यध्वपौरगौरांगीदृक्-तामरसतोरणे । कुमारमुत्सवेनाथ, नृपः प्रावीविशत्पुरे ।।१३३।।

कालेन केनचिद्राज्य-भारमारोप्य विक्रमे । जगाम नामशेषत्व-मेष भूपालपुङ्गवः ।।१३४।।

कुर्वन्ननित्यताध्यान-सुधासिन्धूर्मिमज्जनम् । पितृशोकाग्निजं ताप-ममुञ्चद्विक्रमो नृपः ।।१३५।।

विवेकं पितृशोकाग्नि-विशेषविशदं ततः । हृदलङ्करणं चक्रे, निष्कवद्विक्रमो नृपः ।।१३६।।

न्यायकल्पद्रुमाराम-च्छायामध्ये निवेश्य भूः । तेनाभूष्यत सर्वाङ्ग-मर्हद्गृहविभूषणैः ।।१३७।।

सप्तव्यसननिर्मुक्त-ममुक्तसुकृतोद्यमम् । अभूद्भूपेऽत्र भूपीठं राजन्ते राजवत्प्रजाः ।।१३८।।

आगात्तद्देशभङ्गाय, कलिङ्गाधिपतिर्यमः । कदाप्याकस्मिकापातः, सन्निपात इवोत्कटः ।।१३९।।

दूरं देवस्य कस्यापि, प्रभावादद्भुतौजसा । हरिः सहरिणेनेवा-चक्रमे तेन विक्रमः ।।१४०।।

शूरमण्डलतेजांसि, दूरयन्सैन्यरेणुभिः । विक्रमोऽथ धरित्रीन्दुरभ्यमित्रीणतां गतः ।।१४१।।

यमविक्रमयोर्जाग्र-दुग्रविक्रमकर्मणोः । तयोः प्रववृते वीर-सिंहसंहरणो रणः ।।१४२।।

जातदेवानुभावौजःसंक्रमो विक्रमं यमः । जितोत्कटचमूकोटि-र्विकटे संकटेऽनयत् ।।१४३।।

पादान्ते ढौकणीकृत्य, कृतदोःसंयमं यमम् । स्मृतिमात्रागतो यक्ष-स्तदा विक्रममैक्षत ।।१४४।।

हीनोद्यमं दीनमुखं विद्विषं वीक्ष्य विक्रमः । बन्धादुन्मोच्य देशाया-दिदेशाढ्य कृपाशयः ।।१४५।।

मानयित्वा च नत्वा च, यक्षमक्षीणसौहृदम् । अनुज्ञाय निवासाय, स्वपुरायाचलन्नृपः ।।१४६।।

पुर्या मङ्गलशृङ्गार-हृद्याया हृदयेऽविशत् । प्रतोलीदृक्पथेनाथ भूनाथः कीर्तिभूषणः ।।१४७।।

तस्मिन्राजनि राजन्तः, पौराः सौराज्यसम्पदा । महोत्सवैर्दिवो देवान्, धरामानिन्यिरेऽन्वहम् ।।१४८।।

व्रजन् भूपोऽन्यदा बाह्यावनीं वाह्यालिकेलये । किमप्योकः क्षणक्षीवा-स्तोकलोकमलोकत ।।१४९।।

वाहयित्वा हयान्भूपो वलमानस्तदैव सः । अमन्दाक्रन्दसन्दर्भ-गर्भमैक्षत मन्दिरम् ।।१५०।।

विस्मयव्याकुलेनैको नरः पार्श्वचरस्ततः । पृष्टस्तत्कारणं राज्ञा, विज्ञायेति व्यजिज्ञपत् ।।१५१।।

स्वामिन्नेतद्गृहेशस्य, महेभ्यस्य गतेऽहनि । अपुत्रकस्य पुत्रोऽभूदन्धस्येव दृगुद्गमः ।।१५२।।

इदानीमेव वाह्यालि-विलासगमनक्षणे । तन्निमित्तभवोऽदर्शि, देवेनेह महोत्सवः ।।१५३।।

अधुनैव पुनर्दैव-योगतः स मृतः शिशुः । तद्वियोगार्त्तिमार्गेण, तत्पितापि तमन्वगात् ।।१५४।।

तत्कुटुम्बजनः सर्वः, पुत्रजन्मोत्सवागतः । प्रत्युत द्विगुणे दुःखे पतितो रारटीत्ययम् ।।१५५।।

भवनाटककौटिल्या-दथोत्कण्टकविग्रहः । अव्याकुलचलच्चेताः, क्षितिनेता व्यचिन्तयत् ।।१५६।।

विदामप्यपरिच्छेद्या संसारस्य विचित्रता । जनोऽयं चिन्तयत्युच्चै - रन्यदन्यच्च जायते ।।१५७।।

सुखाय च्छायामायाति, ग्रीष्मतापातुरस्तरोः । नरस्तत्कोटरस्थेन, दश्यते हा ! महाहिना ।।१५८।।

वहत्यहो नरः शस्त्रं रिपोर्दारणकारणम् । कदाचिदेष तेनैव दैवात्तेनैव हन्यते ।।१५९।।

मनोरथानुरूपं यत्, फलमाप्नोति कश्चन । महाविडम्बनाजाल - क्षेपविश्वासकं हि तत् ।।१६०।।

एकान्तदुःखदे लोको, विरज्य मयि मुक्तये । मा धावत्विति संसारो दत्ते सुखकणानपि ।।१६१।।

या संसारसुखावाप्ति-र्दुरन्तैव नरस्य सा । मत्स्यस्य गलिकायन्त्र-नियुक्तकवलोपमा ।।१६२।।

अयं जनो मनो लोलं, कथं नु कथयत्यदः । भवभावेषु यद्वज्र-लेपेनेव नियन्त्रितम् ।।१६३।।

अलोकव्योम्नि ये लोक-व्योम क्षेप्तुं क्षमा जिनाः । तदाश्रयबलाच्चित्तं कृषामि भवभावतः ।।१६४।।

इति ध्यायन्ययौ धाम, त्वरितं नृपविक्रमः । चन्द्रसेनं सुतं राज्ये, न्यस्य तस्थौ व्रतोत्सुकः ।।१६५।।

ज्ञानविज्ञाततद्भावः, स्वभावकरुणाकरः । सद्गुरुः केवली काले, तत्र तत्क्समामदत् ।।१६६।।

तद्वार्त्तावादिनं दानै-रानन्द्योद्यानपालकम् । विक्रमः प्रमदस्मेरो जगामारामसुत्सुकः ।।१६७।।

सोऽथ प्रदक्षिणीचक्रे, गुरुं कर्मेन्धनानलम् । चित्रानुरागसम्बद्धां श्रद्धां परिणमन्निव ।।१६८।।

नत्वा गुरुं धराजानि-र्यथायुक्तमथासनम् । भेजे रेजे च तद्वाणीवृष्टिसम्पातचातकः ।।१६९।।

अथ व्रतार्थमभ्यर्थ्य यतीशं जगतीपतिः । प्रभावनार्थं तीर्थस्य, जगाम नगरं पुनः ।।१७०।।

धनञ्जयाख्ययक्षेश-कृतसान्निध्यबन्धुरः । सुरासुरचमत्कार-करोदारमहोत्सवः ।।१७१।।

प्रभावनाभिर्यक्षेन्द्र-कृताभिः सुकृताब्धिभिः । वैधर्मिकैरपि स्तुत्यं जनयञ्जिनशासनम् ।।१७२।।

पुराद्गुरुमगाद्भूपः, सिद्धिलोभनरूपभाक् । भेजे भवशिरःशूलं मूलं ज्ञानतरोर्व्रतम् ।।१७३।।

त्रिभिर्विशेषकम् ।।

नृचन्द्रे चन्द्रसेनेऽथ, नत्वा नगरगामिनि । विजहार महीं राज-महर्षिर्गुरुभिः सह ।।१७४।।

श्रद्धाशुद्धतपाः शुद्ध - सिद्धान्तपठनक्रमः । बोधयित्वा धरां ज्ञानी, स परं पदमासदत् ।।१७५।।

इति तत्त्वेन सम्यक्त्वं सेव्यं विक्रमवत्ततः । जनो येन भवत्याशु, लोकद्वयभयव्ययः ।।१७६।।

।। इति सम्यक्त्वे विक्रमराजकथा।।

[इइ धरह सम्मत्तं]

[छव्विह-आवस्सयंमि]

[४-षड्विधावश्यकम्]

"[1]आरंभाण निवारणं सुहमणोवित्तीइ जं कारणं,
अक्खारीण निसेहणं दिणनिसापच्छित्तसंसोहणं ।
कम्माणं मुसमूरणं तवसिरीभंडारसंपूरणं,
ते धन्ना भवनासयं पइदिणं सेवंति आवस्सयं ।।" [ ]

"[2]आवस्सयमुभयकालं ओसहमिव जे कुणंति उज्जुत्ता ।
जिणविज्जकहिअविहिणा अकम्मरोगा ते हवंति ।।" [सुक्तमुक्तावली-२/१३]

इत्युक्तेरहो भविकाः ! **षड्विधावश्यककरणप्रवणाः प्रतिदिवसं भवन्तु ।** सामायिकादिषड्विधावश्यककरणसम्भवे सामग्र्यां सत्यां गुरुसाक्षिकमेव कार्यम् । यतो गुरुसमीपे सर्वाण्यपि धर्मानुष्ठानानि महाफलानि जायन्ते । अगुरवस्तु -

"[3]सचित्तजल-फलाई भक्खइ आवस्सयं च न करेइ[१] ।
विहि[२]अकुधम्मपसंसो चेइयदव्वं च भक्खेइ ।।
[4]पुत्थं करेइ निच्चं, सावज्जं भासइ पयडदव्वो ।
चिगिच्छय दुट्ठवेसो, अबंभयारी असाहू सो ।।" [ ]

तथा योगशास्त्रे -

"सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।
अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ।।" [योगशास्त्र-२/९]

---

१. 'कहेइ.' हस्तप्रतौ । २. 'कृतकुधर्मप्रशंसः' इत्यर्थः ।

1. आरम्भानां निवारणं शुभमनोवृत्तेः यत्कारणम्; अक्षारीणां निषेधनं दिननिशाप्रायश्चित्तसंशोधनम् । कर्माणां भञ्जनं तपःश्रीभाण्डागारसम्पूरणम्; ते धन्या भवनाशकं प्रतिदिनं सेवन्तेऽऽवश्यकम् ।।
2. आवश्यकमुभयकालमौषधमिव ये कुर्वन्ति उद्युक्ताः । जिनवैद्यकथितविधिना अकर्मरोगाः ते भवन्ति ।।
3. सचित्तजलफलानि भक्षयत्यावश्यकं च न करोति । विहितकुधर्मप्रशंसश्चैत्यद्रव्यं च भक्षयति ।।
4. पुस्तं करोति नित्यं सावद्यं भाषते प्रकटद्रव्यः । चिकित्सको दुष्टवेषोऽब्रह्मचारी असाधुः सः ।।

साधुलक्षणं त्वेवम् –

"महाव्रतधरा धीरा, भैक्षमात्रोपजीविनः।
सामायिकस्था धर्म्मोप-देशका गुरवो मताः ।।" [योगशास्त्र-२/८]

एवमुभयोर्लक्षणं ज्ञात्वाऽनादरणीयाननादृत्याऽऽदरणीयानादृत्य [सर्वाण्यपि धर्मानुष्ठानानि गुरुसाक्षिकमेव कर्तव्यानि ।] गुरोरभावे तु -

[5] **"गुरुविरहंमि अ ठवणा गुरूवएसोवदंसणत्थं च ।**
जिणविरहंमि व जिणबिंबसेवणामंतणं [३] सहलं ।।" [गुरुवन्दनभाष्य-३०]

[6] **"रन्नो व परुक्खस्स वि जह सेवा मंतदेवयाए वा ।**
तह चेव परुक्खस्स वि गुरुणो सेवा विणयहेऊ ।।"[वि.आ.भा.-३४६५, ३४६६]

[7] **"अक्खे वराडए वा, कट्ठे पुत्थे अ चित्तकम्मे अ ।**
सब्भाव-मसब्भावं, [४] गुरुठवणा-इत्तरावकहा ।।" आ.नि.-१४३२, ओ.नि.-३३५]

स्थापनाचार्यस्थापनाभावे श्रावकाणां साधूनामपि सामायिकाद्यावश्यकं कुर्वतां 'करेमि भंते सामाइयं' इति भंते - गुर्वामन्त्रणं कथं युक्तं स्यात् ? तथा विधिभूत-स्थापनाचार्याभावे वन्दनकदाने 'अणुजाणह मे मिउग्गहं' इत्यादिनावग्रहानुज्ञापनम्, अवग्रहान्तर्द्विर्वारं प्रवेश एकवारं निर्गमश्चतुःशीर्षकाद्यावश्यकानि च वन्दनकेऽवश्य-विधेयानि कथं घटमानकानि स्युः ? इत्येतत्सम्यग्विचार्य गुरुविरह एव स्थापनाचार्य-स्थापनापूर्वमेव क्रियमाणं फलवत्स्यादिति विशेषावश्यकादिषूक्तम् ।

[8] **"समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा ।**
अंतो अहो-निसिस्स उ तम्हा आवस्सयं नाम ।।" [वि.आ.भा.-८७६]

---

३. 'सफलं' विशेषा० भाष्ये । ४. 'ठवणाकायं वियाणाहि' आवश्यकनिर्युक्तौ, 'ठवणापिण्डं' पिण्ड०, ओघनिर्युक्तौ ।

5. **गुरुविरहे च स्थापना गुरूपदेशोपदर्शनार्थं च । जिनविरहे इव जिनबिम्बसेवनामन्त्रणं सफलम् ।।**

6. **राज्ञ इव परोक्षस्यापि यथा सेवा मन्त्रदेवताया वा । तथैव परोक्षस्याऽपि गुरोः सेवा विनयहेतुः ।।**

7. **अक्षे वराटके वा काष्ठे पुस्तके च चित्रकर्मणि च । सद्भावमसद्भावं गुरुस्थापना इत्वरा यावत्कथा ।।**

8. *श्रमणेन श्रावकेण चावश्यकर्तव्यकं भवति यस्मात् । अन्तरहर्निशं तु तस्मादावश्यकं नाम ।।*

तथा -

"[9]से किं तं लोउत्तरियं भावावस्सयं ? लोउत्तरियं भावावस्सयं जं णं समणो वा समणी वा सावओ वा साविआ वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए [५]तत्तिव्वज्झवसाणे तदट्ठोवउत्ते तदप्पिअकरणे तब्भावणाभाविए अन्नत्थ कत्थइ मणं अकुव्वमाणे उभओकालं आवस्सयं करिन्ति ।"

इत्यनुयोगद्वारसूत्रे । एतस्य वृत्तिः -

यदिदं श्रमणादयस्तच्चित्तादिविशेषणविशिष्टा उभयकालं प्रतिक्रमणाद्यावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावावश्यकम् । [मलधारिहेमचन्द्रसूरिवृत्त्यंशसमेतमनुयोगद्वारसूत्र-२८]

अत्र सूत्रे वृत्तौ च साधूनां श्रावकाणां च प्रतिक्रमणाद्यावश्यकं समानमेव कथितम्, ततः साधूनामिव श्रावकाणामपि दैवसिक-रात्रिक-पाक्षिक-चातुर्मासिक-सांवत्सरिकरूपं पञ्चविधावश्यकं कृतं विलोक्यते । श्रावकाणामन्यो भिन्नः सम्पूर्णषडावश्यकविधिः सिद्धान्ते क्वापि नास्तीति ज्ञेयम् । तथा श्रावकप्रज्ञप्तौ श्रीहरिभद्रसूरिकृतायाम् -

इह विश्रमणनिर्व्यापारत्वयोर्दिनेन गृहस्थानामेकशो द्विस्त्रिश्चतुर्वा सम्भवनियमोऽस्ति, अतो यावत्कृत्वो विश्रमणनिर्व्यापारत्वसम्भवस्तावत्कृत्वः सर्वत्र सामायिकं करोति । तथा -

"[10]जाहे खणिओ ताहे करेइ तो से न भज्जइ ।" इत्यावश्यकचूर्णौ ।

---

५. 'तद्ज्झवसाणे' हस्त० ।

9. तस्य किं तं लोकोत्तरिकं भावावश्यकम् ? लोकोत्तरिकं भावावश्यकं यं तु श्रमणो वा श्रमणी वा, श्रावको वा श्राविका वा तच्चित्तस्तन्मना तल्लेश्यस्तदध्यवसितस्तत्तीव्राध्यवसानस्तदर्थोपयुक्तस्तदर्पितकरणस्तद्भावनाभावितोऽन्यत्र कुत्रचिन्मनोऽकुर्वनुभयकालमावश्यकं कुर्वन्ति ।

10. यदा खनितो तदा करोति तस्मात् स न भज्यते ।

तथा -

[11] "भारं णं वहमाणस्स चत्तारि आसासा पन्नत्ता, तं जहा - जत्थ णं अंसाओ अंसं साहरइ तत्थ वि अ से एगे आसासे पन्नत्ते-१, जत्थ वि अ णं उच्चारं वा पासवणं वा परिट्ठावेति तत्थ वि अ से एगे आसासे पन्नत्ते-२, जत्थ वि अ णं णागकुमारावासंसि वा सुवन्नकुमारावासंसि वा वासं उवेति तत्थ वि अ से एगे आसासे पन्नत्ते-३, जत्थ वि अ णं आवकहाए चिट्ठइ तत्थ वि अ से एगे आसासे पन्नत्ते-४ ।

[12] एवामेव समणोवासगस्स चत्तारि आसासा पन्नत्ता, तं जहा-जत्थ णं सीलव्वय-गुणव्वयवेरमणपच्चक्खाणपोसहोववासाइं पडिवज्जइ तत्थ वि अ से एगे आसासे पन्नत्ते-१, जत्थ वि अ णं सामाइअं देसावगासिअं सम्ममणुपालेइ तत्थ वि अ से एगे आसासे पन्नत्ते-२, जत्थ वि अ णं चाउद्दसट्ठमुद्दिट्ठपुन्नमासिणीसु पडिपुन्नं पोसहं सम्मं अणुपालेइ तत्थ वि अ से एगे आसासे पन्नत्ते-३, जत्थ वि अ णं अपच्छिममारणंतितसंलेहणाजूसणाजूसिते भत्तपाणपडितातिक्खिते पाओवगते कालमणवकंखमाणे विहरति तत्थ वि अ से एगे आसासे पन्नत्ते-४ ।" [ठाणांग-४/३/३१४]

[इइ छव्विह-आवस्सयं]

---

11. भारं वहमानस्य चत्वार आश्वासाः प्रज्ञप्ताः । ते यथा - यत्र अंसात् [एकस्मात् स्कंधात्] अंसं संहरति तत्राऽपि च तस्य [वोढुम्] एक आश्वासः प्रज्ञप्तः -१, यत्राऽपि उच्चारं वा प्रस्रवणं वा परिष्ठापयति तत्रापि च तस्य एक आश्वासः प्रज्ञप्तः -२, यत्राऽपि नागकुमारावासे वा सुवर्णकुमारावासे वा वासमुपैति तत्राऽपि च तस्य एक आश्वासः प्रज्ञप्तः-३, यत्रापि [मनुष्योऽयं देवदत्तादिर्वा] यावत्कथया [यावज्जीवं] तिष्ठति तत्राऽपि च तस्य एक आश्वासः प्रज्ञप्तः-४ ।

12. एवमेव श्रमणोपासकस्य [सावद्यव्यापारभाराक्रान्तस्य] चत्वार आश्वासा [चित्तस्य आश्वासनानि] प्रज्ञप्ताः, ते यथा - यत्र शीलव्रत-[शिक्षाव्रत-] गुणव्रत-विरमणप्रत्याख्यान-पौषधोपवासादीन् प्रतिपद्यते तत्राऽपि च तस्यैक आश्वासः प्रज्ञप्तः -१, यत्रापि च सामायिकं देशावकाशिकं [च] सम्यगनुपालयति तत्रापि च तस्यैक आश्वासः प्रज्ञप्तः -२, यत्रापि च चतुर्दशि-अष्टमी-उद्दिष्ट-पूर्णिमामावास्यासु परिपूर्णं [अहोरात्रं यावत्] पौषधं सम्यगनुपालयति तत्रापि च तस्यैक आश्वासः प्रज्ञप्तः -३, यत्रापि च अपश्चिममारणान्तिकीसंलेखनाजुषणाजुष्टः [सेवनालक्षणो यो धर्म्मस्तया सेवितः क्षपितः वा देहः येन सः] भक्त-पानप्रत्याख्यातः पादोपगतः [अनशनविशेषे प्रतिपन्ने सति मरण-] कालम् अनवकाङ्क्षमानः विहरति तत्रापि चैक आश्वासः प्रज्ञप्तः -४ ।

[१-छव्विह-आवस्सयंमि]

[४-सामायिकावश्यकम्]

सामायिकविधिमाह -

"त्यक्तार्त्त-रौद्रध्यानस्य त्यक्तसावद्यकर्मणः ।
मुहूर्त्तं समता या तां विदुः सामायिकव्रतम् ।।" [योगशास्त्र-३/८२]

इह श्रावकः सामायिककर्त्ता द्विविधः स्यात् - ऋद्धिमाननृद्धिकश्च । तत्रानृद्धिकः स चतुर्षु स्थानेषु सामायिकं करोति-जिनगृहे, साधुसमीपे, पौषधशालायाम्, स्वगृहे वा, यत्र वा विश्राम्यति निर्व्यापारो वाऽऽस्ते तत्र च सामायिकं करोति । साधु-समीपकरणेऽयं विधिः - यदि कस्माच्चिदपि भयं नास्ति, केनचिद्विवादो नास्ति, ऋणं वा न धारयति, मा भूत् तत्कृताकर्षणापकर्षणनिमित्तश्चित्तसंक्लेशः, तदा स्वगृहेऽपि सामायिकं कृत्वा ईर्यां शोधयन्, सावद्यां भाषां परिहरन्, काष्ठलेष्ठ्वादिना यदि कार्यं तदा तत्स्वामिनमनुज्ञाप्य प्रतिलिख्य प्रमार्ज्य च गृह्णन्, खेल-सिङ्घाणकादींश्चाविवेचयन् विवेचयंश्च स्थण्डिलं प्रत्युप्रेक्ष्य प्रमृज्य च, एवं पञ्चसमितिसमितस्त्रिगुप्तिगुप्तः साध्वाश्रयं गत्वा साधून्नमस्कृत्य सामायिकं करोति । यथा- 'करेमि भंते ! सामाइअं सावज्जं जोगं पच्चक्खामि' इत्यादि । तस्याधिकृतस्य सामायिकं करोतीति । योगस्य त्रिकालविषयस्यातीतमवयवं 'प्रतिक्रमामि' निवर्त्ते इत्यर्थः । आत्मसाक्षिकी निन्दा, गुरुसाक्षिकी गर्हा । भंते इति भदंत, कल्याणिन्, भवान्त इति वा । इदं च पुनर्गुरोरामन्त्रणं भक्त्यतिशयख्या-पनार्थमपुनरुक्तम्, सामायिकक्रियाप्रत्यर्पणाय वाऽनेनैतज्ज्ञापितं सर्वक्रियावसाने गुरोः प्रत्यर्पणं कार्यमिति।

[उक्तं च भाष्यकारेण -

"[1]सामाइयपच्चप्पणवयणो वाऽयं भयंतसद्दो त्ति ।
सव्वकिरियावसाणे भणियं पच्चप्पणमणेण ।।"] [विशेषावश्यकभाष्य-३५७१]

---

1. सामायिकप्रत्यर्पणवचनो वाऽयं भदन्तशब्द इति । सर्वक्रियावसाने भणितं प्रत्यर्पणमनेन ।।

आत्मानमतीतकालसावद्ययोगकारिणं व्युत्सृजामि, अत्र 'करेमि भंते सामाइयमि'ति वर्तमानस्य सावद्ययोगस्य प्रत्याख्यानम्, 'सावज्जं जोगं पच्चक्खामी'त्यनागतस्य, 'तस्स भंते पडिक्कमामी'त्यतीतस्येति त्रैकालिकं प्रत्याख्यानमुक्तम् । उक्तं च -

"[2]अईयं निंदामि, पडुपन्नं संवरेमि, अणागयं पच्चक्खामि" इति ।

एवं कृतसामायिक ईर्यापथिकीं प्रतिक्रामति, पश्चादागमनमालोच्य यथाज्येष्ठमाचार्यादीन् वन्दते । पुनरपि गुरुं वन्दित्वा प्रत्युपेक्षितासने निर्विष्टः श्रुणोति, पठति, पृच्छति वा । एवं चैत्यभवनेऽपि द्रष्टव्यम् । यदा तु स्वगृहे पौषधशालायां वा सामायिकं गृहित्वा तत्रैवाऽऽस्ते तदा गमनं नास्ति ।

यस्तु राजादिर्महर्द्धिकः स गन्धसिन्धुरस्कन्धाधिरूढ-च्छत्र-चामरादि[१]राज्यालङ्करणालङ्कृतो हस्तिकाऽश्वीय-पदाति-रथकोट्या परिकरितो भेरीभाङ्कारभरिताम्बरतलो बन्दिवृन्दकोलाहलाकुलीकृतनभस्तलोऽनेकसामन्त-मण्डलेश्वराहमहमिकासम्प्रेक्ष्यमाणपादकमलः पौरजनैः [२]सश्रद्धमङ्गुल्योपदर्श्यमानो मनोरथैरुपस्पृश्यमानस्तेषामेवाञ्जलिबन्धान् लाजाञ्जलिपातान् [३]शिरःप्रणाममाननुमोदमानः 'अहो धन्यो धर्मो य एवंविधैरप्युपसेव्यते' इति प्राकृतजनैरुपश्लाघ्यमानोऽकृतसामायिक एव श्रीजिनालयं साधुवसतिं वा गच्छति । तत्र गतो [४]राजककुदानि छत्र-चामर-उपानद्-मुकुट-खड्गादिरूपाणि परिहरति, जिनार्चनं साधुवन्दनं वा करोति । यदि त्वसौ कृतसामायिक एव गच्छेत् तदा गजाऽश्वादिभिरधिकरणं स्यात्; तच्च न युज्यते कर्तुम् । तथा कृतसामायिकेन पादाभ्यामेव गन्तव्यम्, तच्चानुचितं भूपतीनाम्, यत आगतस्य च यद्यसौ श्रावकस्तदा न कोऽप्यभ्युत्थानादि करोति । अथ यथाभद्रकस्तदा पूजा कृताऽस्तु इति पूर्वमेवासनं [५]रच्यते, आचार्याश्च पूर्वमेवोत्थिता आसते, मा उत्थानाऽनुत्थानकृता दोषा भवन्निति, आगतश्चासौ सामायिकं करोतीत्यादि पूर्ववत् ।। श्रीआवश्यकेऽपि-

---

१. '...राज्यलङ्करणा...' हस्त०, '...राजालङ्करण...' योगशास्त्रवृत्तौ । २. 'सश्रद्धमङ्गुल्युपदर्श्यमानो' हस्त० । ३. 'शिरः प्रणामानुमोदमानः' हस्त० । ४. 'राजकुकुदानि' हस्त० । ५. 'मुच्यते' हस्त० ।

2. **अतीतं निन्दामि, प्रत्युत्पन्नं संवृणोमि, अनागतं प्रत्याख्यामि ।।**

"सामाइअं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपडिसेवणं च ।"

सामायिकशुद्धिर्येन प्रकारेण स्यात्तदाह -

"[3]सामाइअं ति काउं, घरवित्तिं जो उ चिंतये सड्ढो ।
अट्टवसट्टोवगओ, निरत्थयं तस्स सामइअं ।।

[4]कडसामाइओ पुव्वं बुद्धीए पेहिऊण भासिज्जा ।
सइ निरवज्जं वयणं अन्नह सामाइअं न भवे ।।

[5]अनिरिक्खियापमज्जिअ थंडिल्ले ठाणमाइ सेवंतो ।
हिंसाभावे वि न सो कडसामाइओ पमायाओ ।।

[6]न सरइ पमायजुत्तो जो सामाइअं कया उ कायव्वं ।
कयमकयं वा तस्स उ कयं पि विफलं तयं नेअं ।।

[7]काऊण तक्खणं चिअ पारेइ करेइ वा जहिच्छाए ।
अणवट्ठिअं सामइअं अणायराओ न तं सुद्धं ।।" [श्रावकप्रज्ञप्ति-३१३-३१७]

केन हेतुना सामायिकाद्यावश्यकानि भव्यैर्विधीयन्ते, तद् हेतुमाह -

"[8]चारित्तस्स विसोही, कीरइ सामाइएण किल इहयं ।
सावज्जेअरजोगाण, वज्जणाऽऽसेवणत्तणओ ।।

---

६. अशुद्धिपरिहारेण शुद्धिः स्यादिति। - संपा० । ७. 'घरचिन्तं' आवश्यकनिर्युक्तौ, 'परचिन्तं' श्रावकप्रज्ञप्तौ, 'गिहकज्जं' सम्बोधसित्तर्याम् । ८. 'पेहितूण भासेज्जा' आवश्यकनिर्युक्तौ । ९. 'अणवज्जं' श्रावकप्रज्ञप्तौ । १०. 'सेवेन्तो' आवश्यकनि० ।

3. सामायिकमिति कृत्वा गृहवृत्तिं यस्तु चिन्तयेत् श्राद्धः । आर्तवशार्तोपगतो निरर्थकं तस्य सामायिकम् ।।
4. कृतसामायिकं पूर्वं बुद्ध्या प्रेक्ष्य भाषेत । सदा निरवद्यं वचनमन्यथा सामायिकं न भवेत् ।।
5. अनिरीक्ष्य-अप्रमृज्य स्थण्डिले स्थानादि सेवमानः । हिंसाभावेऽपि नासौ कृतसामायिकः प्रमादतः ।।
6. न स्मरति प्रमादयुक्तो यः सामायिकं कदा तु कर्तव्यम् । कृतमकृतं वा तस्य तु कृतमपि विफलं तकं ज्ञेयम् ।।
7. कृत्वा तत्क्षणमेव पारयति करोति वा यदृच्छया । अनवस्थितं सामायिकमनादरान्न तच्छुद्धम् ।।
8. चारित्रस्य विशोधिः क्रियते सामायिकेन किल इह । सावद्येतरयोगानां वर्जनाऽऽसेवनातः ।।

'[9] दंसणायारविसोही, चउवीसायत्थएण कज्जई अ ।
अच्चब्भुअगुणकित्तण-रूवेणं जिणवरिंदाणं ।।

[10] नाणाईआ उ गुणा, तस्संपन्नपडिवत्तिकरणाओ ।
वंदणएणं विहिणा, कीरइ सोही अ तेसिं पि ।।

[11] खलियस्स य तेसिं, पुणो विहिणा जं निंदणाइपडिकमणं ।
तेणं पडिक्कमणेणं, तेसिं पि य कीरए सोही ।।

[12] चरणाइआइआणं, जहक्कमं वणतिगिच्छरूवेणं ।
पडिकमणासुद्धाणं, सोही तह काउसग्गेणं ।।

[13] गुणधारणरूवेणं, पच्चक्खाणेण तवइआरस्स ।
विरियायारस्स पुणो, सव्वेहि वि कीरए सोही ।।" [चतुःशरणप्रकीर्णक-२-७]

सामायिकाद्यावश्यकानि सर्वाणि मुखवस्त्रिका-चरवलकाद्युपकरणग्रहण-पूर्वमीर्यापथिकीप्रतिक्रमणपूर्वकाण्येवागमयुक्त्या क्रियमाणानि प्रमाणतयावगम्यते । यतः -

"[14] ववहारावस्सय-महानिसीह-भगवइ-विवाहचूलासु ।
पडिक्कमणचुण्णिमाइसु, पढमं इरिआपडिक्कमणं ।।" [धर्मसङ्ग्रह - ६१ वृत्ति]

"[15] तए णं से पोक्खली समणोवासए जेणेव पोसहसाला जेणेव संखे समणोवासए तेणेव उवागच्छइ, उवागच्छित्ता गमणागमणाए पडिक्कमइ, पडिक्कमित्ता संखं समणोवासगं वंदइ नमंसइ ।" श्रीभगवतीसूत्रे ।

---

9. दर्शनाचारविशोधिश्चतुर्विंशत्यात्मस्तवेन क्रियते च । अत्यद्भुतगुणकीर्त्तनरूपेण जिनवरेन्द्राणाम् ।।

10. ज्ञानादिकास्तु गुणास्तत्सम्पन्नप्रतिपत्तिकरणात् । वन्दनकेन विधिना क्रियते शोधिश्च तेषामपि ।।

11. स्खलितस्य च तेषां पुनर्विधिना यन्निन्दनादिप्रतिक्रमणम् । तेन प्रतिक्रमणेन तेषामपि च क्रियते शोधिः ।।

12. चरणातिगादिकानां यथाक्रमं व्रणचिकित्सारूपेण । प्रतिक्रमणाशुद्धानां शोधिस्तथा कायोत्सर्गेण ।।

13. गुणधारणरूपेण प्रत्याख्यानेन तपोऽतिचारस्य । वीर्याचारस्य पुनः सर्वैरपि क्रियते शोधिः ।।

14. व्यवहारावश्यक-महानिशीथ-भगवती-विवाहचूलासु । प्रतिक्रमणचूर्णिमादिषु प्रथममीर्याप्रतिक्रमणम् ।।

15. ततः स पुष्कली श्रमणोपासको यत्रैव पौषधशाला यत्रैव शङ्खः श्रमणोपासकस्तत्रैवोपागच्छति, उपागम्य गमनागमनया प्रतिक्रमति, प्रतिक्रम्य शङ्खं श्रमणोपासकं वन्दते नमति ।

"ईर्यापथिक्याः प्रतिक्रमणं विना न कल्पते किमपि कर्तुमनुष्ठानम्, तद्विना तदशुद्ध-तापत्तेः ।" श्रीदशवैकालिक- [द्वितीयचूलिका-७]वृत्तौ ।

"[16]उवगओ सिवकुमारसमीवं निसीहिअं काऊण इरिआइपडिक्कंतो बारसावत्तं किइकम्मं करेइ ।" वसुदेवहिंडौ ।

इत्यादिष्वागमेष्वेवं दर्शनेऽपि कैश्चित् कस्मिन्नेकस्मिन् स्थाने सामायिकं कृत्वा ईर्यापथप्रतिक्रमणमुक्तं दृष्ट्वा तामेव वर्णपद्धतिं प्रमाणीकृत्य तथैव विधीयमानमस्ति, सा तु तेषां गणसंप्रदायसामाचार्येव संभाव्यते, अथवा ते एव सम्यग्जानन्ति ।

अथ ये केचन यथाकथञ्चनाऽपि किमपि मतिविपर्यासादिकारणमाश्रित्य निर्मापयन्ति ते तु श्रीकेवलिभिरपि मोचयितुं दुष्करं मादृशैः साम्प्रतीनैः स्वल्पमतिभिः कथं निवारयितुं शक्याः ?

मुखवस्त्रिकाऽपि क्वाप्यागमे श्राद्धानां सर्वथा त्याज्यतया पार्श्व एव स्थापनतया च दृष्टा दृश्यमाना च नास्ति, सांप्रतकालीनैर्मादृशादिभिः, पुरातनैर्वृद्धैः, बहुश्रुतैर्गीतार्थैश्च श्रीआगमानुसारिवर्णपद्धत्या दर्शिताऽपि नास्ति, तथापि कैश्चिद् गृह्यमाणैव नास्ति, कैश्चिच्च पार्श्व एव स्थाप्यमानाऽस्ति ।

यैः सर्वथा त्याज्यमानास्ति तैरुच्यते - 'यद्गृहीतं तद्गृहीतमेव नो मुच्यते ।' यैस्तु समीप एव स्थाप्यमानाऽस्ति तैस्त्वेवमुच्यते - 'मोचनवर्णाः क्वाप्यागमे न सन्ति। ये तु श्रीआगमवर्णांगीकारिणस्तेषां तु दृक्पथे प्रतिष्ठानम्-

"[17]पावरणं मुत्तूणं, गिण्हित्ता मुहपोत्तिअं ।
वत्थ-कायविसुद्धीए, करेइ पोसहाईअं ।।" व्यवहारचूर्णौ ।

श्रद्धालूनामौघिकमेव रजोहरण-मुखवस्त्रिकादि, साधूनां चौपग्रहिकमेव ।

---

16. उपगतः शिवकुमारसमीपं नैषेधिकीं कृत्वा ईर्यादिप्रतिक्रान्तः द्वादशावर्तं कृतिकर्म करोति ।

17. प्रावरणं मुक्त्वा, गृहीत्वा मुखपोतिकाम् । वस्त्र-कायविशुध्या, करोति पौषधादिकम् ।।

18 [११]
"मुहपोत्तीए विसए उवासगदसासु कुंडकोलिओ ।
मूत्तूण उत्तरिज्जं, पडिवन्नो पोसहवयं ति ।।
19
कंपिल्ले सावय कुंडकोलिओ, निअअसोगवणिआए ।
गंतुं ठवइ सिलाए [१२] नाममुद्दंतुत्तरिज्जं च ।।
20
तह पण्हावागरणे, दसमंगे सावगाण मुहपत्ती ।
पयडु च्चिय ठाणतिगे, [१३] पन्नत्ता तत्थिमं पढमं ।।
21
सामाइअं कुणंतो, सड्ढो कुंडल-किरीड-मणिमुद्दं [१४] ।
तंबोल-पुप्फ-पंगुरणमाइ, वोसिरइ सव्वं पि ।।" [मु. कु.-९,१०,२०,८]
22
"तय वत्थिन्नं वासगे, जाणुं निसिऊण तत्थ मुहपत्तिं ।
रयहरण-मज्झभागंमि ठावए पुज्जपायजुगं ।।
23
एवं सुसावओ वि हु, दुवालसावत्तवंदणं दिंतो ।
मुहपत्तिमज्झभागंमि, ठावए पुज्जपायजुगं ।।" इति वन्दनकभाष्ये ।

तथा -

24
"जो मुहपत्तिअं अपडिलेहित्ता वंदणं वंदेइ । गो० गुरुअंतो तस्स पच्छित्तं ।"

इति व्यवहारसूत्रे ।

---

११. 'सव्वइ अ सत्तमंगे' मुखवस्त्रिकाकुलके । १२. 'निअमामुत्तुत्तरिज्जं' हस्त०, 'नाममुद्दंतरिज्जं' मुखवस्त्रिकाकुलके । १३. 'वण्णिज्जइ' मुखवस्त्रिकाकुलके । १४. 'मणिबद्धं' मुखवस्त्रिकाकुलके ।

18. मुखपोतिकाया विषये उपासकदशासु कुण्डकोलिकः । मुक्त्वा उत्तरियं प्रतिपन्नः पौषधव्रतमिति ।।

19. काम्पिल्ये श्रावकः कुण्डकोलिको निजाशोकवनिकायाम् । गत्वा स्थापयति शिलायां निजनाममुद्रामुत्तरियं च ।।

20. तथा प्रश्नव्याकरणे दशमाङ्गे श्रावकानां मुखपत्रिः । प्रकटैव स्थानत्रिके प्रज्ञप्ता तत्रेमं प्रथमम् ।।

21. सामायिकं कुर्वन् श्राद्धः कुण्डल-किरीट-मणिमुद्रं । तम्बोल-पुष्प-प्रावरणमादि व्युत्सृजति सर्वमपि ।।

22. ततो विस्तीर्णे वासके जानुं निस्थाप्य तत्र मुखपत्रिम् । रजोहरणमध्यभागे स्थापयति पूज्यपादयुगम् ।।

23. एवं सुश्रावकोऽपि खलु द्वादशावर्तवन्दनं ददन् । मुखपोतिकामध्यभागे स्थापयति पूज्यपादयुगम् ।।

24. यो मुखपत्रिकामप्रतिलेख्य वन्दनं वन्दते, गौतम ! गुरुकं तस्य प्रायश्चितम् ।

इत्यादिवर्णाः स्थाने स्थाने समागच्छन्तः सन्ति, मुखवस्त्रिकापार्श्वस्थापनवर्णास्तु न हि क्वाप्यागमे कैरपि दृष्टाः, यैर्दृष्टास्ते दर्शयन्तु ।

मोचनवर्णास्तु 'आगमिअमागमेणं जुत्तीगम्म च जुत्तीए ।' इत्युक्तेर्षडुपधानवहन-११ श्राद्धप्रतिमावहनानन्तरं च मुखवस्त्रिकाया मोच्यतयोक्तेस्तथैव सर्वैरपि गीतार्थ-बहुश्रुतैः पुरा संप्रत्यपि कार्यमाणत्वात् । एवं सर्वत्रागमादौ वर्णसद्भावेऽवगतेऽपि केनापि मतिविपर्यासेन यत्तत्करणे दुरन्तसंसारतैव प्रसज्यमाना केन कथं निवारयिष्यते ? पुरापि संप्रति च श्रीश्रुतधर्म्म एव प्रमाणम्, तेनैव विधिना विधीयमानं सर्वं सफलम्, अन्यथा अन्यथा । श्रीआगमस्य प्रामाण्यं केवलिभिरपि उररीक्रियते । यतः श्रीओघनिर्युक्त्यावश्यकादौ -

"[25]ओहो सुओवउत्तो सुअनाणी जइ वि गिण्हइ असुद्धं ।
तं केवली वि भुंजइ अपमाणं सुअं भवे इहरा ।" [पिण्डनिर्युक्ति-५२४]

"[26]ववहारोऽवि हु बलवं, जं छउमत्थं पि वंदइ अरिहा ।
जा होइ अणभिन्नो, जाणंतो धम्मयं एअं ।।" [पञ्चवस्तु-१०१६]

इत्यादिवर्णान् जानन्तोऽपि श्रुतज्ञानाप्रामाण्येनापरशास्त्रबलेनाधिकामपि क्रियां कुर्वाणा अपि मिथ्यादुष्कृतप्रदानसमय-साधुप्रतिक्रमणसूत्रोक्त- 'हीणक्खरमच्चक्खरं पयहीणं' इत्याद्युक्तियुक्त्या भृशातीचारप्राप्तिर्जायमाना, यतो मलशुद्धिस्तत एव चेत्पङ्काकुलता तदा केन निर्मलीक्रियते ? तथा श्रीजिनागमेनैव सर्वातीचारशुद्धिः, सूत्रसम्बन्धिप्राप्तातीचारास्तु पुमांसः केन शुद्धिं प्राप्स्यन्ति ? सूत्रादूर्ध्वमुत्सूत्रमित्यर्थयुक्त्या तदाप्तिरपि कथं निवार्या ?

धर्ममार्गस्तु श्रीजिनेन्द्रैर्मुख्यतया द्विविध एव प्रज्ञापितोऽस्ति श्रीउपदेशमालादिषु सिद्धान्तेषु । यतः -

---

25. ओघः श्रुतोपयुक्तः श्रुतज्ञानी यद्यपि गृह्णात्यशुद्धम् । तत् केवल्यपि भुङ्क्तेऽप्रमाणं श्रुतं भवेदितरथा ।।

26. व्यवहारोऽपि खलु बलवान् यत् छद्मस्थमपि वन्दतेऽर्हन् । यावद् भवत्यनभिज्ञो जानानो धर्मतामेनाम् ।।

[27] **"दो चेव जिणवरेहिं, जाइजरामरणविप्पमुक्केहिं ।**
लोगम्मि पहा भणिआ, सुस्समण-सुस्सावगो वा वि ।।" [उपदेशमाला-४९०]

विरत्यपेक्षयापि स्वप्नमध्ये दामद्वयविचारे केवलज्ञानोत्पत्त्यनन्तरं धर्मदेशनासमये च-

देश-सर्वविरत्याख्य-वामावामभुजद्वयः ।
धर्मः समुद्धरत्याशु जनं संसारसागरात् ।।१।।

इत्याद्युपदेशपद्धत्या देशविरति-सर्वविरतिरूपं विरतिद्वयमेव प्ररूपितम्, नान्यदधिकं किञ्चिन्मूलभूतं धर्माधिकारे, अपरे सर्वेऽपि शाखादिकास्तद्विस्ताररूपाः । तत्रापि देशविरतिः निर्लिङ्गा, सर्वविरतिस्तु लिङ्गा ।

श्राद्धानां देशविरतिभाजां सामायिक-पौषधाद्यावश्यकजुषां च रजोहरण-मुखवस्त्रिका-कलितानामपि श्रमण इव श्रावकः प्रोक्तः सूत्रेषु, न तु श्रमण एव । श्राद्धानां देशविरतिश्चेत् सलिङ्गा प्ररूपिताऽभविष्यत्तदा क्वाप्यागमे आनंदादीनां श्राद्धानां महाने[चे]ष्टापराणां सलिङ्गा दर्शिताऽभविष्यत् । न च क्वापि दर्शिता दृष्टा च केनापि क्वापि । श्राद्धो रजोहरण-मुखवस्त्रिकालिङ्गधारकस्तु साधुरेव तदा तेषां साधर्मिकत्वेन विहर्तुं कल्पते, कदापीति लाभमिच्छतां मूलक्षितिरागता लिङ्गधारणप्ररूपकाणाम् । इति प्रथमं सामायिकावश्यकम् ।

अत्र दमदन्तकथा -

[28] **निक्खंतो हत्थिसीसा दमदंतो कामभोगमवहाय ।**
णवि रज्जइ रत्तेसुं दुट्ठेसु ण दोसमावज्ज ।। [आवश्यकभाष्य-१५१]

[29] **वंदिज्जमाणा न समुक्कसंति हीलिज्जमाणा न समुज्जलंति ।**
दंतेण चित्तेण चरंति धीरा, मुणी समुग्घाइयरागदोसा ।।[आवश्यकनिर्युक्ति-८६६]

---

27. द्वावेव जिनवरैर्जातिजरामरणविप्रमुक्तैः । लोके पथौ भणितौ सुश्रमणः सुश्रावको वाऽपि ।।

28. निष्क्रान्तो हस्तिशीर्षात् दमदन्तः कामभोगानपहाय । नापि रज्यते रक्तेषु द्विष्टेषु न द्वेषमापद्यते ।।

29. वन्द्यमाना न समुत्कर्षन्ति, हील्यमाना न समुज्ज्वलन्ति । दान्तेन चित्तेन चरन्ति धीराः, मुनयः समुद्घातितरागद्वेषाः ।।

।। अथ दमदन्तकथा ।।

30 हत्थिसीसए णगरे राया दमदन्तो नाम, इतो अ गयपुरे णगरे पंच पंच पाण्डवा, तेसिं तस्स य वयरं, तेहिं तस्स [दमदन्तस्स] जरासंधमूलं रायगिहं गतस्स सो विसओ लूडितो दड्ढो अ -

"मायया शत्रवो वध्या अवध्या स्युर्बलेन ये ।
यथा स्त्रीरूपमासाद्य, हता भीमेन कीचकाः ।।१।।"

31 अण्णदा दमदंतो आगतो, तेण हत्थिणापुरं रोहितं, ते भएण ण निन्ति । ततो दमदंतेण ते भणिता-सिआला चेव सुण्णगविसए जहिच्छियं आहिंडिआ, जाव अहं जरासंधसगासं गतो ताव मम विसयं लूडेह, इयाणिं निप्फिडह, ते ण णिंति ।

"तुल्यवर्णच्छदैरेव, कोकिलैः सह सङ्गतः ।
केन विज्ञायते काकः, स्वयं यदि न भाषते ।।" [भोजप्रबन्ध-२६९]
न विना मधुमासेन, अन्तरं पिककाकयोः ।
वसन्ते च पुनः प्राप्ते, काकः काकः पिकः पिकः ।।

32 ताहे सविसयं गतो । अण्णदा निव्विण्णकामभोगो पव्वइओ, ततो एगल्लविहारं पडिमं पडिवण्णो विहरंतो हत्थिणापुरं गतो, तस्स बाहिं पडिमं ठितो, जुहिट्ठिलेण अणुजत्ताणिग्गण वंदितो । पच्छा सेसेहिवि चउहिं पंडवेहिं वंदितो, ताहे दुज्जोहणो आगतो । तस्स मणुस्सेहिं कहिअं, जहा - एस सो दमदन्तो, तेण सो मातुलिंगेण आहतो । पच्छा खंधावारेण एतेणं पत्थरं पत्थरं खिवंतेणं पत्थररासीकओ । जुहिट्ठिलो निअत्तो पुच्छति - एत्थ साहू आसि कहिं सो ?, लोएण कहिअं - जहा एसो पत्थररासी दुज्जोहणेण कओ, ताहे सो अंबाडितो, ते अ अवणिआ पत्थरा, तेल्लेण अब्भंगितो खामितो अ ।

---

30. हस्तिशीर्षे नगरे राजा दमदन्तो नाम, इतश्च गजपुरे नगरे पञ्च पञ्च पाण्डवाः, तेषां तस्य च वैरम्, तैस्तस्य दमदन्तस्य जरासन्धमूलं राजगृहं गतस्य स विषयो लुण्टितो दग्धश्च,

31. अन्यदा दमदन्त आगतः, तेन हस्तिनापुरं रुद्धम्, ते भयेन न निर्यान्ति, ततो दमदन्तेन ते भणिताः - शृगाला इव शून्यविषये यथेच्छमाहिण्डध्वम्, यावदहं जरासन्धसकाशं गतस्तावन्मम विषयं लुण्टयत, इदानीं निर्गच्छत, ते न निर्गच्छन्ति ।

32. तदा स्वविषयं गतः । अन्यदा निर्विण्णकामभोगः प्रव्रजितः, तत एकाकिविहारं प्रतिमां प्रतिपन्नो विहरन् हस्तिनापुरं गतः, तस्मात् बहिः प्रतिमया स्थितः । युधिष्ठिरेणानुयात्रानिर्गतेन वन्दितः, पश्चात् शेषैरपि चतुर्भिः पाण्डवैर्वन्दितः, तदा दुर्योधन आगतः, तस्य मनुष्यैः कथितम्-यथा एष स दमदन्तः, तेन स मातुलिङ्गेनाहतः, पश्चात्स्कन्धावारेणागच्छता प्रस्तरं प्रस्तरं क्षिपता प्रस्तरराशीकृतः । युधिष्ठिरो निवृत्तः पृच्छति - साधुरत्रासीत् क्व सः ?, लोकेन कथितम् - यथैष प्रस्तरराशिर्दुर्योधनेन कृतः, तदा स निर्भर्त्सितः, ते चापनीताः प्रस्तराः, तैलेनाभ्यङ्गितः क्षमितश्च ।

"निवसन्नपि सममितरैरभिजातः शिक्षते न तच्चरितम् ।
ध्वांक्षो विरावी न पिकः, स्थितवानपि बलिभुजां भवति ।।" [ ]

33 **तस्स किर भगवतो दमदंतस्स दुज्जोहणे पंडवेसु अ समो भावो आसि । एवं कायव्वं सामाइअं ।।**

।। इति दमदन्तकथा ।।

अथ सामायिकफले सम्बन्धः -

34 **"दिवसे दिवसे लक्खं, देइ सुवन्नस्स खंडियं एगो ।**
इयरो पुण सामाइयं, करेइ न पहुप्पए तस्स ।।" [सम्बोधप्रकरण-१२३३]

।। अथ सामायिकफलविषये वृद्धस्त्रीकथा ।।

कस्मिन्नगरे कश्चित् श्रेष्ठी [प्रत्यहं] पात्रापात्रविचारं विना दानशौंडत्वाल्लक्षं [लक्षं] सुवर्णं दत्त्वा प्रातः खट्वातः समुत्तरति । एका च तत्प्रातिवेश्मिकी वृद्धा प्रत्यहं प्रातः सायं च 'जाहे खणं ताहे सामाइअं कुणइ' इत्युक्तेर्यदा तदा वा समयं प्राप्य सामायिकं करोति । सामायिककरणे 'करेमि भंते सामाइअं' इति सूत्रपाठप्रतिपत्तिः । भदंतेति गुर्वामन्त्रणं गुरुकुलवासोपसंग्रहार्थम् । यदुक्तम् -

35 "आमंतेइ करेमि भदंत ! सामाइयं ति सीसोऽयं ।
आहामंतणवयणं गुरुणो किं कारणमिणं ति ?।।

36 भण्णइ गुरुकुलवासोवसंगहत्थं जहा गुणत्थीह ।
निच्चं गुरुकुलवासी हविज्ज सीसो जओऽभिहिअं ।।

37 नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते अ ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति ।।"

38 "आवस्सयं पि निच्चं गुरुपादमूलम्मि देसिअं होइ ।
वीसुं पि हु संवसओ कारणओ[१५] जयइ सिज्जाए ।।

---

१५. 'जदभि सेज्जाए' विशेष० भाष्ये ।

33. तस्य किल भगवतो दमदन्तस्य दुर्योधने पाण्डवेषु च समभाव आसीत् । एवं कर्तव्यं सामायिकम् ।

34. दिवसे दिवसे लक्षं ददाति सुवर्णस्य खण्डिकामेकः । इतरः पुनः सामायिकं करोति न प्रभवति तस्य ।।

35. आमन्त्रयति 'करोमि भगवन् ! सामायिकं' इति शिष्योऽयम् । आहामन्त्रणवचनं गुरोः किं कारणमिदमिति ?।।

36. भण्यते गुरुकुलवासोपसंग्रहार्थं यथा गुणार्थीह । नित्यं गुरुकुलवासी भवेत् शिष्यो यतोऽभिहितम् ।।

37. ज्ञानस्य भवति भागी स्थिरतरको दर्शने चारित्रे च । धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति ।।

38. आवश्यकमपि नित्यं गुरुपादमूले देशितं भवति । विष्वगपि खलु संवसतः कारणतो यतते शय्यायाम् ।।

[39]एवं चिय सव्वावस्सयाइं आपुच्छिऊण कज्जाइं ।
जाणाविअमामंतणवयणाओ जेण सव्वेसिं ।।
[40]सामाइअमाईअं भदंतसद्दो अ जं तयाईए ।
तेणाणुवत्तइ तओ करेमि भंते त्ति सव्वेसु ।।
[41]किच्चाकिच्चं गुरवो विदंति विणयपडिवत्तिहेउं च ।
ऊसासाइं पमोत्तुं तदणापुच्छाइं पडिसिद्धं ।।
[42]गुरुविरहंमि य ठवणा गुरूवएसोवदंसणत्थं च ।
जिणविरहंमि वि जिणबिंबसेवणामंतणं सफलं ।।
[43]रन्नो व परुक्खस्स वि जह सेवा मंतदेवयाए वा ।
तह चेव परुक्खस्स वि गुरुणो सेवा विणयहेउं ।।" [वि.भा.-३४५७-५९, ३४६१-६६]

[इति] सामायिकं करोति । एकदा द्वयोरपि केनाऽपि कारणेन दानसामायिकविषयेऽन्तरायो बभूव। तेन द्वयोरपि खेदः समभूत् । श्रेष्ठी वृद्धायाः खेदं श्रुत्वा प्राह - 'त्वयाऽद्य[१६] बहु बहु पडपडाकार्ये'ति हास्यं चक्रे कर्मबन्धकारणमपि । यतः -

"सुखेन बध्यते कर्म तद्विपाकस्तु दुस्तरः ।
हसती धारयेत् कर्म रुदती च विमुञ्चति ।।

अयि खलु -

विषमः पुराकृतानां भवति हि जन्तुषु कर्मणां विपाकः[१७] ।
हरशिरसि यानि रेजुर्हरि-२ तानि लुठन्ति गृध्रपादे ।।"

---

१६. 'अहो वस्त्रखण्डं गृहीत्वा हस्तादिप्रमार्जनं कृतं तेन किं पुण्यं गतम् ? तत्र धनव्ययस्तु कश्चिदपि न दृश्यते, इत्थं यदि धर्मः समेति सदा क्रियते, लक्षखण्डिसुवर्णदानं न कोऽपि विदधाति ।' इति उपदेशप्रासादे ।

१७. अयं श्लोकोऽशुद्धो भाति, अतः स्वमत्या संशोध्यः । सम्पा. ।

39. एवमेव सर्वावश्यकान्यापृच्छ्य कार्याणि । आज्ञपितमामन्त्रणवचनात् येन सर्वेषाम् ।।

40. सामायिकमादिकं भदन्तशब्दश्च यत्तदादौ । तेनानुवर्त्तते ततः करोमि भगवन् इति सर्वेषु ।।

41. कृत्याकृत्यं गुरवो विदन्ति विनयप्रतिपत्तिहेतुं च । उच्छ्वासादि प्रमुच्य तदनापृच्छादि प्रतिषिद्धम् ।।

42. गुरुविरहे च स्थापना गुरूपदेशोपदर्शनार्थं च । जिणविरहे इव जिणबिम्बसेवणामन्त्रणं सफलम् ।।

43. राज्ञ इव परोक्षस्यापि यथा सेवा मन्त्रदेवताया वा । तथैव परोक्षस्यापि गुरोः सेवा विनयहेतुः ।।

तयोक्तम् - 'नैवं वद ।' यतः -

"[44]कंचणमणिसोवाणं, थंभसहस्सूसियं सुवण्णतलं ।
जो करिज्ज जिणहरं, तओ वि तवसंजमो अहिओ ।।" [उ.मा-४९३, सम्बोधप्रकरण-१२५०]

इत्यादि । ततः श्रेष्ठी अन्ते आर्त्या मृत्वा दानकर्मवशात् करी जातः, वृद्धापि सामायिकध्यानेन मृत्वा राजसुता जाता । कियता कालेन स करी तेनैव राज्ञा धृतः । स एकदा राजमार्गे स्वगृहादि दृष्ट्वा जातजातिस्मृतिमूर्च्छया भूमौ पपात । कथमपि तद्द्रष्टुं [राजसुता] तत्रागता । तस्या अपि स्वस्थानादि दृष्ट्वा जातिस्मृतिरुत्पन्ना, [पूर्वभववृत्तान्तं दृष्टवती], करी उत्थापितोऽपि नोत्तिष्ठति । ततो राजसुतयोक्तम्-

"[45]ऊठ सिठि मत भंत कर, करि हूअ दाणवसेण ।
हुं सामाइए रायधुअ, बहुगुण सामाइअ तेण ।।"

इति वचः श्रुत्वा शीघ्रं करी उत्थितः । ततो नृपादीनां महदाश्चर्यं जातम् । पृष्टा सती सा सर्वं[२०] पूर्वभवस्वरूपं कथितवती तत् श्रुत्वा बहुनां धर्मविषये आदरो जातः । सामायिकपरिपालनफले निश्चयो जातः।

।। इति सामायिकफलविषये वृद्धस्त्रीकथा ।।

[इइ सामाइयआवस्सयम्]

---

१९. 'प्राग्भववृत्तान्तमकथयत् । स करी तद्वचसा प्रबुद्धः । कालद्वये सामायिककरणाय भूमिं चक्षुर्भ्यां निरीक्ष्य स्वगुरूण्यभ्यर्णे समतया मुहूर्तं यावत्तिष्ठिति भावसामायिकेन । ग्रहणपूर्णसमये च गुरुं नत्वा तिष्ठत्युत्तिष्ठति । भक्ष्याभक्ष्य-पेयापेयादिज्ञानपरः समाधिना पूर्णायुषा च मृत्वा सहस्रारे देवत्वं प्राप्तः ।'

"दानं सदा यच्छति मार्गणेभ्यः, सुवर्णभूमेः स्वपतिश्च कश्चित् । ततोऽप्यधिकं गदितं मुनीन्दैः सामायिके पुण्यमतो विधेयम् ।।" इति उपदेशप्रासादे नवमस्तम्भे अष्टात्रिंशदुत्तरशततमं व्याख्याने ।

44. काञ्चनमणिसोपानं स्तम्भसहस्रोच्छ्रितं सुवर्णतलम् । यः कारयेज्जिनगृहं ततोऽपि तपःसंयमोऽधिकः ।।

**45. उत्तिष्ठ श्रेष्ठिन् ! मा भ्रान्तं कुरु, [चित्तं त्वं] करी भूतो दानवशेन ।
अहं सामायिकेन राजदुहिता बहुगुणः सामायिकस्तेन ।।**

[२-छव्विह-आवस्सयंमि]

[५-चतुर्विंशतिस्तवः]

द्वितीयमावश्यकं चतुर्विंशतिस्तवश्चतुर्विंशति-तीर्थंकरनामग्रहणवर्णनरूपः । स च प्रतिक्रमणं विधीयमानो भव्यजन्तूनां महानिर्जराहेतुः स्यात् । यतः श्रीश्राद्धप्रतिक्रमणसूत्रे -

"चिरसंचिअ-पावपणासणीइ, भवसयसहस्समहणीए ।
चउवीस-जिण-विणिग्गय-कहाइ वोलंतु मे दीअहा ।।"[1][श्राद्धप्रतिक्रमणसूत्र-४६]

श्रीभक्तामरस्तोत्रेऽपि श्रीमानतुङ्गसूरिविरचिते -

[आस्तां तव स्तवनमस्त-समस्त-दोषम्;
त्वत्संकथापि जगतां दुरितानि हन्ति ।]
"दूरे सहस्रकिरणः कुरुते प्रभैव;
पद्माकरेषु जलजानि विकासभाञ्जि ।।"

।। चतुर्विंशतिस्तवे श्रीजम्बूकुमारसम्बन्धः ।।

राजगृहे श्रेणिके नृपे सति ऋषभदत्तः श्रेष्ठी, धारिणी पत्नी, पुत्रेच्छोस्तस्या अधृतिं कुर्वाणाया विनोदनाय श्रेष्ठी ऋषभदत्तो वैभाराद्रौ चेइअवंदणत्थं गओ [चैत्यवन्दनार्थं गतः]। वलमानाभ्यां मार्गे सिद्धपुत्रो जसमित्रश्राद्धो दृष्टः, पृष्टश्च 'क्व प्रस्थितोऽसीति ?' स प्राह - 'इहोद्याने श्रीसुधर्मगणधरं नन्तुम्, युवामप्यागच्छतः ? ततो गतास्त्रयोऽपि, जसमित्रेण पृष्टम्-'स्वामिन् ! कीदृशो जम्बूः यन्नाम्नाऽयं जम्बूद्वीपः ?' स्वामिना सविस्तरं तत्स्वरूपमूचे ।

तदा मुदाऽनादृताख्यो जम्बूद्विपपतिः सुरः । शब्देन महताऽवादी-दहो ! मे कुलमुत्तमम् ।।१।।
तदा च श्रेणिकोऽपृच्छद्भगवन्तं कृताञ्जलिः । देवोऽयमेवं स्वकुलप्रशंसां कुरुते कुतः ?।।२।।
सर्वज्ञः कथयामास राजन्नत्रैव पत्तने । इभ्यो गुप्तमतिर्नाम बभूव भुवि विश्रुतः ।।३।।
तस्य द्वौ तनुजन्मानावभूतां क्रमयोगतः । ज्यायानृषभदत्ताख्यो, जिनदासाभिधो लघुः ।।४।।
ज्यायानतिसदाचारो द्यूतादिव्यसनी लघुः । तौ द्वावाद्यन्तयुगयोः प्रत्यक्षे इव वर्ष्मणी ।।५।।
ततश्चर्षभदत्तेन जिनदासः सुमेधसा । त्यक्तो दुराचार इति सर्वस्वजनसाक्षिकम् ।।६।।
अहमभ्रातृकोऽस्मीति ज्येष्ठः स श्रेष्ठिसूर्वदन् । कनिष्ठस्य शुन इव प्रवेष्टुं न गृहेऽप्यदात् ।।७।।

---

1. चिरसञ्चितपापप्रणाशन्या, भवशतसहस्रमथन्या । चतुर्विंशतिजिनविनिर्गतकथया गच्छन्तु मम दिवसाः ।।

जिनदासोऽन्यदा दीव्यन्नन्येन द्यूतकारिणा । संजात द्यूतकलहे सद्योऽस्त्रेण न्यहन्यत ।।८।।
फलं द्यूतविषतरोरायुधाघातवेदनम् । जिनदासोऽन्वभूद्रङ्क इव भूमितले लुठन् ।।९।।
स्वजनाश्चर्षभदत्तमूचुर्भो परमार्हत ! । प्राणिमात्रसाधारिण्या दयया जीवयानुजम् ।।१०।।
पात्रं कीर्त्तेर्विशुद्धायाः स बन्धुः स च नायकः । यो बन्धुं सेवकं चाभ्युद्धरते व्यसनावटात् ।।११।।
ऋषभोऽप्यभ्यधाद् गत्वाऽवरजं स्वजनेरितः । समाश्वसिहि हे वत्स ! त्रास्ये त्वामौषधादिभिः ।।१२।।
जगाद जिनदासोऽपि क्षमस्व मम दुर्नयान् । कार्यमामुष्मिकं कुर्या जीवितव्यास्पृहस्य मे ।।१३।।
प्रयच्छ परलोकाध्वप्रस्थितस्य ममाधुना । धर्मोपदेशपाथेय - मार्यानशनपूर्वकम् ।।१४।।
ऋषभोऽप्यन्वशादेव-मनुजं निर्ममो भव । जप स्वच्छमनाः पञ्चपरमेष्ठिनमस्क्रियाम् ।।१५।।
एवमाद्यनुशिष्यानु-जन्मानमृषभः स्वयम् । आराधनां सानशनां कारयामास शुद्धधीः ।।१६।।
विपद्य जिनदासोऽपि, तेन पण्डितमृत्युना । जम्बूद्वीपाधिपो जज्ञे, देवोऽयं परमर्द्धिकः ।।१७।।

अत्रान्तरे धारिण्या पृष्टम्-'मे पुत्रो भावी न वेति ?' जसमित्रः प्राह - 'नेदं सावद्यमाहुः साधवो जानन्तोऽपि, परमहं वच्मि, 'यथा पृष्टं तथा भावी ते पुत्रः ।' यतो 'ऽर्हदादिनामकित्तणाइ कए पुच्छिज्जमाणस्स अत्थि संपत्ती [अर्हन्तादिनामकिर्तनादि कृते पृच्छतोऽस्ति सम्पत्तिः]। अन्येऽपि च शकुनाः पृच्छायां भव्या जाताः । स्वप्ने चोत्सङ्गगतं श्वेतसिंहकिशोरं द्रक्ष्यसी'ति। ततो धारिण्या हृष्टयोक्तम्- 'यद्येवं सत्यं भावी तदा जम्बूवृक्षदेवतानाम्ना १०८ [अष्टोत्तरशतानि] आचाम्लानि करिष्यावहे ।' ततो पुरं गताः अन्यदा तत्स्वप्नसूचितो विद्युन्माली देवः पञ्चमकल्पात् च्युतो गर्भे उत्पन्नः । जिनसाधुपूजादोहदः । जम्बूदेवसानिध्याज्जम्बूनाम, यौवने श्रीसुधर्मपार्श्वे ब्रह्मव्रतमुच्चार्य दीक्षायै पितरावापृच्छति । तावाहतुः, 'वत्स ! कन्याः परिणीयाऽस्मान् कृतार्थीकुरु, तथा [ततः] वयमप्यनुव्रजामः ।' ततः श्रेष्ठिनाऽष्टौ जैनाः समुद्रप्रियः १ समुद्रदत्तः २ सागरदत्तः ३ कुबेरदत्तः ४ कुबेरसेनः ५ वैश्रमणदत्तः ६ वसुसेनः ७ वसुपालितश्चेति ८ नामानः श्रेष्ठिनः,

तेषां भार्याः क्रमात् पद्मावती १, कनकमाला २, विनयश्रीः ३, धनश्रीः ४, कनकवती ५, श्रीषेणा ६, वीरमती ७, जयसेना ८, चेति । तेषां पुत्र्यः क्रमात् सिद्धिमती १, पद्मश्रीः २, पद्मसेना ३, कनकसेना ४, नागसेना ५, कनकश्रीः ६, कमलावती ७, यशश्रीश्चेति ८, । [पृष्टाः, ततस्तदनुरोधेन यद्यस्माभिर्न धृतस्ततोऽमुमेवानुयास्या इति विहितप्रतिज्ञा अष्टावपि कन्याः समकालं स परिणीतवान् ।] विवाहमहे वृत्ते [सति वासभवने तत्प्रबोधाय प्रवृत्ते सति, तदवसरे] जयपुरेशविन्ध्यनृपपुत्रः प्रभवोऽवस्वापिनी- तालोद्घाटिन्यौ विद्ये ददामि, यदि स्तंभिनी - मोक्षिण्यौ ददासीति वदन् मधुबिन्दुज्ञातेन बोधितः । ततो जम्बूवृक्षेशाना-दृतदेवकृतसानिध्यः प्रव्राजितो जम्बूर्बहुवर्षैः केवलमुपार्ज्य अष्टात्रिंशत् वर्षाणि केवलीत्वेन विहृत्य भक्तप्रत्याख्याय बलाहकाद्रौ मासं पादोपगमेन सिद्धः ।

।। इति चतुर्विंशतिस्तवे श्रीजम्बूकुमारसम्बन्धः ।।

[इइ चउविसत्थो]

[३-छव्विह-आवस्सयंमि]

[६-वन्दनकावश्यकम्]

अथ तृतीयमावश्यकम् ।

वन्दनकानि गुरुभिः सार्धं प्रतिक्रमणकरणे साधुभिः श्राद्धैश्चावश्यं श्रीगुरुपादमूले कर्त्तव्यान्येव । वन्दनेषु कृतेषु च लाभः कः स्यादिति दर्शयति -

"[1]**विणओवयार माणस्स, भंजणा पूअणा गुरुजणस्स ।**
तित्थयराण य आणा, सुअधम्माराहणाऽकिरिआ ।।

[2]**विणओ सासणे मूलं, विणीओ संजओ भवे ।**
विणयाउ विप्पमुक्कस्स, कओ धम्मो कओ तवो ? ।।

[3]**जम्हा विणयइ कम्मं अट्ठविहं चाउरंतमुक्खाय ।**
तम्हा उ वयंति विऊ विणउत्ति विलीनसंसारा ।।" [आ.नि.-१२१५-१२१७]

वन्दनकप्रदानेनैव श्रीकृष्णस्य ईयान् लाभः प्रोक्तः सिद्धान्तादौ -

"[4]**तित्थयरत्तं सम्मत्त-खाइअं सत्तमीइ तइआए ।**
वंदणएणं[१] विहिणा, बद्धं च दसारसीहेणं ।।" [सम्बोधसित्तरी-१०६]

कियत्सु स्थानकेषु वन्दनकानि दातव्यानीति ज्ञापयति -

"[5]**पडिकमणे सज्झाए काउस्सग्गावराह-पाहुणए ।**
आलोयण-संवरणे उत्तमट्ठे य वंदणयं ।।" [आवश्यकनिर्युक्ति-१२००]

---

१. 'साहुण वन्दणेणं' उपदेशतरङ्गीणीवृत्तौ ।

1. विनयोपचारो मानस्य भञ्जना पूजना गुरुजनस्य । तीर्थंकराणां चाज्ञा श्रुतधर्माराधनाऽक्रिया ।।
2. विनयः शासने मूलं विनीतः संयतो भवेत् । विनयाद्विप्रमुक्तस्य कुतो धर्मः कुतस्तपः ? ।।
3. यस्माद्विनयति कर्माष्टविधं चतुरन्तमोक्षाय । तस्मादेव वदन्ति विद्वांसः विनय इति विलीनसंसाराः ।।
4. तीर्थकरत्वं क्षायिकसम्यक्त्वं सप्तम्यास्तृतीयायाः । वन्दनेन विधिना, बद्धं च दशार्हसिंहेन ।।
5. प्रतिक्रमणे स्वाध्याये कायोत्सर्गापराध-प्राघूर्णके । आलोचना-संवरणे, उत्तमार्थे च वन्दनकम् ।।

"[6]चत्तारि पडिक्कमणे किइकम्मा तिन्नि हुंति सज्झाए ।
पुव्वण्हे अवरण्हे किइकम्मा चउदस हवंति ।।" [आवश्यकनिर्युक्ति-१२०१]

कत्यावश्यकानीति दर्शयति -

"[7]दुओणयमहाजायं, किइकम्मं बारसावयं ।
चउसिरं तिगुत्तं च, दुपवेसं एगनिक्खमणं ।।

[8]अवणामा दुन्नऽहाजायं, आवत्ता बारसेव य ।
सीसा चत्तारि गुत्तीओ, तिन्नि दो अ पवेसणा ।।

[9]एगनिक्खमणं चेव, पणवीसं विआहिया ।
आवस्सगेहि परिसुद्धं, किइकम्मं जेहिं कीरई ।।

[10]किइकम्मं पि करिंतो न होइ किइकम्म-निज्जराभागी ।
पणवीसामन्नयरं साहू ठाणं विराहंतो ।।

[11]पणवीसा परिसुद्धं, किइकम्मं जो पउंजइ गुरूणं ।
सो पावइ निव्वाणं अचिरेण विमाणवासं वा ।।" [आ. नि.-१२०२ - १२०६]

कतिदोषाश्च त्याज्यतयेति दर्शयति -

"[12]दोस अणाढिअ-थड्ढिअ-पविद्ध-परिपिंडिअं च टोलगयं ।
अंकुस-कच्छभरिंगिअ-मच्छुव्वत्तं मणपउट्ठं ।।"

---

6. चत्वारि प्रतिक्रमणे कृतिकर्माणि त्रीणि भवन्ति स्वाध्याये । पूर्वाह्णेऽपराह्णे कृतिकर्माणि चतुर्दश भवन्ति ।।
7. द्व्यवनतं यथाजातं कृतिकर्म द्वादशावर्तम् । चतुःशिरो त्रिगुप्तं द्विप्रवेशं एकनिष्क्रमणम् ।।
8. अवनता द्विर्यथाजातमावर्ता द्वादशैव च । शीर्षाश्चत्वारि गुप्तयस्त्रिणी द्वौ च प्रवेशौ ।।
9. एकनिष्क्रमणं चैव पञ्चविंशतिं विजानीहि । आवश्यकैः परिशुद्धं कृतिकर्म यैः क्रियते ।।
10. कृतिकर्मापि कुर्वन् न भवति कृतिकर्मनिर्जराभागी । पञ्चविंशतीनामन्यतरत् साधुः स्थानं विराधयन् ।।
11. पञ्चविंशतिपरिशुद्धं कृतिकर्म यः प्रयुङ्क्ते गुरवे । स प्राप्नोति निर्वाणम् अचिरेण विमानवासं वा ।।
12. दोषा अनादृत-स्तब्ध-प्रविद्ध-परिपिण्डितं च टोलगतिम् । अङ्कुश-कच्छपरिङ्गित-मत्स्योद्वृतं मनःप्रदुष्टम् ।।

"[13]वेइअबद्ध-भयंतं, भय-गारव-मित्त-कारणा-तिन्नं ।
पडिणीअ-रुट्ठ-तज्जिअ-सढ-हीलीअ-विपलिउंचिअयं ।।
[14]दिट्ठमदिट्ठं सिंगं, कर-तम्मोअण-अणिद्धणालिद्धं ।
ऊणं उत्तरचूलिअ-मूअं ढड्ढर-चुडलिअं च ।।
[15]बत्तीसदोस-परिसुद्धं, किइकम्मं जो पउंजइ गुरूणं ।
सो पावइ निव्वाणं, अचिरेण विमाणवासं वा ।।" [गुरुवन्दनभाष्य-२३-२६]

अथ कृतिकर्मविधिं दर्शयति -

"[16]आयारस्स उ मूलं, विणओ सो गुणवओ अ पडिवत्ती ।
सा य विहि-वंदणाओ, विही इमो बारसावत्ते ।।
[17]होउमहाजाउवहि[१] संडासं पमज्ज उक्कुडुअठाणे[२] ।
पडिलेहिअमुहपत्ती-पमज्जिओवरिमदेहद्धो ।।
[18]उट्ठेउं परिसंठिअकुप्परठिअपट्टगोनमिअकाओ ।
जुत्तिपिहिअपच्छद्धो पवयणकुच्छा जह न होइ ।।
[19]वामंगुलिमुहपोत्तीकरजुअलतलत्थजुत्तरयहरणो ।
अवणिअ जहुत्तदोसं गुरुसमुहं भणइ पयडमिणं ।।

---

१. 'ओवहि' 'ओ बहिं संडासं' योगशास्त्रे । २. '...डुअठाणो' योगशास्त्रे ।

13. वेदिकाबद्धं भजन्तं भय-गौरव-मित्र-कारण-स्तेनम् । प्रत्यनीक-रुष्ट-तर्जित-शठ-हीलित-विपरिकुञ्चितकम् ।।
14. दृष्टादृष्टं शृङ्गं कर-तन्मोचनाश्लिष्टानाश्लिष्टम् । न्यूनमुत्तरचूड-मूकं ढड्ढर-चुडलिकं च ।।
15. द्वात्रिंशद्दोषपरिशुद्धं कृतिकर्म यः प्रयुङ्क्ते गुरून् । स प्राप्नोति निर्वाणमचिरेण विमानवासं वा ।।
16. आचारस्य तु मूलं विनयः स गुणवतश्च प्रतिपत्तिः । सा च विधिवन्दनात् विधिरयं द्वादशावर्ते ।।
17. भूत्वा यथाजातोपधिः सन्दंशं प्रमृज्योत्कुटुकस्थानः । प्रतिलेखितमुखवस्त्रिका प्रमार्जितोपरिमदेहार्धः ।।
18. उत्थाय प्रतिसंस्थितकूर्परस्थितपट्टकावनतकायः । युक्तिपिहितपश्चार्धः प्रवचनकुत्सा यथा न भवति ।।
19. वामाङ्गुलिमुखवस्त्रिकाकरयुगलतलस्थयुक्तरजोहरणः । अपनीय यथोक्तदोषं गुरुसंमुखं भणति प्रकटमिदम्।।

20
इच्छामि खमासमणो इच्चाई जा निसीहिआइ त्ति ।
छंदणं ति सुणेउं गुरुवयणं उग्गहं जाए ।।

21
अणुजाणह मे मिउग्गहमणुजाणामि त्ति भासए गुरुणा ।
उग्गहखित्तं पविसह पमज्ज संडासए निसिए ।।

22
वामदेसं रयहरणं पमज्ज भूमीए[३] संठवेऊण ।
सीसफुसणेण होही कज्जं ति तओ पढममेव ।।

23
वामकरगहिअपुत्ती एगदेसेण वामकन्नाओ ।
आरभिऊण[४] णिडालं पमज्ज जा दाहिणो कण्णो ।।

24
अव्वुच्छिन्नं वामयजाणुं नसिऊण तत्थ मुहपत्तिं ।
रयहरणमज्झदेसम्मि ठावए पुज्जपायजुगं ।।

25
सुपसारियबाहुजुओ ऊरुजुयलंतरं अफुसमाणो ।
जमलट्ठिअग्गपाणी 'अ'कारमुच्चारयं फुसइ ।।

26
अब्भंतरपरिअट्टियकरयलमुवणीय सीसफुसणंतं ।
तो करजुअलं निज्जा[५] 'हो'क्कारोच्चार[६]समकालं ।।

27
पुण हिट्ठा मुहकरयल 'का'कारसमं[७] ठविज्ज रयहरणं ।
'यं' सद्देणं समयं पुणो वि सीसं तहच्चेअ ।।

---

३. 'भूमीउं' हस्त० । ४. 'आरंभिऊण' योगशास्त्रे । ५. 'निज्जह' हस्त० । ६. '...रोच्चरण...' योगशास्त्रे । ७. 'छिविज्ज' योगशास्त्रे ।

20. इच्छामि क्षमाश्रमण ! इत्यादि यावद् नैषेधिक्येति । छन्देनेति श्रुत्वा गुरुवचनमवग्रहं याचते ।।
21. अनुजानीध्वं मे मितावग्रहमनुजानामीति भाषिते गुरुणा । अवग्रहक्षेत्रं प्रविशति प्रमृज्य सन्दंशान् निषीदेत् ।।
22. वामदेशं रजोहरणं प्रमृज्य भूमौ संस्थाप्य । शिरःस्पर्शनेन भविष्यति कार्यमिति ततः प्रथममेव ।।
23. वामकरगृहीतमुखवस्त्रिका एकदेशेन वामकर्णात् । आरभ्य ललाटं प्रमृज्य यावद् दक्षिणः कर्णः ।।
24. अव्युच्छिन्नं वामकजानुं न्यस्य तत्र मुखवस्त्रिकाम् । रजोहरणमध्यप्रदेशे स्थापयेत् पूज्यपादयुगम् ।।
25. सुप्रसारितबाहुयुग ऊरुयुगलान्तरमस्पृशन् । यमलस्थिताग्रपाणिः 'अ'कारमुच्चारयन् स्पृशति ।।
26. अभ्यन्तरपरिवर्त्तितकरतलमुपनीय शिरःस्पर्शनान्तम् । ततः करयुगलं नयेद् 'हो'कारोच्चारसमकालम् ।।
27. पुनरधस्ताद् मुखकरतलं 'का'कारसमं स्थापयेद् रजोहरणम् । 'यं' शब्देन समकं पुनरपि शिरस्तथैव ।।

28
'का'कारसमुच्चारणसमयं रयहरणमालुहेऊण ।
'य' त्ति अ सद्देण समं पुणो वि सीसं तहच्चेअ ।।
29
संफासं ति भणंतो सीसेणं पणमिऊण रयहरणे ।
उन्नामिअमुद्धंजलि अव्वाबाहं पुणो पुच्छे ।।
30
खमणिज्जो भे किलामो अप्पकिलंताण बहुसुभेण भे ।
दिण पक्खो वरिसो वा वइक्कंतो इअ तओ तुसिणी ।।
31
गुरुणा तह त्ति भणिए जत्ता जवणा य पुच्छिअव्वा य ।
परिसंठिएण इणमो सराण जोएण कायव्वं ।।
32
तत्थ य परिभासेमो[९] मंदमइविणेअगाहणट्ठाए ।
नीउच्चमज्झिमाओ सुरजुत्तीओ ठावेअव्वा ।।
33
नीओ तत्थणुदत्तो रयहरणे उच्चओ उदत्तो अ ।
सीसे निदंसणीओ तयंतरालम्मि सरिओ अ ।।
34
अणुदत्तो अ 'ज' कारो 'त्ता' सरिओ होइ 'भे' उदत्तसरो ।
पुणरवि 'ज[१०]-व-णी'सद्दा अणुदत्ताई मुणेअव्वा ।।
35
'ज्जं' अणुदत्तो अ पुणो 'च' स्सरिओ 'भे' उदत्तसरणामो ।
एवं रयहरणाइसु तिसु ठाणेसुं सरा नेआ ।।

---

८. 'तहो' योगशास्त्रे । ९. 'परिभासेसा' धर्मसंङ्ग्रहवृत्तौ । १०. 'जवणि' योगशास्त्रे ।

28. 'का'कारसमुच्चारणसमकं रजोहरणमाश्लिष्य । 'य' इति च शब्देन समं पुनरपि शिरस्तथैव ।।

29. 'संफासं' इति भणन् शिरसा प्रणम्य रजोहरणे । उन्नामितमूर्धाञ्जलिमव्याबाधं पुनः पृच्छेत् ।।

30. क्षमणीयो भवद्भिः क्लमोऽल्पक्लान्तानां बहुशुभेन भवताम् । दिनं पक्षो वर्षं वा व्यतिक्रान्तमिति ततस्तूष्णीकः।।

31. गुरुणा तथेति भणिते यात्रा यापना च प्रष्टव्या च । परिसंस्थितेनेदं स्वराणां योगेन कर्तव्यम् ।।

32. तत्र च परिभाषामहे मन्दमतिविनेयग्राहणार्थम् । नीचोच्चमध्यमाः स्वरयुक्तयः स्थापयितव्याः ।।

33. नीचस्तत्रानुदात्तो रजोहरणे उच्चक उदात्तस्तु । शीर्षे निदर्शनीयस्तदन्तराले स्वरितश्च ।।

34. अनुदात्तश्च 'ज'कारः 'त्ता' स्वरितो भवति 'भे' उदात्तस्वरः । पुनरपि 'ज-व-णि' शब्दा अनुदात्तादयो ज्ञातव्याः।।

35. 'ज्जं' अनुदात्तश्च पुनः 'च' स्वरितो 'भे' उदात्तस्वरनामा । एवं रजोहरणादिषु त्रिषु स्थानेषु स्वरा ज्ञेयाः ।।

36
पढमं आवत्ततिगं वण्णदुगेणं तु[११] रइयमणुकमसो ।
बीआवत्ताण तिगं तिहिं तिहिं वण्णेहि निष्फन्नं ।।

37
रयहरणंमि[१२] 'ज'कारं 'त्ता'कारं कर-जुएण मज्झम्मि ।
'भे'कारं सीसम्मि अ[१३] काउं गुरुणो वयं सुणसु ।।

38
तुब्भं पि वट्टइ त्ति अ गुरुणा भणिअम्मि सेसआवत्ता ।
दुण्णि वि काउं तुसिणी जा गुरुणा भणिअमेवं ति ।।

39
अह सीसो रयहरणे कयंजली भणइ सविणयं सिरसा ।
खामेमि खमासमणो ! देवसिआईपडिक्कमणं[१४] ।।

40
अहमवि खामेमि तुमे गुरुणाऽणुन्नाइ खामणे सीसो ।
निक्खमइ उग्गहाओ आवसिआए भणेऊणं ।।

41
ओणयदेहो अवराहखामणं सव्वमुच्चरेऊणं ।
निंदिअगरहिअवोसट्ठ[१५]सव्वदोसो पडिक्कंतो ।।

42
खामित्ता विणएणं तिगुत्तो तेण पुणरवि तहेअ ।
उग्गहजायणपविसण दुओणयं दोपवेसं च ।।

43
पढमे छच्चावत्ता बीअपवेसम्मि हुंति छच्चेव ।
ते अ 'अहो' इच्चाई असंकरेणं पउत्तव्वा ।।

११.'तु' नास्ति, 'रईअअ' हस्त० ।१२. 'रयहरणं जकारं जुएण...' हस्त० ।१३. 'अ' हस्त० नास्ति ।१४. 'देवसिआईवइक्कमणं' योगशास्त्रे ।१५. '...सट्ठचत्तदेसो' हस्त० ।

36. प्रथममावर्तत्रिकं वर्णद्विकेन तु रचितमनुक्रमशः । द्वितीयावर्तानां त्रिकं त्रिभिस्त्रिभिर्वर्णैर्निष्पन्नम् ।।

37. रजोहरणे 'ज'कारं 'त्ता'कारं करयुगेन मध्ये । 'भे'कारं शीर्षे च कृत्वा गुरोर्वचः शृणु ।।

38. तवापि वर्तत इति च गुरुणा भणिते शेषावर्त्तौ । द्वावपि कृत्वा तूष्णीको यावद् गुरुणा भणितमेवमिति ।।

39. अथ शिष्यो रजोहरणे कृताञ्जलिर्भणति सविनयं शिरसा । क्षमयामि क्षमाश्रमण ! दैवसिकादिप्रतिक्रमणम् ।।

40. अहमपि क्षमयामि त्वां गुरुणाऽनुज्ञाते क्षमणे शिष्यः । निष्क्रामत्यवग्रहादावश्यक्या भणित्वा ।।

41. अवनतदेहोऽपराधक्षमणं सर्वमुच्चार्य । निन्दितगर्हितव्युत्सृष्टसर्वदोषः प्रतिक्रान्तः ।।

42. क्षमयित्वा विनयेन त्रिगुप्तस्तेन पुनरपि तथैव । अवग्रहयाचन-प्रवेशने द्व्यवनतं द्विप्रवेशं च ।।

43. प्रथमे षट् चावर्ता द्वितीयप्रवेशे भवन्ति षट् चैव । ते च 'अहो' इत्यादयोऽसङ्करेण प्रयोक्तव्याः ।।

३-छव्विह-आवस्सयंमि ~~~

[50]"**जे जत्थ जया जइआ बहुस्सुआ चरणकरणपब्भट्ठा ।**
जं ते [१९]समायरंती आलंबण मंदसड्ढाणं ।।
[51]**जे जत्थ जया जइआ बहुस्सुआ चरणकरणसंपन्ना ।**
जं ते समायरंती आलंबण तिव्वसड्ढाणं ।।" [आवश्यकनिर्युक्ति-११८७-११९०]

अवन्दनीयान् दर्शयति -

[52]"**दंसणनाणचरित्ते तवविणए निच्चकालपासत्था ।**
एए अवंदणिज्जा जे [२०]जसघाई पवयणस्स ।।" [आवश्यकनिर्युक्ति-११९१]

तेषां वन्दने फलं दर्शयति -

[53]"**किइकम्मं च पसंसा सुहसीलजणंमि कम्मबंधाय ।**
जे जे पमायठाणा ते ते उववूहिआ हुंति ।।" [आवश्यकनिर्युक्ति-११९२]

अथ वन्दनीयान् दर्शयति -

[54]"**दंसणनाणचरिते तवविणए निच्चकालमुज्जुत्ता ।**
एए उ वंदणिज्जा जे जसकारी पवयणस्स ।।" [आवश्यकनिर्युक्ति- ११९३]

एवंविधानां वन्दने च फलं दर्शयति -

[55]"**किइकम्मं च पसंसा संविग्गजणंमि निज्जरट्ठाए ।**
जे जे विरईठाणा ते ते उववूहिआ हुंति ।।" [आवश्यकनिर्युक्ति- ११९४]

---

१९. 'समायती' हस्त० । २०. 'जघाई' हस्त० ।

50. ये यत्र यदा यदा बहुश्रुताश्चरणकरणप्रभ्रष्टाः । यत्ते समाचरन्त्यालम्बनं मन्दश्रद्धानाम् ।।

51. ये यत्र यदा यदा बहुश्रुताश्चरणकरणसम्पन्नाः । यत्ते समाचरन्त्यालम्बनं तीव्रश्रद्धानाम् ।।

52. दर्शनज्ञानचारित्रेषु तपोविनययोः नित्यकालपार्श्वस्थाः । एते अवन्दनीया ये यशोघातिनः प्रवचनस्य।।

53. कृतिकर्म च प्रशंसा सुखशीलजने कर्मबन्धाय । यानि यानि प्रमादस्थानानि तान्युपबृंहितानि भवन्ति।।

54. दर्शनज्ञानचारित्रेषु तपविनययोः नित्यकालमुद्युक्ताः । एते तु वन्दनीया ये यशःकारिणः प्रवचनस्य ।।

55. कृतिकर्म प्रशंसा च संविग्नजने निर्जरार्थाय । यानि यानि विरतिस्थानानि तानि तान्युपबृंहितानि भवन्ति।।

३-छव्विह-आवस्सयंमि ~~~

64
"विअडण-पच्चक्खाणे सुए अ रयणाहिआ वि उ करिंति ।
मज्झिल्ले न करेंती सो चेव य तेसि पकरेइ ।।" [पञ्चवस्तुक-४७७]

कृतिकर्मकर्तारं दर्शयति -

65
"पंचमहव्वयजुत्तो अणलस माणपरिवज्जिअमईओ ।
संविग्गनिज्जरट्ठी किइकम्मकरो हवइ साहू ।।" [आवश्यकनिर्युक्ति - ११९७]

सदोषकृतिकर्मकरणे फलं दर्शयति -

66
"किइकम्मंपि करिंतो न होइ किइकम्मनिज्जराभागी ।
बत्तीसामन्नयरं साहू ठाणं विराहंतो ।।" [आवश्यकनिर्युक्ति - १२१२]

शुद्धकृतिकर्मकरणे फलं दर्शयति -

67
"एअं किइकम्मविहिं जुंजंता चरणकरणमुवउत्ता[२८] ।
साहू खवंति कम्मं अणेगभवसंचिअमणंतं ।।" [आवश्यकनिर्युक्ति - १२३०]

68
"विणयमूलो धम्मो त्ति काउं वंदिउकामो गुरुं संडासयं पडिलेहित्ता उवविट्ठो मुहणंतयं पडिलेहेइ । ससीसं कायं पमज्जित्ता परेण विणएण तिकरणसुद्धं किइकम्मं कायव्वं ।"

आवश्यकचूर्णौ पञ्चमाध्ययने ।

अत्रार्थे श्रीशीतलाचार्यदृष्टान्तः ।

।। अथ श्रीशीतलाचार्यसम्बन्धः ।।

69
एगस्स रण्णो पुत्तो सीयलो णाम, सो य णिव्विण्णकामभोगो पव्वइओ, तस्स य भगिणी अण्णस्स रण्णो दिण्णा । तीसे चत्तारि पुत्ता । सा तेसिं कहंतरेसु कहं कहेइ, जहा 'तुज्झ मातुलओ पुव्वपव्वइओ,'

---

२८. 'चरणकरमाउत्ता' हस्त० ।

64. विकटनप्रत्याख्यानयोः श्रुते च रत्नाधिका अपि तु कुर्वन्ति । मध्यमे न कुर्वन्ति स एव च तेषां करोति ।।

65. पञ्चमहाव्रतयुक्तोऽनालस्यो मानपरिवर्जितमतिः । संविग्न-निर्जरार्थी कृतिकर्मकारको भवति साधुः ।।

66. कृतिकर्मापि कुर्वन्न भवति कृतिकर्मनिर्जराभागी । द्वात्रिंशद्दोषाणामन्यतरत्साधुः स्थानं विराधयन् ।।

67. एवं कृतिकर्मविधिं युञ्जानाश्चरणकरणोपयुक्ताः । साधवः क्षपयन्ति कर्मानेकभवसञ्चितमनन्तम् ।।

68. विनयमूलो धर्म इति कृत्वा वन्दितुकामो गुरुं संडाशकं प्रतिलेखयित्वा उपविष्टो मुखान्तकं प्रतिलेखयति । सशीर्षं कायं प्रमार्ज्य परेण विनयेन त्रिकरणशुद्धं कृतिकर्म कर्तव्यम् ।

३-छव्विह-आवस्सयंमि ~~~

[४-छव्विह-आवस्सयंमि]

[७-प्रतिक्रमणावश्यकम्]

अथ चतुर्थमावश्यकं भावयति ।

तत्र प्रतिक्रमणकालमुत्सर्गापवादाभ्यां दर्शयति -

"[1]जो [१]मासो वट्टंतो, तस्स य मासस्स जो भवे तईओ ।
तन्नामनक्खत्ते, मत्थयत्थे गोससमयपडिकमणं ।।"

[इति] प्रातःप्रतिक्रमणवेला ।

"[2]अद्धनिब्बुडे सूरे, सुत्तं कड्ढंति गीअत्था ।
पडिपुन्ने पडिकमणे, तारा दो तिन्नि दीसंति ।।"

[इति] सन्ध्याप्रतिक्रमणवेला उत्सर्गतः । अपवादस्तु दैवसिकं प्रतिक्रमणं मध्याह्नादारभ्य निशीथं यावत् स्यात् । रात्रिकं निशीथादारभ्य मध्याह्नं यावद् भवन्तीति योगशास्त्रवृत्तौ। यतः -

"[3]उग्घाडपोरिसिं जा, राइअमावस्सयस्स चुन्नीए ।
ववहाराभिप्पाया, भणंति पुण जाव पुरिमड्ढं ।।" [पाक्षिकसप्ततिका-९]

अथ प्रतिक्रमणसंक्षेपविधिः -

"[4]जिणमुणिवंदणअइआरुस्सग्गो पोत्ति अ वंदणाऽऽलोए ।
सुत्तं वंदणखामण, वंदण तिन्नेव उस्सग्गा ।।

---

१. 'जो वट्टमाणमासो तस्स य मासस्स होइ जो तइओ !
तन्नामयनक्खत्ते सीसत्थे गोसपडिकमणम् ।।' विधिमार्ग प्रपायाम् ।

1. यो मासो वर्तन् तस्य च मासस्य यो भवेत्तृतीयः । तन्नामनक्षत्रे मस्तकस्थे गोससमयप्रतिक्रमणम् ।।
2. अर्द्धनिमग्ने सूर्ये सूत्रं कथयन्ति गीतार्थाः । प्रतिपूर्णे प्रतिक्रमणे तारकाणि द्वित्रीणि दृश्यन्ते ।।
3. उद्घाटपौरुषिं यावत् रात्रिकमावश्यकस्य चूर्णौ । व्यवहाराभिप्राया भणन्ति पुनः यावत् पुरिमार्धम् ।।
4. जिनमुनिवन्दनातिचारोत्सर्गः पोत्तिश्च वन्दनाऽऽलोचके । सूत्रं वन्दनक्षमापना वन्दनं त्रिण्येवोत्सर्गाः ।।

४-छव्विह-आवस्सयंमि ~~~

प्रवचनसारोद्धारोक्तश्च विधिः -

[11]
"चिइवंदणमुस्सग्गो पुत्तीपडिलेह वंदणालोए[८] ।

सुत्तं वंदण खामण वंदणय[९] चरित्तउस्सग्गो ।।

[12]
दंसणनाणुस्सग्गो सुअदेवय[१०]खित्तदेवयाणं च ।

पुत्ती वंदण थुइतिअ सक्कथय[११] थोत्त देवसिअं ।।

[13]
मिच्छादुक्कड पणिवाय[१२]दंडयं काउस्सग्गतिअकरणं ।

पुत्ती वंदण[१३] आलोअ सुत्त वंदणय खामणयं ।।

[14]
वंदणयं गाहातिअपाढो छम्मासिअस्स उस्सग्गो[१४] ।

पुत्ती वंदण नियमो थुइतिअ चिइवंदणा राओ ।।" [प्रवचनसारोद्धार-१७५-१७८]

प्रतिक्रमणं सर्वतीर्थकराणां सम्मतम् -

[15]
"सपडिक्कमणो धम्मो पुरिमस्स य पच्छिमस्स य जिणस्स ।

मज्झिमयाण जिणाणं कारणजाए पडिक्कमणं ।।"

[आवश्यकनिर्युक्ति-१२४४]

आद्यान्तिमतीर्थकरैः[१५] साधु-श्राद्धादीनामुभयकालं प्रतिक्रमणं सातिचारत्वे निरतिचारत्वे वावश्यं कर्तव्यतयैव प्रदर्शितम् । तेन यथा साधुभिरुभयकालं विधीयते एव तथा श्राद्धादीनामपि नियतमुभयकालं कृतमेव विलोक्यते । यच्च कदा कैश्चिन्न क्रियते स

---

८. 'वंदणालोअं' हस्त० । ९. 'वंदयण' हस्त० । १०. 'सुअदेवखित्त०' हस्त० । ११. '...थय' हस्त० नास्ति । १२. 'पडिवाय०' हस्त० । १३. 'वंद' हस्त० । १४. 'उस्स' हस्त० नास्ति । १५. 'आद्यान्तिमकरैः' हस्त० ।

11. चैत्यवन्दनमुत्सर्गः पोत्तिकाप्रतिलेखो वन्दनमालोचनम् । सूत्रं वन्दनं क्षामणं वन्दनकं चारित्रोत्सर्गः ।।

12. दर्शनज्ञानोत्सर्गः श्रुतदेवताक्षेत्रदेवतयोश्च । पोत्तिका वन्दनकं स्तुतित्रयं शक्रस्तवः स्तोत्रं दैवसिकम् ।।

13. मिथ्यादुष्कृतं प्रणिपातदण्डकं कायोत्सर्गत्रितयकरणम् । पोत्तिका वन्दनकमालोचनं सूत्रं वन्दनकं क्षामणकम् ।।

14. वन्दनकं गाथात्रिकपाठः षाण्मासिकस्योत्सर्गः । पोत्तिका वन्दनकं नियमः स्तुतित्रिकं चैत्यवन्दना रात्रौः ।।

15. सप्रतिक्रमणो धर्मः पूर्वस्य च पश्चिमस्य च जिनस्य । मध्यमकानां जिनानां कारणजाते प्रतिक्रमणम् ।।

४-छव्विह-आवस्सयंमि ~~~

प्रमादस्तु सर्वत्राप्यसारतयैव भावितः -

"[19]विकथा अनइ वातडी, जे सामाई पूरंति ।
सोना केरइ कचोलडइ मूरख चलउ भरंति ।।"

प्रमादसामर्थ्यं दर्शयति -

"[20]मा जाण वयं गहिअं सुअं अहिअं हुउमि कयकिच्चो ।
अज्ज वि तुह भवभमणं संजमे जइ पमाएसि ।।"

श्रीआगमेऽपि -

"[21]चउदसपुव्वी आहारगा वि मणनाणी वीअरागो[२०] वि ।
हुंति पमायपरवसा तयणंतरमेव चउगइआ ।।" [श्राद्धप्रतिक्रमणसूत्रवृत्तौ]

अन्यत्रापि -

"दृष्ट्वाऽप्यालोकं नैव विश्रम्भितव्यं तीरं नीताऽपि भ्राम्यते वायुना नौः ।
लब्ध्वा वैराग्यं भ्रष्टयोगः प्रमादाद्भूयो भूयः संसृतौ बम्भ्रमीति ।।" [ ]

इत्यादि सम्यगवगम्य प्रमादपरिहारेण सोपयोग[गो भवितव्यः] ।

श्रीजिनाज्ञाप्रतिपाल[नं]व्रतैरुभयकालं साधु-श्राद्धादिचतुर्विधश्रीसङ्घेन कर्तव्यमेव ।

"[22]जो जाहे आवन्नो साहू अन्नयरयंमि ठाणंमि ।
सो ताहे पडिकमई मज्झिमयाणं जिणवराणं ।।

---

२०. 'वीअरागाई' हस्त० ।

19. विकथया वार्तया च ये समयं पूरयन्ति । स्वर्णस्य कच्चोलके मूर्खाश्चणकान् बिभ्रन्ति ।।

20. मा जानीहि व्रतं गृहीतं श्रुतमधीतं भवामि कृतकृत्यः । अद्यापि तव भवभ्रमणं संयमे यदि प्रमाद्यसि ।।

21. *चतुर्दशपूर्वी आहारका अपि मनोज्ञानी वीतरागोऽपि* । भवन्ति प्रमादपरवशास्तदनन्तरमेव चतुर्गतिकाः ।।

22. यो यदा आपन्नः साधु अन्यतरस्मिन् स्थाने । स तदा प्रतिक्रामति मध्यमानां जिनवराणाम् ।।

४-छव्विह-आवस्सयंमि ~~~

31
हत्थसया आगंतुं गंतुं च मुहुत्तगं जहिं चिट्ठे ।

पंथे वा वच्चंतो नइसंतरणे पडिक्कमइ ।।

32
पडिसिद्धाणं करणे किच्चाणमकरणे अ पडिक्कमणं ।

असद्दहणे अ तहा विवरीयपरूवणाए अ ।।"

[आ.नि. १२४५-४७, ४९, ५०, १२७१]

प्रतिक्रमणादिक्रियाः सर्वा अपि सोपयोगतयैव क्रियमाणाः सफलाः कर्मनिर्जराहेतुः [हेतुत्वाद्?] । अन्यथा तु 'अनुपओगो द्रव्यमि'ति वचनाद् द्रव्यप्रतिक्रमणमेवोच्यते । यथा -

"33
जह सव्वदोसरहिअं पि निगदओ सुत्तमणुवउत्तस्स ।

दव्वसुअं दव्वावस्सयं च तह सव्वकिरिआओ ।।

34
उवउत्तस्स उ खलिआइअं पि सुद्धस्स भावओ सुत्तं ।

साहइ तह किरिआओ सव्वाओ निज्जरफलाओ ।।" [वि.भा.-८६२, ८६३]

अतः सर्वेष्वपि भगवदुक्तानुष्ठानेष्वन्तःप्रणिधानेऽतिशयः प्रयत्नः कार्यः, इति विशेषावश्यके । अन्तःप्रणिधानेन प्रतिक्रमणक्रियाकरणे केषाञ्चिदाचार्याणां '[२५]आयरिअ उवज्झाए' इति गाथोच्चारे भावशुद्ध्या पूर्वोत्पन्नकषायोपशमे केवलोत्पत्तिः श्रूयते । तथा प्रतिक्रमणे अतिमुक्तकसम्बन्धः श्रीभगवतीसूत्रमध्यगतः -

---

२५. 'आयरिअ-उवज्झाए सीसे साहम्मिए कुलगणे य । जे मे केऽवि कसाया सव्वे तिविहेण खामेमि ।।
[आचार्योपाध्यायान् शिष्यान् साधर्मिकान् कुलगणांश्च । ये मया केऽपि कषायिताः सर्वान् त्रिविधेन क्षमयामि ।।]'

31. हस्तशतादागत्य गत्वा च मुहूर्त्तकं यत्र तिष्ठेत् । पथि वा व्रजन् नदीसन्तरणे प्रतिक्राम्यति ।।

32. प्रतिषिद्धानां करणे कृत्यानामकरणे च प्रतिक्रमणम् । अश्रद्धाने च तथा विपरीतप्ररूपणायां च ।।

33. यथा सर्वदोषरहितमपि निगदतः सूत्रमनुपयुक्तस्य । द्रव्यश्रुतं द्रव्यावश्यकं च तथा सर्वक्रियाः ।।

34. उपयुक्तस्य तु स्खलितादिकमपि शुद्धस्य भावतः सूत्रम् । कथयति तथा क्रियाः सर्वा निर्जराफलाः ।।

[35] तेणं काले णं तेणं समये णं समणस्स भगवओ महावीरस्स अंतेवासी अतिमुत्ते णामं कुमारसमणे पगतिभद्दए जाव [पगतिउवसंते पगतिपयणुकोहमाणमायालोभे मिउमद्दवसंपन्ने अल्लीणे] विणीए ।

तए णं से अतिमुत्ते णामं कुमारसमणे अन्नया कयाइ महावुट्ठिकायंसि निवयमाणंसि कक्खपडिग्गह-रयहरणमायाए बहिया संपट्ठिए विहाराते ।

तए णं से अतिमुत्ते कुमारसमणे वाहयं वहमाणं पासति, पासित्ता मट्टियापालिं बंधति, बंधित्ता 'नाविया मे, नाविया मे' णाविओ विव णावमयं पडिग्गहकं, उदगंसि कट्टु पव्वाहमाणे-पव्वाहमाणे अभिरमति । तं च थेरा अद्दक्खु । जेणेव समणे भगवं महावीरे तेणेव उवागच्छंति, उवागच्छित्ता एवं वयासी - एवं खलु देवाणुप्पियाणं अंतेवासी अतिमुत्ते णामं कुमारसमणे, से णं भंते ! अतिमुत्ते कुमारसमणे कतिहिं भवग्गहणेहिं सिज्झिहिति जाव [बुज्झिहिति मुच्चिहिति परिणिव्वाहिति सव्वदुक्खाणं] अंतं करेहिति ?

[36] 'अज्जो !' ति समणे भगवं महावीरे ते थेरे एवं वदासी - एवं खलु अज्जो ! ममं अंतेवासी अतिमुत्ते णामं कुमारसमणे पगतिभद्दए जाव विणीए, से णं अतिमुत्ते कुमारसमणे इमेणं चेव भवग्गहणेणं सिज्झिहिति जाव अंतं करेहिति । तं मा णं अज्जो ! तुब्भे अतिमुत्तं कुमारसमणं हीलेह निंदह खिंसह गरहह अवमन्नह । तुब्भे णं देवाणुप्पिया ! अतिमुत्तं कुमारसमणं अगिलाए संगिण्हह, अगिलाए उवगिण्हह, अगिलाए भत्तेणं पाणेणं विणएणं वेयावडियं करेह । अतिमुत्ते णं कुमारसमणे अंतकरे चेव, अंतिमसरीरिए चेव ।

---

35. तस्मिन् काले तस्मिन् समये श्रमणस्य भगवतो महावीरस्य अन्तेवासी अतिमुक्तो नाम कुमारश्रमणः प्रकृतिभद्रको यावत् [प्रकृत्युपशान्तः प्रकृतिप्रतनुक्रोधमानमायालोभो मृदुमार्दवसम्पन्न आलीनः] विनीतः ।
ततः स अतिमुक्तो नाम कुमारश्रमणोऽन्यदा कदाचिन्महावृष्टिकाये निपतति कक्षाप्रतिग्रह-रजोहरणमादाय बहिः संप्रस्थितो विहाराय ।
ततः स अतिमुक्तः कुमारश्रमणो वाहकं वहमानं पश्यति, दृष्ट्वा मृत्तिकापालिं बध्नाति, बद्ध्वा 'नौका मम, नौका मम', नाविक इव नौमयं प्रतिग्रहमुदके कृत्वा प्रवाह्यन् प्रवाह्यन् अभिरमते । तं च स्थविरा अद्राक्षुः । यत्रैव श्रमणो भगवान् महावीरस्तत्रैव उपागच्छन्ति, उपागम्य एवमवादिषुः - एवं खलु देवाणुप्रियाणामन्तेवासी अतिमुक्तो नाम कुमारश्रमणो, स भदन्त ! अतिमुक्तः कुमारश्रमणः कतिभिर्भवग्रहणैः सेत्स्यति यावत् [भोत्स्यति मोक्ष्यति परिनिर्वास्यति सर्वदुःखानाम्] अन्तं करिष्यति ?

36. आर्याः ! इति श्रमणो भगवान् महावीरस्तान् स्थविरान् एवमवादीद् - एवं खलु आर्याः ! मम अन्तेवासी अतिमुक्तो नाम कुमारश्रमणः प्रकृतिभद्रको यावत् विनीतः, स अतिमुक्तः कुमारश्रमणोऽनेन चैव भवग्रहणेन सेत्स्यति यावत् अन्तं करिष्यति । तन्मा आर्याः ! यूयमतिमुक्तं कुमारश्रमणं हीलयत निन्दत खिंसत गर्हध्वमवमन्यध्वम् । यूयं देवानुप्रियाः ! अतिमुक्तं कुमारश्रमणम् अग्लान्या संगृह्णीत, अग्लान्या उपगृह्णीत, अग्लान्या भक्तेन पानेन विनयेन वैयापृत्यं कुरुत । अतिमुक्तः कुमारश्रमणोऽन्तकरश्चैव, अन्तिमशरीरिकश्चैव ।

[37]तए णं ते थेरा भगवंतो समणेणं भगवता महावीरेणं एवं वुत्ता समाणा समणं भगवं महावीरं वंदंति णमंसंति, अतिमुत्तं कुमारसमणं अगिलाए संगिण्हंति जाव [अगिलाए उवगिण्हंति, अगिलाए भत्तेणं पाणेणं विणएणं] वेयावडियं करेंति ।

एवं अतिमुत्तकुमारसमणस्स इरिआवहिअपडिक्कममाणस्स दगमट्टिअ २ पुणो उच्चारणसुहभावेण बहुअरा कम्मनिज्जरा जाया । केवलुप्पाए वि तमेव झाणं हेऊ णेओ इअ बहुस्सुअवयं ।

अतो महारम्भपरिग्रहवद्भिः श्रद्धालुरपि यदि द्विर्वेलं प्रतिक्रमणं निरायासं निर्वहनव्ययमपि न विधीयते, तदा तेषां परीत्तसंसारता कथं स्यात् ? प्रतिक्रमणं तु सामान्यवृत्त्या सर्वत्र स्खलनादौ प्रतिपदं प्रतिपदम् -

"[38]मित्ति मिउमद्दवत्ते छत्ति अ दोसाण छायणे होइ ।
मित्ति अ मेराइ ठिओ दुत्ति दुगंछामि अप्पाणं ।।

[39]कत्ति कडं मे पावं डत्ति अ डेवेमि तं उवसमेणं ।
एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ।।" [आवश्यकनिर्युक्ति-१५०५-०६]

इत्येवंरूपमेव मिथ्यादुष्कृतं दत्तं बहुपापभरनिवारकं सद्गतिनिदानं च । यदुक्तं श्रीआवश्यके -

"[40]जस्स य इच्छाकारो मिच्छाकारो अ परिचिआ दोऽवि ।
तइओ अ तहक्कारो न दुल्लहा सुग्गई तस्स ।।" [आवश्यकनिर्युक्ति-६९०]

---

37. ततस्ते स्थविरा भगवन्तो श्रमणेन भगवता महावीरेण एवमुक्ताः सन्तः श्रमणं भगवन्तं महावीरं वन्दन्ते नमस्यन्ति, अतिमुक्तं कुमारश्रमणम् अग्लान्या संगृह्णन्ति, यावत् [अग्लान्या उपगृह्णन्ति, अग्लान्या भक्तेन पानेन विनयेन] वैयापृत्यं कुर्वन्ति ।

एवं अतिमुक्तकुमार-श्रमणस्य इर्यापथिकीप्रतिक्रममाणस्य 'दगमट्टिअ-२' पुनः उच्चारणशुभभावेन बहुतरा कर्मनिर्जरा जाता । केवलोत्पादेऽपि तमेव ध्यानं हेतुः ज्ञेय इति बहुश्रुतवचनम् ।

38. 'मी'ति मृदुमार्दवत्वे 'छे'ति च दोषानां छादने भवति । 'मी'ति च मर्यादायां स्थितो 'दु'इति जुगुप्साम्यात्मानम्।।

39. 'क' इति कृतं मया पापं 'ड' इति च लङ्घयामि तमुपशमेन । एषो मिथ्यादुष्कृतपदस्याक्षरार्थः समासेन ।।

40. यस्य चेच्छाकारो मिच्छाकारश्च परिचितौ द्वावपि । तृतीयश्च तथाकारो न दुर्लभा सुगतिस्तस्य ।।

अत्र सम्बन्धः -

"[41]सव्वंपि अ संपज्जइ, मणिच्छियं निच्छयं सुपुन्नाणं ।
जह संपत्तं गुणसुंदरीइ, जणएण चत्ताए ।।"

तत्कथा चेयम् -

।। प्रतिक्रमणादिपुण्योपरि पुण्यपालराज्ञः कथा ।।

भद्दिलपुरेऽरिसिंहः राजा, कनकमाला राज्ञी, तत्सुता गुणसुन्दरी सर्वकलाकुशला श्रीजिनधर्मवासिता च । यौवनमनुप्राप्ता, एकदा सभामध्ये पितुः प्रणामार्थं गता । राज्ञा तां सभालोकं च दृष्ट्वा साहंकारमुक्तम्, 'भो जनाः ! कस्य प्रसादेन यूयं विलसथ ?' तैरुक्तम्, 'तव प्रसादेन, राजप्रसादो दिव्यास्त्र-वाणिज्य-हस्तिरत्नानां महालाभाय जायते । तावता गुणसुन्दर्या नृपतिनिरपेक्षमियं गाथोक्ता -

"[42]सा जयउ जओ लच्छी, जीआ पसाएण ईसरजणस्स ।
सच्चमलियं पि वयणं, सुअणपुरिसा वि मन्नंति ।।"

तत् श्रुत्वा राज्ञाऽतीवरुष्टेन कस्य प्रसादेन विलसतीति प्रोक्तम् -

"यां लब्ध्वेन्द्रियनिग्रहो न महता भावेन संपद्यते;
या बुद्धेर्न विधेयतां प्रकुरुते, धर्मे न या वर्त्तते ।
लोके केवलवाक्यमात्ररचनायां प्राप्य संजायते;
या नैवोपशमाय नापि यशसे विद्वत्तया किं तया ।।"

तयोक्तम्-कर्मप्रसादात्, ततश्चातितरतमरुष्टेन राज्ञा राजपाटीं गच्छता कमप्यतिदीनं दरिद्रं मूलीवाहकं दृष्ट्वा तस्य दत्ता । ततः सा दरिद्रं वदति - 'आयुषो राजः ! त्वं धर्मं कुरु, धर्माल्लक्ष्मीप्राप्तिः ।'

यतः-

"यन्नागा मदवारिभिन्नकरटास्तिष्ठन्ति निद्रालसा;
द्वारे हेमविभूषिताश्च तुरगा हेषन्ति यद्दर्पिताः।

---

41. सर्वमपि सम्पद्यते मनेच्छितं निश्चयं सुपुण्यानाम् । यथा सम्प्राप्तं गुणसुन्दर्या जनकेन त्यक्तया ।।

42. सा जयतु यतो लक्ष्मी यस्याः प्रसादेन ईश्वरजनस्य । सत्यमलिकमपि वचनं सुजनपुरुषा अपि मन्यन्ते ।।

वीणावेणुमृदङ्गशङ्खपणवैः सुप्तश्च यद्बोध्यते;
तत्सर्वं सुरलोकभूतिसदृशं धर्मस्य विस्फूर्जितम् ।।"

43
"जो पूएइ जिणिंदं, जस्स मणे जिणमयं सया वसई ।
तस्सत्थेण परेण वि, चिन्तामणिणा वि का गणणा ।।"

इत्याद्युपदेशेन प्रथमं स्वगृहासन्नजिनालये देवनमस्करणनियमं ग्राहितः । प्रातः शनैः शनैः मध्याह्नि-जिनपूजानियमं ग्राहितः । स एतन्नियमद्वयं पालयन्मूल्यानयनेन निर्वाहं करोति । वनादागच्छद्वनकुसुमानयनेन मध्याह्ने पूजां करोति । एकदा भोजनानन्तरं सा गुणसुन्दरी दरिद्रशिरसि चिकुरविवरणं करोति । तावता शिरसि गोशीर्षचन्दनगन्ध उच्छलितः । चिन्तयति किमेतत्पृच्छति च 'युष्माभिरद्यतना मूली विक्रीता न वेति ?' तेनोक्तम् - 'कान्दविकापणे मुक्ताऽस्ति ।' तयोक्तम्- 'तामानय ।' आनीता, दृष्टाश्चन्दन-फालिकाः । वनाच्च शेषचन्दनकाष्टानि आनायितानि । सर्वाणि विक्रीतानि । दशलक्षसुवर्णप्राप्तिः । व्यवहारी जातो गृहीतावासे तिष्ठति । तयोक्तम् - 'दृष्ट इदानीं धर्ममहिमा, ततो विशेषेण धर्मं कुरु । इत्युपदेशेनोभयकालप्रतिक्रमणनियमं ग्राहितः । ततः स व्यवहारी एकदा प्रतिक्रमणं कुर्वन् प्रदीपनाक्रान्तचौरै-र्द्रविणाद्यपह्रियमाणं पश्यति स्म । परिजनः कलकलं करोति गुणसुन्दरी च कथयति 'क्व सारद्रव्यम् ?' इत्यादि । बहुप्रकारेण वादितोऽपि न वदति ।

"धर्मे दार्ढ्यं फलं वृक्षे जलं नद्यां बलं भटे ।
खलेऽसत्यं जले शैत्यं घृतं भोज्ये च जीवितम् ।।"

अत्रान्तरे दीप्यमानं पुरुषं ददर्श, न च प्रदीपनम्, न चौराः, न च गुणसुन्दरी । स च वदति 'यादृशस्त्वमिन्द्रेण प्रशंसितस्तादृश एव दृढनियमोऽसि । अहं देवो वरं वृणीथ ।' स न याचते । अमोघं देवदर्शनमिति कृत्वा चिन्तामणिं समर्पयित्वा गतः । तस्य च पुण्यपालेति नामख्यातम् । ततः स चिन्तामणिप्रसादाद्बहुवाहन-परिजनोपेतो गौडदेशं गतः । तत्र भद्रगजेन्द्राणां दशसहस्राणि गृहीतानि । ततो भद्दिलपुरं प्रत्यागतः । तदासन्ने द्वितीयं भद्दिलपुरमिव सार्थमावास्य वणिक् प्रतिरूपेण तत्र स्थितः । प्राभृतमादाय पुण्यपालो नृपमिलनार्थं गतः । कुशलागमनादि प्रश्नः । राज्ञापि तं करिविक्रयकारिकं श्रुत्वा उक्तम् - मह्यं मूल्येन करिसहस्रं देहि । तेनोक्तम्, 'सार्थे समागत्य परीक्ष्य गृह्यन्तु ।' अरिसिंहो राजा बहुपरिवारवृतस्ततो गतः, तत्र विलोकिता गजाः । तावता मध्याह्नो जातः । ततः पुण्यपालेन राजा भोजनार्थं निमन्त्रितः । राजा कथयति-'पुरा सामग्रीं विना कथं भोजनं दास्यती'त्युक्ते, 'सर्वं भव्यं भावी'त्युक्त्वा स्वकार्ये लग्नः । कियद्वेलानन्तरं राजा जनपार्श्वे पृच्छति, 'स सामग्रीं कुर्वाणोऽस्ति न

---

43. *यः पूजयति जिनेन्द्रं यस्य मनसि जिनमतं सदा वसति ।*
तस्यार्थेन परेणाऽपि चिन्तामणिनाऽपि का गणना ।।

वेति ।' जनाः कथयन्ति 'कोऽपि किमपि ।' राजा चिन्तयति, 'किं मां प्रतारयति ?' तावता स चिन्तामणिप्रसादात् स्तम्भशतबहुरम्यमण्डपाकुलं चतुर्द्वारं कृत्वा राजानं निमन्त्रणार्थं गतः । राजा बहुविभूतिदर्शनविस्मितस्तत्र प्राप्तः । बहुविस्तरेण स्नानादि कृत्वा भोजनार्थमुपविष्टः । ततो गुणसुन्दरी स्फारशृङ्गारा पूर्वद्वारेणैत्य फलावलिकां परिवेषयति । ततो वेषं परावृत्य द्वितीयद्वारेणैत्य पक्वान्नम्, ततः कृतनवाद्भुतशृङ्गारा तृतीये द्वारे शालिदालिघृतादि, एवं चतुर्थेन घोलादि परिवेष्य गता । तावता राज्ञा पुण्यपालपार्श्वे पृष्टम्, 'तव कति वध्वः ?' तेनोक्तम् 'यावत्यः स्वामिना दृष्टास्तावत्यः । '

राजा तत उपरिभूमौ पल्यंके विश्रान्तः, ततो गुणसुन्दरी पुरातनं शाटितं नृपदत्तं वेषं परिधाय तत्र गता । नृपं प्रणम्य वक्ति, 'मामुपलक्षयसि ?' ततो राजा तां दृष्टवा उपलक्ष्य बाष्पाविलनयनस्तामङ्के आरोप्य, 'वत्से ! त्वं गुणसुन्दरी ? भोजनपरिवेषकाले नोपलक्षिता । वदति चाहमधन्यः ।' नमस्कृतं किमपि, तत उचितवेषं ग्राहीत्वागता पृष्टा किमेतत् ? तया सर्वं कथितं यथाजातं विभवादिधर्मफलम् । ततः स पुण्यपालो महतामहेन राज्ञा नगरे प्रवेशितः । एकदा तु राजा पुण्यपाल-गुणसुन्दरीसमेतो वने क्रीडार्थं गतः । मुनिं दृष्ट्वा तद्धर्मं श्रुत्वा प्रतिबुद्धः। ततः पुण्यपालस्य राज्यं दत्त्वा प्रव्रजितः । पुण्यपालोऽपि नियमत्रयं सविशेषं प्रभावनासहितं पालयन् चिरं राज्यं कृत्वा गुणसुन्दरीतनयं सुलोचनं राज्ये निवेश्य दीक्षां गृहीत्वा सिद्धिं गतः ।

।। इति प्रतिक्रमणादि-पुण्योपरि पुण्यपालराजसम्बन्धः ।।

[इति पडिकमणआवस्सयम्]

[५-छव्विह-आवस्सयंमि]

[८-कायोत्सर्गः]

अथ पञ्चममारभ्यते -

"[1]उस्सग्गेण विसुज्झइ[१] अइआरो कोइ कोइ[२] अ तवेणं ।
[३]तेणावि अ असुज्झमाणे छेअविसेसा [४]विसोहिंति ।।" [प्रायश्चित्तपञ्चाशक-७६२]

"[2]सो उस्सग्गो दुविहो चेट्ठाए अभिभवे अ नायव्वो ।
भिक्खायरिआइ पढमो उस्सग्गाभिजुंजणे बीओ[५] ।।
[3]इयरहवि ता न जुज्जइ अभिओगो किं पुणाइ उस्सग्गे ? ।
नणु गव्वेण परपुरं अभिरुज्झइ एवमेअं पि ।।" [ ]

नोदकवचः । गुरुराह -

"[4]मोहपयडीभयं अभिभवित्तु जो कुणइ काउस्सग्गं तु ।
भयकारणे य तिविहे नाऽभिभवो नेव पडिसेहो ।।

[5]आगारेऊण परं रणोव्व जइ सो करिज्ज उस्सग्गं ।
जुंजेज्ज[६] अभिभवो तो तदभावे अभिभवो कस्स ? ।।

[6]अट्ठविहंपि अ कम्मं अरिभूअं तेण तज्जयट्ठाए ।
अब्भुट्ठिआ उ तवसंजमं[७] च कुव्वंति निग्गंथा ।।

---

१. 'सुज्झति' पञ्चाशके । २. 'उ' पञ्चाशके । ३. 'तहविय' पञ्चाशके । ४. 'विसोहंति' पञ्चाशके । ५. 'बिइओ' आवश्यकनिर्युक्तौ । ६. 'जुंजिज्ज' आवश्यकनिर्युक्तौ । ७. 'तवसंयमंमि' आवश्यकनिर्युक्तौ ।

1. उत्सर्गेण विशुद्ध्यत्यतिचारः कोऽपि कोऽपि च तपसा । तेनापि चाशुद्ध्यति छेदविशेषा विशोधयन्ति ।।
2. स कायोत्सर्गो द्विविधश्चेष्टायामभिभवे च ज्ञातव्यः । भिक्षाचर्यादौ प्रथमः उत्सर्गाभियोजने द्वितीयः ।।
3. इतरथापि तावत् न युज्यतेऽभियोगः किं पुनः कायोत्सर्गे? । ननु गर्वेण परपुरमभिरुध्यते एवमेतदपि ।।
4. मोहप्रकृतिभयमभिभूय यः करोति कायोत्सर्गं तु । भयकारणे तु त्रिविधे नाभिभवः नैव प्रतिषेधः ।।
5. *आकार्य परं संग्रामे इव यदि स कुर्यात् कायोत्सर्गम् । युज्येत अभिभवस्तदा तदभावेऽभिभवः कस्य ? ।।*
6. अष्टविधमपि च कर्मारिभूतं तेन तज्जयार्थम् । अभ्युपस्थितास्तु तपोसंयमं च कुर्वन्ति निर्ग्रन्थाः ।।

[7] तस्स कसाया चत्तारि नायगा कम्मसत्तुसिन्नस्स ।
काउस्सग्गमभग्गं करंति तो तज्जयट्ठाए ।।

[8] संवच्छरमुक्कोसं अंतमुहुत्तं च अभिभवुस्सग्गे ।
चिट्ठाउस्सग्गस्स उ कालपमाणं उवरि वुच्छं ।।

[9] उस्सिउस्सिओ अ तह उस्सिओ अ उस्सियनिसन्नओ चेव ।
निस्सनुसिओ निसन्नो निसन्नगनिसन्नओ चेव ।।

[10] निवणुस्सिओ निवन्नो निवन्नगनिवन्नगो अ नायव्वो ।
एएसिं तु पयाणं पत्तेअ परूवणं वुच्छं ।।

[11] उस्सिअनिसन्नग निवन्नगे अ इक्किक्कगंमि पयंमि ।
दव्वेण य भावेण य चउक्कभयणा उ कायव्वा ।।

[12] देहमइजडुसुद्धी सुहदुक्खतितिक्खया अणुप्पेहा ।
झायइ अ सुहं झाणं एगग्गो काउसग्गंमि ।।

[13] अंतोमुहुत्तमित्तं[८] चित्तस्सेगग्गया हवइ झाणं ।
तं पुण अट्टं रुद्दं धम्मं सुक्कं च नायव्वं ।।

[14] तत्थ उ दो आइल्ला झाणा संसारवड्ढणा भणिआ ।
दुन्नि अ विमुक्खहेऊ तेसिऽहिगारो न इअरेसिं ।।

---

८. 'अंतोमुहुत्तकालं' आ.नि. ।

7. तस्य कषायाश्चत्वारो नायकाः कर्मशत्रुसैन्यस्य । कायोत्सर्गमभग्नं कुर्वन्ति ततस्तज्जयार्थम् ।।
8. संवत्सरमुत्कृष्टमन्तर्मुहूर्त्तं चाभिभवकायोत्सर्गे । चेष्टाकायोत्सर्गस्य तु कालप्रमाणमुपरिष्टाद् वक्ष्यामः ।।
9. उच्छ्रितोच्छ्रितश्च तथा उत्सृतश्च उत्सृतनिषण्णश्चैव । निषण्णोत्सृतो निषण्णो निषण्णनिषण्णश्चैव ।।
10. निषण्णोत्सृतो निषण्णो निषण्णनिषण्णश्च ज्ञातव्यः । एतेषां तु पदानां प्रत्येकं प्ररूपणां वक्ष्ये ।।
11. उत्सृतो निषण्णो निषण्णनिषण्णेषु च एकैकस्मिन्नेव पदे । द्रव्येन च भावेन च चतुर्भङ्गिका तु कर्तव्या ।।
12. देहमतिजाड्यशुद्धिः सुखदुःखतितिक्षा अनुप्रेक्षा । ध्यायति च शुभं ध्यानं एकाग्रः कायोत्सर्गे ।।
13. अन्तर्मुहूर्त्तमितं चित्तस्यैकाग्रता भवति ध्यानम् । तत् पुनरार्त्तं रौद्रं धर्मं शुक्लं च ज्ञातव्यम् ।।
14. तत्र च द्वयादिमे ध्याने संसारवर्धके भणिते । द्वे च विमोक्षहेतुनी तयोरधिकारो नेतरयोः ।।

15
संवरिआसवदारो अव्वाबाहे अकंटए देसे ।
काऊण थिरं ठाणं ठिओ निसन्नो निवन्नो वा ।।" [आ.नि. -१४५२-६५]

16
"काउस्सग्गंमि ठिओ निरेअकाओ निरुद्धवयपसरो ।
जाणइ सुहमेगमणो मुणि देवसिआइअइआरं ।।

17
परिजाणिऊण य जओ सम्मं गुरुजणपगासणेणं तु ।
सोहेइ अप्पगं सो जम्हा य जिणेहिं सो भणिओ ।।" [आवश्यक - १, २]

18
"काउस्सग्गं मुक्खपहदेसिअं जाणिऊण तो धीरा ।
दिवसाइआरजाणणट्ठयाइ ठायंति उस्सग्गं ।।

19
सयणासणन्नपाणे चेइय-जइ-सेज्ज-काय-उच्चारे ।
समिती-भावणगुत्ती वितहायरणंमि अइयारो ।।

20
गोसमुहणंतगाई आलोए देसिए य अइयारे ।
सव्वे समाणइत्ता हिअए दोसे ठविज्जाहि ।।

21
काउं हिअए दोसे जहक्कमं जा न ताव पारेइ ।
ताव सुहुमाणुपाणू धम्मं सुक्कं च झाइज्जा ।।

22
देसिअ राइअ पक्खिअ चाउम्मासे तहेव वरिसे अ ।
इक्किक्के तिन्नि गमा नायव्वा पंचसु एसु ।।

---

15. संवृताश्रवद्वारोऽव्याबाधेऽकण्टके देशे । कृत्वा स्थिरं स्थानं स्थितो निषण्णो निवण्णो वा ।।

16. कायोत्सर्गे स्थितो निरेजकायो निरुद्धवाक्प्रसरः । जानीते सुखमेकमना मुनिः दैवसिकातिचारम् ।।

17. परिज्ञाय च यस्मात् सम्यग् गुरुजनप्रकाशनेन तु । शोधयत्यात्मानं स यस्माच्च जिनैः स भणितः ।।

18. कायोत्सर्गं मोक्षपथदेशितं विज्ञाय ततो धीराः । दिवसातिचारज्ञानार्थं तिष्ठन्ति कायोत्सर्गम् ।।

19. शयनासनान्नपानश्चैत्य-यति-शय्या-काय-स्थंडिलः । समिति-भावना-गुप्तिः वितथाचरणेऽतिचारः ।।

20. गोषमुखवस्त्रिकादि-अवलोकयेत् दैवसिकान् चातिचारान् । सर्वान् समाप्य हृदये दोषान् स्थापयेत् ।।

21. कृत्वा हृदये दोषान् यथाक्रमं यावन्न तावत् पारयति । तावत् सुक्ष्मप्राणापानो धर्मं शुक्लं च ध्यायेत् ।।

22. दैवसिके रात्रिके पाक्षिके चातुर्मासिके तथैव वार्षिके च । एकैकस्मिन् त्रयो गमा ज्ञातव्याः पञ्चस्वेतेषु ।।

५-छव्विह-आवस्सयंमि ~~~

31 अगणीओ[९] छिंदिज्ज व बोहिअखोभाइ दीहडक्को वा ।
आगारेहिं अभग्गो उस्सग्गो एवमाईहिं ।।

32 "आलोइऊण दोसे गुरुणा पडिदिन्नपायच्छित्ता उ ।
सामाइअपुव्वगं समभावे[१०] ठाउं पडिकमंति ।।

33 आयरिअ उवज्झाए सीसे साहंमिए कुलगणे य ।
जे मे केऽवि कसाया सव्वे तिविहेण खामेमि ।।

34 सव्वस्स समणसंघस्स भगवओ अंजलिं करिय सीसे ।
सव्वं खमावइत्ता खमामि सव्वस्स अहयंपि ।।

35 सव्वस्स जीवरासिस्स भावओ धम्मनिहियनियचित्तो ।
सव्वं खमावइत्ता खमामि सव्वस्स अहयंपि ।।

36 एस चरित्तुस्सग्गो दंसणसुद्धीइ तइओ होइ ।
सुअनाणस्स चउत्थो सिद्धाणं थुई अ किइकम्मं ।।" [आ.नि.-१५२२ वृत्ति, १५२३]

37 "दुन्नि अ हुंति चरित्ते दंसणनाणेसु होइ इक्किक्को ।
सुअखित्तदेवयाए थुइ अंते पंचमंगलयं ।।"

---

९. '**अगणि**'त्ति यदा ज्योतिः स्पृशति, '**छिंदिज्ज व**'त्ति मार्जारीमूषकादिभिर्वा पुरतो यायात्, '**बोहिअखोभाइ**'त्ति स्तेनकास्तेभ्यः क्षोभः-संभ्रमः, आदिशब्दाद्राजादिक्षोभः परिगृह्यते, '**दीहडक्को वे**'त्ति सर्पदष्टे चात्मनि परे वा सहसा-अकाण्ड एवोच्चारयतः, आगारैः अभग्नः कायोत्सर्गः एवमादिभिः । १०. 'समभावावठिया' आवश्यकनिर्युक्तौ ।

31. अग्न्या छिन्द्याच्च बोधिक्षोभादिसर्पदष्टे वा । आगारैरभग्नः कायोत्सर्ग एवमादिभिः ।।

32. आलोच्य दोषान् गुरुणा प्रतिदत्तप्रायश्चित्तास्तु । सामायिकपूर्वकं समभावे स्थित्वा प्रतिक्राम्यन्ति ।।

33. आचार्योपाध्यायान् शिष्यान् साधर्मिकान् कुलगणांश्च । ये मया केऽपि कषायिताः सर्वान् त्रिविधेन क्षमयामि ।।

34. सर्वस्य श्रमणसङ्घस्य भगवतोऽञ्जलिं कृत्वा शीर्षे । सर्वं क्षमयित्वा क्षमे सर्वस्याहमपि ।।

35. सर्वस्मिन् जीवराशौ भावतो धर्मनिहितनिजचित्तः । सर्वं क्षमयित्वा क्षमे सर्वस्याहमपि ।।

36. एष चारित्रोत्सर्गो दर्शनशुद्ध्या तृतीयको भवति । श्रुतज्ञानस्य चतुर्थो सिद्धानां स्तुतिश्च कृतिकर्म्म ।।

37. द्वौ च भवन्ति चारित्रे दर्शनज्ञानेषु भवत्येकेकः । श्रुतक्षेत्रदेवताभ्यां स्तुतिः अन्ते पञ्चमङ्गलकम् ।।

"[38]सुकयं आणत्ति पिव लोगे काऊण सुकयकिइकम्मं ।
वड्ढंतिया थुईओ गुरुथुइगहणे कए तिन्नि ।।
[39]निद्दामत्तो न सरइ अइआरं मा य घट्टणंऽणोऽन्नं ।
किइअकरणदोसा वा गोसाई तिन्नि उस्सग्गा ।।
[40]एत्थ पढमो चरित्ते दंसणसुद्धीइ बिईअओ होइ ।
सुअनाणस्स य तइओ नवरं चिंतेइ तत्थ इमं ।।
[41]तइए निसाइआरं चिंतेई[११] चरिमंमि किं तवं काहं ? ।
छम्मासा एगदिणाइहाणि जा पोरिसि नमो वा ।।"

[आ.नि.-१४९७-१५०३, १५१०-१६, १५२२-१५२७]

"[42]चाउम्मासिअवरिसे उस्सग्गो खित्तदेवयाए उ ।
पक्खिअ सिज्जसुरीए करिंति चउमासिए चेगे[१२] ।।" [आवश्यकभाष्य-२३३]

"[43]देसिअ राइअ पक्खिअ चउमासे या तहेव वरिसे अ ।
एएसु हुंति निअया उस्सग्गा अनिअया सेसा ।।
[44]साय सयं गोसऽद्धं तिन्नेव सया हवंति पक्खंमि ।
पंच य चाउम्मासे अट्ठसहस्सं च वारिसिए ।।

---

११. 'चितंति' आ.नि. । १२. 'वेगे' आ. नि. ।

38. सुकृता आज्ञा इत्यपि इव लोके कृत्वा सुकृतकृतिकर्म । वर्धमानाः स्तुतयः गुरुस्तुतिग्रहणे कृते तिस्रः ।।
39. निद्रामत्तो न स्मरत्यतिचारं मा च घट्टनमन्योऽन्यम् । कृत्यकरणदोषा वा प्रत्युषादौ त्रयः कायोत्सर्गाः।।
40. अत्र प्रथमश्चारित्रे दर्शनशुद्ध्या द्वितीयो भवति । श्रुतज्ञानस्य च तृतीयो नवरं चिन्तयति तत्रायम् ।।
41. तृतीये निशातिचारं चिन्तयति चरमे किं तपः करिष्ये? । षण्मासादेकदिनादिहानी यावत् पौरुषी नमो वा ।।
42. चातुर्मासिकवर्षे उत्सर्गो क्षेत्रदेवतायास्तु । पाक्षिके शय्यासूर्याः कुर्वन्ति चातुर्मासिके चेके ।।
43. दैवसिक-रात्रिक-पाक्षिक-चतुर्मासे यास्तथैव वर्षे च । एतेषु भवन्ति नियता उत्सर्गा अनियताः शेषाः ।।
44. सायं शतं प्रत्युषार्धं त्रिण्येव शता भवन्ति पक्षे । पञ्च च चातुर्मासेऽष्टसहस्रं च वर्षे ।।

45 चत्तारि दो दुवालस वीसं चत्ता य हुंति उज्जोआ ।
देसिअ राइअ पक्खिअ चाउम्मासे अ वरिसे अ ।।

46 पणवीसमद्धतेरस सिलोग पन्नत्तरिं च बोद्धव्वा ।
सयमेगं पणवीसं बे बावन्ना य वारिसिए ।।

47 गमणागमणविहारे सुत्ते वा सुमिणदंसणे राओ ।
नावानइसंतारे इरिआवहिआपडिक्कमणं ।।

48 [१३] "पाणवहमुसावाए अदत्तमेहुणपरिग्गहे चेव ।
सयमेगं तु अणूणं ऊसासाणं भविज्जाहि ।।

49 दिट्ठीविप्परिआसे सय मेहुन्नंमि थीविपरिआसे ।
[१४] ववहारे अट्ठसयं अणभिस्संगस्स साहुस्स ।।

50 नावाए उत्तरिउं वहमाई तह नइं च एमेव ।
संतारेण चलेण व गंतुं पणवीस ऊसासा ।।" [आ.नि.-१५२९-३३, १५३८]

51 "पायसमा ऊसासा कालपमाणेण हुंति नायव्वा ।
एअं कालपमाणं उस्सग्गेणं तु नायव्वं ।।" [आ.नि.-१५३९, व्य.भा.-१२२]

52 "जो खलु तीसइवरिसो सत्तरिवरिसेण पारणाइसमो ।
विसम व कूडवाही निव्विन्नाणे हु से जड्डे ।।

---

१३. 'पाणिवह...' हस्त० । १४. 'ववहारेणट्ठसयं' आ.नि. ।

45. चत्वारि-द्वि-द्वादश-विंशति-चत्वारिंशत् च भवन्ति उद्योताः । दैवसिकरात्रिकपाक्षिकचातुर्मासे च वर्षे च ।।

46. पञ्चविंशमर्धत्रयोदशश्लोकपञ्चसप्तति च बोद्धव्या । शतमेकं पञ्चविंशं द्वे द्विपञ्चाशत् च वर्षे ।।

47. गमनागमनविहारे सुप्ते वा स्वप्नदर्शने रात्रौ । नौनदीसन्तरणे इरियापथिकीप्रतिक्रमणम् ।।

48. प्राणवधमृषावादयोः अदत्तमैथुनपरिग्रहेषु चैव । शतमेकं त्वनूनमुच्छ्वासानां भवेत् ।।

49. दृष्टिविपर्यासे शतं मैथुने स्त्रीविपर्यासे । व्यवहारेऽष्टशतमनभिसङ्गस्य साधोः ।।

50. नावा उत्तरित्वा वहनादि तथा नदी चैवमेव । सन्तारेण चलेन वा गन्तुं पञ्चविंशोच्छ्वासाः ।।

51. पादसमाः उच्छ्वासाः कालप्रमाणेन भवन्ति ज्ञातव्याः । एवं कालप्रमाणमुत्सर्गेन तु ज्ञातव्यम् ।।

52. *यः खलु त्रिंशद्वर्षः सप्ततिवर्षेण पारणादिसमः । विषम इव कूटवाही निर्विज्ञान एवासौ जड्डः ।।*

[53][१५]समभूमेऽवि अइभारो उज्जाणे किमुअ कूडवाहिस्स ? ।
अइभारेणं भज्जइ तुत्तयघाएहि अ मरालो ।।

[54]एमेव बलसमग्गो न कुणइ मायाइ सम्ममुस्सग्गं ।
मायावडिअं कम्मं पावइ उस्सग्गकेसं च ।।" [आवश्यकभाष्य-२३५, २३६]

"[55]मायाए उस्सग्गं सेसं च तवं अकुव्वओ सहुणो ।
को अन्नो अणुहोही सकम्मसेसं अणिज्जरिअं ? ।।

[56]निक्कूडं सविसेसं वयाणूरूवं बलाणुरूवं च ।
खाणुव्व उद्धदेहो काउस्सगं तु ठाइज्जा ।।

[57]तरुणो बलवं तरुणो अ दुब्बलो थेरओ बलसमिद्धो ।
थेरओ अबलो चउसुवि भंगेसु जहाबलं ठाइ ।।

[58]पयलाइ पडिपुच्छइ कंटयविआरपासवणधम्मे ।
निअडी गेलन्नं वा करेइ कूडं हवइ एयं ।।

[59]पुव्वं ठंति अ गुरुणो गुरुणा उस्सारिअंमि पारंति ।
ठायंति अ सविसेसं तरुणा [उ] अनूणविरिआओ ।।

[60]चउरंगुल मुहपत्ती उज्जूए डब्बहत्थे रयहरणं ।
वोसट्ठचत्तदेहो काउस्सग्गं करिज्जाहि ।।" [आवश्यकनिर्युक्ति-१५४०-१५४५]

---

१५. 'समभोमेऽवि अइभरो' हस्त० ।

53. समभूमावपि अतिभार उद्याने किमुत कूटवाहिनः ? अतिभारेण भज्यते तुत्तयघातैश्च मरालः ।।
54. एवमेव बलसमग्रो न करोति मायया सम्यगुत्सर्गम् । मायाप्रत्ययं कर्म प्राप्नोति कायोत्सर्गक्लेशं च ।।
55. मायया कायोत्सर्गं शेषं च तपोऽकुर्वतः सहिष्णोः । कोऽन्योऽनुभविष्यति स्वकर्मशेषमनिर्जरितम् ? ।।
56. निष्कूटं सविशेषं वयोऽनुरूपं बलानुरूपं च । स्थाणुरिवोर्द्ध्ववदेहः कायोत्सर्गं तु तिष्ठेत् ।।
57. तरुणो बलवान् तरुणश्च दुर्बलः स्थविरो बलसमृद्धः । स्थविरो दुर्बलश्चतुर्ष्वपि भङ्गकेषु यथाबलं तिष्ठति ।।
58. प्रचलयति प्रतिपृच्छति कंटक-पुरिष-प्रस्रवणधर्मम् । निकृत्या ग्लानत्वं वा करोति कूटं भवत्येतद्।।
59. पूर्वे तिष्ठन्ति च गुरवो गुरुणा उत्सारिते पारयन्ति । तिष्ठन्ति च सविशेषं तरुणा अन्यूनवीर्यतः ।।
60. चतुरङ्गुलमुखवस्त्रिका ऋजुके वामहस्ते रजोहरणम् । व्युत्सृष्टत्यक्तदेहः कायोत्सर्गं कुर्वते ।।

अथ दोषानाह -

[61] "घोडग लया य खंभे कुड्डे माले अ सबरि वहु नियले ।
लंबुत्तर थण उड्ढी [१६]संजइ खलिणे अ वायसकविट्ठे ।।

[62] सीसुक्कंपिअ [१७]मूई अंगुलिभमूहा उ वारुणी पेहा ।
[१८]नाभीकरयलकुप्पर उस्सारिअ पारिअंमि थुई ।।

[63] आसुव्व विसमपायं [१९]आउंटावित्तु ठाइ [२०]उस्सग्गे ।
कंपइ काउस्सग्गे लयव्व खरपवणसंगेण ।।

[64] खंभे वा कुड्डे वा अवठंभिअ [२१]कुणइ काउस्सग्गं तु ।
माले अ उत्तमंगं अवठंभिअ ठाइ उस्सग्गं ।।

[65] सबरी वसणविरहिआ करेहि सागारिअं जह ठएइ ।
ठइऊण गुज्झदेसं करेहि इअ कुणइ उस्सग्गं ।।

[66] अवणमिउत्तमंगो काउस्सग्गं जहा कुलवहुव्व ।
निअलियओ विव चलणे वित्थारिअ अहव मेलविउं ।।

[67] काऊण चोलपट्टं अविहीए नाभिमंडलस्सुवरिं ।
हिट्ठा य जाणुमित्तं चिट्ठई लंबुत्तरुस्सग्गं ।।

---

१६. 'संजय' आ.नि. । १७. 'सूई' आ. नि. । १८. 'एए काउस्सग्गे हवंति दोसा इगुणवीसं' प्रवचनसारोद्धारे । १९. 'गायं...' आ.नि. । २०. 'उस्सग्गं' हस्त० । २१. 'ठाइ' आ.नि. ।

61. घोटको लता च स्तम्भः कुड्यं मालश्च शबरी वधूः निगडः । लम्बोत्तरः स्तनः ऊर्द्धिः संयती खलीनं च वायसकपित्थौ ।।

62. शीर्षोत्कम्पितो मूकोऽङ्गुली भृकुटिस्तु वारुणी प्रेक्षा । नाभि-करतल-कूर्पर-उस्सारिते पारिते स्तुतिः ।।

63. अश्वस्येव विषमपादमाकुञ्चित्वा तिष्ठत्युत्सर्गे । कम्पते कायोत्सर्गे लतेव खरपवनसङ्गतेन ।।

64. स्तम्भे वा कुड्ये वाऽवष्टम्भ्य करोति कायोत्सर्गं तु । माले चोत्तमाङ्गमवष्टम्भ्य तिष्ठत्युत्सर्गम् ।।

65. शबरी वसनविरहिता कराभ्यां सागारिकं यथा स्थगति । स्थगयित्वा गुह्यदेशं कराभ्यामिति करोत्युत्सर्गम् ।।

66. अवनामितोत्तमाङ्गः कायोत्सर्गं यथा कुलवधूरिव । निगडनियन्त्रित इव चरणौ विस्तार्याथवा मेलयित्वा ।।

67. कृत्वा चोलपट्टमविधिना नाभिमण्डलस्योपरि । अधस्ताच्च जानुमात्रं तिष्ठति लम्बुत्तरोत्सर्गम् ।।

68
उच्छाईऊण य थणे चोलगपट्टेण ठाइ उस्सग्गं ।
दंसाइरक्खणट्ठा अहवा अन्नाणदोसेणं[२२] ।।
69
मेलित्तु पन्हिआओ चलणे वित्थारिऊण बाहिरओ ।
काउस्सग्गं एसो बाहिरउद्धी मुणेअव्वो ।।
70
अंगुट्ठे मेलविउं वित्थारिअ पन्हिआओ बाहिं तु ।
काउस्सग्गं एसो भणिओ अब्भिंतरुद्धित्ति ।।
71
कप्पं वा पट्टं वा पाउणिउं संजइव्व उस्सग्गं ।
ठाइ य खलिणं व जहा रयहरणं अग्गओ काउं ।।
72
भामेइ तहा दिट्ठिं चलचित्तो वायसुव्व उस्सग्गे ।
छप्पईआण भएणं कुणई अ पट्टं कविट्ठं व ।।
73
सीसं पकंपमाणो जक्खाइट्ठुव्व कुणइ उस्सग्गं ।
मूउव्व हूहुअंते[२३] तहेव छिज्जंतमाईसु ।।
74
अंगुलिभमुहाओऽवि अ चालंतो तह य कुणइ उस्सग्गं ।
आलावगगणणट्ठा संठवणत्थं च जोगाणं ।।
75
काउस्सग्गंमि ठिओ सुरा जह बुडबुडेइ अव्वत्तं ।
अणुपेहंतो तह वानरुव्व चालेइ ओट्ठउडे ।।

---

२२. 'अणाभोगदोसेणं' प्रवचनसारोद्धारे । २३. 'हुअहुअंतो' आ.नि. ।

68. अवच्छाद्य च स्तनौ चोलपट्टेन तिष्ठत्युत्सर्गम् । दंशादिरक्षणार्थमथवाऽज्ञानदोषेण ।।
69. मेलयित्वा पार्ष्णी चरणौ विस्तार्य बाह्यतः । कायोत्सर्गे एष बहिः शकटोर्ध्विको ज्ञातव्यः ।।
70. अङ्गुष्ठौ मेलयित्वा विस्तार्य पार्ष्णी बाह्यतस्तु । कायोत्सर्गे एष भणितोऽभ्यन्तरशकटोर्ध्विक इति ।।
71. कल्पं वा पट्टं वा प्रावृत्य संयतीव उत्सर्गम् । तिष्ठति च खलीनमिव यथा रजोहरणमग्रतः कृत्वा ।।
72. भ्रमयति तथा दृष्टिं चलचित्तो वायस इव उत्सर्गे । षट्पदिकानां भयेन करोति च पट्टं कपित्थमिव ।।
73. शीर्षं प्रकम्पयतो यक्षाविष्टस्येव करोत्युत्सर्गम् । मूक इव हुंहुमिति करोति तथैव छिद्यमानेषु ।।
74. अङ्गुलीः भ्रुवावपि च चालयन्तस्तथा च करोत्युत्सर्गम् । आलापकगणनार्थं संस्थापनार्थं च योगानाम् ।।
75. कायोत्सर्गे स्थितः सुरा यथा बुडबुडाशब्दमव्यक्तम् । अनुप्रेक्षमाणो तत्र वानर इव चालयत्योष्ठपुटौ ।।

76
एए काउस्सग्गं कुणमाणेण विबुहेण दोसा उ ।
सम्मं परिहरिअव्वा जिणपडिकुट्ठ त्ति काऊणं ।।"

[आ.नि.-१५४६, १५४७, वृत्ति]

कायोत्सर्गशुद्धिमाह -

"77
वासीचंदणकप्पो जो मरणे जीविए अ समसण्णो ।
देहे अ अपडिबद्धो काउस्सग्गो हवइ तस्स ।।
78
तिविहाणुवसग्गाणं दिव्वाणं माणुसाण तिरियाणं ।
सम्ममहिआसणाए काउस्सग्गो हवइ सुद्धो ।।" [आ. नि. -१५४८, १५४९]

अथ कायोत्सर्गे दृष्टान्तान् दर्शयति -

79
इहलोगंमि सुभद्दा राया उइओद सिट्ठिभज्जा य ।
सोदासखग्गथंभण सिद्धी सग्गो अ परलोए ।।

तत्थ सुभद्दोदाहरणं -

।। कायोत्सर्गे सुभद्राकथा ।।

80
वसंतपुरं नगरं, तत्थ जियसत्तुराया, जिणदत्तो सेट्ठी संजयसड्ढओ, तस्स सुभद्दा दारिया धुया, अतीवरूवस्सिणी ओरालियसरीरा साविगा य । सो तं असाहंमियाणं न देइ । तच्चनियसड्ढेणं चंपाओ वाणिज्जागएण दिट्ठा । तीए रूवलोभेण कवडसड्ढओ जाओ । धम्मं सुणेइ, जिणसाहू पूजेइ, अण्णया भावो समुप्पण्णो, आयरियाणं

---

76. एते कायोत्सर्गं कुर्वता विबुधेन दोषास्तु । सम्यक् परिहर्तव्या जिनप्रतिषिद्धा इति कृत्वा ।।

77. वासीचन्दनकल्पो यो मरणे जीविते च समसञ्ज्ञः । देहे चाप्रतिबद्धः कायोत्सर्गो भवति तस्य ।।

78. त्रिविधानामुपसर्गानां दिव्यानां मानुषाणां तैरश्चानाम् । सम्यगतिसहनायां कायोत्सर्गो भवति शुद्धः ।।

79. इहलोके सुभद्रा, राजा उदितोदयः श्रेष्ठिभार्या च । सौदासखड्गस्तम्भनं सिद्धिः स्वर्गश्च परलोके ।।

80. वसन्तपुरं नगरम्, तत्र जितशत्रू राजा, जिनदत्तः श्रेष्ठी संयतश्राद्धः, तस्य सुभद्रा बालिका दुहिताऽतीव रूपिणी उदारशरीरा श्राविका च । स तामसाधर्मिकाय न ददाति । तच्चनिकश्राद्धेन चम्पातो वाणिज्यागतेन दृष्टा । तस्या रूपलोभेन कपटश्राद्धो जातः । धर्मं शृणोति, जिनसाधून् पूजयति, अन्यदा भावः समुत्पन्नः, आचार्याणां कथयति, तैरप्यनुशिष्टः । जिनदत्तेन तस्य भावं ज्ञात्वा दुहिता दत्ता । वृत्तो विवाहः । कियच्चिरेण कालेनापि

81

आलोएइ, तेहिवि अणुसासिओ । जिणदत्तेण से भावं नाऊण धूया दिण्णा । वित्तो विवाहो । केच्चिरकालस्सवि सो तं गहाय चंपं गओ । नणंदसासुमाइयाओ तव्वण्णियसङ्गिगाओ तं खिंसंति । तओ जुयगं घरं कयं । तत्थाणेगे समणा समणीओ य पाउग्गनिमित्तमागच्छंति । तव्वण्णिगसाङ्गिया भणंति, एसा संजयाणं दढं रत्तत्ति भत्तारो से न पत्तियइत्ति । अण्णया कोई वण्णरूवाइगुणगणनिष्फणो तरुणभिक्खू पाउग्गनिमित्तं गओ । तस्स य वाउद्धुयं अच्छिंमि कणगं पविट्ठं । सुभद्दाए तं जीहाए लिहिऊण अवणीयं, तस्स निलाडे तिलओ संकंतो । तेणवि वक्खित्तचित्तेण ण जाणिओ । सो नीसरति ताव तच्चणिगसङ्गिगाहिं अथक्कागयस्स भत्तारस्स स दंसिओ, पेच्छ इमं वीसत्थरमियसंकंतं भज्जाए संगतं तिलगंति । तेणवि चिंतियं-किमिदमेवंपि होज्जा ?, अहवा बलवंतो विसया अणेगभवब्भत्थगा य किन्न होइत्ति ?, मंदनेहो जाओ । सुभद्दाए कहवि विदिओ एस वुत्तंतो, चिंतियं च णाए-पावयणीओ एस उड्डाहो कहं फेडिउ [डेमि] त्ति, पवयणदेवयमभिसंधारिऊण रयणीए काउस्सग्गं ठिया, अहासंनिहिया काइ देवया तीए सीलसमायारं नाऊण आगया, भणियं च तीए-'किं ते पियं करेमि'त्ति, तीए भणियं-'उड्डाहं फेडेहि ।' देवयाए भणियं-'फेडेमि, पञ्चूसे इमाए नयरीए दाराणि थंभेमि, तओ आलग्गे [अद्दण्णे]सु नागरेसु आगासत्था भणिस्सामि-जाए परपुरिसो मणेणा वि न चिंतिओ सा इत्थिया चालणीए पाणियं छोढूणं गंतूणं तिण्णि वारे छंटेउं उग्घाडाणि भविस्संति, तओ तुमं विण्णासिउं सेसनागरिएहिं बाहि पच्छा जाएज्जासि, तओ उग्घाडेहिसि, तओ फिट्टिही उड्डाहो, पसंसं च पाविहिसि ।' तहेव कयं पसंसं च पत्ता, एयं ताव इहलोइयं काउस्सग्गफलं । [आ.नि.-१५५०, वृत्ति]

---

81. स तां गृहीत्वा चम्पां गतः । ननन्दृश्वश्वादिकास्तच्चनिकश्राद्ध्यस्तां निन्दन्ति । ततः पृथग्गृहं कृतम् । तत्रानेके श्रमणाः श्रमण्यश्च प्रायोग्यनिमित्तमागच्छन्ति । तच्चनिकश्राद्ध्यो भणन्ति-'एषा संयतेषु दृढं रक्तेति ।' भर्त्ता तस्या न प्रत्येतीति । अन्यदा कोऽपि वर्णरूपादिगुणगणनिष्पन्नस्तरुणभिक्षुः प्रायोग्यनिमित्तं गतः । तस्य च वायूद्धुतं रजोऽक्षिणि प्रविष्टम्, सुभद्रया तज्जिह्वयोल्लिख्यापनीतम्, तस्य ललाटे तिलकः संक्रान्तः । तेनापि व्याक्षिप्तचित्तेन न ज्ञातः । स निस्सरति तावत्तच्चनिकश्राद्धीभिरकाण्डागताय भर्त्रे स दर्शितः, पश्येदं विश्वस्तरमणसंक्रान्तं भार्यायाः संगतं तिलकमिति । तेनापि चिन्तितम्-किमिदमेवमपि भवेत् ?, अथवा बल्वन्तो विषया अनेकभवाभ्यस्तकाश्च, किं न भवतीति ? मन्दस्नेहो जातः । सुभद्रया कथमपि विदित एष वृत्तान्तः, चिन्तितं चानया-प्रावचनिक एष उड्डाहः कथं स्फेटयामीति ?, प्रवचनदेवतामभिसंधार्य रजनौ कायोत्सर्गे स्थिता । यथासन्निहिता काचिद्देवता तस्याः शीलसमाचारं ज्ञात्वाऽऽगता, भणित च तया-'किं ते प्रियं करोमी'ति, तया भणितम्-'उड्डाहं स्फेटय,' देवतया भणितम्-स्फेटयामि, प्रत्यूषेऽस्या नगर्या द्वाराणि स्थगिष्यामि, ततोऽधृतिमापन्नेषु नागरेष्वाकाशस्था भणिष्यामि-यथा परपुरुषो मनसाऽपि न चिन्तितः सा स्त्री चालिन्यामुदकं क्षिप्त्वा गत्वा त्रीन् वारान् छण्टित्वा उद्घाटानि भविष्यन्ति । ततस्त्वं परीक्ष्य शेषनागरैः सह बहिः पश्चाद्यायाः, तत उद्घाटयिष्यसि, ततः स्फेटिष्यत्युड्डाहः प्रशंसां च प्राप्स्यसि,' तथैव कृतं प्रशंसां च प्राप्ता, एतत्तावदिहलौकिकं कायोत्सर्गफलम् ।

तथा -

।। इहलोकफले कुन्तीसम्बन्धः ।।

क्वापि वनभुविस्थितानां पाण्डवानामपराह्ने वातप्रेरितमतिसुगन्धि सहस्रदलकमलं खाद्धर्मपुत्राग्रे पतितम्, चिन्तयामास ।

"वृन्दैर्वृन्दारकाणामतुलपरिमलै-र्मूर्ध्नि चारोप्यते ज्ञैः ;
वैरत्यागादतुल्याभ्युदयिनि वसतः, शारदा श्रीश्च यस्मिन् ।
धन्यानामाननाब्जैः कलयति तुलनां, भानुशक्तिप्रभावां;
तत्पद्मं पुष्पजातौ जयति मधुकरै-र्गीयमानोरुकीर्त्ति ।।" [ ]

तल्लात्वाशिषं ददत्या जनन्याश्चरणावानर्च । साऽपि मुदा द्रौपद्यै ददे । सा कर्णावतंसीकृत्य स्वपतिं धर्मपुत्रं व्यजिज्ञपयत् । द्वितीयश्रवणाय विलोक्यत एव, नो चेन्म्रिये । ततो दुर्मोचं स्त्रीकदाग्रहं ज्ञात्वा तदर्थं भीमः प्रहितः । स प्राच्यां समीरागममाशङ्कमानस्तामेव दिशमनुस्मरन्महासर एकं गतः। अत्र नानाविधानि अपूर्वाणि तानि दृष्ट्वा हृष्टस्तदपूर्वसरो दर्शयितुं निजकुटुम्बं गृहीत्वा समीपे वने आवासं कृत्वा तत्सरो गाहमानः कमलैः सहसोऽन्तर्दधे । अथाऽर्जुनो समाधिपरस्तत्सरो द्रष्टुं प्रविष्टो मध्ये गतो ममज्ज। तदनु तयैव रीत्या नकुलः सहदेवोऽपि । अथाऽत्र समये युधिष्ठिरमपि कुन्त्यादेशात् सरो मध्ये गतं मग्नं ज्ञात्वा किं कर्तव्यतामूढा कुन्ती सवधूका कायोत्सर्गयति । निशान्ते ऽम्बिकागत्य तामाश्वास्यावधिना ज्ञात्वा पातालेऽगात् । चन्दनद्रूनिव नागपाशैस्तान् बद्धान् दृष्ट्वा आः ! किमेतदिति वदन्ती धरणेन्द्रमाह! यदमी नेमिनः श्राद्धाः, तदैतेषां त्वया सधार्मिकत्वं चक्रे । आगतस्य निजगेहमप्यरे गौरवं विदधते महाधियः। तदमी सत्कृत्य प्रेष्याः । यतः –

"औचित्यमेकमेकत्र, गुणानां कोटिरेकतः ।
विषायते गुणग्राम औचित्यपरिवर्जितः ।।" [ ]

ततस्तान् संहरणौषध्या व्रणानि रोधयित्वा सिंहासने उपवेश्य तेजोमयीमूर्मिकाममूल्यां स्थावर-जङ्गमविषनाशकहारं च दत्त्वा एतत्सरःप्राहरिकैः सर्पैरज्ञानाद्भः स्वरूपमजानद्भिर्यदपरद्धं तत्क्षमयति स्म । ततो विसर्जीतेऽम्बिकया विमानेऽऽरोप्य मातुः पादाग्रे मुक्ताः । माता सवधूका कायोत्सर्गमपारयत्। अम्बिकाऽपि जैनधर्माराधने सम्यग् यतितव्यमित्युपदेश्यान्तर्दधे ।

।। इति कायोत्सर्गे कुन्तीसम्बन्धः ।।

अथ कायोत्सर्गफलं दर्शयति -

"[82]जह करगओ निकिंतइ दारुं इंतो पुणोवि वच्चंतो ।
इअ कंतंति सुविहिआ काउस्सग्गेण कम्माइं ।।" [आवश्यकभाष्य-२३७]

"[83]काउस्सग्गे जह सुट्ठिअस्स भज्जंति अंगुवंगाइं ।
इय भिंदंति मुणिवरा अट्ठविहं कम्मसंघायं [२४] ।।

[84]अन्नं इमं सरीरं अन्नो जीवुत्ति एव कयबुद्धी ।
दुक्खपरिकिलेसकरं छिंद ममत्तं सरीराओ ।।

[85]जावइआ किर दुक्खा संसारे जे मए समणुभूया ।
तत्तो दुव्विसहतरा नरएसु अणोवमा दुक्खा ।।

[86]तम्हा उ निम्ममेणं मुणिणा उवलद्धसुत्तसारेणं ।
काउस्सग्गो उग्गो कम्मखयट्ठाय कायव्वो ।।" [आवश्यकनिर्युक्ति-१५५१-१५५४]

[इइ काउस्सग्गआवस्सयं]

---

२४. 'सुविहिया' आ.नि. ।

82. यथा करगतो निकृन्तति दारु आगच्छन् पुनश्च व्रजन् । एवं कृन्तन्ति सुविहिताः कायोत्सर्गेण कर्माणि ।।

83. कायोत्सर्गे यथा सुस्थितस्य भज्यन्ते अङ्गोपाङ्गानि । एवं भिन्दन्ति मुनिवरा अष्टविधं कर्मसङ्घातम् ।।

84. अन्यदिदं शरीरमन्यो जीव इत्येव कृतबुद्धिः । दुःखपरिक्लेशकरं छिन्द्धि ममत्वं शरीरात् ।।

85. यावन्ति किल दुःखानि संसारे यानि मया समनुभूतानि । ततः दुर्विषहतराणि नरकेष्वनुपमानि दुःखानि।।

86. तस्मात्तु निर्ममेन मुनिना उपलब्धसूत्रसारेण । कायोत्सर्ग उग्रः कर्मक्षयार्थं कर्तव्यः ।।

[६-छव्विह-आवस्सयंमि]

[९-प्रत्याख्यानम्]

अथ षष्ठमारभ्यते । अथ सर्वोत्तरगुणप्रत्याख्यानमाह -

"[1]पच्चक्खाणं उत्तरगुणेसु खमणाइअं अणेगविहं ।
तेण य इहयं पगयं तंपि अ इणमो दसविहं तु ।।
[2]अणागयमइक्कंतं कोडियसहिअं निअंटिअं चेव ।
सागारमणागारं परिमाणकडं निरवसेसं ।।
[3]संकेयं चेव अद्धाए पच्चक्खाणं तु दसविहं ।
सयमेवणुपालणिअं दाणुवएसे जह समाही ।।" [आ.नि.-१५६३-१५६५]

दशविधमपि [प्रत्याख्यानं] भावयति -

"[4]होही पज्जोसवणा मम य तया अंतराइअं हुज्जा ।
गुरुवेआवच्चेणं तवस्सिगेलन्नयाए वा ।।
[5]सो दाइ तवोकम्मं पडिवज्जे तं अणागए काले ।
एअं पच्चक्खाणं अणागयं होइ नायव्वं ।।
[6]पज्जोसवणाइ तवं जो खलु न करेइ कारणज्जाए ।
गुरुवेआवच्चेणं तवस्सिगेलन्नयाए वा ।।
[7]सो दाइ तवोकम्मं पडिवज्जइ तं अइच्छिए काले ।
एअं पच्चक्खाणं अइकंतं होइ नायव्वं ।।

---

1. प्रत्याख्यानमुत्तरगुणेषु क्षपणादिकमनेकविधम् । तेन चेह प्रकृतं तमपि चैतद् दशविधं तु ।।
2. अनागतमतिक्रान्तं कोटिसहितं नियन्त्रितं चैव । साकारमनाकारं परिमाणकृतं निरवशेषम् ।।
3. सङ्केतं चैवाद्धया प्रत्याख्यानं तु दशविधम् । स्वयमेवानुपालनीयं दानोपदेशे यथा समाधिः ।।
4. भविष्यति पर्युषणा मम च तदाऽन्तरायं भवेत् । गुरुवैयावृत्त्येन तपस्विग्लानतया वा ।।
5. स इदानीं तपःकर्म प्रतिपद्येत तदनागते काले । एतत्प्रत्याख्यानमनागतं भवति ज्ञातव्यम् ।।
6. पर्युषणायां तपो यः खलु न करोति कारणजाते । गुरुवैयावृत्त्येन तपस्विग्लानतया वा ।।
7. स इदानीं तपःकर्म प्रतिपद्यते तदतिक्रान्ते काले । एतत्प्रत्याख्यानमतिक्रान्तं भवति ज्ञातव्यम् ।।

६-छव्विह-आवस्सयंमि ~~~

[16]अंगुट्ठमुट्ठिगंठीघरसेउस्सासथिवुगजोइक्खे ।
भणिअं संकेअमेअं धीरेहिं अणंतनाणीहिं ।।

[17]अद्धा पच्चक्खाणं जं तं कालप्पमाणछेएणं ।
पुरिमड्ढपोरिसीए मुहुत्तमासद्धमासेहिं ।।

[18]भणियं दसविहमेअं पच्चक्खाणं गुरूवएसेणं ।
कयपच्चक्खाणविहिं इत्तो वुच्छं समासेणं ।।

[19]आह जह जीवघाए पच्चक्खाए न कारए अन्नं ।
भंगभयाऽसणदाणे धुव कारवणं ति नणु दोसो ।।

[20]नो कयपच्चक्खाणो आयरिआईण दिज्ज असणाई ।
न य विरइपालणाओ वेआवच्चं पहाणयरं ।।" [आवश्यकनिर्युक्ति-१५६६-१५८२]

गुरुः [आह] -

"[21]नो तिविहं तिविहेणं पच्चक्खइ अन्नदाणकारवणं ।
सुद्धस्स तओ मुणिणो न होइ तब्भंगहेउत्ति ।।" [आवश्यकनिर्युक्ति-१५८३]

किञ्च -

"[22]सयमेवऽणुपालणीअं दाणुवएसा य नेह पडिसिद्धो ।
ता दिज्ज उवइसिज्ज व जहा समाहीइ अन्नेसिं ।। [आवश्यकनिर्युक्ति-१५८४]

---

16. अङ्गुष्ठमुष्टिग्रन्थिगृहस्वेदोच्छ्वासस्तिबुकज्योतिष्कान् । भणितं सङ्केतमेतद् धीरैः अनन्तज्ञानिभिः ।।
17. अद्धा प्रत्याख्यानं यत् तत् कालप्रमाणच्छेदेन । पुरिमार्द्धपौरुषीभ्यां मुहूर्त्तमासार्द्धमासैः ।।
18. भणितं दशविधमेतत् प्रत्याख्यानं गुरूपदेशेन । कृतप्रत्याख्यानविधिमतो वक्ष्ये समासेन ।।
19. आह यथा जीवघाते प्रत्याख्याते न कारयत्यन्यम् । भङ्गभयादशनदाने ध्रुवं कारापणमिति ननु दोषः ।।
20. न कृतप्रत्याख्यान आचार्यादिभ्यो दध्यादशनादि । न च विरतिपालनाद् वैयावृत्त्यं प्रधानतरम् ।।
21. न त्रिविधं त्रिविधेन प्रत्याख्यात्यन्यदानकारापणम् । शुद्धस्य ततो मुनेः न भवति तद्भङ्गहेतुः इति ।।
22. स्वयमेवानुपालनीयं दानोपदेशौ च नेह प्रतिषिद्धौ । तस्माद् दध्यादुपदिशेद्वा यथा समाधिना अन्येभ्यो ।।

६-छव्विह-आवस्सयंमि ~~~

30
अणुभासइ गुरुवयणं अक्खरपयवंजणेहिं परिसुद्धं ।
८
कयपंजलि अभिमुहो तं जाणणुभासणासुद्धं ।।
31
कंतारे दुब्भिक्खे आयंके वा महई समुप्पन्ने ।
जं पालिअं न भग्गं तं जाणसु पालणासुद्धं ।।
32
रागेण व दोसेण व परिणामेण व न दूसिअं जं तु ।
तं खलु पच्चक्खाणं भावविसुद्धं मुणेअव्वं ।।
33
एएहिं छहिं ठाणेहिं पच्चक्खाणं न दूसिअं जं तु ।
तं सुद्धं णायव्वं तप्पडिवक्खे असुद्धं तु ।।" [आवश्यकभाष्य-२४६-२५२]

अशुद्धिमाह -

34
"थंभाकोहा अणाभोगा अणापुच्छा असंतइं ।
परिणामओ असुद्धो अवाओ जम्हा विउ पमाणं ।।" [आवश्यकभाष्य-२५३]
35
"अन्नत्थ निवडिए वंजणंमि जो खलु मणोगओ भावो ।
तं खलु पच्चक्खाणं न पमाणं वंजणच्छलणा ।।
36
फासिअं पालिअं चेव, सोहिअं तीरिअं तहा ।
किट्टिअमाराहिअं चेव, ९एरिसयंमी पयइयव्वं ।।"[आवश्यक निर्युक्ति-१५९२, ९३]

---

८. 'पंजलिउडो' आ.नि. । ९. 'एरिसंमी पइयव्वं' हस्त० ।

30. अनुभाषते गुरुवचनमक्षरपदव्यञ्जनैः परिशुद्धम् । कृतप्राञ्जलिरभिमुखस्तज्जानीहि अनुभाषणाशुद्धम् ।।

31. कान्तारे दुर्भिक्षे आतङ्के वा महति समुत्पन्ने । यत् पालितं न भग्नं तज्जानीहि पालनाशुद्धम् ।।

32. रागेण वा द्वेषेण वा परिणामेन वा न दूषितं यत्तु । तत् खलु प्रत्याख्यानं भावविशुद्धं ज्ञातव्यम् ।।

33. एभिः षड्भिः स्थानैः प्रत्याख्यानं न दूषितं यत्तु । तत् शुद्धं ज्ञातव्यं तत्प्रतिपक्षेऽशुद्धं तु ।।

34. स्तम्भात् क्रोधात् अनाभोगात् अनापृच्छातोऽसन्ततेः । परिणामात् अशुद्धोऽपायो यस्माद् विद्वत्प्रमाणम्।।

35. अन्यत्र निपतिते व्यञ्जने यः खलु मनोगतो भावः । तत् खलु प्रत्याख्यानं न प्रमाणं व्यञ्जनच्छलना ।।

36. स्पृष्टं पालितं चैव शोधितं तीरितं तथा । कीर्तितमाराधितं चैव एतादृशि प्रयतितव्यम् ।।

६-छव्विह-आवस्सयंमि ~~~

44
दो छच्च सत्त अट्ठ य सत्तट्ठ य पंच छच्च पाणंमि ।
चउ पंच अट्ठ नव य पत्तेअं पिंडए नवए ।।
45
दोच्चेव नमुक्कारे आगारा छच्च पोरिसीए उ ।
सत्तेव य पुरिमड्ढे एगासणगंमि अट्ठेव ।।
46
सत्तेगट्ठाणस्स उ अट्ठेवायंबिलस्स[१४] आगारा ।
पंचेव[१५] अभत्तट्ठस्स[१६] उ छप्पाणे चरिमि चत्तारि ।।
47
पंच चउरो अभिग्गहि निव्वीए अट्ठ नव व आगारा ।
अप्पाउराण पंच उ हवंति सेसेसु चत्तारि ।।" [आवश्यकनिर्युक्ति-१५९७-१६०१]

अथ कारयितृ-कर्त्रोर्भङ्गानाह -

48
"पच्चक्खाएण कया पच्चक्खावितएवि सूआ उ ।
उभयमवि जाणगेअर चउभंगे गोणिदिट्ठंतो ।।
49
मूलगुण-उत्तरगुणे सव्वे देसे य तहय सुद्धीए ।
पच्चक्खाणविहिन्नू पच्चक्खाया गुरू होइ ।।
50
किइकम्माइविहिन्नू उवओगपरो अ असढभावो अ ।
संविग्गथिरपइन्नो पच्चक्खावितओ भणिओ ।।
51
इत्थं पुण चउभंगो जाणगइअरंमि गोणिनाएणं ।
सुद्धासुद्धा पढमंतिमा उ सेसेसु अ विभासा ।।" [आवश्यकनिर्युक्ति-१६१३-१६१७]

---

१४. '...आयंबिलंमि' आ.नि. । १५. 'पंच' हस्त० । १६. 'अभत्तट्ठे' आ.नि. ।

44. द्वौ षट् च सप्त अष्टौ च सप्ताष्टौ पञ्च षट् च पाने । चतुः पञ्च अष्टौ नव च प्रत्येकं पिण्डको नवकः ।।
45. द्वावेव नमस्कारेऽऽकारौ षट् च पौरुष्यां तु । सप्तैव च पुरिमार्द्धे एकासनेऽष्टावेव ।।
46. सप्तैकस्थानस्य त्वष्टैवाचाम्लस्याकाराः । पञ्चैवाभक्तार्थस्य तु षट् पाने चरिमे चत्वारः ।।
47. पञ्च चत्वारोऽभिग्रहे निर्विकृतौ अष्टौ नव वाऽऽकाराः । अप्रावरणे पञ्च तु भवन्ति शेषेषु चत्वारः ।।
48. प्रत्याख्यात्रा कृता प्रत्याख्यापयितर्यपि सूचा तु । उभयमपि ज्ञातरेतरे चतुर्भङ्गो गोणिदृष्टान्तः ।।
49. मूलगुणोत्तरगुणे सर्वे देशे च तथा च शुद्धौ । प्रत्याख्यानविधिज्ञः प्रत्याख्याता गुरुः भवति ।।
50. कृतिकर्मादिविधिज्ञ उपयोगपरश्चाशठभावश्च । संविग्नस्थिरप्रतिज्ञः प्रत्याख्यापयिता भणितः ।।
51. इत्थं पुनश्चतुर्भङ्गः ज्ञातकेतरयोः गोणिज्ञातेन । शुद्धाशुद्धौः प्रथमान्तिमौ तु शेषेषु च विकल्पाः ।।

अथ परीषदमाह -

"[52]सोउं उवट्ठियाए विणीअ[आ?]वक्खित्ततदुवउत्ताए ।
एवंविहपरिसाए पच्चक्खाणं कहेअव्वं ।।
[53]आणागिज्झो अत्थो आणाए चेव सो कहेअव्वो ।
दिट्ठंतिअ दिट्ठंता कहणविही विराहणा इहरा ।।" [आवश्यकनिर्युक्ति-१६१८, १६१९]

अथ प्रत्याख्यानफलमाह -

"[54]पच्चक्खाणस्स फलं इहपरलोए अ होइ दुविहं तु ।
इहलोइ धम्मिलाई दामन्नगमाई परलोए ।।

यथा -

।। इहलोकफले धम्मिलकथा ।।

कुशाग्रपत्तने त्वासीज्जितशत्रुर्नराधिपः । धारिणी तस्य राज्ञी च गुणरत्नौघधारिणी ।।१।।
सुरेन्द्रदत्तः सार्थेशस्तत्र श्रीद इव श्रिया । आसीत्तस्य सुभद्रेति प्रेयसी श्रेयसीतमा[१७] ।।२।।
अन्यदाऽऽपन्नसत्त्वाया दानधर्मादिदोहदाः । जातास्तस्याः प्रियेणाशु निःशेषा अपि पूरिताः ।।३।।
सूनुः शुभेऽह्नि संजातस्ततः पित्रा प्रमोदतः । पुत्रजन्मोत्सवश्चक्रे जगदानन्ददायकः ।।४।।
तस्य धम्मिल इत्याख्या विदधे दोहदानुगा । लाल्यमानोऽनिशं पञ्चधात्रीभिर्वर्धते स्म सः ।।५।।
द्विसप्ततिकलाविज्ञः स व्यवाहि यशोमतीम् । तत्रैवेभ्यधनवसुधनदत्तातनूद्भवाम् ।।६।।
भोगक्षमोऽप्यतद्रागी हस्तान्नोज्झति पुस्तिकाम् । भोगत्यागविलासाद्यैः फलं गृह्णाति न श्रियः ।।७।।
मात्रोचे तत्पिता पुत्रः सुहृद्गोष्ठ्यां नियोज्यते । पितोचेऽम्भः स्वयं नीचैर्यात्येव निरुपक्रमम् ।।८।।
परं[१८] क्षिप्तः सुहृद्गोष्ठ्यां स्नेहान्मात्रा सुतस्ततः । वसन्ततिलकावेश्यावेश्म तत्सङ्गतो गतः ।।९।।

---

१७. 'तथा' हस्त० । १८. 'परिक्षिप्तः' मुद्रितधम्मिलचरित्रे ।

52. श्रोतुमुपस्थितायां विनित[ता]-व्याक्षिप्त-तदुपयुक्तायाम् । एवंविधपर्षदि प्रत्याख्यानं कथयितव्यम् ।।
53. आज्ञाग्राह्योऽर्थ आज्ञयैव स कथयितव्यः । दार्ष्टान्तिको दृष्टान्तात् कथनविधिः विराधना इतरथा ।।
54. प्रत्याख्यानस्य फलमिह-परलोके च भवति द्विविधं तु । इहलोके धम्मिलादयो दामन्नकादयः परलोके ।।

बहुकालं तदासक्तस्तत्रास्थाद्भोगलालसः । प्रत्यहं तद्गृहे प्रैषीद्दीनाराष्टशतं प्रसूः ।।१०।।
एवं पूर्वार्जिते द्रव्ये प्रयात्यम्बा रुरोद सा । किं रोदिषीति भर्ताऽऽह द्रव्यं यातीति साऽवदत् ।।११।।
प्रियेणोचे मयाऽवारि तथाप्येवं कृतं त्वया । तन्मा रोदीस्ततः पुत्रवियोगात्पितरौ मृतौ ।।१२।।
यशोमत्यपि निःस्वत्वे प्रैषीत्स्वाभरणान्यपि । अक्कापि निःस्वतां ज्ञात्वा पश्चात्तान्यार्पयत्ततः ।।१३।।
सापि विक्रीय गेहाद्यं गच्छति स्म पितुर्गृहम् । ऊचे वसन्तसेनाऽपि कुट्टिनी स्वां सुतामिति ।।१४।।
मुञ्चैनं निर्धनं सापि तद्रक्ता तं न मुञ्चति । इक्षुकूर्चादिदृष्टान्तान्नाक्कोक्तानप्यजीगणत् ।।१५।।
[19]कृत्वाक्का प्रोत्सवं शाठ्यादानयत्[20] प्रमदाकुलम् । आपानकं [21]व्यधादक्का तत्राचेतनयोर्द्वयोः ।।१६।।
धम्मिलं निजदासीभिरौज्झयन्नगराद्बहिः । प्रातस्त्यैः पवनैर्बुद्धो वीक्ष्यात्मानं भुवि स्थितम् ।।१७।।
चिन्तयामास चित्ते स्ववेश्याविलसितं तदा । आसां स्वार्थाश्रयिप्रेम तत्त्वतो न यदुच्यते ।।१८।।
सर्पाणां क्षितिपानां च व्याघ्राणां पावकस्य च । पण्यस्त्रीणामपि प्रायो न हि कोऽपि प्रियो भवेत् ।।१९।।
पृष्ट्वा [22]पृष्ट्वा ततः स्वौको [23]गतः प्रातिवेश्मिकैः । द्रव्यक्षयो मृतिः पित्रोः [24]पत्नी पितृगृहं गता ।।२०।।
तच्चाकर्ण्य क्षणाद्वज्राहतवन्मूर्छितोऽपतत् । विमूर्छश्चोत्थितो दध्यौ किमतो जीवितेन मे ।।२१।।
निर्गत्य नगरान्मृत्यै जीर्णोद्यानं गतस्ततः । तत्रासिना छिन्दितं स्वं देवता तमकुण्ठयत् ।।२२।।
चितां प्रज्वाल्य चाविक्षद्देवता तामशीतयत् । भक्षितं कालकूटं च ग्रस्तं तज्जठराग्निना ।।२३।।
मुक्तवान् स्वं तरोरग्राद्भूल्यां तूल्यामिवापतत् । तदा तं दिवि कोऽप्याह मा मैवं साहसं कृथाः ।।२४।।
ततः स चिन्तयन्नस्ति कर्त्तव्यं किं मयाऽधुना । इतो वसन्ततिलका बुद्ध्वाऽनालोक्य धम्मिलम् ।।२५।।
पप्रच्छाक्कां धम्मिलः क्व ? साऽऽह तं वेत्ति कोऽधनम् । साऽथ दध्यौ व्यधादेतदर्थमेवम[25]धूत्सवम् ।।२६।।
ततो वेणीं बबन्धासौ सर्वं शृङ्गारमत्यजत् । प्रत्यज्ञासीच्चेति नरं नेहाऽन्यं धम्मिलं विना ।।२७।।
धम्मिलोऽपि ततो जीर्णोद्यानात् स्निग्धवनं गतः । अशोकद्रोरधः साधुं धर्म[26]साक्षात्मैक्षत ।।२८।
साधुस्तमाह किमहो ईदृक्साहसकार्यसि । प्रणम्य सोऽभ्यधात्साधुं प्रभोऽहं दुःखभागिति ।।२९।।

---

१९. श्लोक १६-१७-१८ स्थाने मुद्रितधम्मिलचरित्रेऽयं पाठः

'आपानकं व्यधादक्का तत्राचेतनयोर्द्वयोः । धम्मिलं निजदासीभिरौज्झयन्नगराद्बहिः ।।१६।।

'प्रातस्त्यैः पवनैर्बुद्धो वीक्ष्यात्मानं भुवि स्थितम् । चिन्तयामास चित्ते स्ववेश्याविलसितं यतः ।।१७।।

२०. '...दाह्वयत्' मुद्रितधम्मिलचरित्रे । २१ 'विधात्पश्चाद्' हस्त० । २२. 'नरं' मुद्रितधम्मिलचरित्रे ।

२३. 'गतस्य' मुद्रितचरित्रे । २४. 'पत्न्या पितृगृहे गतिः' मुद्रितचरित्रे । २५. 'मेवामुमुद्यमम्' मुद्रितचरित्रे । २६. 'धर्ममाख्यान्त' मुद्रितचरित्रे ।

६-छव्विह-आवस्सयंमि ~~~

कन्याऽभीष्टजनालाभात् पश्चात्तापेन जागरात् । अस्वपीद्धम्मिलेनोक्ता वृहती के युवामिति ।।५३।।
साऽथोचे मागधपुरेऽस्त्यमित्रदमनो नृपः । तत्पुत्री विमला प्राप्तयौवना द्वेष्टि पुरुषान् ।।५४।।
दुर्वाच्यानि वचांस्याह ततो राज्ञा पुराद्बहिः । सौधे साऽस्थापि दास्यास्या धात्र्यहं कमलाभिधा।।५५।।
अन्यदा तत्र वास्तव्यसमुद्रदत्तनन्दनः । अदर्शि धम्मिलो नाम तया राजपथे व्रजन् ।।५६।।
सा तस्मिन्ननुरक्ताऽभूत्सख्याऽथ तमवीवदत् । मत्स्वामिनीमुद्वहेति सोऽभ्यधाद्वणिगस्म्यहम् ।।५७।।
नोद्वहे नृपतेः पुत्रीं साऽऽहैकान्ते विवाह्यताम् । गम्यं देशान्तरे द्वाभ्यां नो चेदेषा मरिष्यति ।।५८।।
ततस्तद्वयया तेनोद्याने भूतगृहान्तरे । तत्रोभयोः सङ्गमोऽस्तु सङ्केत इति निर्ममे ।।५९।।
कथञ्चिन्न स तत्रागाद्युवा सौभाग्यभाग्यभूः । तत्समानाभिधानोऽस्या[२८] दैवयोगात्त्वमागतः ।।६०।।
आवामपि रथारूढे तत्रायाते मयोदितम् । धम्मिलोऽस्त्यत्र संप्राप्तस्त्वयोक्तं धम्मिलोऽस्म्यहम् ।।६१।।
चेलिवाऽद्य त्वया सार्द्धं प्रातस्त्वां वीक्ष्य साऽशुचत् ।
तदेतां त्वं वशे कुर्याः सोऽवक् बोध्या त्वयाऽप्यसौ ।।६२।।
व्यभाद्वार्तयतोरेवं पृष्ट्वा ग्रामाधिपं ततः । चलिताश्चाटवीमापुर्दुस्तरां भववार्द्धिवत् ।।६३।।
मार्गे वन्येभशार्दूलफणीन्द्रवनसैरिभाः । त्रासिताः सिंहनादाद्यैर्भीते चाश्वासिते स्त्रियौ ।।६४।।
अर्जुनश्चौरसेनानीर्नीतो यमपुरीं युधा । पन्थानं सुवहं कृत्वा रथारूढश्चचाल सः ।।६५।।
विस्मिता कमलाऽशंसद्विमला तु न किञ्चन । श्रुत्वाऽथायत्परानीकध्वनिं ते चकिते पुनः ।।६६।।
अथोचे धम्मिलो धैर्यान्मयि जीवति वां न भीः । तावदेकः पुमानेत्य धम्मिलं स्माह भो नर[२९] ! ।।६७।।
निहतोऽर्जुनकश्चौरसेनानीरिति सादरः । अजितसेनः पल्लीशो हृष्टस्त्वां द्रष्टुमेत्यसौ ।।६८।।
तावदागत एवासाववारोहत्तुरङ्गमात् । धम्मिलोऽपि रथोत्तीर्णः समाश्लिष्टौ मिथोऽथ तौ ।।६९।।
पल्लीशः स्माह ते वत्स ! साहसं गुरु सोऽवदत् । देवतानां गुरूणां च प्रसादात्सर्वमप्यदः ।।७०।।
ततः स्नेहेन पल्लीशस्तं पल्लीमनयत्तदा । तत्र सत्क्रियमाणोऽस्थाद्धम्मिलोऽहानि कत्यपि ।।७१।।
कमला विमलाग्रे च तं प्रशंसति धम्मिलम् । साऽवोचद्द्रमकोऽयं न श्लाघनीयो ममाग्रतः ।।७२।।
पल्लीपतिमथापृच्छ्य ययौ चम्पां सुखेन सः । आवासार्थं प्रतस्थेऽथ मध्ये मुक्त्वा रथं बहिः ।।७३।।

२८.'...धानस्तु' हस्त० । २९. 'भोस्त्वया' हस्त० ।

६-छव्विह-आवस्सयंमि ~~~

[३४]अयं पुनर्गुणमयः पटवद्धम्मिलो ध्रुवम् । इतो नैवाधिकं किञ्चिन्मन्येऽहं पुरुषं भुवि ।।९४।।

आत्मच्छन्दाः पुमांसोऽपि विनश्यन्ति बुधा अपि । किमुच्यते ? पुनः स्त्रीणामज्ञानध्वस्तचक्षुषाम् ।।९५।।

एवं तयोक्ता विमला प्रपेदे धम्मिलं वरम् । हृष्टस्तां सोऽपि गान्धर्वविवाहेनोढवाँस्ततः ।।९६।।

कमलाविमलायुक्तो द्वितीयेऽहनि धम्मिलः । कुमारेण सहोद्यानं ययौ श्रीदस्य लीलया ।।९७।।

स्वेच्छया क्रीडितं तत्र सुहृद्वृन्दारकैः समम् । धम्मिलं विमलायुक्तं ललन्तं वीक्ष्य राजसूः ।।९८।।

प्रीतस्तत्राथ सङ्गीतमतिस्फीतमचीकरत् । भुक्त्वा पीत्वा च रन्त्वा[३५] च लतावेश्मसु कौतुकान् ।।९९।।

ततः सर्वेऽपि सोत्साहाः परिपूर्णमनोरथाः । कृतार्थानर्थिनः कृत्वा गृहं निजं निजं ययुः ।।१००।।

ततो विमलया सार्धं धम्मिलो विलसन् भृशम् । प्रमोदं परमं प्राप्तो नास्तं जानाति नोद्गतम् ।।१०१।।

अन्यदा प्रेमकलहे विमलामाह धम्मिलः । वसन्ततिलके ! देवीभूयते नातिरोषणैः ।।१०२।।

ततः प्रकुपिता पादतलेनाहत्य तं जगौ । वसन्ततिलकायास्त्वं वल्लभाया व्रजान्तिके ।।१०३।।

[३६]स्मित्वाऽथ निर्गतो गेहाद्गच्छन् राजाध्वसन्निधौ । दृष्ट्वा नागगृहं दीप्तदीपमुद्धूतसौरभम् ।।१०४।।

प्रविश्य देवतां तत्र प्रणिपत्योपविष्टवान् । तदागात्तत्र पूजाङ्गव्यग्रहस्ता सखीयुता ।।१०५।।

उद्भिन्नयौवना कन्याऽर्चित्वा नागेन्द्रमानमत् । सुप्रसन्नोऽथ तामूचे स्वाभीष्टं वरमाप्नुयाः ।।१०६।।

धम्मिलं सोत्थिताऽपश्यद्धम्मिलोऽपि ददर्श ताम् ।
स तयोक्तः कुतो यूयं ? सोऽवक् कुशाग्रपत्तनात् ।।१०७।।

[३७]तद्गुणै रञ्जिता सास्थाद्विस्मयस्मेरलोचना । सा तु रागमनाः सोऽपि भवती केति पृष्टवान् ।।१०८।।

सोचेऽस्यां पुरिसार्थेशो नाम्ना नागवसुर्धनी । नागसेना च तद्भार्या नागदत्तास्मि तत्सुता ।।१०९।।

अहं च प्रत्यहं नागमर्चित्वा वरमर्थये । अद्यापि पुण्यैर्दृष्टस्त्वमुपविष्टस्तदग्रतः ।।११०।।

तन्मे मनोरथः पूर्ण इत्युक्त्वा सा गता गृहम् । तत्सर्वं कथितं पित्रोः स ताभ्यां तां विवाहि[illegible] ।।१११।।

तत्सखी कपिला तच्च श्रुत्वा कपिलराट्सुता । अकारयत्पितुः पार्श्वात्स्वयंवरणमण्डपम् ।।११२।।

---

३४. अयं श्लोको मुद्रितधम्मिलचरित्रे नास्ति । ३५. 'च लतावेश्मसु कौतुकान् ।। ततः सर्वेऽपि सोत्साहाः परिपूर्णमनोरथाः । कृतार्थानर्थिनः कृत्वा' इति पाठो मुद्रितधम्मिलचरित्रे नास्ति । ३६. 'स्मृत्वा' हस्त० । ३७. त्रिश्लोक १०८-११० स्थानेऽयं पाठो मुद्रितधम्मिलचरित्रे- 'भवती केति सोत्कण्ठं पृष्ठा तेनेति साऽवदत् । अत्र नागवसुः श्रेष्ठी नागसेना तदङ्गना ।। तत्सुता नागदत्ताहं नागं वरमाथार्थये । अर्चित्वा सततं भक्त्या पुण्यैर्दृष्टो मया यतः ।।'

६-छव्विह-आवस्सयंमि ~~~

श्रीचंद्राद्या सुनंदाथ श्रीसेना च सुमंगला । सेना विजयसेना च श्रीः सोमा च यशोमती ।।१३४।।

श्रीदेवी च सुमित्रा च श्रीमती मित्रवत्यथ । सोमदत्ता च गान्धारी मित्रसेनाऽहमंतिमा ।।१३५।।

अधुना साधयन् विद्यां वंशजाल्यां स विद्यते । अचिन्तयद्धम्मिलोऽथ मया स एव मारितः ।।१३६।।

ततः सोक्ता मया सोऽद्य वंशजाल्यां स्थितो हतः ।

साश्रुर्विषण्णा सा दध्यौ नान्यथा मुनिभाषितम् ।।१३७।।

तद्गच्छाम्यार्यपुत्राहं तद्याम्योः कथयाम्यदः । चेद्रक्ते त्वयि ते स्यातां ततो रक्तां पताकिकाम् ।।१३८।।

उत्तम्भिष्येऽन्यथा श्वेतामिति सङ्केत एष ते । स च तद्गतचित्तोऽस्थात् क्षणाच्छ्वेतां पताकिकाम् ।।१३९।।

दृष्ट्वा मयि विरक्ते ते ज्ञात्वाऽपक्रान्तवाँस्ततः । गच्छन्नवाप कान्तारे कर्बटं तत्र सोऽविशत् ।।१४०।।

सुदत्तो नाम तत्रेशश्चम्पाधिपसहोदरः । प्रिया वसुमती तस्य पुत्री पद्मावती पुनः ।।१४१।।

कन्यकां तत्र दृष्ट्वैकां शूलार्ता चानुकम्पया । दत्त्वौषधं कृता भव्या श्रुतं तच्च महीभृता ।।१४२।।

ततो नीतः स्वसौधं स स्वपुत्रीं रोगपीडिताम् । तां भव्यां कारितवाँस्तुष्टस्तेन तां पर्यणाययत् ।।१४३।।

तत्र सार्धं तया भोगान् भुञ्जानोऽस्ति यथासुखम्[४०] । अन्यदोचे नृपः सन्धिं चम्पेशेन समं मम ।।१४४।।

कः करिष्यत्यभाषिष्ट धम्मिलोऽहं ततो नृपः । तमेव प्रेषयच्चम्पां जगाम च तदैव सः ।।१४५।।

तदा च तत्र भूपस्य स्तम्भमुन्मूल्य हस्तिराट् । पुरीमुपद्रवन्नस्ति महामदवशं गतः ।।१४६।।

तत्रेन्द्रदत्तसार्थेशसूनुः सागरदत्तकः । कमला कमलश्रीश्च धनश्रीर्देवकी तथा ।।१४७।।

कुमुदा कुमुदानन्दा विमला वसुमत्यथ । कन्याष्टकविवाहार्थं सर्ववैवाहिकान्वितः ।।१४८।।

यावदस्ति व्रजँस्तावन्मत्तस्तत्रागतः करी । नष्टः सागरदत्तोऽथ सर्वाः कन्या विमुच्य ताः ।।१४९।।

लोकः सर्वोऽपि चानश्यद्बिभ्यन्त्यस्ताश्च कन्यकाः । तस्थुर्वराक्यस्तत्रैव निःसरज्जीविता इव ।।१५०।।

मृत्योर्मुखादिवाकृष्य कन्यास्ता हस्तिनोऽग्रतः । लघुहस्ततयोदग्रस्थाने संस्थाप्य धम्मिलः ।।१५१।।

तं गजं गजमानज्ञः खेलयित्वा वशे व्यधात् । कन्यास्तु मातृपितॄणां समस्तास्ताः समार्पयत् ।।१५२।।

सागरः परिणेतुं ताः कन्याः पुनरुपस्थितः । न मन्यन्ते स्म कन्यास्तु स्वस्योद्वाहाय सागरम् ।।१५३।।

प्राणानादाय नष्टोऽसावस्माँस्तत्याज मृत्यवे । प्रदत्तं जीवितं येन जीवितेशः स एव नः ।।१५४।।

---

४०. 'सुखेन स' हस्त० ।

६-छव्विह-आवस्सयंमि ~~~

धम्मिलस्तत्पुरोऽप्याह कुशाग्रपुरपत्तने । जितशत्रूरभूद्राजा गणिका तस्य विश्रुता ।।१७५।।
वसन्तसेना नाम्नाऽस्ति वसन्ततिलका सुता । सा ममातिप्रिया तस्या अतीवाहमपि प्रियः ।।१७६।।
विद्युन्मत्यवदत्तस्याः कृत्वा सारामुपैम्यहम् । सोऽभ्यधाद्याहि याता सा सारां कृत्वा समागता ।।१७७।।
आख्याति धम्मिलस्याग्रे युवरूपमितः प्रिय ! । दर्शनीयं सशृङ्गारं कृत्वा तस्या गृहेऽगमम् ।।१७८।।
दृष्टा वसन्ततिलका पत्युर्विरहतः कृशा । त्यक्तनिःशेषशृङ्गारा जरन्मलीमसांशुका ।।१७९।।
कृतवेणिबन्धा ध्यायन्त्यस्ति त्वामेव केवलम् । पुरुषद्वेषिणी लीना मां नावलोकयत्यपि ।।१८०।।
ततः पुंरूपमुत्सृज्य भूत्वाऽहं निजरूपभाक् । ऊचेऽहं प्रेषिताऽस्म्यत्र धम्मिलेन महात्मना ।।१८१।।
हले ! वसन्ततिलके ! सारां कर्तुमहं तव । तदाकर्ण्य प्रमोदेनोद्भिन्नरोमाञ्चकञ्चुका ।।१८२।।
सहसोत्थाय सस्नेहं गाढमालिङ्ग्य सादरम् । [४५]अथापृच्छच्च मां हर्षात् कुत्र ? मे प्राणवल्लभः ।।१८३।।
उक्तं मयाऽस्ति चम्पायां ततो मे त्वद्वियोगजम् । मुञ्चत्यश्रूणि भूयांसि दुःखं सर्वं न्यवेदयत् ।।१८४।।
विद्युन्मत्या तदाख्यातं श्रुत्वाऽभूदुन्मनाः क्षणात् । साऽथ विज्ञाय [४६]तच्चित्तमुचे तस्य प्रियङ्करम् ।।१८५।।
किं कुशाग्रपुरे कान्त ! गन्तुकामोऽसि सोऽवदत् । यदि यूयं प्रसन्नाः स्थ ततस्तस्य तथैव हि ।।१८६।।
मेलयित्वा प्रियाः सर्वा विमानं विदधे महत् । राज्ञो राजकुमारस्यानुज्ञयाऽशेषभूतियुक् ।।१८७।।
सप्रियो धम्मिलस्तत्राधिरोप्य क्षणमात्रतः । कुशाग्रपत्तने नीतः किं दूरं व्योमचारिणाम् ।।१८८।।
गृहे वसन्तसेनायाः प्राविशत्सपरिच्छदः । वसन्ततिलका दृष्टा तयाप्यालोकितः प्रियः ।।१८९।।
मेघागमे मयूरीवाभूत् प्रमोदवशंवदा । अमित्रदमनेनैतत्सर्वं राज्ञा श्रुतं ततः ।।१९०।।
तुष्टेन निजराज्यस्य त्रिभागोऽस्य व्यतीर्यत । कारितं तस्य सौधं च स तत्रास्ते स्म राजवत् ।।१९१।।
सार्थवाहो धनवसुरप्यतुष्यत्तदागमात् । सोऽप्यानीयार्पयत् पुत्रीं तस्योद्योढां यशोमतीम् ।।१९२।।
[४७]इहलोकार्थकृतषण्मासाचाम्लतपःफलात् । स सर्ववल्लभायुक्तो भुञ्जानोऽस्ति भृशं सुखम् ।।१९३।।
अन्यदा धम्मिलं प्रीता वसन्ततिलकाभ्यधात् । ह्यस्त्वं वेषान्तरेणागाः सम्भोक्तुं नाथ ! चारुणा ।।१९४।।
भवच्चित्तविनोदार्थमीदृक्कान्ते ! मया कृतम् । इत्युक्त्वा दध्यवानेवं मम रूपेण कश्चन ।।१९५।।
खेचरः सञ्चरत्यत्र [४८]मत्कलत्राभिलाषुकः । स्वगेहं परितः क्षिप्तः सिन्दूरस्तं विवेद सः ।।१९६।।

४५. 'अथ प्रपृच्छ' हस्त० । ४६. 'तच्चित्तं चलनोपक्रमं व्यधात् ।' मुद्रितधम्मिलचरित्रे, तथा श्लोक-१८६ नास्ति ।

४७. श्लोक-१९३-१९९ स्थानेऽयं मुद्रितचरित्रे-'अन्यदान्तःपुरासन्नं चरन्तं खेचरं विटम् । हत्वा यावत्सशङ्कोऽस्ति दिव्यस्त्री तावदागमत् ।। धम्मिलेन तु सा दृष्टा ।' ४८. 'मलतकत्रा...' हस्त० ।

करवालकरो भ्राम्यन् ददर्श पदपद्धतिम् । ततः पदानुसारेण गत्वा खड्गमवाहयत् ।।१९७।।

खेचरं तु द्विधाचक्रे तमथ स्वैर्व्यसर्ज्जयत् । अचीकरत्पवित्रां[४९] क्षमां साशङ्कोऽस्ति वा तद्वधात् ।।१९८।।

एकदोपवनस्थस्य नवयौवनशालिनी । स्फारशृङ्गारसारङ्गी काऽपि स्त्री समुपागमत् ।।१९९।।

दृष्ट्वातिशायिरूपः स तयोक्तं शृणु सुन्दर ! । वैताढ्ये दक्षिणश्रेण्यामशोकपुरपत्तने ।।२००।।

खेचरेन्द्रो महासेनस्तस्य भार्या शशिप्रभा । सूनुर्मेघरथो नाम मेघमालाऽहमङ्गजा ।।२०१।।

अन्यदा[५०] भूभुजास्माकं जनन्या सह मन्त्रितम् । को ममान्तरं राजा भविष्यत्यत्र पत्तने ।।२०२।।

दध्यौ[५१] प्रज्ञप्तितो ज्ञातं सुनुर्मेघरथोऽधमः । दुहितुर्भाविना भर्त्रा दुर्नयान्मारयिष्यते ।।२०३।।

अत्रापरो नृपो भावी ततोऽम्बा विषसाद मे । अन्यायिनोऽपि पुत्रस्य व्यथते हि विपत् प्रसूम् ।।२०४।।

मद्भ्राताऽथ ममावेद्य कुशाग्रपुरमीयिवान् । भ्रातृस्नेहात्तमन्वागामत्र चाकर्णितं मया ।।२०५।।

धम्मिलेन हतः खेटस्ततोऽहं रोषनिर्भरा । अशोकवनिकां प्राप्ता तत्र त्वं वीक्षितो मया ।।२०६।।

गतो रोषोऽनुरागोऽभूत्तत्प्रसीदाधुना मम । अत्राणाया भव त्राणमित्युक्त्वांङ्क्योः पपात सा ।।२०७।।

ततः सा तेन गान्धर्वविवाहेन विवाहिता । तामप्यादाय निःशङ्को धम्मिलः स्वगृहेऽविशत् ।।२०८।।

पत्न्या विमलसेनायाः संजातः सूनुरन्यदा । कृतपद्मरथाख्यः स कलाभिः सर्वहर्षदः ।।२०९।।

अन्येद्युरागमद्भूरिशिष्यो धर्मरुचिर्गुरुः । राज्ञा पौरैर्धम्मिलेन प्रणतो धर्ममादिशत् ।।२१०।।

नत्वाऽथ धम्मिलोऽप्राक्षीत् किं मया प्राग्भवे कृतम् । येनैवं सुखदुःखानि प्राप्तोऽहं गुरुरूचिवान् ।।२११।।

जम्बूद्वीपाभिधे द्वीपे भरतक्षेत्रमध्यगे । भृगुकच्छे गृहपतिर्मिथ्यादृष्टिर्महाधनः ।।२१२।।

सुनन्दा प्रेयसी तस्य सुनन्दाख्यः स्तनंधयः । साधिकाष्टसमोऽधीतः कुलोचितकलोऽभवत् ।।२१३।।

तद्गृहेऽन्येद्युराजग्मुरिष्टाः प्राघुर्णिकास्तदा । तदर्थं प्रेषितः सूनुरेकेनातिथिना सह ।।२१४।।

आनेतुं शौनिकागारान्मांसं तत्तत्र नाभवत् । वारितोऽपि सुनन्देनागात्कैवर्तालयेऽतिथिः ।।२१५।।

गृहीतास्तेन जीवन्तः पाठीनाः पञ्च तत्र च । सुनन्दस्यार्पयित्वा तानूचिवाँस्त्वं व्रजन् भव ।।२१६।।

कायशुद्धिं विधायैमि प्रतीक्षेथाः पुरः पथि । सुनन्देनापि ते क्षिप्तास्तिमयः कृपया जले ।।२१७।।

अथ प्राघूर्णकोऽभ्यागात् पृष्टं मत्स्याः क्व ? सोऽवदत् ।

क्षिप्ता नीरे व्यषीदत्स द्वावप्यथ गतौ गृहे।।२१८।।

पृष्टं पित्रा किमानिन्ये स स्माहालम्भि नामिषम् । द्वितीयः स्माह पञ्चात्ताः जीवन्तस्तिमयो मया ।।२१९।।

---

४९. 'त्यविक्रां' हस्त० । ५०. मुद्रितचरित्रेऽयं श्लोको नास्ति । ५१. 'पितृभ्यामन्यदा ज्ञातं प्रज्ञप्त्या मेघरथः' मुद्रितचरित्रे ।

परं क्षिप्ता जलेऽनेन पित्रोक्तः सरुषाऽथ सः । ऊचेऽप्सु कृपया क्षिप्ता यद्वोऽभीष्टं विधत्त तत् ।।२२०।।

पित्राऽथातिक्रुधाऽत्यन्तं निर्भर्त्स्यातीव कुट्टितः । स पीडां सहमानस्तां मृतो मध्यमभावतः ।।२२१।।

विषमकन्दरापल्ल्यां मन्दरः तस्करेश्वरः । वनमाला प्रियाऽस्यासीत् सरलाख्यः स तत्सुतः ।।२२२।।

युवत्वेऽस्य मृतस्तातः स पल्लीशः कृतः शनैः । सोऽन्यदैकोऽस्त्रभृत्पल्ल्या नातिदूरे बहिर्गतः ।।२२३।।

मार्गभ्रष्टा नरा दृष्टाः कृशास्तेन निरायुधाः । ऋजुत्वेनान्तिके तेषां गतस्तैर्धर्मलाभितः ।।२२४।।

तेन प्रणम्य पृष्टास्ते के यूयं ? कुत आगताः । क्व वा यास्यथ ? तैरुक्तं धर्मस्थाः श्रमणा वयम् ।।२२५।।

सोऽवक्को धर्म ऊचुस्तेऽन्यदुःखं क्रियते न यत् । लम्भिताः पथि ते तेन स्वयं पल्लीमुपागतः ।।२२६।।

अन्येद्युर्ग्रामघाताय चौरवृन्दान्वितोऽगमत् । दिनशेषातिवाहाय ग्रामासन्नवने स्थितः ।।२२७।।

तत्र चाचिन्तयद्धर्मं परदुःखाविधानतः । परदुःखकृतौ पापं श्रमणाः प्रवदन्त्यदः ।।२२८।।

खादिष्यन्ति जनाः पापं ममैकस्य भविष्यति । तत्किं मे ग्रामघातेन परदुःखविधायिना ।।२२९।।

ततस्त्यक्त्वायुधान्याशु चौरवृन्दं विमुच्य सः । ययौ जनपदं धर्मवासनावासितान्तरः ।।२३०।।

तथाऽथ सर्वसत्त्वेषु सानुकम्पो विमत्सरः । प्रियंवदो विशुद्धात्मा मध्यस्थो मृत्युमाप्तवान् ।।२३१।।

स चौरात्मा धम्मिलस्त्वं [५२] कुशाग्रपुरपत्तने । सुरेन्द्रदत्तसुभद्रातनयः सनयोऽभवत् ।।२३२।।

पुराकृतात्कृपाधर्मात्परदुःखविवर्ज्जनात् । यथाभद्रकभावेन मध्यस्थपरिणामतः ।।२३३।।

मानुषत्वं त्वया प्राप्तं नैरुज्येन मनोरमम् । देवताकृतसांनिध्यमनपायं च सर्वतः ।।२३४।।

ज्ञानिनो वचसा साधोरिहलोकार्थिनस्तव । षण्मासाचाम्लतपसः प्रभावादृद्धिरीदृशी ।।२३५।।

ऋद्धिरत्यद्भुता प्राप्ता द्वात्रिंशद्वरकन्यकाः । सर्वत्र राजमान्यत्वं सौभाग्यं च जनाधिकम् [५३] ।।२३६।।

इत्येवं गुरुणाख्यातं [५४] तस्य प्राग्भववलितम् । श्रुत्वा जातिस्मृतेः सर्वं समक्षं समजायत ।।२३७।।

ततः सञ्जातसंवेगो धर्मरङ्गतरङ्गितः । निर्विण्णकामभोगः सन् प्रवव्राज तदन्तिके ।।२३८।।

एकादशाङ्गान्यध्यैष्ट परिपाल्य चिरं व्रतम् । अच्युते देवलोकेऽथ भूत्वा सामानिकः सुरः ।।२३९।।

महाविदेहाभिधवर्षमध्ये, संभुज्य सांसारिकसौख्यमुग्रम् ।
प्रव्रज्य सत्केवलमाकलय्य, प्राप्स्यत्यसौ सिद्धिवधूपभोगम् ।।२४०।।

।। इति इहलोके धम्मिलकथा ।।

---

५२. अतः श्लोक २३४ स्थानेऽयं पाठो मुद्रितचरित्रे - 'पुराकृतकृपादितः । तथा भद्रकभावादेः प्राप्तो नरभवस्त्वया ।।'

५३. 'जनातिगम्' हस्त० । ५४ 'तस्य... धर्मरङ्गतरङ्गितः' इति पाठस्थाने 'श्रुत्वा तज्जातिसंस्मरः' अयं पाठो मुद्रितचरित्रे ।

अथ परलोकफले दृष्टान्तः ।

।। अथ परलोकफले दामन्नककथा ।।

[55]रायपुरे णगरे एगो कुलपुत्तो जातीतो, तस्स जिणदासो मित्तो, तेण सो साधुसगासं णीतो, तेण [१]मच्छयमंसपच्चक्खाणं गहितं, दुब्भिक्खे मच्छाहारो लोगो जातो, इतरोवि सालेहिं महिलाए खिंसिज्जमाणो गतो, [२]उदिण्णे मच्छे दट्ठुं पुणरावत्ती जाता, एवं तिण्णि दिवसे तिण्णि वारं गहिता मुक्का य, अणसणं कातुं रायगिहे णगरे मणियारसेट्ठिपुत्तो [३]दामण्णगो णाम जातो, अट्ठवरिसस्स कुलं मारीए उच्छिण्णं, तत्थेव सागरवोदसत्थवाहस्स गिहे चिट्ठइ, तत्थ य गिहे भिक्खट्ठं साधुणो पइट्ठा, साधुणा संघाडइल्लस्स कहितं, एतस्स गिहस्स एस दारगो अधिपती भविस्सति, सुतं सत्थवाहेण, पच्छा सत्थवाहेण पच्छन्नं चंडालाण अप्पितो, तेहिं दूरं णेतुं अंगुलिं छेत्तुं भासितो णिव्विसओ कतो, णासंतो तस्सेव गोसंधिएण गहितो पुत्तोत्ति, जोव्वणत्थो जातो, अण्णता सागरपोतो तत्थ गतो तं दट्ठूण उवाएण परियणं पुच्छति- कस्स एस ?, [56]कथितं अणाधोत्ति इहागतो, इमो सोत्ति, [४]ता लेहं दाउं घरं पावेहित्ति विसज्जितो, गतो, रायगिहस्स बाहिपरिसरे देवउले सुव्वति, सागरपोतधूता विसा णाम कण्णा तीए अच्चणियवावडाए दिट्ठो, पितुमुद्दमुद्दितं लेहं दट्ठुं वाएति-एतस्स दारगस्स असोइयमक्खितपादस्स विसं दातव्वं, अणुस्सारफुसणं, कण्णगदाणं, पुणोवि मुद्देति, णगरं पविट्ठो, विसाऽणेण विवाहिता, आगतो सागरपोतो, मातिघरअच्चणिय विसज्जणं, सागरपुत्तमरणं सोतुं सागरपोतो हितयफुट्टणेण मतो, रण्णा दामण्णगो घरसामी कतो, भोगसमिद्धी जाता, अण्णया पव्वण्हे मंगलिएहिं पुरतो से उग्गीयं-

---

१. 'मच्छय०' हस्त० नास्ति । २. 'उव्वित्तिणोदहं' हस्त० । ३. 'दामन्नगनामेण' हस्त०। ४. 'भीतो' हस्त० ।

55. राजपुरे नगरे एकः कुलपुत्रो जात्यः, तस्य जिनदासो मित्रम्, तेन स साधुसकाशं नीतः, तेन मत्स्यमांसप्रत्याख्यानं गृहीतम्, दुर्भिक्षे मत्स्याहारो लोको जातः, इतरोऽपि श्यालमहिलाभ्यां निन्द्यमानो गतः, पीडितान् मत्स्यान् दृष्ट्वा पुनरावृत्तिर्जाता, एवं त्रीन् दिवसान् त्रीन् वारान् गृहीता मुक्ताश्च, अनशनं कृत्वा राजगृहे नगरे मणिकारश्रेष्ठिपुत्रो दामन्नको नाम जातः, अष्टवर्षस्य मार्या कुलमुत्सन्नम्, तत्रैव सागरपोतसार्थवाहस्य गृहे तिष्ठति, तत्र च गृहे भिक्षार्थं साधवः प्रविष्टाः, साधुना संघाटकीयाय कथितं एतस्य गृहस्यैष दारकोऽधिपतिर्भावी, श्रुतं सार्थवाहेन, पश्चात् सार्थवाहेन प्रच्छन्नं चाण्डालेभ्योऽर्पितः, तैर्दूरं नीत्वाऽङ्गुलिं छित्वा भाषितः निर्विषयः कृतः, नश्यन् तस्यैव गोसंधिकेन [गोष्ठाधिपतिना] गृहीतः पुत्र इति, यौवनस्थो जातः, अन्यदा सागरपोतस्तत्र गतः तं दृष्ट्वोपायेन परिजनं पृच्छति-कस्यैषः ?

56. कथितमनाथ इति इहागतः, अयं स इति, ततो लेखं दत्त्वा गृहं प्रापयेति विसृष्टो गतः, राजगृहस्य बहिःपरिसरे देवकुले सुप्तः, सागरपोतदुहिता विषानाम्नी कन्या, तयाऽर्चनिकाव्यापृतया दृष्टः, पितृमुद्रामुद्रितं लेखं दृष्ट्वा वाचयति, एतस्मै दारकाय अधौताम्रक्षितपादाय विषं दातव्यम्, अनुस्वारस्फेटनं कन्यादानम्, पुनरपि मुद्रयति, नगरं प्रविष्टः, विषाऽनेन विवाहिता, आगतः सागरपोतः, मातृगृहार्चनिकायै विसर्जनम्, सागरपुत्रमरणं श्रुत्वा सागरपोतः हृदयस्फोटनेन मृतः, राज्ञा दामन्नको गृहस्वामी कृतः, भोगसमृद्धिर्जाता, अन्यदा पर्वाहनि माङ्गलिकैः पुरतस्तस्योद्गीतम्-

[57]'अणुपुंखमावयंता वि अणत्था तस्स बहुगुणा होंति ।
सुहदुक्खकच्छपुडतो जस्स कतंतो वहइ पक्खं ।।'

[58]**सोतुं सतसहस्सं मंगलियाण देति, एवं तिण्णि वारा तिण्णि सतसहस्साणि, रण्णा सुतं, पुच्छितेण सव्वं रण्णो सिट्ठं, तुट्ठेण रण्णा सेट्ठी ठावितो, बोधिलाभो, पुणो धम्माणुट्ठाणं देवलोगगमणं, एवमादि परलोए । अहवा सुद्धेण पच्चक्खाणेण देवलोगगमणं पुणो बोधिलाभो सुकुलपच्चायाती सोक्खपरंपरेण सिद्धिगमणं, केसिंचि पुणो तेणेव भवग्गहणेण सिद्धिगमणं भवतीति ।**

।। इति परलोकफले दामन्नककथा ।।

"[59]पच्चक्खाणमिणं सेविऊण भावेण जिणवरुद्दिट्ठं ।
पत्ता अणंतजीवा सासयसुक्खं लहुं मुक्खं ।।" [आवश्यकनिर्युक्ति-१६२१]

एवं प्रत्याख्यानं तपोरूपतया प्रसिद्धम् । तपस्तु द्विधा बाह्यम् अभ्यन्तरं च । बाह्यम्-

"[60]अणसण-मूणोअरिआ, वित्तीसंखेवणं रसच्चाओ ।
कायकिलेसो संलीणया य, बज्झो तवो होइ ।।" [दशवैकालिकनिर्युक्ति-४७]

फलं च -

"[61]नमुआईदसमेहिं मुणिणा कम्मं खिवंति जं गुत्ता ।
तं नो वाससयाइ कोडाकोडीहिं नेरइआ ।।" [सुक्तमुक्तावली-१०८/१]

नउकारसहीइं वर्षशत-१, पोरिसिइं वर्षसहस्र-२, साढपोरिसिइं वर्षदससहस्र-३, पुरिमड्ढि[इं] वर्षलक्ष-४, एकासणइ दसवर्षलक्ष-५, नीवी कोडि-६, एकस्थानकि दशकोडि-७, एकदत्ति

---

57. अनुपुङ्खमापतताऽप्यनर्थास्तस्य बहुगुणा भवन्ति । सुखदुःखकक्षपुटको यस्य कृतान्तो वहति पक्षम् ।।१।।

58. श्रुत्वा शतसहस्रं माङ्गलिकाय ददाति, एवं त्रीन् वारान् त्रीणि शतसहस्राणि, राज्ञा श्रुतम्, पृष्टेन सर्वं शिष्टं राज्ञे, तुष्टेन राज्ञा श्रेष्ठी स्थापितः, बोधिलाभः, पुनर्धर्मानुष्ठानं देवलोकगमनं, एवमादि परलोके। अथवा शुद्धेन प्रत्याख्यानेन देवलोकगमनं पुनर्बोधिलाभः सुकुलप्रत्यायातिः सौख्यपरम्परकेण सिद्धिगमनम्, केषाञ्चित् पुनस्तेनैव भवग्रहणेन सिद्धिगमनं भवतीति ।

59. प्रत्याख्यानमिदमासेव्य भावेन जिनवरोद्दिष्टम् । प्राप्ता अनन्तजीवाः शाश्वतसौख्यं शीघ्रं मोक्षम् ।।

60. अनशनोनोदरिके वृत्तिसंक्षेपनं रसत्यागः । कायक्लेशः संलीनता च बाह्यस्तपो भवति ।।

61. नमस्कारादिभिर्दशमान्तैर्मुनयः कर्म क्षपयन्ति यद् गुप्ताः । तन्न वर्षशतादिभिः कोटाकोटीभिर्नैरयिकाः ।।

६-छव्विह-आवस्सयंमि ~~~

66
तत्तो चुओ समाणो, मणुअभवे लहइ उत्तमं भोगं ।
जह तावसदुहिताए, लद्धं रण्णे[१०] वसंतीए ।।
67
भुज्जइ अणंतरेणं, दोण्णि य वेलाउ जो निओगेणं ।
सो पावइ उववासा, अट्ठावीसं तु मासेणं ।।
68
एवं मुहुत्तवुड्ढी उववासे[११] छट्ठमट्ठमादीए ।
जो कुणइ जहाथामं, तस्स फलं तारिसं भणिअं ।।"[प.च.-१४/१२५-२८, १३१]

पद्मपुराणेऽपि -

"अह्नो मुहूर्त्तमात्रं यः कुरुते भुक्तिवर्जनम् ।
फलं तस्योपवासेन समं मासेन जायते ।।

मुहूर्त्तद्वितयं यस्तु न भुङ्क्ते प्रतिवासरम् ।
षष्ठोपवासिता तस्य जन्तोर्मासेन जायते ।।

मुहूर्त्तत्रिंशतं कृत्वा काले यावति तावति ।
आहारवर्जनं कुर्यादुपवासफलं[१२] लभेत् ।।

मुहूर्त्तयोजनं कार्यमेवमेवाष्टमादिषु ।
अधिकं तु फलं वाच्यं हेतुवृद्ध्यनुरूपतः ।।

अवाप्यास्य फलं नाके नियमस्य शरीरिणः ।
मनुष्यतां समासाद्य जायन्तेऽद्भुतचेष्टिताः ।।" [प.पु.-१४/२४५, २५२-५५]

ग्रन्थिसहितप्रत्याख्यानप्रवृत्तिः स्पष्टमाहात्म्यं च कथानकादवसेयम्[१३] । तच्चेदम् -

---

१०. 'रण्णं' हस्त० । ११. 'उपवास छेट्ठमाईआ' हस्त० । १२. 'जन्तुरुपवासफलं भजेत्' पद्मपुराणे । १३. '...दवसेये' हस्त० ।

66. ततश्च्युतः सन् मनुजभवे लभते उत्तमं भोगम् । यथा तापसदुहित्रा लब्धमरण्ये वसन्त्या ।।

67. भुनक्ति अनन्तरेण द्वयोः वेलयोः यो नियोगेन । स प्राप्नोत्युपवासा अष्टाविंशतयस्तु मासेन ।।

68. एवं मुहूर्त्तवृद्धिः उपवासे षष्टमष्टमादौ । यो करोति यथास्थामं तस्य फलं तादृशं भणितम् ।।

६-छव्विह-आवस्सयंमि ~~~

"[71]मणवयणकायगुत्तो नाणावरणं च[१५] खवेइ अणुसमयं ।
सज्झाए वट्टंतो खणे खणे जाइ वेरग्गं ।।
[72][१६]उड्ढमहे तिरियंमि य जोइसवेमाणिआ य सिद्धी य ।
सव्वो लोगालोगो सज्झायविउस्स[१७] पच्चक्खं ।।" [महानिशीथ-३/१०८, १०९]

"[73][१८]बारसविहंमि वि तवे सब्भिंतरबाहिरे[१९] कुसलदिट्ठे ।
नवि अत्थि न वि अ होही सज्झायसमं तवोकम्मं ।।" [दश. नि.-११८]

"[74]एगदुतिमासक्खमणं संवच्छरमवि अ अणसिओ हुज्जा ।
सज्झाय-झाणरहिओ एगोवासफलं पि ण लभेज्जा ।।
[75]उग्गमउप्पायणएसणाहिं[२०] सुद्धं तु भत्तं भुंजंतो ।
जइ तिविहेणाउत्तो अणुसमय-भविज्ज सज्झाए ।।
[76]ता तं गोअम ! एगग्गमाणसत्तं ण उवमिउं सक्का ।
संवच्छरखवणेण वि जेण तहिं णिज्जराऽणंता ।।"[महानिशीथ-३/११०-११३]

तपसा क्रियमाणेनैहिकानि चक्रिण इवामुष्मिकानि तु परलोकसाधकानामिव सर्वाण्यपि कार्याणि सिध्यन्ति । प्रायो निकाचितान्यपि तपसा क्षयं यान्ति । यतः -

"[77]सव्वेसिं पयडीणं परिणामवसा उवक्कमो भणिओ ।
पायमनिकाइआणं तपसा उ निकाइआणं ।।" [ ]

---

१५. 'च' हस्त० नास्ति, 'खिवइ' हस्त० । १६. 'उड्ढमह तिरिअनरए... माणिआइ' हस्त० । १७. '... विअस्स' हस्त० । १८. 'दुवालसविहंमि वि' महानिशीथे । १९. 'सब्भंतर...' हस्त० । २०. '...प्पायणेए' हस्त० ।

71. मनवचनकायगुप्तो ज्ञानावरणं च क्षपयत्यनुसमयम् । स्वाध्याये वर्तयन् क्षणे क्षणे याति वैराग्यम् ।।

72. उर्ध्वमधस्तिर्च्छे च ज्योतिषवैमानिकाश्च सिद्धिश्च । सर्वो लोकालोकः स्वाध्यायविदः प्रत्यक्षम् ।।

73. द्वादशविधेऽपि तपसि साभ्यन्तरबाह्ये कुशलदृष्टेः । नाप्यस्ति नापि च भविष्यति स्वाध्यायसमं तपःकर्म ।।

74. एकद्वित्रिमासक्षपणं संवत्सरमपि चानशितो भवेत् । स्वाध्यायध्यानरहित एकोपवासफलमपि न लभेत् ।।

75. उद्गमोत्पादनैषणाभिः शुद्धं तु भक्तं भुञ्जानः । यदि त्रिविधेनायुक्तोऽनुसमयं भवेत् स्वाध्याये ।।

76. तस्मात्तं गौतम ! एकाग्रमानसत्वं न नोपमितुं शक्यम् । संवत्सरक्षपणेनापि येन ततो निर्जराऽनन्ता ।।

77. सर्वेषां प्रकृतीनां परिणामवशात् उपक्रमो भणितः । प्रायः अनिकाचितानां तपसा तु निकाचितानाम् ।।

६-छव्विह-आवस्सयंमि ~~~

।। अथ द्वितीयगाथाव्याख्याने प्रबोधदीपिकायां द्वितीयः प्रस्तावः ।।

अथ द्वितीया गाथा विव्रीयते -

पव्वेसु पोसहवयं, दाणं सीलं तवो य भावो य ।
सज्झायनमुक्कारो, परोवयारो अ जयणा य ।।

[पर्वसु पौषधव्रतं दानं शीलं तपश्च भावश्च ।
स्वाध्याय-नमस्कारौ परोपकारश्च यतना च ।।]

[पव्वेसु पोसहवयं]

[१०-पौषधः]

व्याख्या - **पर्वसु पौषधव्रते** नियमेन यत्नो विधेय एव । यदुक्तम् -

"सव्वेसु[1] कालपव्वेसु पसत्थो [1]पोसहो मुणेअव्वो ।
अट्ठमि-चउद्दसीसुं नियमेण होइ[2] पोसहिओ ।।" [श्राद्धप्रतिक्रमणसूत्रवृत्ति]

"अगारिसामाइअंगाइं[2], सड्ढी काएण फासए ।
पोसहं दुहओ पक्खं, एगराइं न हावए ।।" [उत्तराध्ययन - ५/२३]

अगारिणो गृहिणः सामायिकं सम्यक्त्व-श्रुत-देशविरतिरूपं तस्याङ्गानि निःशङ्कता-कालाध्ययनाणुव्रतादिरूपाणि **अगारिसामायिकाङ्गानि 'सड्ढत्ति'** सूत्रत्वात् श्रद्धारुचिरस्यादिति श्रद्धावान् स **कायेन** उपलक्षणत्वान्मनसा वाचा च **'फासएत्ति'** स्पृशति सेवते, तथा **पौषधं** आहारपौषधादिकं **'दुहओ पक्खंति'** प्राकृतत्वात् द्वयोरपि सितेतररूपयोः पक्षयोः चतुर्दशीपूर्णिमादितिथिषु[3] **'एगराइंति'**

---

१. 'जिणमए तवो जोगो ।' श्राद्धप्रतिक्रमणसूत्रवृत्तौ । २. 'हविज्ज' श्राद्धप्रतिक्रमणसूत्रवृत्तौ । ३. 'पूर्णिमास्यादिषु' हस्त-प्रतौ ।

1. **सर्वेषु कालपर्वेषु प्रशस्तः पौषधो ज्ञातव्यः । अष्टमीचतुर्दशीषु नियमेन भवति पौषधवान् ।।**
2. **अगारिसामायिकाङ्गानि श्राद्धः कायेन स्पृशति । पौषधं द्वयोः पक्षयोः एकरात्रिं न हापयति ।।**

पव्वेसु पोसहवयं ~~~

दोषाश्च -

"आरभडा संमद्दा मोसलि पप्फोडणा वक्खित्ता ।
णच्चाविअति पडिलेहणाइ वज्जिज्ज छदोसा ।।

वितथाचरणेऽन्यान्यग्रहणे वाऽऽ**रभडा**-१ [१०]वस्त्रान्तः कोणयोर्वा ग्रहणे प्रतिलिख्य तत्रैव मोचने **संमर्दा-**२, उर्ध्वाधस्तिर्यग् घट्टने **मुशली-**३, गाढताडने रजोऽवगुण्ठितस्येव [वस्त्रस्य] **प्रस्फोटना**-४, सूत्रादिषु व्यग्रता [विक्षिप्ता]-५, वस्त्रात्मनो नर्त्तनेन नर्त्तितः [तन्**नर्त्तितः**] - ६ इत्यादि-[प्रतिलेखनायां वर्जितव्याः षट्दोषाः ।]"

श्रीजिनोक्तं सूत्रं मुखपोतिकां विना कथं सत्प्राप्यमानमस्ति ? तदसत्प्रापने चाज्ञाभङ्गादयो दोषाः स्युः । आज्ञाभङ्गादौ चाशातना, आशातनया च मिथ्यात्वम्। यतः -

"[6]आसायण मिच्छत्तं, आसायणवज्जणा य सम्मत्तं ।
आसायणानिमित्तं, कुव्वइ दीहं च संसारं ।।" [उपदेशमाला-४०९]

इत्यादि प्रसज्यमानं केन निवारयितुं शक्यते ।

पर्वस्वेव पौषधानुष्ठानमन्यथा नेत्येकान्तो नावगम्यः । यतो विपाकश्रुताङ्ग-द्वितीयश्रुतस्कन्धे सुबाहुप्रमुखैर्दशभिः श्राद्धैः, श्रीज्ञाताधर्माङ्गप्रथमाध्ययनज्ञाते श्रीअभयकुमारेण च दर्भसंस्तारादिविधिपूर्वं च दिनत्रयम्, वसुदेवहिण्डौ विजयनृपेण दिनसप्तकं पौषधः कृतः । स च विधिरेवान्यथा तत्तदिष्टसिद्धिः कथं तेषां जातेति ज्ञेयं पर्वान्यदिनेष्वपि पौषधग्रहणम् । पौषधस्वरूपं चेदम् -

---

१०. 'वस्त्र' हस्त० नास्ति तथा ओघनिर्युक्तौ संमर्दस्य अयमर्थः-'उपधिकायां उपविश्य यत्प्रत्युपेक्षणां करोति सा वा संमर्दोच्यते' इति ।

6. आशातना मिथ्यात्वमाशातनावर्जना च सम्यक्त्वम् । आशातनानिमित्तं करोति दीर्घं च संसारम् ।।

"[7]आहारदेहसक्कारबंभवावारपोसहो यऽन्नं ।
देसे सव्वे अ इमं चरमे सामाईअं नियमा ।।" [पञ्चाशक-२९]

देशे आहारादीनां देशविषये सर्वस्मिन्निरवशेषे आहारादौ च इदं पौषधव्रतं स्यादिति सम्बन्धः । अन्यद्देशावकाशिकादपरं तृतीयमित्यर्थः । तत्र पौषधे चरमे भेदे सर्वतोऽव्यापाराख्ये कृते सति सामायिकं नियमादवश्यभावेन कर्त्तव्यं भवतीति गम्यम्, अन्यथा सामायिकफललाभाभावः स्यात् । इह च भावार्थो वृद्धोक्तो य आहारपौषधो हि द्विविधो देश-सर्वभेदात् । तत्र देशे विवक्षित-विकृतेरविकृ[११]तेराचाम्लस्य वा सकृदेव द्विरेव वा भोजनमिति, सर्वतस्तु चतुर्विधस्याप्याहारस्याहोरात्रं यावत्प्रत्याख्यानम् । शरीरसत्कारपौषधस्तु स्[१२]नानोद्वर्त्तनवर्णक-विलेपन-पुष्पगन्धविशिष्ट-वस्त्राभरण-परित्यागः । सोऽपि देश-सर्वभेदाद् द्विधा । तत्र देशे कस्यापि शरीरसत्कारणस्याकरणम्, सर्वतस्तु सर्वस्याप्यकरणं तस्य । ब्रह्मचर्यपौषधोऽपि देशतः सर्वतश्च । तत्र देशे दिवैव रात्रावेव सकृदेव द्विरेव वाऽब्रह्मासेवनम्[१३], सर्वतस्त्वहोरात्रं यावद् ब्रह्मचर्यपालनम् । अव्यापारपौषधोऽपि देशतः सर्वतश्च । तत्र देशत एकतरस्यापि व्यापारस्याकरणम्, सर्वतस्तु सर्वेषामपि [कृषि-सेवा-वाणिज्य-पशुपाल्यगृहकर्मादीनां] व्यापाराणामकरणम् । तत्र चाव्यापारविषये यो देशतः पौषधं करोति स सामायिकं करोति वा न वा । यस्तु सर्वतः पौषधं करोति स नियमात्सामायिकं करोति, यदि न करोति तदा तत्फलेन वञ्च्यते ।

इह च यद्याहार-शरीरसत्कार-[१४]ब्रह्मचर्यपौषधवदव्यापारपौषधमप्यन्यत्रानाभोगेनेत्याद्याकारोच्चारणपूर्वकं प्रतिपद्यते, तदा सामायिकमपि सार्थकं भवति, स्थूलत्वात् पौषधप्रत्याख्यानस्य, सूक्ष्मत्वाच्च सामायिकस्येति । तथा पौषधवताऽपि सावद्यव्यापारा न कार्या एव । सामायिकमकुर्व्वंस्तल्लाभाद् भ्रश्यतीति । यदि पुनः सामाचारी-

---

११. '...राचाम्लस्य' धर्मसङ्ग्रह वृत्तौ । १२. 'स्नानो द्वन...' हस्त० । १३. 'वा स्त्रीसेवां मुक्त्वा ब्रह्मचर्यकरणम्' योगशास्त्र-धर्मसङ्ग्रहवृत्तौ । १४. 'ब्रह्मच' हस्त० ।

7. **आहारदेहसत्कारब्रह्मव्यापारपौषधः पुनरन्यद् । देशे सर्वस्मिन् चेदं चरिमे सामायिकं नियमात् ।।**

विशेषात्सामायिकमिव द्विविधं त्रिविधेनेत्येवं पौषधं प्रतिपद्यते, तदा सामायिकार्थस्य पौषधेनैव गतत्वान्न सामायिकमत्यन्तं फलवत् । यदि परं पौषधसामायिकलक्षणं व्रतद्वयं प्रतिपन्नं मयेत्यभिप्रायात्फलवदित्यर्थः । प्रथमपञ्चाशकवृत्तौ ।

"[8]ततो पोसहोववासो चउव्विहो । [१५]सरीरसक्कारपोसहो देसे सव्वे अ । देसे अमुगं ण्हाणाइ न करेइ, सव्वे ण्हाण-मद्दण-वन्नग-विलेवण-पुप्फ-वत्थ-गंधाभरणाण परिच्चाओ । अव्वावारपोसहो देसे सव्वे अ । देसे अमुगं अमुगं वावारं न करेमि त्ति, सव्वे ववहार-हल-[१६]सेवा-सगड-घरपरिकम्म[१७]मातितो न करेइ । बंभचेरं [बंभचेरे पोसहो बंभचेर-पोसहो] देसे दिवा रत्तिं वा इक्कसिं वा दो वा, सव्वे अहोरत्तं बंभयारी । आहारे [पोसहो आहारपोसहो] आहारदेसे अमुगा विगई आयंबिलं वा इक्कसिं वा दो वा, सव्वे चउव्वि[१८]हो आहारो अहोरत्तं । जो देसे पोसहं करेइ सो सामाइअं करेइ वा न वा, जो सव्वपोसहं करेइ सो नियमा [सामाइओ] करेइ, जइ न करेइ तो वंचिज्जए ।" आवश्यकचूर्णौ ।

तथा -

"[9]आहारपोसहो खलु सरीरसक्कारपोसहो चेव ।
बंभव्वावारेसु अ तईअं सिक्खावयं नाम ।।"
[10]देसे सव्वे अ दुहा इक्किक्के इत्थ होइ नायव्वो ।
सामाईए विभासा देसे ईअरंमि नियमेणं ।।" श्रावकप्रज्ञप्तौ [३२१/३२२]।

१५. 'पुष्प' हस्त० । १६. 'सेवा-हल' आवश्यकचूर्णौ । १७. '...कम्ममाईआ न कीरइ' हस्त० ।१८. 'चउव्विहो चउव्विहो आहाराई' हस्त० ।

8. ततो पौषधोपवासश्चतुर्विधः । शरीरसत्कारपौषधो देशे सर्वे च । देशे अमुकं स्नानादि न करोति, सर्वे स्नान-मर्दन-वर्णक-विलेपन-पुष्प-वस्त्र-गन्धाभरणानां परित्यागः । अव्यापारपौषधो देशे सर्वे च, देशे अमुकमुकं व्यापारं न करोमीति, सर्वे व्यापार-हल-सेवा-शकटगृहपरिकर्म्मादिको न करोति । ब्रह्मचर्यं [ब्रह्मचर्ये पौषधो ब्रह्मचर्यपौषधः] देशे दिवसे रात्रौ वा एके वा द्वौ वा, सर्वे अहोरात्रं ब्रह्मचारी । आहारे [पौषध आहारपौषधः] आहारदेशे अमुका विकृति आचाम्लं वा एके वा द्वौ वा, सर्वे चतुर्विधः आहारोऽहोरात्र्यम् । यो देशे पौषधं करोति स सामायिकं करोति वा न वा । यः सर्वपौषधं करोति स नियमेन सामायिकं करोति, यदि न करोति तस्मात् वञ्च्यते ।

9. आहारपौषधः खलु शरीरसत्कारपौषधश्चैव । ब्रह्मव्यापारयोश्च तृतीयं शिक्षाव्रतं नाम ।।

10. देशे सर्वस्मिन् च द्विधा एकैकोऽत्र भवति ज्ञातव्यः । सामायिके विभाषा देशे इतरस्मिन्नियमेन ।।

कैः पौषधः सभोजनो मन्यते कैश्चाभोजन एव । तदर्थं किञ्चिल्लिख्यते । यथा -

"[11]तं सत्तिओ करिज्जा, तवो अ जो वण्णिओ समणधम्मे ।
देसावगासिएण व जुत्तो सामाइएणं वा ।।" आवश्यकचूर्णौ ।

"[12]जइ देसओ आहारपोसहिओ तो भत्तपाणस्स गुरुसक्खिअं पारावित्ता आवस्सिअं करित्ता इरिआसमिईए गंतुं घरं इरिआवहिअं पडिक्कमइ, आगमणालोअणं च करेइ, चेइए वंदइ, तओ संडासयं पमज्जित्ता पाउंछणे निसीअइ, [१९]भायणं पमज्जइ, जहोचिए अ भोअणे परिवेसिए पंचमंगलमुच्चारेइ, सरेइ पच्चक्खाणं, तओ वयणं पमज्जित्ता -

[13][२०]असरसरं अचबचबं, अद्दुअमविलंबिअं अपरिसाडिं ।
मणवयणकायगुत्तो, भुंजइ साहुव्व उवउत्तो ।।

[२१]जायमायाए भुच्चा फासुअजलेण मुहसुद्धिं काउं नवकारसरणेण उट्ठाइ, देवे वंदेइ ।।"
श्रावकप्रतिक्रमणचूर्णौ ।

तथा -

"[14]तए णं अम्हे तं विउलं असणं पाणं खाइमं साइमं [२२]आसाएमाणा विसाएमाणा परिभाएमाणा परिभुंजेमाणा पक्खिअं पोसहं पडिजागरमाणा विहरिस्सामो त्ति ।"

पक्षे भवं पाक्षिकम् । **'पोषधम्'** अव्यापारपोषधं **'प्रतिजाग्रतः'** अनुपालयन्तः **'विहरिष्यामः'** स्थास्यामः, यच्चेहातीतकालीनप्रत्ययान्तत्वेऽपि वार्त्तमानिकप्रत्ययोपादानं तद्भोजनानन्तरमेवाक्षेपेण

१९. 'भायणं पमज्जइ' हस्त० नास्ति । २०. 'असुरसुरं' हस्त० । २१. 'जायामायए' हस्त०, 'भुच्चा' हस्त० नास्ति । २२. 'आसाएमाणाए'हस्त० ।

11. तद् शक्त्या कुर्यात्तपश्च यद्वर्णितः श्रमणधर्मे । देशावकासिकेन वा युक्तः सामायिकेन वा ।।
12. यदा देशत आहारपौषधः कृतस्तदा भक्तपानस्य गुरुसाक्षिकं पारयित्वाऽऽवश्यिकीं कृत्वा इर्यासमित्या गत्वा गृहं इर्यापथिकीं प्रतिक्रमति, आगमनालोचनां च करोति, चैत्यान् वन्दते, ततः सन्दंशं प्रमार्ज्य प्रावरणे निषीदति, भाजनं प्रमार्जयति, यथोचिते च भोजने परिवेशिते पञ्चमङ्गलमुच्चारयति, स्मरति प्रत्याख्यानम्, ततो वदनं प्रमार्ज्य-
13. अस्वरस्वरमचबचबमद्रुतमविलम्बितमपरिशाटीम् । मनवचनकायगुप्तो भुञ्जते साधु इवोपयुक्तः ।। जातमात्रात् भुक्त्वा प्रासुकजलेन मुखशुद्धिं कृत्वा नमस्कारस्मरणेनोत्तिष्ठति देवान् वन्दते ।
14. ततो वयं तं विपुलमशनं पानं खादिमं स्वादिममास्वाद्यमाना विस्वाद्यमानाः परिभूयमानाः परिभुञ्जमानाः पाक्षिकं पौषधं प्रतिजाग्रमाना विचरिष्याम इति ।

पौषधाभ्युपगमप्रदर्शनार्थम्, एवमुत्तरत्रापि गमनिका कार्येत्येके, अन्ये तु व्याचक्षते - इह किल पोषधं पर्वदिनानुष्ठानम्, तच्च द्वेधा - इष्टजनभोजनदानादिरूपमाहारादिपोषधरूपं चेति[२३] ।

श्रीभगवती १२ / १ /

"[15]इत्थ सामाचारी - सावगेण पोसहं पारिंतेण नियमा साहूणमदाउं[२४] न पारेअव्वं, अन्नया पुण अनियम - दाउं वा पारेइ, पारित्ता[२५] वा देइत्ति । तम्हा पुव्वं साधूणं दाउं पच्छा पारेअव्वं, कहं[२६] ? जाहे देसकालो ताहे अप्पणो सरीरस्स विभूसं काउं साहुपडिस्सयं गंतुं निमंतेइ, 'भिक्खं गिण्हं' इत्ति । साहूण का पडिवत्ती ? ताहे अन्नो पडलं अन्नो मुहणंतयं अन्नो भायणं पडिलेहेइ, मा अंतरायदोसा ठविअगदोसा य भविस्संति, सो जइ पढमाए पोरिसिए निमंतेइ, अत्थि नमुक्कारसहिआइत्ता तो गिज्झइ, जइ[२७] नत्थि ताहे न गिज्झति[२८], तं धरिअव्वं होइ, सो जइ घणं[२९] लगेज्जा ताहे गिज्झइ संचिक्खाविज्जइ, जो वा उग्घाडापोरिसिए पारइ पारणइत्तो अन्नो वा तस्स दिज्जइ, पच्छा तेण सावगेण समगं गम्मइ, संघाडगो वच्चइ, एगो ण वट्टइ पेसेउं, साहू पुरओ सावगो पच्छा मग्गतो[३०], घरं नेऊण आसणेण[३१] निमंतेइ, जइ निदिट्ठगा तो लट्ठयं, अह जइ ण निवेसंति तहा वि विणओ पउत्तो, ताहे भत्तं पाणं[३२] सयं चेव देइ अहवा भायणं धरेइ, भज्जा से देइ, अहवा ठिउं[३३] अच्छइ जाव दिन्नं, साहूवि सावसेसं दव्वं गिण्हइ, पच्छाकम्मपरिहारणट्ठा, दाऊण वंदिउं विसज्जेइ, विसज्जिआ अणुगच्छइ, पच्छा सयं भुंजइ, जं च किर साहूण न दिन्नं तं सावगेण न भोत्तव्वं, जहिं पुण साहू नत्थि ताहे

---

२३. 'इष्ट भोजन...' हस्त० । २४. 'साहूमदाउं' हस्त० । २५. 'पारितो' आवश्यकनिर्युक्तौ । २६. 'कहं ?' हस्त० नास्ति । २७. 'अथवा' आ.नि. । २८. 'धिप्पइ' हस्त० । २९. 'लब्भिज्जा' हस्त० । ३०. 'मग्गओतो' हस्त० । ३१. 'आसणे' हस्त०। 'उवणिमंतिज्जति' आ.नि. । ३२. 'सणं' हस्त० । 'चेव' हस्त० नास्ति । ३३. 'ठितीओ' आ.नि.

15. इह सामाचारी - श्रावकेन पोषधं पारयता नियमात् साधुभ्योऽदत्वा न पारयितव्यम्, अन्यदा पुनरनियमः- दत्त्वा वा पारयति, पारयित्वा वा ददातीति । तस्मात् पूर्वं साधुभ्यो दत्वा पश्चात् पारयितव्यम्, कथम् ? यदा देशकालस्तदाऽऽत्मनः शरीरस्य विभूषां कृत्वा साधुप्रतिश्रयं गत्वा निमन्त्रयेत्, 'भिक्षां गृह्णीते'ति । साधूनां का प्रतिपत्तिः ? [उच्यते-] तदैकः पटलकमन्यो मुखानन्तकमन्यो भाजनं प्रत्युपेक्षते, माऽन्तरायदोषाः स्थापनादोषाश्च भवन्तु, स यदि प्रथमायां पौरुष्यां निमन्त्रयेत्, अस्ति च नमस्कारसहितः [प्रत्याख्यानी] ततस्तद् गृह्यते । यदि नास्ति तदा न गृह्यते, तद् धारितव्यं भवति । स यदि घनं लगेत् तदा गृह्यते संस्थाप्यते च; यो वोद्घाटपौरुष्यां पारयति पारणकवाननो वा तस्मै दीयते । पश्चात्तेन श्रावकेन समं गच्छति, सङ्घाटको व्रजति । एको न वर्तते प्रेषयितुम्, साधुः पुरतः श्रावकः पृष्टतो मार्गतो गृहं नीत्वा आसनेन निमन्त्रयेत्, यदि निविष्टास्तदा भव्यम्, अथ यदि न निविशन्ति तथापि विनयः प्रयुक्तः, तदा भक्तं पानं स्वयमेव ददाति अथवा भाजनं धारयति, भार्या तद् ददाति अथवा स्थित्वाऽऽस्ते यावद्दीयते । साधुरपि सावशेषं द्रव्यं गृह्णाति पश्चात्कर्मपरिहरणार्थम् । दत्त्वा

देसकालवेलाए दिसालोओ कायव्वो, विसुद्धभावेण चिंतेअव्वं - जइ साहूणो होंतोत्ति णित्थारितो होंतोत्ति विभासा ।" इति श्रीआवश्यकचूर्णौ वृत्तौ च ।

लोकेऽपि च नन्दगोकुलिना स्वपुत्रो नारायणो भोजनान्तरं पृष्टः, भोजनं कृतं त्वयेति ? स प्राह - स्वच्छन्दतः स्वभवने स्वकृषीयमन्नं कान्ताकाग्रपचितं[३४] द्विजभुक्तशेषम् ।

"ये भुञ्जते सुरपितॄनपि तर्प्पयित्वा ।
ते भुक्तवन्त इह नंद ! मया न भुक्तम् ।।"

पौषधोपरि दृष्टान्तः -

।। अथ पौषधे जिनचन्द्रश्राद्धसम्बन्धः ।।

सुप्रतिष्ठानपुरेऽनन्तवीर्यो राजा, जिनचन्द्रः श्राद्धः, तस्य सुन्दरी भार्या, सम्यक्त्वमूलानि द्वादशव्रतानि निरतीचाराण्याराधयति विशेषतः पौषधव्रतम् ।

"चतुष्पर्व्यां चतुर्थादिकुव्यापारनिषेधनम् ।
ब्रह्मचर्यक्रिया स्नानादित्यागः पौषधव्रतम् ।।" [योगशास्त्र-३/८५]

अन्यदा तेन पौषधो जगृहे । कायोत्सर्गश्चक्रे ।

"[16]जिणसाहुगुणकित्तण-पसंसणादाणविणयसंपन्नो । [सम्बोधप्रकरण-१३८९, ध्यानशतक-६८]
सुयसीलसंजमरओ, धम्मज्झाणी मुणेयव्वो ।।१।।
[17]जो मेरुगिरिसमाणं, रासिं कणयस्स देइ अणवरयं ।
जं होइ तस्स पुन्नं, तत्तो पोसहवयं अहिअं ।।२।।
[18]सत्तहत्तरि सत्तसया सत्तहत्तरि सहस लक्खकोडीओ ।
सगवीसं कोडिसया, नवभागा सत्तपलियस्स ।।३।।" [सम्बोधप्रकरण - १२५०]

---

३४. न ज्ञातः स्पष्टार्थः । सम्पा० ।
वन्दित्वा विसर्जयति, विसर्जितोऽनुगच्छति, पश्चात्स्वयं भुङ्क्ते, यद् च किल साधुभ्यो न दत्तं तद् श्रावकेण न भोक्तव्यम्, यदि पुनः साधुः नास्ति तदा देशकालवेलायां दिशालोकः कर्तव्यः, विशुद्धभावेन चिन्तयितव्यम् - यदि साधवोऽभविष्यन् तदा निस्तारितोऽहमभविष्यमिति ।

16. **जिनसाधुगुणकीर्तनप्रशंसनादानविनयसम्पन्नः । श्रुतशीलसंयमरतो धर्मध्यानी ज्ञातव्यः ।।**
17. **यो मेरुगिरिसमानं राशिं कनकस्य ददात्यनवरतम् । यद् भवति तस्य पुण्यं तस्मात् पौषधव्रतमधिकम् ।।**
18. **सप्तसप्ततिः सप्तशतानि सप्तसप्ततिः सहस्रलक्षकोट्यः । सप्तविंशतिः कोटिशतानि नवभागाः सप्तपल्यस्य ।।**

अङ्कानां वामतो गतिः । सप्तविंशतिकोडिशत-सप्तसप्ततिकोटि-सप्तसप्ततिलक्ष-सप्तसप्ततिसहस्र-सप्तशत-सप्तसप्तति-नवभागीकृतपल्यस्य सप्तमभागः । [२७,७७,७७,७७,७७७ ७/३ एतावत्पल्यायुर्बन्ध एकस्मिन् पौषधे] इत्यागमोक्तधर्मध्यानं सर्वोत्कृष्टं प्रपेदे जिनचन्द्रेण । अत्रान्तरे सौधर्मेन्द्रेण प्रशंसा कृता । धन्योऽसौ श्राद्धः । य एवंविधशुद्धधर्म्मध्यानाद्देवैरपि चालयितुं न शक्यते। तदाकार्ण्य रत्नचूडदेवो भरते आगत्य श्राद्धपरीक्षां चकार । तत्र सुदर्शनाभगिनीरूपं कृत्वा पौषधशालामागत्य सूर्योदयं निर्माय तमुवाच । भ्रातस्तव रसवती षट्रसमिश्रा निष्पन्नास्ति, शीतली भवति । पौषधं पारय । श्रावकः शृणोत्यपि न शुभध्यानलीनमनाः, ततो दासीरूपेणाह - हे प्राणनाथ ! एतद्विलेपनं मम स्वामिन्या सुन्दर्या प्रेषितमस्तीत्युक्त्वा तेन विलेपयति सुकुमालपाणिपद्मेन सर्वाङ्गम्, तथापि न क्षुब्धः। ततो मित्ररूपेण ताम्बूलं दत्ते । ततो भार्यारूपेण शीलभङ्गाय यतते । ततः प्रतिकूलोपसर्गैः क्षोभनं तथापि न क्षुब्धः । ततः प्रत्यक्षीभूय तुष्टो नृत्यं कृत्वा जिनचन्द्रगृहे रत्नवृष्टिं विधाय देवो जगाम । श्रावकः प्रातः पौषधं पारयित्वाऽर्हत्पूजासुपात्रदानपूर्वं भोजनं चकार । ततो रत्नानि विभज्य स्वजनेभ्यो ददौ। क्रमेण जिनभवनबिम्बादीनि धर्मकृत्यानि कृत्वा पुत्रे भारमारोप्य तपस्यां जग्राह । केवलज्ञानान्मोक्षं प्राप्तः।।

।। इति पौषधे जिनचन्द्रसम्बन्धः ।।

[इइ पव्वेसु पोसहवयं]

[दाणं]

[११-दानम्]

अथ दानादिधर्मचतुष्ट्यी श्रीवीरमुखचतुष्ट्यप्रदर्शिता प्ररूप्यते । यथा गृहिणां चतुर्धाऽपि धर्मः समर्प्पितः । आत्मना दीक्षाप्रतिपत्त्यवसरे वर्षम् -

"[1]**वरवरिआ घोसिज्जइ किमिच्छअं दिज्जए बहुविहीअं ।**
सुरअसुरदेवदाणवनरिंदमहिआण निक्खमणे ।।" [आवश्यकनिर्युक्ति-२१९]

प्रहरवेलायाम् -

"[2]**एगा हिरण्णकोडी अट्ठेव अणूणगा सयसहस्सा ।**
सूरोदयमाईअं दिज्जइ जा पायरासाओ ।।" [आवश्यकनिर्युक्ति-२१७]

वर्षेण च -

"[3]**तिण्णेव य कोडिसया अट्ठासीइं च हुंति कोडीओ ।**
असिइं च सयसहस्सा एअं संवत्सरे दिण्णं ।।" [आवश्यकनिर्युक्ति-२२०]

इत्येवं विधिना दानं दत्त्वा सर्वविरतिप्रतिपत्तिं विधाय केवलोत्पत्तेरनन्तरं प्रथम-समवसृतौ चतुःप्रकारमपि धर्मं प्ररूप्यात्मना त्रिप्रकारमेवादृत्य गृही दानेन शुध्यतीति हेतोश्चतुःप्रकारोऽपि श्रीजिनधर्म्मो गृहस्थानामेव प्रदत्तः । गृहस्थैः स त्वाराध्य एव चतुःप्रकारोऽपि तथैव श्रीजिनाज्ञाप्रतिपालनसम्भवात् । केन किमपि स्वमतिकल्पितं किञ्चित्कारणं विभाव्य दाननिषेधः श्राद्धानां विधीयमानोऽस्ति । स तु श्रीजिनागमा-दियुक्त्याज्ञाविराधकतयैव ज्ञेयः । यतः श्राद्धाः श्रीहेम[चन्द्र]सूरिभिर्योगशास्त्रे दातार एव प्ररूपिताः ।

---

1. वरवरिका घोष्यते किमीप्सितं दीयते बहुविधिकम् । सुरासुर-देव-दानव-नरेन्द्रमहितानां निष्क्रमणे ।।
2. एका हिरण्यकोट्योऽष्टैवान्युनकाः शतसहस्राः । सूर्योदयादारभ्यो दीयते यावत् पातराशः ।।
3. त्रिण्येव च कोटिशतानि, अष्टाशीतिश्च भवन्ति कोटयः । अशीतिश्च शतसहस्राणि एतत् संवत्सरे दत्तम् ।।

एवं व्रतस्थितो भक्त्या सप्तक्षेत्र्यां धनं वपन् ।
दयया चातिदीनेषु महाश्रावक उच्यते ।।
यः सद् बाह्यमनित्यं च क्षेत्रेषु न धनं वपेत् ।
कथं वराकश्चारित्रं दुश्चरं स समाचरेत् ।। [योगशास्त्र-३/११९-१२०]

सप्तक्षेत्रीयम् -

"सन्मृत्तिका-ऽमलशिलातल-रूप्य-दारु-;
सौवर्ण-रत्न-मणि-चन्दनचारुबिम्बम् ।
कुर्वन्ति जैनमिह ये स्वधनानुरूपम्;
ते प्राप्नुवन्ति नृसुरेषु महासुखानि ।।" [योगशास्त्र-३/११९ वृत्ति]

तथा -

"[4]पासाईअ पडिमा, लक्खणजुत्ता समत्तलंकरणा ।
जह पल्हाएइ मणं, तह निज्जरमो विआणाहि ।।" [योगशास्त्र-३/११९ वृत्ति]

तथा निर्मितस्य जिनबिम्बस्य शास्त्रोक्तविधिना प्रतिष्ठापनम्, [६]अष्टप्रकार-पूजाभिरर्चनम्, यात्राविधानम्, विशिष्टाभरणभूषणम्[७], विचित्रवस्त्रैः परिधापनमिति जिनबिम्बे धनवपनम् ।

जिन[८]भवनक्षेत्रे स्वधनवपनं यथा-शल्यादिरहितभूमौ स्वयंसिद्धस्योपलकाष्ठादिदलस्य ग्रहण[९]ेन सूत्रकारादिभृतकानतिसन्धानेन भृत्यानामधिकमूल्यवितरणेन षड्जीवनिकाय-रक्षा[१०]यतनापूर्वकं जिनभवनस्य विधापनम् । सति विभवे भरतादिवद् रत्नशिलाभिर्बद्ध-चामीकरकुट्टिमस्य मणिमयस्तम्भसोपानस्य रत्नमयतोरणशतालङ्कृतस्य

---

६. 'अष्टाभिश्च प्रकारैरभ्यर्चनम्', योगशास्त्रे । ७. '०भूषणानि' हस्त० । ८. 'जिनभवनक्षेत्रे स्वधनवपनं यथा' हस्त० नास्ति । ९. 'ग्रहणे' हस्त० । १०. 'षड्जीवनिकाययतनया पूर्वम्' हस्त० ।

4. **प्रासादिका प्रतिमा लक्षणयुक्ता समस्तालङ्करणा । यथा प्रह्लादयति मनस्तथा निर्जरां विजानीहि ।।**

विशालशालाबलानकस्य[११] शालभञ्जिकाभङ्गिभूषितस्तम्भादिप्रदेशस्य दह्यमानकर्पूर-कस्तूरिका-ऽगरुप्रभृतिधूपसमुच्छलद्धूमपटलजातजलदशङ्कानृत्यत्कलकण्ठकुल[१२]-कोलाहलस्य चतुर्विधातोद्य-नान्दीनिनादनादितरोदसीकस्य देवाङ्गलूहनप्रभृति[१३]विचित्र-वस्त्रोल्लोचखचितमुक्तावचूलालङ्कृतस्य[१४] उत्पतन्निपतद्गायन्नृत्यद्वल्गत्सिंहादि[१५]नादित-वत्सुरसमूहमहिमानुमोदनप्रमोदमानजनस्य विचित्रचित्रचित्रीयितसकललोकस्य चामर-ध्वजच्छत्राद्यलङ्कारविभूषितस्य मूर्धारोपितविजयवैजयन्तीनिबद्धकिङ्किणीरणत्कार-मुखरितदिगन्तस्य कौतुकाक्षिप्तसुरासुर-किन्नरीनिवहाहमहमिकाप्रारब्धसङ्गीतस्य गन्धर्व-गीतध्वनितिरस्कृततुम्बुरुमहिम्नो[१६] निरन्तरतालारासक-हल्लीसक[१७]प्रमुखप्रबन्धनानाभिनयन-व्यग्रकुलाङ्गनाचमत्कारितभव्यलोकस्याऽभिनीयमाननाटककोटिरसाक्षिप्तरसिकजनस्य जिनभवनस्योत्तुङ्गगिरिशृङ्गेषु जिनानां जन्म-दीक्षा-ज्ञान-निर्वाणस्थानेषु सम्प्रतिराजवच्च प्रतिपुरं प्रतिग्रामं पदे पदे विधापनम्; असति तु विभवे तृणकुट्यादिरूपस्याऽपि । यतः -

"यस्तृणमयीमपि कुटीं कुर्याद् दद्यात्तथैकपुष्पमपि ।
भक्त्या परमगुरुभ्यः पुण्योन्मानं कुतस्तस्य ? ।।"

"किं पुनरुपचित[१८]दृढघनशिलासमुद्घातघटितजिनभवनम् ।
ये कारयन्ति शुभमतिविधायिनस्ते महाधन्याः ।।" [योगशास्त्र-३/११९ वृत्ति]

राजादेस्तु विधापयितुः प्रचुरतरभाण्डागार-ग्राम-नगर-मण्डल-गोकुलादिप्रदानं जिनभवन[१९]क्षेत्रे वपनम्, तथा जीर्णशीर्णानां चैत्यानां समारचनम्, नष्टभ्रष्टानां समुद्धरणं चेति ।

अथ जिना[२०]गमक्षेत्रे स्वधनवपनं यथा–जिनागमो हि कुशास्त्रजनितकुसंस्कार-

---

११. '०बलानक' हस्त० । १२. '०नृत्यकाल०' हस्त० । १३. 'देवाङ्गप्रभृति०' योगशास्त्रे । १४. '०कृतस्य गायन्' हस्त० । १५. 'सिंहादितवत्सुरसमूहानुमोदन०' हस्त० । १६. '०तुम्बुरमहिम्नो' हस्त० । १७. 'मण्डलेन तु यन्नृत्तं स्त्रीणां हल्लीसकं हि तत्।' इति अभिधानचिन्तामणौ । १८. 'पुनरुचित०' हस्त० । १९. 'जिनभवने' हस्त० । २०. 'जिनागमे हस्त० ।

विषसमुच्छेदनमहामन्त्रायमाणो[२१] धर्माधर्म-कृत्याकृत्य-भक्ष्याभक्ष्य-पेयापेय-गम्यागम्य-सारासारादिविवेचनहेतुः सन्तमसे दीप इव समुद्रे द्वीपमिव मरौ कल्पतरुरिव संसारे दुरापः, जिनादयोऽप्येतत्प्रामाण्यादेव निश्चीयन्ते । यदवोचाम स्तुतिषु -

"यदीयसम्यक्त्वबलात् प्रतीमो भवादृशानां परमाप्तभावम् ।
कुवासनापाशविनाशनाय नमोऽस्तु तस्मै तव[२२] शासनाय ।।" [अ. द्वा.-२१]

जिनागमबहुमानिना[२३] च देव-गुरु-धर्मादयोऽपि बहुमता भवन्ति[२४] । किञ्च, केवलज्ञानादपि जिनागम एव प्रामाण्येनाऽतिरिच्यते । यदाहुः -

"[5]ओहो सुओवउत्तो सुयणाणी जइ हु गिण्हइ असुद्धं ।
तं केवली वि भुंजइ अपमाणं सुअं भवे इहरा ।।" [पिण्डनिर्युक्ति-५२४]

एकमपि च जिनागमवचनं[२५] भविनां भवविनाशहेतुः । यदाहुः -

"एकमपि च जिनवचनाद्यस्मान्निर्वाहकं पदं भवति ।
श्रूयन्ते चानन्ताः सामायिकमात्रपदसिद्धाः ।।" [त.का. - २७]

जिनवचनं च दुःषमाकालवशादुच्छिन्नप्रायमिति मत्वा भगवद्भिर्नागार्जुनस्कन्दिलाचार्यप्रभृतिभिः पुस्तकेषु न्यस्तम् । ततो जिनवचनबहुमानिना[२६] तत् पुस्तकेषु लेखनीयं वस्त्रादिभिरभ्यर्चनीयं च । यतः -

"न ते नरा दुर्गतिमाप्नुवन्ति, न मूकतां नैव जडस्वभावम् ।
न चान्धतां बुद्धिविहीनतां च, ये लेखयन्तीह जिनस्य वाक्यम् ।।"

[योगशास्त्र-३/११९ वृत्ति]

जिनागमपाठकानां भक्तितः[२७] सन्मानन[२८] च । यतः -

---

२१. '०च्छेदनमन्त्रा०' हस्त० । २२. 'जिनशासनाय' धर्मसङ्ग्रह ५९ वृत्तौ । २३. '०बहुमानेन' हस्त० । २४. 'बहुमताः स्युः' हस्त० । २५. 'जिनवचनं भव०' हस्त० । २६. '०बहुमान्यता तल्लेखनं...अभ्यर्चनं च' हस्त० । २७. 'भक्तिपूर्वकं' योगशास्त्रवृत्तौ । २८. 'सन्मानं' हस्त० ।

5. **ओघः श्रुतोपयुक्तः श्रुतज्ञानी यदि हु गृह्णात्यशुद्धम् । तत् केवल्यपि भुङ्क्ते अप्रमाणं श्रुतं भवेदितरथा ।।**

"पठति पाठयते पठतामसौ वसन-भोजन-पुस्तकवस्तुभिः ।
प्रतिदिनं कुरुते य उपग्रहं स इह सर्वविदेव भवेन्नरः ।।[योगशास्त्र-३/११९ वृत्ति]

लिखितानां च पुस्तकानां संविग्नगीतार्थेभ्यो बहुमानपूर्वकं व्याख्यानार्थं दानम्, व्याख्यायमानानां च प्रतिदिनं पूजापूर्वकं श्रवणं चेति ।

साधूनां च जिनवचनानुसारेण सम्यक् चारित्रमनुपालयतां दुर्लभं[२९] मनुष्यजन्म सफलीकुर्वतां स्वयं तीर्णानां परं तारयितुमुद्यतानामातीर्थकरगणधरेभ्यस्तद्दिनदीक्षितेभ्यः[३०] सामायिकसंयतेभ्यो यथोचितप्रतिपत्त्या स्वधनवपनं यथा - उपयुज्यमानस्य[३१] चतुर्विधाहार-भेषज-वस्त्र-पात्रोपाश्रयादेः दानम् ।

"[6]तम्हा सइ सामत्थे आणाभट्ठम्मि नो खलु उवेहा ।
अणुकूलेहिअरेहि अ अणुसट्ठी होइ दायव्वा ।।" [योगशास्त्र-३/११९ वृत्ति]

तथा[३२] रत्नत्रयधारिणीषु साध्वीषु साधुष्विव यथोचिताहारादिदानं स्वधनवपनं मोक्षसाधकमेव ।

"जानीते जिनवचनं श्रद्धते चरति चाऽऽर्यिका[३३][ऽ]शबलम् ।
नास्यास्त्यसम्भवोऽस्यां[३४] नादृष्टविरोधगतिरस्ति ।।"[स्त्रीनिर्वाणकेवलीभुक्ति प्र.४]

एतच्चाधिकं यत् साध्वीनां दुःशीलेभ्यो नास्तिकेभ्यो गोपनम्, स्वगृहप्रत्यासत्तौ च समन्ततो गुप्ताया गुप्तद्वाराया वसतेर्दानम्, स्वस्त्रीभिश्च तासां परिचर्य्याविधानम्,

---

२९. 'दुलभमनुष्यं सफल०' हस्त० । ३०. 'नामायथोचित्त०' हस्त० । ३१. 'उपकारिणां प्रासुकैषणीयानां कल्पनीयानां चाशनादीनां, रोगापहारिणां च भेषजादीनां. शीतादिवारणार्थानां च वस्त्रादीनां, प्रतिलेखनाहेतो रजोहरणादीनां, भोजनाद्यर्थं पात्राणाम्, औपग्राहिकाणां च दण्डकादीनां, निवासार्थमाश्रयाणां दानम् । न हि तदस्ति यद् द्रव्य-क्षेत्र-काल-भावापेक्षयाऽनुपकारकं नाम, तत् सर्वस्वस्यापि दानम्, साधुधर्मोद्यतस्य स्वपुत्र-पुत्र्यादेरपि समर्पणं च । किं बहुना ? यथा यथा मुनयो निराबाधवृत्त्या स्वमनुष्ठानमनुतिष्ठन्ति तथा तथा महता प्रयत्नेन सम्पादनम्, जिनप्रवचनप्रत्यनीकानां च साधुधर्मनिन्दापराणां यथाशक्ति निवारणम् । यदाह-, योगशास्त्र - धर्मसङ्ग्रहवृत्तौ । ३२. 'तथा साध्वीषु स्वधनवपनम्' हस्त०, 'मोक्षसाधकमेव' योगशास्त्र-धर्मसङ्ग्रहवृत्तौ नास्ति । ३३. 'चार्यका सकं' हस्त०, 'चार्यिका सकलम्' धर्मसङ्ग्रहवृत्तौ । ३४.'ऽस्या नादृष्टि०' हस्त० ।

6. तस्मात् सति सामर्थ्ये आज्ञाभ्रष्टे नो खलु उपेक्षा । अनुकूलैरितरैश्चानुशास्तिर्भवति दातव्या ।।

स्वपुत्रिकाणां च तत्सन्निधौ धारणम्, व्रतोद्यतानां स्वपुत्र्यादीनां प्रत्यर्पणं च, तथा विस्मृतकरणीयानां तत्स्मारणम्, अन्यायप्रवृत्तिसम्भवे तन्निवारणम्, सकृदन्यायप्रवृत्तौ शिक्षणम्, पुनः पुनः प्रवृत्तौ निष्ठुरभाषणादिना ताडनम्, उचितेन वस्तुनोपचरणं चेति।

श्रावकेषु स्वधनवपनं यथा–तेषां[३५] श्रावकत्वेन सङ्गमोऽपि महते पुण्याय, किं पुनस्तदनुरूपा प्रतिपत्तिः ? । सा च स्वपुत्रादिजन्मोत्सवे विवाहे[३६]ऽन्यस्मिन्नपि तथाविधे प्रकरणे साधर्मिकाणां निमन्त्रणम्, विशिष्टभोजन-ताम्बूल-वस्त्राभरणादिदानम्, आपन्निमग्नानां च स्वधनव्ययेनाप्यभ्युद्धरणम्, अन्तरायदोषाच्च विभवक्षये पुनः पूर्वभूमिकाप्रापणम्, धर्मे च विषीदतां तेन तेन प्रकारेण धर्मे स्थैर्य्यारोपणम्, प्रमाद्यतां च स्मारण-वारण-चोदन-प्रतिचोदनादिकरणम्, [३७]पञ्चविधस्वाध्याये यथायोग्यं विनियोजनम्, विशिष्टधर्मानुष्ठानकरणार्थं च साधारणपौषधशालादेः करणमिति ।

श्राविकासु धनवपनं श्रावकवदन्यूनातिरिक्तमुन्नेतव्यम् । ताश्च[३८] ज्ञान-दर्शन-चारित्रवत्यः [३९]शील-सन्तोषप्रधानाः सधवा विधवा वा जिनशासनानुरक्तमनसः साधर्मिकत्वेन माननीयाः ।

ननु स्त्रीणां[४०] कुतः शीलशालित्वं कुतो वा रत्नत्रययुक्तत्वम् ? स्त्रियो हि नाम लोके लोकोत्तरे चानुभवाच्च दोषभाजनत्वेन प्रसिद्धाः । एताः खल्वभूमिका विषकन्दल्यः, अनभ्रसम्भवा वज्राशनयः, असंज्ञका व्याधयः, अकारणो मृत्युः, अकन्दरा व्याघ्राः, प्रत्यक्षा राक्षस्यः, असत्यवचनस्य साहसस्य बन्धुस्नेहविघातस्य सन्तापहेतुत्वस्य निर्विवेकत्वस्य च परमं कारणमिति दूरत एव परिहार्याः, तत् कथं [४१]दान-सन्मान-वात्सल्यविधानं तासु युक्तियुक्तम् ?

उच्यते–अनेकान्त एष यत् स्त्रीणां दोषबहुलत्वमुच्यते[४२], पुरुषेष्वपि हि समानमेतत्।

---

३५. 'साधर्मिकाः खलु श्रावकस्य श्रावकाः, समानधार्मिकाणां च' योगशास्त्र-धर्मसङ्ग्रहवृत्तौ । ३६. 'विवाहादिप्रकरणे निमन्त्रणम्' हस्त० । ३७. 'वाचना-प्रच्छना-परावर्तना-ऽनुप्रेक्षा-धर्मकथादिषु' इति योगशास्त्र-धर्मसङ्ग्रहवृत्त्योः । ३८. 'तच्च' योगशास्त्रवृत्तौ, 'तद्वच्च' धर्मसङ्ग्रहवृत्तौ । ३९. 'शीलप्रधानाः' हस्त० । ४०. 'स्त्रीणां शील०' हस्त० । ४१. 'सन्मानादि युक्तिस्तासु ?' हस्त० । ४२. '०लत्वं पुरुषे०' हस्त० ।

तेऽपि क्रूराशया दोषबहुला नास्तिकाः कृतघ्नाः स्वामिद्रोहिणो देव-गुरुवञ्चकाः[४३] कूटकपटमायाविधायिनश्च दृश्यन्ते । तद्दर्शनेन च महापुरुषाणामवज्ञा कर्तुं[४४] न युज्यते, एवं[४५] स्त्रीणामपि । यद्यपि कासाञ्चिद् दोषबहुलत्वमुपलभ्यते तथापि कासाञ्चिद् गुणबहुलत्वमप्यस्ति । तीर्थकरादिजनन्यो हि स्त्रीत्वेऽपि तत्तद्गुणगरिमयोगितया[४६] सुरेन्द्रैरपि पूज्यन्ते, मुनिभिरपि स्तूयन्ते । लौकिका अप्याहुः -

"निरतिशयं गरिमाणं, तेन युवत्या वदन्ति विद्वांसः ।
तं कमपि वहति गर्भं[४७], जगतामपि यो गुरुर्भवति ।। [योगशास्त्र-३। ११९ वृत्ति]

काश्चन स्वशीलप्रभावादग्निं जलमिव, विषधरं रज्जुमिव, सरितः स्थलमिव, विषममृतमिव कुर्वन्ति । चतुर्वर्णे[४८] च सङ्घे चतुर्थमङ्गं गृहमेधिस्त्रियोऽपि । सुलसाप्रभृतयो हि श्राविकास्तीर्थकरैरपि प्रशस्यगुणाः, सुरेन्द्रैरपि स्वर्गभूमिषु पुनः पुनर्बहुमतचारित्राः, प्रबलमिथ्यात्वैरप्यक्षोभ्यसम्यक्त्वसम्पदः[४९], काश्चिच्चरमदेहाः, काश्चिद् द्वित्रिभवान्तरितमोक्षगमनाः शास्त्रेषु श्रूयन्ते । तदासां जननीनामिव भगिनीनामिव स्वपुत्रीणामिव वात्सल्यं विधेयम् ।

श्राद्धास्तु प्रतिदिनं दानगुणाढ्या एव प्रोक्ताः श्रीउपदेशमालायां भोजनाधिकारे प्रत्यहं क्रियमाणेऽपि । यदुक्तम् -

"[7]पढमं जईण दाऊण, अप्पणा पणमिऊण पारेइ ।
असईइ सुविहिआणं, भुंजइ य कयदिसालोओ ।।
[8]साहूण कप्पणिज्जं, जं नवि दिन्नं कहिं चि किंचि तहिं ।
धीरा जहुत्तकारी, सुसावगा तं न भुंजति ।।

---

४३. 'ञ्चकाश्च दृश्यन्ते' योगशास्त्र-धर्मसङ्ग्रहवृत्त्योः । ४४. 'अवज्ञा न युक्तिमती' हस्त० । ४५. 'एवं... गुणबहुलत्वमप्यस्ति' हस्त० नास्ति । ४६. 'गरिमयोग्यतया' हस्त० । ४७. 'गर्वं' हस्त० । ४८. 'चतुर्वर्णे...स्त्रियोऽपि ।' हस्त० नास्ति । ४९. 'प्रबलमिथ्यात्वैर०' हस्त० ।

7. **प्रथमं यतिभ्यो दत्त्वा आत्मना प्रणम्य पारयति । अभावे सुविहितानां भुङ्क्ते च कृतदिशालोकः ।।**
8. **साधूनां कल्पनीयं यन्नापि दत्तं कस्मिंश्चित् कञ्चित् तस्मिन् । धीरा यथोक्तकारिणः सुश्रावकास्तन्न भुञ्जते ।।**

[9]वसही-सयणा-ऽसण-भत्त-पाण-भेसज्जवत्थपत्ताई ।
जइ वि न पज्जत्तधणो, थोवो वि हु थोवयं देइ ।।" [उपदेशमाला-२३७-२३९]

श्रीभगवत्यामपि -

"[10]तेणं कालेणं तेणं समएणं तुंगिआए नयरीए बहवे समणोवासगा [५०]परिवसंति अड्ढा दित्ता वित्थिण्णा-विपुलभवण-सयणाऽऽसण-जाण-वाहणाइण्णा [५१]बहुधण-बहुजायरूव-रयया आओग-पओगसंपउत्ता विच्छड्डिअविपुलभत्त-[५२]पाणा बहुदासी-दास-गो-महिस-गवेल-यप्पभूआ [५३]बहुजणस्स-अपरिभूता अहिगतजीवाजीवा उवलद्धपुण्ण-[५४]पावा आसव-संवर-[५५]निज्जर-किरियाहिकरण-बंधमोक्खकुसला [11]असहेज्जदेवासुर-नाग-सुवण्ण-जक्ख-रक्खस-किन्नर-किंपुरिसे-गरुल-गंधव्व-महोरगादिएहिं देवगणेहिं निग्गंथाओ पावयणाओ अणइक्कमणिज्जा, [५५]णिग्गंथे पावयणे निस्संकिया निक्कंखिआ [५६]निव्वितिगिच्छा लद्धट्ठा गहिअट्ठा पच्छिअट्ठा [५७]अभिगतट्ठा विणिच्छियट्ठा, अट्ठिमिंजपेम्माणुरागरत्ता- 'अयमाउसो ! निग्गंथे पावयणे अट्ठे, अयं परमट्ठे, सेसे अणट्ठे', ऊसियफलिहा अवंगुअदुवारा चियत्ततेउर-घरप्पवेसा, बहूहिं सीलव्वय-

---

५०. '०वासगा अड्ढा विपुल०' हस्त० । ५१. 'बहुधण...रयया' हस्त० नास्ति । ५२. '०पाणा दासी०' हस्त० । ५३. 'बहुजणस्स अपरिभूता' हस्त० नास्ति । ५४. '०पावा असहेज्जादेवासुरेहिं पि निग्गंथाओ' हस्त० ।

9. वसति- शयनासनं-भक्त-पान-भैषज वस्त्र-पात्रादि । यद्यपि न पर्याप्तधनः स्तोकादपि स्तोकं ददाति ।।

10. तस्मिन् काले तस्मिन् समये तुङ्गिकायां नगर्यां बहवः श्रमणोपासकाः परिवसन्ति आढ्या दिप्ता विस्तीर्ण-विपुलभवनशयनासनयानवाहनाकीर्णाः बहुधनबहुजातरूप(सुवर्ण)रजताः आयोगप्रयोगसम्प्रयुक्ताः विच्छिर्दितविपुल-भक्तपानाः बहुदासीदासगोमहिषगवेलक[उरभ्र]प्रभूताः बहुजनस्यापरिभवनीयाः अधिगतजीवाजीवाः उपलब्धपुन्यपापाः आश्रव-संवर-निर्जरा-क्रियाधिकरणबन्ध-मोक्षकुशलाः [आश्रवादिनां हेयोपादेयतास्वरूपवेदिनः]

11. असहाय्यदेवासुर-नाग-सुपर्ण-यक्ष-राक्षस-किन्नर-किंपुरुष [व्यन्तरविशेष]-गरुडध्वज[भवनपतिविशेष] गान्धर्व-महोरगादिभिः [व्यन्तरविशेषैः] देवगणैः निर्ग्रन्थात् प्रवचनात् अनतिक्रमणीयाः, निर्ग्रन्थे प्रवचने निःशङ्किताः निष्काङ्क्षिताः निर्विचिकित्साः लब्धार्थाः गृहितार्थाः पृष्टार्थाः अभिगतार्थाः विनिश्चितार्थाः अस्थिमज्जाप्रेमानुरागरक्ताः, [अस्थिमिञ्जासु सर्वज्ञप्रवचनप्रीतिरूपकुसुम्भादिरागेण जिनशासनगत-प्रेमानुरागेण वा रक्ताः] इदमायुष्मन् ! निर्ग्रन्थे प्रवचने अर्थः, अयं परमार्थः, शेषः अनर्थः उच्छितस्फटिकाः [मौनीन्द्रप्रवचनावाप्त्या परितुष्टमानसाः] अप्रावृतद्वाराः [सद्दर्शनलाभेन न कुतोऽपि पाषण्डिकाद्बिभ्यति, शोभनमार्ग-परिग्रहेणोद्घाटशिरसस्तिष्ठन्तीति] चियत्तान्तःपुर-गृहप्रवेशाः [लोकानां प्रीतिकर एवान्तःपुरे गृहे वा प्रवेशो येषां ते तथा, अतिधार्मिकतया सर्वत्रानाशङ्कनीयास्ते, नाप्रीतिकरोऽन्तःपुरगृहयोः प्रवेशः-शिष्टजनप्रवेशनं येषां ते तथा, अनीर्ष्यालुताप्रतिपादनपरं इत्थं विशेषणमथवा त्यक्तोऽन्तःपुरगृहयोः परकीययोर्यथाकथञ्चित्प्रवेशो यैस्ते तथा] बहुभिः शीलव्रत-गुणव्रत-विरमणप्रत्याख्यान-पौषधोपवासैः

गुणव्वय-वेरमण-पच्चक्खाण-पोसहोववासेहिं[12] चाउद्दसऽट्ठमुद्दिट्ठपुण्णमासिणीसु पडिपुण्णं पोसहं सम्मं अणुपालेमाणा, समणे निग्गंथे फासुएसणिज्जेणं असण-पाण-खाइम-साइमेणं वत्थ-पडिग्गह-कंबल-पादपुंछणेणं पीठ-फलग-सेज्जा-संथारगेणं ओसह-भेसज्जेण य पडिलाभेमाणा, अहापरिग्गहिएहिं तवोकम्मेहिं अप्पाणं भावेमाणा विहरंति ।" [भगवतीसूत्र-२/५/१०७]

तथा श्रीआवश्यके श्राद्धद्वादशव्रताधिकारे -

"अतिहिसंविभागो[13] नाम नायागयाणं कप्पणिज्जाणं अन्नपाणाईणं दव्वाणं देसकाल-सद्धासक्कारकमजुत्तं पराए भत्तीए आयाणुग्गहबुद्धीए संजयाणं दाणं ।"

इत्यादिभिः श्रीसिद्धान्तवचनयुक्त्या श्राद्धा उदारा दातारो दानशौण्डीरा विलोक्यन्ते, न तु स्वल्पमात्रकार्प्पण्यभाजः, तस्मात्सति विभवे सर्वदा भावेन सकलदानप्रकारेषु यतनीयमेव । असति विभवे तु हार्दभावेन भावनां 'अहो एते धन्याः कृतपुण्या यत्सद्रव्या दातारश्च, अहमकृतपुण्योऽद्रव्योऽदाता चे'ति भावयेत् । एवमकर्तृत्ववृत्या भावयन्नपि भवान्तरे सुगतिभाजनं स्यादिति । अन्यत्रापि -

इक्केण[14] कुण गुणेण जिअं जयंपि काएण निग्गुणेणावि ।
काउं परेसि सद्दं जो भक्खइ थेवभक्खं पि ।।

दानमपि पञ्चधा, तत्र मोक्षसाधने परमसुपात्रदानोपरिकथा -

णं[15] जो दाणं भत्तीए विअरइ सो पावइए विउलरिद्धीओ ।
धणदेवो धणमित्तो सहोअरा इत्थ दिट्ठंता ।।

---

12. चतुर्दशी-अष्टम्युद्दिष्टा [अमावास्या]-पूर्णमासीषु प्रतिपूर्णं पौषधं सम्यग् अनुपाल्यमानाः, श्रमणे निर्ग्रन्थे प्रासुकैषणीयैः अशन-पान-खादिम-स्वादिमैः वस्त्र-पतद्ग्रह[पात्र]-कम्बल-पादप्रोञ्छनैः पीठ-फलक-शय्या-संस्तारकैः औषध-भैषजैश्च प्रतिलाभ्यमानाः यथाप्रतिगृहितैः तपःकर्मभिः आत्मानं भाव्यमानाः विहरन्ति।
13. अतिथिसंविभागो नाम न्यायागतानां कल्पनीयानामन्नपानादीनां द्रव्याणां देशकालश्रद्धा-सत्कारक्रमयुक्तं परया भक्त्याऽऽत्मानुग्रहबुद्ध्या संयतेभ्यो दानम् ।
14. एकेन करोतु गुणेन जितं जगदपि कायेन निर्गुणेनापि । कृत्वा परेषां शब्दं यो भक्ष्यते स्तोकभक्ष्यमपि ।।
15. यो दानं भक्त्या विकुर्वते स प्राप्नोति विपुल-ऋद्धयः । धनदेवो धनमित्रः सहोदरौ अत्र दृष्टान्तौ ।।

तथाहि -

।। अथ पात्रदानोपरि धनदेव-धनमित्रयोः सम्बन्धः ।।

सिंहलद्वीपे सिंहेश्वरो राजा, सिंहली राज्ञी, सिंह सुतः । सोऽन्यदा वसंतसमये क्रीडार्थं जगाम। तावता वनगजेन मार्यमाणायाः कन्याया हाहारवं शृणोति ।

"न[16] हु ताव रक्खसि, तुमं जणणि, तुमंपि हु करेसि मा करुणं ।
कुलदेवया वि तुम्हवि इअ, समये कत्थ वि गयाओ ।।"

इत्यादि वर्णेन, सिंहजसिंहकुमारेण चिन्तितम् ।

"किं[17] ताणं जप्पेण वि, निअजणणी पसवदुक्खजणगेण ।
परउवयारगुणेवि हु, न जाण हिययंमि विप्पुरइ ।।

परप्राणैर्निजप्राणान्, सर्वे तुष्यन्ति जन्तवः ।
निजप्राणैः परप्राणानेको जीमूतवाहनः ।।"

ततः स धावितः, दृष्टो हस्ती, 'रे ! रे ! दुष्टमातङ्ग ! किं कुर्व्वाणोऽस्ति स्त्रीघातपातकम् ? यदि पौरुषं समस्ति तदा आगच्छ त्वम्', इति वादितः सन् वचनानुसारेण धावितः कुमारोऽपि विण्टलिकां कृत्वा धावितः सम्मुखम् । क्रमेण विण्टलिका त्यक्ता । हस्ती तस्या उपरि दन्तप्रहारं ददाति । अस्मिन् समये कन्यका नष्टा हस्तिपार्श्वात्, कुमारस्य कीर्तिर्विस्तृता । तत्सम्बन्धं श्रुत्वा राजाऽपि हृष्टः ।

"गुणाः कुर्वन्ति दूतत्वं, दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्रातुं स्वयमायान्ति षट्पदाः ।।"

ततः सा कन्या धनवती नाम्नी कुमारगुणानुरागिणी जज्ञे । तत्पिताऽपि धनश्रेष्ठी कुमारस्य तां ददाति। कृतं च तया पाणिग्रहणम् । इतश्च यदा कुमारः पुरमध्ये क्रीडार्थं यत्र यत्र याति तत्र तत्र पौरनारीवर्गः समग्रोऽपि स्वस्वकर्माणि त्यक्त्वा कुमाररूपं निरीक्ष्य हृतहृदयः पृष्टलग्नो भ्रमति । पौरलोकै राजा विज्ञप्तः। राज्ञाऽपि कुमारो नगरमध्ये भ्रमणे निषिद्धः, पराभवेन देशान्तरं गन्तुकामो रात्रौ धनवतीं गृहीत्वा पुरान्निर्गत्य मार्गे गच्छन् समुद्रतटं प्राप्तः, परद्वीपयियासया यानपात्रं चटितो धनवतीयुक्तः कुमारः । तयोर्गच्छतोर्वार्तालापं कुर्व्वतोर्दैववशात्प्रतिकूलवातेन प्रवहणं भग्नम् । धनवती फलकं लब्ध्वा प्राप तटम्। मार्गे गच्छन्ती वियोगविह्वला प्राप्ता कुसुमपुरं नगरम् । तत्र प्रियमेलकतीर्थे दुस्तपस्तपति।

---

16. न खलु तावत्रक्षसि त्वं जननी त्वमपि खलु करोसि मा करुणाम् ।
कुलदेवताऽपि त्वमपि इह समये कुत्रापि गतः ।।

17. किं तस्य जापेनाऽपि निजजननीं प्रसवदुःखजनकेन । परोपकारगुणेऽपि खलु न जाने हृदये विस्फुरति ।।

यावद् भर्त्ता विलप्स्यतीति तावता मया मौनव्रतं पालनीयं इत्यभिग्रहं च गृह्णाति ।

इतश्च कुमारोऽपि प्राप्तः फलकखण्डः समुद्रमुत्तीर्य रत्नपुरं प्राप्तः । तत्र च रत्नप्रभराज्ञो रत्नसुन्दरी प्रिया तयोः पुत्री रत्नकुमारी सर्प्पेण एकदा दष्टा । मान्त्रिकैर्मुक्ता, कुमारेण पटहस्पर्शनापूर्वं सा सज्जीकृता परिणीता च। ततः कुमारो धनवतीवियोगेन भूमौ शेते, ब्रह्मव्रतं च पालयति । सा लज्जातो वक्तुं न शक्नोति । परमेकदा पृष्टं कारणम्, स च सपत्नीर्ष्याभयेन समयोचितमुत्तरं दत्तः । देवि ! ममैवं प्रतिज्ञा -

"[18]देसावलोअणत्थं तिन्निग्गंतस्स मह पइन्ना ।
बंभं भूमीसयणं, जा निअजणए न पिच्छामि ।।

रत्नवत्योक्तम्- 'नाथ ! त्वं धन्योऽसि ! यदीयती भक्तिः पित्रोरुपरि ।' ततो राज्ञाऽपि कुमारः पृष्टः सन् नृपस्य देशकुलादिकं सम्यक् कथयति । ततो राजा रत्नवतीयुतं कुमारं बहुवस्त्राभरणरत्नादिभिः सत्कृत्य सिंहलद्वीपं प्रति विसर्जयति । सज्जीकृतं यानपात्रम् । रूढस्तस्मिन् सप्रियः कुमारः, राज्ञा च स्वमन्त्री रुद्रदत्ताभिधानः संप्रेषणार्थं सार्थे प्रेषितः । एकदा मार्गे दृष्टा स्नुषा तेन मन्त्रिणा । ततस्तस्यां लुब्धेन कुमारो जलधौ यानपात्रात् पातितः । ततो रत्नवती विलापान् करोति । तदा मन्त्री भणति, भद्रे! ऽहं सदापि दासः । भव मम भार्या, तया चिन्तितमेष दुरात्मा मम शीलभङ्गं करिष्यति । यतः -

"न पश्यति हि जात्यन्धः, कामान्धो नैव पश्यति ।
न पश्यति मदोन्मत्तोऽप्यर्थी दोषं न पश्यति ।।"

ततः किमप्युत्तरं दत्त्वा शीलं रक्षामीति विचिन्त्य सा वदति - 'भो मन्त्रिन् ! तीरे गत्वा एतन्मृतकार्य-करणानन्तरं तद्वचः करिष्ये ।' जलधौ गच्छत्प्रतिकूलवातेन प्रवहणं भग्नम् । लब्धफलका रत्नवती कुसुमपुरे प्राप्ता सापि तथैव तपस्तपति । मन्त्र्यपि प्राप्तफलकः कुसुमपुरे राज्ञो मन्त्री जातः ।

कुमारोऽपि जलधौ पतन् केनापि मन्त्रादिनोत्पाद्य तापसाश्रमे मुक्तः । कुलपतिरपि कुमारशरीरे राजलक्षणानि वीक्ष्य स्वपुत्रीं रूपवतीं ददाति । जातं पाणिग्रहणम्, हस्तमोचने दत्तैका कन्था प्रतिदिनटङ्ककपञ्चशतदात्री एका च खट्वा आकाशगामिनी । कुलपतिं नत्वा चरितः सप्रियः कुमारः खट्वायां धनवतीं मनसि कृत्वा, चलिता खट्वा प्राप्ता चाकाशमार्गेण कुसुमपुरोद्याने । रूपवत्यास्तृषा लग्ना, कुमारः प्रियां कन्थां खट्वां च मुक्त्वा पानीयार्थं निकटावटे गतः । तत्र कूपे 'भो कुमार ! मामस्मादन्धकूपात्कर्षय,' इति मनुष्यभाषया ब्रुवाणः सर्पो दृष्टः । स च कुमारेणोत्तरीयं मुक्त्वा कर्षितः । तत्र तावता सर्प्पेण हस्ते दष्टः कुमारः कुब्जश्च बभूव । कुमारेणोक्तम्-'भो सर्प ! त्वया भव्यः प्रत्युपकारः कृतः स्वजातेः सदृशः ।' तावता सर्प आह - 'भो कुमार ! तव प्रत्युपकारं करिष्यामि, सङ्कटे स्मरणीयोऽहम्, । इत्युक्त्वा तिरोदधे सर्पः । कुमारः किमिति विस्मितमानसः पानीयं लात्वा भणति,

18. देशावलोकनार्थं निर्गतस्य मम प्रतिज्ञा । ब्रह्मं भूमीशयनं यावत् निजजनकं न पश्यामि ।।

प्रिये ! पानीयं पिब ।' सा कुब्जं कुरूपं वीक्ष्य 'परपुरुष' इति मनसि विचिन्त्य तत्संमुखं विलोकयत्यपि न । तत उत्थाय जनितं भर्त्तारं गवेषयति । स्वप्रियं क्वाप्यवीक्ष्य गता प्रियमेलकतीर्थे तथैव तपस्तपति । तिस्रोऽपि मीलितनयना मौनव्रतधारिण्यस्तिष्ठन्ति। विकृतिपरिवर्जितं धार्मिकजनोपनीतमाहारं भुञ्जते ।

राजाऽपि कुतूहलेन तत्रागत्य विलोकयति । पटह वादयति- 'य एता स्त्रियो वादयति, तस्य स्वसुतां कुसुमवतीं ददामि ।' ततः कुब्जकरूपधारी कुमारः पटहं स्पृशति, अहं वादयिष्यामीत्युक्त्वा। ततः कोरकपत्राणि वेष्टकेनाच्छाद्य तत्रागच्छति । राजसमक्षं वस्त्रमुत्सार्य कोरकपत्राणि वाचयति, ततः कथयति - 'यो द्विजातो भवति स एव एतान्यक्षराणि पश्यति वाचयति च। अहो ! भव्यान्यक्षराणी'ति प्रशंसति । कुब्जको वाचयित्वा व्याख्यानयति । यथा- 'सिंहलद्वीपे सिंहलसिंहो धनवतीयुक्तो प्रवहणे भग्ने जलधौ पपात । अग्रतः कल्ये कथयिष्ये ।' इत्युक्त्वा पुस्तकं वेष्टयति। ततो धनवती स्वचरित्रं श्रुत्वा विस्मयं प्राप्ताऽग्रतः किं जातमिति पृच्छति, सादरतया पृष्टे पुनः कथयति। 'फलकेन समुद्रमुत्तीर्य रत्नवतीं सर्पदृष्टां सज्जां विधाय परिणीता च समुद्रमध्ये रुद्रदत्तमन्त्रिणा प्रक्षिप्तः।' इत्युक्त्वा तत्कालं पुनरुत्तिष्ठति, ततो विस्मिता रत्नवती पृच्छति, 'भो कुब्जक! नैमित्तिक ! अग्रतः किं जातमिति । ततो निर्बन्धे पुनः कथयति । 'केनापि देवादिना तापसाश्रमे मुक्तः। तत्र रूपवतीं तापसकन्यकां परिणीय कन्थाखट्वायुतोऽत्र प्राप्तः। पानीयार्थं कुपे गतः, सर्प्पेण दृष्टः' इत्युक्त्वोत्तिष्ठति । ततो रूपवती पृच्छति । स च सर्वथा न कथयति । पुस्तकं वेष्टयित्वा राज्ञः समीपे कुसुमवतीं याचते । राजापि प्रतिपन्नत्वेन ददाति, हस्तमोचने वामनेन याचिते शालकः प्राह - 'कुर्व्वन्तं सर्प्पं याहि ।' तेनोक्तं 'सर्प एव समागच्छतु ।' कुमारो दष्टः, पपात भूमौ, ताश्चिन्तयति, 'यद्येष मरिष्यति तदा कः प्रियतमशुद्धिं कथयिष्यति।' ततो दुःखेन ताः स्वहृदयं क्षुरिकया यावद्विदारयन्ति, तावता कुमारो दिव्यरूपधारी स्वरूपावस्थः सञ्जातः। नागः प्रत्यक्षीभूय कुमारपूर्वभवं ब्रूते । श्रूयतां सावधानीभूय, ततः सर्वेऽपि शृण्वन्ति सराजादयः ।

धनपुरे धनञ्जयः श्रेष्ठी, तस्य धनवती भार्या, धनदेव-धनदत्तौ तत्सुतौ, एकदा शर्करादुग्धं मुनीन् विहारयति। धनदेवः सोऽहं मृत्वा देवो जातः । धनदत्तो यदा इक्षुरसयुतं घटं मुनिभ्यो दत्ते, वारत्रयं भावखण्डनात् स मृत्वा कुमारस्त्वं जातः । तद्दानप्रभावेन भार्याचतुष्कप्राप्तिः । भावखण्डनात् त्रयेण वियोगः। जलधिपतितो मयैवोत्पाट्य तापसाश्रमे मुक्तस्त्वं मयैव सर्परूपेण वामनीकृतः। यतस्तव शत्रुमन्त्री वर्तते । अत्र मयैव त्वं कुरूपश्च स्वरूपभृदपि । इत्युक्त्वा देवो जगाम । कुमारस्य जातिस्मरणम्, मन्त्री देशान्निष्कासितः । भार्याचतुष्केणोपलक्षितः सस्नेहम् । ततो भार्याचतुष्कयुतो गगनमार्गेण स खट्वायामारुह्य सिंहलद्वीपे गतः । पित्रा राज्यप्रदानं कृतम्, कन्थाप्रभावेण विश्वमदरिद्रमकार्षीत् । जैनधर्ममाराध्य षष्ट-देवलोके गतः ।

।। इति पात्रदानोपरि धनदेव-धनमित्रयोः सम्बन्धः ।।

[इइ दाणं]

[सीलं]

[१२-शीलम्]

अथ **शीलम्** -

"[1]आणं ताण कुणंति जोडिय-करा, दासुव्व सव्वे सूरा ;
मायंगा-हि-जलग्गि-सीह-पमुहा, वट्टंति ताणं वसे ।
हुज्जा ताण कुओ वि नो परिभवो, सग्गाऽपवग्ग-सिरी;
ताणं पाणि-तलं उवेइ विमलं, सीलं न लुंपंति[१] जे ।।"

अतः शीलपालने यतनीयमेव सर्वैः साध्वादिभिः । यतः -

"[2]अक्खाण रसणी कम्माण[२] मोहणी तह वयाण बंभवयं ।
गुत्तीण य मणगुत्ती चउरो दुक्खेण घिप्पंति ।।" [सुक्तमुक्तावली-९७/१३]

तथा -

"[3]वंसीसुहेण छिज्जइ कट्टिज्जइ दुक्करं कुडंगाओ ।
पव्वज्जा सुहगहिआ सीलभरो दुव्वहो होइ ।।" [ ]

अस्मिन्नेके व्रते पालिते सति सर्वाण्यपराणि पालितान्येव । यदुक्तं श्रीआगमे - 'एकव्रतभङ्गे सर्वव्रतभङ्गः' इति निश्चयनयमतम्, व्यवहारतः पुनरेकव्रतभङ्गे तदेवैकं भग्नं प्रतिपत्तव्यम् । शेषाणां तु भङ्गः क्रमेण[३] प्रायश्चित्तप्रतिपत्त्या नानुसन्धत्ते इति । अन्ये पुनराहुश्चतुर्थमहाव्रतप्रतिसेवने तत्कालमेव सकलचारित्रभङ्गः, शेषेषु पुनर्महाव्रतेषु अभीक्ष्णं प्रतिसेवनया महत्यतिचरणे वा वेदितव्यः । उत्तरगुणप्रतिसेवनायां पुनः कालेन चरणभ्रंशो यदि प्रायश्चितप्रतिपत्या नो क्षालयति । उपदेशमालायामपि -

---

१. 'लंपंति यो' हस्त० । २. 'वेअणी' हस्त० । ३. 'क्रमेणय' हस्त० ।

1. आज्ञां तेषां कुर्वन्ति योजितकरा दासा इव सर्वे सुराः, मातङ्गाहि-जलाग्नि-सिंहप्रमुखाः वर्तन्ते तेषां वशे । भवेत्तेषां कुतोऽपि नो परिभवः स्वर्गापवर्गश्रीः, तेषां पाणितलमुपैति विमलं शीलं न लुम्पन्ति ये ।।
2. अक्षाणां रसना कर्मणां मोहस्तथा व्रतानां ब्रह्मव्रतम् । गुप्तीनां च मनोगुप्तिश्चतस्रो दुःखेन गृह्यन्ति ।।
3. वंशः सुखेन छिद्यते कृष्यते दुष्करं कुडङ्गः । प्रव्रज्या सुखगृहिता शीलभारो दुर्वहो भवति ।।

"[4]निच्छयनयस्स चरणस्सुवघाए नाणदंसणवहो वि ।
ववहारस्स उ चरणे हयंमि भयणा उ सेसाणं ।।" [उपदेशमाला-५११]

साध्वादीनामुत्कृष्टदेशविरतिभाजां [च] श्राद्धादीनामपि तुर्यव्रतस्य संपूर्णतया प्रतिपालनमेव श्रेयः । ये तु शुद्धं प्रतिपालयितुमिच्छन्ति ते त्वनया युक्त्या प्रतिपालयन्ति।

"[5]वसहि-कह-निसिज्जिंदिय-कुड्डुंतर-पुव्वकीलिय-पणीए ।
अइमायाहार-विभूसणाई नव बंभचेरगुत्तीओ ।।" [प्रवचनसारोद्धार-५५८]

इति श्रीआवश्यकोक्त-नवब्रह्मचर्यवृत्तिगुप्तिरक्षणेन । श्रीदशवैकालिकेऽपि -

"[6]अन्नट्ठं पगडं लयणं, भइज्ज सयणासणं ।
उच्चारभूमिसंपन्नं, इत्थीपसुविवज्जिअं ।।
[7]विवित्ता अ भवे सिज्जा, नारीणं न लवे कहं ।
गिहिसंथवं न कुज्जा, कुज्जा साहूहिं संथवं ।।
[8]जहा कुक्कुडपोअस्स, निच्चं कुललओ भयं ।
एवं खु बंभयारिस्स, इत्थीविग्गहओ भयं ।।
[9]चित्तभित्तिं न निज्झाए, नारिं वा सुअलंकिअं ।
भक्खरं पिव दट्ठूणं, दिट्ठिं पडिसमाहरे ।।
[10]हत्थपायपडिच्छिन्नं, कण्णनासविगप्पिअं ।
अवि वाससयं नारिं, बंभयारी विवज्जए ।।

---

4. निश्चयनयस्य चरणस्योपघाते ज्ञानदर्शनवधोऽपि । व्यवहारस्य तु चरणे हते भजना शेषयोः ।।
5. वसति-कथा-निषद्येन्द्रिय-कुड्यान्तर-पूर्वक्रीडित-प्रणीताः । अतिमात्राहार-विभूषणादयो नव ब्रह्मचर्यगुप्तयः।।
6. अन्यार्थं प्रकृतं लयनं भजेत् शयनासनम् । उच्चारभूमिसंपन्नं स्त्रीपशुविवर्जितम् ।।
7. विविक्ता च भवेच्छय्या नारीणां न कथयेत्कथाम् । गृहिसंस्तवं न कुर्यात् कुर्यात्साधुभिः संस्तवम् ।।
8. यथा कुर्कुटपोतस्य नित्यं कुललतो भयम् । एवमेव ब्रह्मचारिणः स्त्रीविग्रहाद् भयम् ।।
9. *चित्रभित्यां न निरीक्षेत नारीं वा स्वलङ्कृताम् । भास्करमिव दृष्ट्वा दृष्टिं प्रतिसमाहरेत् ।।*
10. *हस्तपादप्रतिच्छिन्नां कर्णनासाविकृत्ताम् । अपि वर्षशतिकां नारीं ब्रह्मचारी विवर्जयेत् ।।*

[11] **विभूसा इत्थिसंसग्गो, पणीअं रसभोअणं ।**
नरस्सऽत्तगवेसिस्स, विसं तालउडं जहा ।।
[12] ***अंगपच्चंगसंठाणं, चारुल्लविअपेहिअं ।***
इत्थीणं तं न निज्झाए, कामरागविवड्ढणं ।।
[13] **विसएसु मणुन्नेसु, पेमं नाभिनिवेसए ।**
अणिच्चं तेसिं विन्नाय, परिणामं पुग्गलाण य ।।
[14] **पुग्गलाणं परीणामं, तेसिं नच्चा जहा तहा ।**
विणीअतण्हो विहरे, सीईभूएण[७] अप्पणा ।।" [दशवैकालिक-८।५२-६०]

इत्यादिविधिना प्रतिपालनीयम् । तथा -

"[15] **अवि मायरंपि सद्धिं कहा उ एगागिणस्स[८] पडिसिद्धा ।**
किं पुण अणारिआहिं तरुणत्थीहिं सहगयस्स ।।
[16] **अह भावदंसणंमि वि दोसा किमुड्ढोतवट्ठिओ पेहे ।**
अहिअं तं बंभवओ सुरालोगुव्व चक्खुमओ ।।" [ ]

न चैवं चिन्तनीयम्, एवंप्रकारेणैव शीलं प्रतिपालयितुं शक्यम्, नान्यथा । यतः श्रीस्थूलभद्रादीनामिव निर्विकारवपुर्मनसां महासङ्कटे प्रणीताहारादिसेविनामपि स्त्रीवपुःसंमुखावलोकिनामपि शीलगुणः संपूर्ण एव स्यात् । श्रीआचाराङ्गेऽपि तद्गतविकार एव परिहरणीयतया प्रतिपादितः ।

---

७. 'सीइए भूएण' हस्त० । ८. 'एगाणिअस्स' हस्त० ।

11. विभूषा स्त्रीसंसर्गः प्रणीतं रसभोजनम् । नरस्यात्मगवेषिणः विषं तालपुटं यथा ।।
12. अङ्गप्रत्यङ्गसंस्थानं चारुलपितप्रेक्षितम् । स्त्रीणां तद् न निरीक्षेत कामरागविवर्द्धनम् ।।
13. विषयेषु मनोज्ञेषु प्रेम नाभिनिवेशयेत् । अनित्यं तेषां विज्ञाय परिणामं पुद्गलानां च ।।
14. पुद्गलानां परिणामं तेषां ज्ञात्वा यथा तथा । विनीततृष्णः विहरेत् शीतीभूतेनात्मना ।।
15. अपि मात्राऽपि सार्द्धं कथा तु एकाकिनः प्रतिषिद्धा । किं पुनः अनार्याभिस्तरुणस्त्रीभिः सहगतस्य ।।
16. अथ भावदर्शनेऽपि दोषा किमुर्ध्वतपस्थितः प्रेक्षेत् । अहितं तद् ब्रह्मव्रतः सुरालोक इव चक्षुष्मान् ।।

केचनोत्तानमतयः सम्यक्-श्रीजिनागमाज्ञातस्वरूपा एकश एकत्र कदापि निर्विकारतया वार्तालाप-संमुखमात्रावलोकन-स्वल्पतरतमपरिचयकरणतत्परेष्वपि साध्वादिषु ब्रह्मस्थत्वेऽप्यसद्दोषारोपणेन वन्दन-पूजन-बहुमान-दानादौ न प्रवर्त्तन्ते, न ते सम्यग्धर्मावबोधिनः ।

ये तु सम्यक्तया कथञ्चित्कुतश्चित् जानन्तो न बहुमानिनः स्युः, तेऽपि स्वमनसैव ज्ञात्वा तिष्ठन्ति । न तु परप्रकाशने दोषोद्भावनादिविधौ प्रयतन्ते । यदुक्तमुपदेश-मालायाम् -

"[17] जइ ता जणसंववहार-वज्जियमकज्जमायरइ अन्नो ।
जो तं पुणो विकंथइ, परस्स वसणेण सो दुहिओ ।।
[18] सुट्ठु वि उज्जममाणं, पंचेव करेंति रित्तयं समणं ।
अप्पथुई परनिंदा, जिब्भोवत्था कसाया य ।।" [उपदेशमाला-७०, ७१]

ते एव स्तुत्याः, ते एव वन्द्याः, ते एव वर्ण्याः, ते एव प्रशस्या ये एनं व्रतं मनोवचःकायशुद्ध्या धीराः सन्तः प्रतिपालयन्ति । यदुक्तमुपदेशमालायाम् -

"[19] ते धन्ना ते साहू, तेसिं नमो जे अकज्जपडिविरया ।
धीरा वयमसिधारं, चरंति जह थूलभद्दमुणी ।।
[20] विसयाऽसिपंजरमिव, लोए असिपंजरम्मि तिक्खम्मि ।
सीहा व पंजरगया, वसंति तवपंजरे साहू ।।" [उपदेशमाला-५८, ५९]

इदमेव व्रतं न मत्सरेण, नासूयया, न मदेन, न लज्जया, न गुणाभिमानेन न बाह्याडम्बरोद्भावनया च न स्वगुरुवचोऽवहीलनया वा भृशं दृढं प्रतिज्ञेनाऽपि प्रतिपालयितुं शक्यम् । यतः -

---

17. यदि तावज्जनसंव्यवहारवर्जितमकार्यमाचरत्यन्यः । यस्तद् पुनः विकत्थते परस्य व्यसनेनासौ दुःखितः ।।
18. सुष्ठ्वप्युद्यच्छन्तं पञ्चैव कुर्वन्ति रिक्तकं श्रमणम् । आत्मस्तुतिः परनिन्दा जिह्वा उपस्था कषायाश्च ।।
19. ते धन्यास्ते साधवस्तेभ्यो नमो ये अकार्यप्रतिविरताः । धीरा व्रतमसिधारं चरन्ति यथा स्थूलभद्रमुनिः ।।
20. विषया असिपञ्जरमिव लोके असिपञ्जरे तीक्ष्णे । सिंहा इव पञ्जरगता वसन्ति तपपञ्जरे साधवः ।।

"[21]जो कुणइ अप्पमाणं, गुरुवयणं न य लएइ उवएसं ।
सो पच्छा तह सोयइ, उवकोसघरे जह तवस्सी ।।
[22]जेट्ठव्वयपव्वयभर-समुव्वहणववसियस्स अच्चंतं ।
जुवइजणसंवइयरे, जइत्तणं उभयओ भट्ठं ।।
[23]जइ ठाणी जइ मोणी, जइ मुंडी वक्कली तवस्सी वा ।
पत्थिंतो य अबंभं, बंभा वि न रोयए मज्झं ।।
[24]तो पढियं तो गुणियं, तो मुणियं तो य चेइओ अप्पा ।
आवडियपेल्लियामंतिओ, वि जइ न कुणइ अकज्जं ।।"[उपदेशमाला-६०-६३]

ननु सर्वाण्यपि व्रतानि नियमाश्चाऽभिग्रहाः सामान्यजनैः दुष्प्रतिपाल्या एव । एतस्यैवैकस्य व्रतस्य दुष्प्रतिपाल्यत्वं विशिष्यतया किमुच्यते ? सत्यम्, व्रतादयः सर्वेऽपि दुष्प्रतिपाल्या एव, तथापि तेभ्योऽपि सर्वेभ्योऽप्येकमिदमेव व्रतं धीरैः कापुरुषैरपि दुष्प्रतिपाल्यमेव । यतः -

"[25]पत्ता य कामभोगा, कालमणंतं इहं सउवभोगा ।
अपुव्वं पिव मन्नइ, तह वि य जीवो मणे सोक्खं ।।
[26]सव्वगहाणं पभवो, महागहो सव्वदोसपायट्टी ।
कामग्गहो दुरप्पा, जेणऽभिभूयं जगं सव्वं ।।"[इन्द्रियपराजयशतक-१३, २५]
"[27]विसयविसं हालहलं, विसयविसं उक्कडं पियंताणं ।
विसयविसाइन्नं पिव, विसयविसविसूइया होइ ।।" [उ.मा.-२०१, २०९, २१२]

---

21. यः करोत्यप्रमाणं गुरुवचनं न च लभते उपदेशम् । स पश्चात्तथा शोचति उपकोशागृहे यथा तपस्वी ।।
22. ज्येष्ठव्रत-पर्वतभार-समुद्वहनव्यवसितस्यात्यन्तम् । युवतिजनसंव्यतिकरे यतित्वमुभयाभ्यां भ्रष्टम् ।।
23. यदि स्थानी यदि मौनी यदि मुण्डी वल्कली तपस्वी वा । प्रार्थयन् चाब्रह्मं ब्रह्मापि न रोचते मह्यम् ।।
24. ततः पठितं ततः गुणितं ततः मुणितं ततश्च चेतित आत्मा । आपतित-प्रेरितामन्त्रितोऽपि यदि न करोत्यकार्यम्।।
25. प्राप्ताश्च कामभोगाः कालमनन्तमिह सोपभोगाः । अपूर्वमिव मन्यते तथापि च जीवो मनसि सौख्यम् ।।
26. सर्वग्रहाणां प्रभवो महाग्रहो सर्वदोषप्रवर्त्तकः । कामग्रहो दुरात्मा येनाभिभूतं जगत्सर्वम् ।।
27. विषयविषं हालाहलं विशदविषमुत्कटं पिबताम् । विशदविषाजीर्णमिव विषयविषविसूचिका भवति ।।

श्रीउत्तराध्ययनेऽपि -

"[28]सल्लं कामा विसं कामा, कामा आसीविसोवमा ।
कामे पत्थेमाणा, अकामा जंति दुग्गइं ।।" [उत्तराध्ययन-९/५३,]

अन्यत्राऽपि -

"ऐश्वर्यस्य विभूषणं चतुरता, शास्त्रस्य वाक्संयमो;
ज्ञानस्योपशमः श्रुतस्य विनयो, वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवतो, धर्मस्य निर्वाच्यता;
सर्वेषामपि सर्वकालजनितं, शीलं परं भूषणम् ।।" [जैनसुक्तसंदोह-६०/१]

"[29]खणमित्तसुक्खा बहुकालदुक्खा,
पगामदुक्खा अनिकामसुक्खा ।
संसारमुक्खस्स विपक्खभूआ,
खाणी अणत्थाण उ कामभोगा ।।" [उत्तराध्ययन-१४/१३]

तेनैतस्यैव दुष्प्रतिपाल्यत्वम् । अवगतजिनागमरहस्यानां तु सुपाल्यमपि। यतः श्रीपरमगुरु-श्रीरत्नशेखरसूरिविरचितस्तोत्रे -

"मधुकरपरिस्निग्धैर्मुग्धैरपाङ्गतरङ्गितैः ;
सुललितदृशस्तावच्चेतोहरा हरिणीदृशः ।
विलसन्ति वचश्चित्ते यावन्न ते भगवन् ! पुनः;
न तु विलसिते तस्मिन् किं तास्तृणादतिशेरते ।।" [ ]

तदेतदेव व्रतं प्रतिपालयितुं दुःशक्यमपि प्रतिपालितमेव श्रेयस्करं पुण्यप्राप्ति-वृद्धिकरं संसारपरीत्तताकरं च स्यात् । शुद्धब्रह्मव्रतपालनोपायः श्रीउत्तराध्ययनोक्तोऽवगन्तव्यः ।

---

28. शल्यं कामा विषं कामाः कामा आशीविषोपमाः । कामान् प्रार्थयमाना अकामा यान्ति दुर्गतिम् ।।

29. क्षणमात्रसौख्याः बहुकालदुक्खाः, प्रकामदुःखाः अनिकामसौख्याः ।
संसारमोक्षस्य विपक्षीभूताः, खानिः अनर्थानां तु कामभोगाः ।।

[30]"नो [निग्गंथे] इत्थीणं कुड्डंतरंसि, दूसंतरंसि वा, भित्तिंतरंसि वा, कुइअसद्दं वा, रुइअसद्दं वा, गीअसद्दं वा, हसिअसद्दं वा, थणिअसद्दं वा, कंदिअसद्दं वा, विलविअसद्दं वा, सुणित्ता हवइ से निग्गंथे । [तं] कहमिति चे ? आयरिअ आह - [निग्गंथस्स खलु] इत्थीणं कुड्डंतरंसि वा जाव विलविअसद्दं वा सुणमाणस्स बंभयारिस्स बंभचेरे संका वा कंखा वा वितिगिच्छा वा समुप्पज्जिज्जा, भेअं वा लभेज्जा, उम्मायं वा पाउणिज्जा, दीहकालिअं वा रोगायंकं हविज्जा, केवलिपण्णत्ताओ वा धम्माओ भंसिज्जा, तम्हा खलु [९]से निग्गंथे नो इत्थीणं कुड्डंतरंसि वा जाव विलविअसद्दं वा सुणमाणो विहरेज्जा । [उत्तराध्ययन-१६/५]

श्राद्धादीनां शुद्धशीलप्रतिपालनासामर्थ्ययुजां तु को विधिः ? तैः स्वदारसन्तोषः स्त्रीभिश्च स्वपतिसन्तोषव्रतपालने यत्नो विधेय एव । तेषां तथैव फलाप्तेः । यदुक्तं श्रीगौतमपृष्टेन भगवता श्रीवीरेण -

"[31]भयवं ! सड्ढाणं वि अड्ढाणं सदारसंतोसं नामाणुव्वयं धरंताणं केवईअं पुण्णं हवइ ? गो० ! साहूणं बंभव्वयं धरंताणं जावईअं पुण्णं हवइ तावईअं देसूणंति। भयवं ! सदारसंतोसिणं सड्ढाणं का गई हवइ ? गो० ! बंभदेवलोए गई ।"

अब्रह्मफलं च -

"षण्ढत्वमिन्द्रियच्छेदं वीक्ष्याब्रह्मफलं सुधीः ।
भवेत् स्वदारसंतुष्टोऽन्यदारान् वा विवर्जयेत् ।।

---

९. 'से' उत्तराध्ययने नास्ति ।

30. नो [निर्ग्रन्थः] स्त्रीणां कुड्यान्तरे वा, दूष्यान्तरे वा, भित्त्यन्तरे वा, कूजितशब्दं वा, रुदितशब्दं वा, गीतशब्दं वा, हसितशब्दं वा, स्तनितशब्दं वा, क्रन्दितशब्दं वा, विलपितशब्दं वा श्रुत्वा भवति यः स निर्ग्रन्थः । तद् कथमिति चेत् ? आचार्य आह - [निर्ग्रन्थस्य खलु] स्त्रीणां कुड्यान्तरे वा यावत् विलपितशब्दं वा श्रुयमानस्य ब्रह्मचारिणो ब्रह्मचर्ये शङ्का वा काङ्क्षा वा विचिकित्सा वा समुत्पद्येत, भेदं वा लभेत, उन्मादं वा प्राप्नुयात्, दीर्घकालिकं वा रोगाङ्कं भवेत्, केवलिप्रज्ञप्ताद्वा धर्मात् भ्रश्येत्, तस्मात् खलु स निर्ग्रन्थः नो स्त्रीणां कुड्यान्तरे वा यावत् विलपितशब्दं वा श्रुयमानो विहरेत् ।

31. भगवन् ! श्राद्धानामपि आढ्यानां स्वदारसन्तोषं नामाणुव्रतं धारयतां कियत्पुण्यं भवति ? गौतम ! साधूनां बह्मव्रतं धारयतां यावत्पुण्यं भवति तावत् देशन्यूनमिति । भगवन् ! स्वदारसन्तोषिनां श्राद्धानां का गतिः भवति ? गौतम ! ब्रह्मदेवलोके गतिः ।

रम्यमापातमात्रे यत्, परिणामेऽतिदारुणम् ।
किम्पाकफलसङ्काशं, तत्कः सेवेत मैथुनम् ।।"

"कम्पः स्वेदः श्रमो मूर्च्छा, भ्रमिर्ग्लानिर्बलक्षयः ।
राजयक्ष्मादिरोगाश्च, भवेयुर्मैथुनोत्थिताः ।।

योनियन्त्रसमुत्पन्नाः, सुसूक्ष्मा जन्तुराशयः ।
पीड्यमाना विपद्यन्ते, यत्र तन्मैथुनं त्यजेत् ।।" [योगशास्त्र-२/७६-७९]

जन्तुसद्भावं वात्स्यायनोऽप्याह -

"रक्तजाः कृमयः सूक्ष्मा, मृदुमध्याधिशक्तयः ।
जन्मवर्त्मसु कण्डूतिं, जनयन्ति तथाविधाम् ।।

स्त्रीसम्भोगेन यः काम-ज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या, विध्यापयितुमिच्छति ।।

वरं ज्वलदयः स्तम्भ-परिरम्भो विधीयते ।
न पुनर्नरकद्वार-रामाजघनसेवनम् ।।

सतामपि हि वामभ्रू-र्ददाना हृदये पदम् ।
अभिरामं गुणग्रामं, निर्वासयति निश्चितम् ।।

वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता ।
इति नैसर्गिका दोषा यासां तासु रमेत कः ।।

प्राप्तुं पारमपारस्य, पारावारस्य पार्यते ।
स्त्रीणां प्रकृतिवक्राणां, दुश्चरित्रस्य नो पुनः ।।

नितम्बिन्यः पतिं पुत्रं, पितरं भ्रातरं क्षणात् ।
आरोपयन्त्यकार्येऽपि, दुर्वृत्ताः प्राणसंशये ।।

भवस्य बीजं नरक-द्वारमार्गस्य दीपिका ।
शुचां कन्दः कलेर्मूलं, दुःखानां खनिरङ्गना ।।" [योगशास्त्र-२।८०-८७]

वेश्यासङ्गत्यागे -

"मनस्यन्यद्वचस्यन्यत्, क्रियायामन्यदेव हि ।
यासां साधारणस्त्रीणां, ताः कथं सुखहेतवः ।।

मांसमिश्रं सुरामिश्र-मनेकविटचुम्बितम् ।
को वेश्यावदनं चुम्बे-दुच्छिष्टमिव भोजनम् ।।

अपि प्रदत्तसर्वस्वात्, कामुकात् क्षीणसम्पदः ।
वासोऽप्याच्छेत्तुमिच्छन्ति, गच्छतः पण्ययोषितः ।।

न देवान्न गुरून्नापि, सुहृदो न च बान्धवान् ।
असत्सङ्गरतिर्नित्यं, वेश्यावश्यो हि मन्यते ।।

कुष्ठिनोऽपि स्मरसमान्, पश्यन्तीं धनकाङ्क्षया ।
तन्वन्तीं कृत्रिमस्नेहं, निःस्नेहां गणिकां त्यजेत् ।।" [योगशास्त्र-२।८८-९२]

अथ परस्त्रीयाम् -

"नासक्त्या सेवनीया हि, स्वदारा अप्युपासकैः ।
आकरः सर्वपापानां, किं पुनः परयोषितः ।।

स्वपतिं या परित्यज्य, निस्त्रपोपपतिं भजेत् ।
तस्यां क्षणिकचित्तायां, विश्रम्भः कोऽन्ययोषिति ।।

भीरोराकुलचित्तस्य, दुःस्थितस्य परस्त्रियाम् ।
रतिर्न युज्यते कर्तु-मुपशूनं पशोरिव ।।

प्राणसन्देहजननं, परमं वैरकारणम् ।
लोकद्वयविरुद्धं च, परस्त्रीगमनं त्यजेत् ।।

सर्वस्वहरणं बन्धं, शरीरावयवच्छिदाम् ।
मृतश्च नरकं धोरं, लभते पारदारिकः ।।

स्वदाररक्षणे यत्नं, विदधानो निरन्तरम् ।
जानन्नपि जनो दुःखं, परदारान् कथं व्रजेत् ।।

विक्रमाक्रान्तविश्वोऽपि, परस्त्रीषु रिरंसया ।
कृत्वा कुलक्षयं प्राप, नरकं दशकन्धरः ।।

लावण्यपुण्यावयवां, पदं सौन्दर्यसम्पदः ।
कलाकलापकुशला-मपि जह्यात्परस्त्रियम् ।।

अकलङ्कमनोवृत्तिः, परस्त्रीसन्निधावपि ।
सुदर्शनस्य किं ब्रूमः, सुदर्शनसमुन्नतेः ।।" [योगशास्त्र-२।९३-१०१]

स्त्रियापि पुरुषस्पृहापि त्याज्या -

"ऐश्वर्यराजराजोऽपि, रूपमीनध्वजोऽपि च ।
सीतया रावण इव, त्याज्यो नार्या नरः परः ।।" [योगशास्त्र-२।१०२]

परस्त्रीपुरुषसक्तानां पुंसां स्त्रीणां च फलम् -

"नपुंसकत्वं तिर्यक्त्वं, दौर्भाग्यं च भवे भवे ।
भवेन्नराणां स्त्रीणां चा-न्यकान्तासक्तचेतसाम् ।।" [योगशास्त्र-२।१०३]

ऐहिकं ब्रह्मचर्यफलम् -

"प्राणभूतं चरित्रस्य, परब्रह्मैककारणम् ।
समाचरन् ब्रह्मचर्यं, पूजितैरपि पूज्यते ।।" [योगशास्त्र-२।१०४]

पारलौकिकं फलम् -

"चिरायुषः सुसंस्थाना दृढसंहनना नराः ।
तेजस्विनो महावीर्या भवेयुर्ब्रह्मचर्यतः ।।" [योगशास्त्र-२।१०५]

अन्यत्राऽपि -

"रत्यपत्यफलदाः स्वयोषितोऽपायपातकफलाः पराङ्गनाः ।
सन्तति-द्रविणहानिहेतवः कैतवैकनिपुणाः पणाङ्गनाः ।।"

"सङ्कटे च न गन्तव्यं, गन्तव्यं विषमे न तु ।
महत्पथे न गन्तव्यं, गन्तव्यं स्यात्समे पथे ।।

परस्त्री सङ्कटः पन्था, विधवा विषमः पुनः।
वेश्या महापथः प्रोक्तो निजनारी समः पथः ।।" [ ]

आगमेऽपि -

"[32]असंख्या थीनरमेहुणाओ, मुच्छंति पंचिंदियमाणुसाओ ।
नीसेसअंगा[१०]णं विभत्तिचंगे, कहइ[११] जिणो पन्नवणाउवंगे ।।[सम्बोधसप्तति-८७]

[33]इत्थीजोणीए संभवंति बेइंदिया उ जे जीवा ।
इक्को व दो व तिन्न व लक्खपुहुत्तं च उक्कोसं[१२] ।। [सम्बोधसप्तति-८३]

[34]पुरिसेण सह गयाए, तेसिं जीवाण होइ उद्दवणं ।
वेणुगदिट्ठंतेणं, तत्ताइ-सिलागनाएणं ।। [सम्बोधसप्तति-८४]

[35]मेहुणसन्नारूढो, नवलक्ख हणेइ[१३] सुहुमजीवाणं ।
तित्थयरेणं पन्नत्तं, सद्दहियव्वं पयत्तेणं ।। [सम्बोधसप्तति-८६]

[36]पंचिंदिया मणुस्सा, एगनरभुत्तनारिगब्भंमि ।
उक्कोसं नवलक्खा, जायंति एगवेलाए[१४] ।।

---

१०. '...अंगाणि विभत्त०' हस्त० । ११. 'भणइ' सम्बोधसप्ततिकायाम् । १२. 'उक्कोसा' हस्त० । १३. 'केवलिणा पन्नत्ता, सद्दहिअव्वा सयाकालम्' हस्त० । 'तित्थयरेणं भणियं' सम्बोधसप्ततौ । १४. 'एगहेलाए' सम्बोध-सप्ततौ ।

32. असंख्याः स्त्रीनरमैथुनात् मूर्च्छन्ति पञ्चेन्द्रियमनुष्याः । निःशेषाङ्गानां विभक्तिचङ्गे कथयति जिनः प्रज्ञापनोपाङ्गे ।।

33. स्त्रीयोन्यां सम्भवन्ति द्वीन्द्रियास्तु ये जीवाः । एको वा द्वौ वा त्रयो वा लक्षपृथक्त्वं चोत्कृष्टम् ।।

34. पुरुषेण सह गतायां तेषां जीवानां भवत्युपद्रवणम् । वेणुकदृष्टान्तेन तप्तायःशलाकाज्ञातेन ।।

35. मैथुनसंज्ञारूढो नवलक्षं घ्नन्ति सूक्ष्मजीवानाम् । तीर्थकरेण प्रज्ञप्तं श्रद्धातव्यं प्रयत्नेन ।।

36. पञ्चेन्द्रिया मनुष्या एकनरभुक्तनारीगर्भे । उत्कृष्टतो नवलक्षा जायन्ते एकवेलायाम् ।।

37 नवलक्खाणं मज्झे, जायइ इक्कस्स दुन्न व समत्ती[१५] ।
सेसा पुण एमेव य, विलयं वच्चंति तत्थेव[१६] ।।" [सम्बोधसप्तति-६२ वृत्ति]

38 "तहिं पंचिंदिआ जीवा, इत्थीजोणिनिवासिणो[१७] ।
मणुआणं नवलक्खा, सव्वे पासइ केवली ।।

39 सयसहस्साण नारीणं, पिट्टं फाडेइ निग्घिणो ।
सत्तट्ठमासिए गब्भे, तडप्फडंते निगिंतई ।।

40 जं तस्स जत्तियं पावं, तित्तियं[१८] तं नवं गुणं ।
एक्कसित्थीपसंगेणं, साहू बंधेज्ज मेहुणा ।।

41 आजम्मेणं तु जं पावं, बंधेज्जा मच्छबंधओ ।
वयभंगं काउमणो[१९], तं चेवऽट्ठगुणं[२०] जई ।।" [महा.-६।९८, १०३, १०४, १२४]

शीलखण्डनफलं च -

42 "कुरंडरंडत्तणदूहगाइं वंझत्तनिंदूविसकन्नगाइं ।
भवंतरे[२१] खंडिअसीलभावं नाऊण[२२] कुज्जा दढसीलभावं ।।" [कल्पसूत्र-९२/२०]

केवलकायशुद्ध्यैव येऽऽजन्माखण्डं शीलं पालयन्ति तेषामपि महाफलम् । यतः - श्रीगौतमपृष्ट-श्रीवीरजिनेनादिष्टम् -

---

१५. 'समित्ती' हस्त० । १६. 'एमेव' संबोधसित्तरौ । १७. 'जोणिमज्झे निवासिणो सामन्नं नवलक्खाइं' महानिशीथे । १८. 'नवहिं' हस्त० । १९. 'काउमाणस्स' महानिशिथे 'कायमाणो' हस्त० । २०. 'गुणे' महानिशिथे 'मुणे' सम्बोधसप्ततौ । २१. 'लहंति जम्मंतरभग्गसीला' कल्पसूत्रे । २२. 'नाऊण' हस्त० नास्ति । 'कुज्जा' स्थाने 'करिज्जा' हस्त० ।

37. नवलक्षाणां मध्ये जायते एकस्य द्वयोः वा समाप्तिः। शेषाः पुनरेवमेव च विलयं गच्छन्ति तत्रैव ।।
38. तत्र पञ्चेन्द्रिया जीवाः स्त्रीयोनिनिवासिनः । मनुजानां नवलक्षाः सर्वान् पश्यति केवली ।।
39. शतसहस्राणां नारीणां पिट्टं स्फेटयति निर्घृणः । सप्ताष्टमासिके गर्भे तडप्फडति निकृन्तति ।।
40. यद् तस्य यावत्पापं तावत्तद् नवगुणम् । एकस्त्रीप्रसङ्गेन साधुः बध्नाति मैथुनेन ।।
41. आजन्म तु यत्पापं बध्नीयात् मत्स्यबन्धकः । व्रतभङ्गं कर्त्तुमनाः तच्चैवऽष्टगुणं यतिः ! ।।
42. कुरण्डरण्डत्वदुर्भगत्वादि वन्ध्यत्वनिन्दुविषकन्यकत्वादि ।
भवान्तरे खण्डितशीलभावं ज्ञात्वा कुर्याद् दृढशीलभावम्।।

"[43]काएण बंभचेरं धरंति भव्वा उ जे असुद्धमणा ।
कप्पंमि बंभलोए ताणं नियमेण उववाओ ।।" [सुक्तमुक्तावली-९५/६]

"[44]वीरजिणो गोअमसामिपुट्ठो, काएण सीलस्स फलं सुदिट्ठं ।
सुरालए वंतरजोइसिए कहिअं सुअंगे फुडं पंचमंमि ।।" [ ]

"[45]भगवं ! ता एएण नाएणं, जे गारत्थी मउक्कडे ।
रत्तिंदिया ण छड्डंति, इत्थीयं तस्स का गई ।।
[46]ते सरीरं सहत्थेणं, छिंदिऊणं तिलं तिलं ।
अग्गीए जइवि होमंति, तोऽवि सुद्धी ण दीसइ ।।
[47]तारिसो वि णिवित्तिं सो, परदारस्स जई करे ।
सावगधम्मं च पालेइ, गइं पावेइ मज्झिमं ।।
[48]भयवं ! सदारसंतोसे, जइ भवे मज्झिमं गई ।
ता सरीरेऽवि होमंतो, कीस सुद्धिं ण पावई ।।
[49]सदारं परदारं वा इत्थी पुरिसो व गोयमा ! ।
रमंतो बंधए पावं, णो णं हवइ अबंधगो ।।
[50]सावगधम्मं जहुत्तं जो, पाले[२३] परदारं तु वज्जए ।
जावज्जीवं तिविहेणं, तमणुभावेण सा गई ।।

---

२३. 'परदारगं चए' महानिशीथे ।

43. कायेन ब्रह्मचर्यं धारयन्ति भव्यास्तु येऽशुद्धमनसः । कल्पे ब्रह्मलोके तेषां नियमेनोपपातः ।।
44. वीरजिनो गौतमस्वामिपृष्टः कायेन शीलस्य फलं सुदृष्टम् ।
सुरालये व्यंतरज्योतिष्के कथितं श्रुताङ्गे स्फुटं पञ्चमे।।
45. भदन्त ! तस्मात् एतेन ज्ञातेन, ये गारवार्थी मदोत्कटे । रक्तेन्द्रिया न मुञ्चन्ति, स्त्रीणां तस्य का गतिः ।।
46. तस्य शरीरं स्वहस्तेन छिन्दित्वा तिलं तिलम् । अग्नौ यद्यपि हूयन्ते ततोऽपि शुद्धिः न दृश्यते ।।
47. तादृशोऽपि निवृत्तिं सः परदारायाः यदि कुर्यात् । श्रावकधर्मं च पालयति गतिं प्राप्नोति मध्यमाम् ।।
48. भगवन् ! स्वदारसन्तोषे यदि भवेद् मध्यमा गतिः । तस्मात् शरीरमपि होममाणः कस्मात् शुद्धिं न प्राप्नोति ।।
49. स्वदारां परदारां वा स्त्री पुरुषो वा गौतम ! । रममाणो बध्नाति पापं नो भवत्यबन्धकः ।।
50. श्रावकधर्मं यथोक्तं यः पालयेत् परदारां तु वर्जयेत् । यावज्जीवं त्रिविधेन तदनुभावेन सा गतिः ।।

[51] णवरं नियमविहूणस्स, परदारमइगयस्स य ।
अणियत्तस्स भवे[२४] बंधं, णिवित्तीए महाफलं[२५] ।।" [महानिशीथ-६।१०९-११५]

शीलं लज्जया भयेण वा प्रतिपालितं महाफलमेव । यदुक्तं श्री महानिशीथेऽध्ययने -

"गोयमा[52] ! जं इत्थीयं भएण वा, लज्जाए वा, कुलंकुसेण वा, जाव णं धम्मसद्धाए वा तं वेयणं अहियासेज्जा नो वियम्मं समायरेज्जा । से णं धन्ना, से णं पुण्णा, से य णं वंदा, से णं पुज्जा, से णं दट्ठव्वा, से णं सव्व-लक्खणा, से णं सव्व-कल्लाण-कारया, से णं सव्वुत्तम-मंगल-निहि, से णं सुअदेवया, से णं सरस्सती, से णं अंबहुंडी, से णं अच्चुया, से णं इंदाणी, से णं परमपवित्तुतमा सिद्धी मुत्ती सासया सिवगइ त्ति ।" इति स्तुतिवाक्यानि ।

"से[53] जाओ इमाओ गामागर जाव संनिवेसेसु इत्थियाओ भवंति, तं जहा - अंतो अंतेउरियाओ गयपइआओ, मयपइआओ, बालविहवाओ, छड्डिअल्लिताओ, माइरक्खिआओ, पियरक्खिआओ, भायरक्खिआओ, पइरक्खिआओ, कुलघररक्खिआओ, ससुरकुलरक्खिआओ, परूढणहकेसकक्खरोमाओ, ववगयपुप्फ-गंधमल्लालंकाराओ, अण्हाणग-सेअ-जल्ल-मल-

---

२४. 'बंधा' हस्त० । २५. 'महाफला' हस्त० ।

51. नवरं नियमविहीनस्य परदारामतिगतस्य च । अनिवृत्तस्य भवेत् बन्धो निवृत्या महाफलम् ।।

52. गौतम ! या स्त्री भयेन वा लज्जया वा कुलाङ्कुशेन वा यावत् धर्मश्रद्धया वा तं वेदनं अध्यासेत् । नो विधर्मं समाचरेत् । सा धन्या, सा खलु पुण्या, सा च खलु वन्द्या, सा खलु पूज्या, सा खलु दृष्टव्या, सा खलु सर्वलक्षणा, सा खलु सर्वकल्याणकारका, सा खलु सर्वोत्तममङ्गलनिधिः, सा खलु श्रुतदेवता, सा खलु सरस्वती, सा खलु अम्बिका, सा खलु अच्युता, सा खलु इन्द्राणी, सा खलु परमपवित्रोत्तमा सिद्धी मुक्तिः शाश्वता शिवगतीति ।

53. या एता ग्रामाकरयोः यावत् सन्निवेशेषु स्त्रियो भवन्ति । तद् यथा - अन्तः आन्तःपुरिक्याः, गतपतिकाः, मृतपतिकाः, बालविधवाः, छर्दिताः, मातृरक्षिताः, पितृरक्षिताः, भ्रातृरक्षिताः, पतिरक्षिताः, कुलगृहरक्षिताः, श्वश्रूकुलरक्षिताः, प्ररूढनखकेशकक्षरोमण्यः, व्यपगतपुष्प-गन्ध-मालाऽलङ्काराः, अस्नानक-स्वेद-रजः-मल-पङ्कपरितापिताः, व्यपगतक्षीर-दधि-नवनीत-सर्पिः-तेल-गुड-लवण-मधु-मद्य-मांसपरित्यागकृताहाराः, अल्पेच्छिकाः, अल्पारम्भाः, अल्पपरिग्रहाः, अल्पेनारम्भेण अल्पेन समारम्भेणाल्पेनारम्भसमारम्भेण वृत्तिं कल्पमानाः, अकामब्रह्मचर्यवासेन तामेव पतिशय्यां नातिक्रमन्ति [उपपतिना सह नाऽऽश्रयन्ति], ताः स्त्रिय एतत्स्वरूपेण विहारेण विहरमानाः बहूनि वर्षाणि शेषं ताः यावत् अन्यतरेषु स्थानान्तरेष्वुत्पद्यन्ते, ताः यावत् चतुष्षष्टिवर्षसहस्राणि स्थितिः प्रज्ञप्ताः ।

पंक-परितावि‌आओ, ववगयखीरदहि-णवणीअ-सप्पि-तेल्ल-गुल-लोण-महु-मज्ज-मंस-परिचत्तकयाहाराओ, अप्पिच्छाओ[२६], अप्पारंभाओ, अप्पपरिग्गहाओ, अप्पेणं आरंभेणं अप्पेणं समारंभेणं अप्पेणं[२७] आरंभसमारंभेणं वित्तिं कप्पेमाणीओ, अकामबंभचेरवासेणं तामेव पइसेज्जं नाइक्कमंति, ताओ णं इत्थिआओ एयारूवेणं विहारेणं विहरमाणीओ बहूइं वासाइं सेसं[२८] तं चेव जाव अन्नयरेसु ठाणमंतरेसु उववज्जंति, तं चेव जाव चउसट्ठिं वाससहस्साइं ठिई पण्णत्ता ।"

औपपातिकोपाङ्गे ।

शीले सम्बन्धः -

"कानानस्तु पितामहः समभवत्पित्रादयो गोलकाः ;
सम्भूताः पृथगन्यतातजनिताः कुण्डा[२९] ह्यमी पाण्डवाः।
सर्वेषां द्रुपदात्मजा सहचारी युद्धे हता बान्धवाः ;
श्रीकृष्णेन कुलं कलंकमलिनं, नीतं जगद्वन्द्यताम् ।।"

भृगुकच्छे काचिन्मात्स्यिकसुता मत्स्यगन्धाभिधा स्वपितृपुण्यहेतवे नावं वाहयति । एकदा पाराषर-ऋषिस्तन्नावा नदीमुत्तरन् रागान्मत्स्यगन्धां याचित्वा धूमरीं विकुर्व्य बुभुजे । ततस्तदेव माहात्म्यात्तत्र तस्यां पुत्रजन्म । ततो मातुर्ह्रिया स तदैवाकाशे गतः । ऋषिपुत्रत्वात्तेन गच्छता मातुरित्युक्तं त्वयाऽहं कार्ये स्मर्त्तव्यः। ऋषिस्तु तामक्षतयोनिं कृत्वा मत्स्यगन्धां व्यपोह्य योजनगन्धां कृत्वा गतः । इतश्च राजा शान्तनुः भृगुकच्छे नदीतीरे गतः । तां दृष्ट्वा मोहः [मोहितः], ततो राजा तत्पितरं तां याचते । स न ददाति । विमुखः स्वपुरं गतः, तदा राज्ञः पुत्रेण गाङ्गेयेन राजा विच्छायो दृष्टः । मन्त्रिणः पृष्टाः, तै राज्ञो योजनगन्धानुरागादि प्रोक्तम्, ततो गाङ्गेयः पितृभक्त्या ब्रह्मव्रतोच्चारं कृत्वा लोकरूढ्या भीष्मकर्म कृत्वा योजनगन्धापितृपार्श्वे कथितः वृत्तान्तः, ततो राज्ञा तस्या आदानं कृतम् पुनस्तन्नाम तदा सत्यवतीति । ततस्तस्याश्चित्रविचित्रौ सुतौ जातौ। ततः शान्तनुमृते चित्रो नीलविद्याधरेण हतः । स च विद्याधरो गाङ्गेयेन हतः । ततो विचित्रवीर्यो राजा जातः । ततः पुनरेकदा वाणारसीराज्ञो अम्बिका १ अम्बाला २ अम्बा ३ इति कन्यात्रयं स्वयंवरमण्डपे भीष्मेन हृत्वा स्वभ्रातुर्विचित्रवीर्याय दत्तम् । स तदत्यन्तरागात् क्षयी जातः, असुतो मृतः । ततो राज्यधरसुताभावात् सत्यवत्या कन्यावस्थाजात-कृष्णद्वीपायनपुत्रस्मरणम्, तदागमनम्, स्वमातुः कथनम् । यत्स्ववध्वो विवस्त्रा मत्दृष्टौ प्रेष्या इति,

---

२६. 'अप्पिच्छाओ अप्पारंभाओ अप्परिग्गहाओ' हस्त० नास्ति । २७. 'अप्पेणं आरंभसमारंभेणं' हस्त० नास्ति । २८. 'तं चेव... उववज्जंति' अयं पाठो मुद्रितौपपातिकसूत्रे नास्ति । २९. पत्यौ जीवति कुण्डः स्यात्-मनुस्मृतौ ३-१७४

ततस्तास्वेका चन्दनविलिप्ता गता, द्वितीया नेत्रपट्टबन्धं कृत्वा, तृतीया विवस्त्रैव, नीचकुलत्वात्ततस्तासां क्रमात् पाण्डु-धृतराष्ट्र-विदुराः पुत्रा जातास्ततः पाण्डोः पुत्राः पाण्डवाः । ते च कुण्डा अमृते भर्त्तरि जारजः कुण्ड इति वचनात् । जारजत्वं च तेषां धर्मपुत्रो युधिष्ठिरः १ वायुपुत्रो भीमः २ इन्द्रपुत्रोऽर्जुनः ३ अश्विनीकुमारस्य नकुलसहदेवौ ५ । इति लौकिकः।।

तथा -

।। अथ शीले सुरप्रियकथा ।।

मगधेषु पुरं राजगृहं तत्र द्विजोऽभवत् । प्रभासगणभृद्भ्राता, श्राद्धो यज्ञप्रियाभिधः ।।१।।

प्रिया यज्ञयशास्तस्य, तनयश्च सुरप्रियः । रूपसौभाग्यशीलाद्यैः, यः सुराणामपि प्रियः ।।२।।

आयान्तमन्यदा राजगृहे धर्मरुचिं मुनिम् । प्रभासः स्माह तत्रानुशिष्ट्यै यज्ञप्रियं द्विजम् ।।३।।

अगान्मुनिः क्रमाद्यज्ञप्रियौकः सोऽपि वीक्ष्य तम् । ससंभ्रममथोत्थाय, डुढौके स्वयमासनम्।।४।।

तत्रासीनं ववन्दे तं विप्रस्तत्स्वजनास्तथा । मुनिस्तान्वन्दयामास, श्रीवीरं सपरिच्छदम् ।।५।।

तानूचे चा(सो)ऽनुशास्त्येवं प्रभासो मन्मुखेन वः । मनुष्यत्वादिसामग्रीं युष्माभिः प्राप्य दुर्लभाम्।।६।।

धर्मकार्येषु नो कार्यो भोः प्रमादो मनागपि । द्विजोऽपि तन्मुनेर्वाक्यं तथेति प्रत्यपद्यत ।।७।।

मुनिर्जगाद किं स्वानि, निर्वहन्ति व्रतानि वः । त्वत्प्रसादादियत्कालं निर्व्यूढानीति सोऽवदत् ।।८।।

अतः परं तु नो वेद्मि, यत्पुत्रो मे सुरप्रियः । सौभाग्यातिशयात्स्त्रीभिः, प्रार्थ्यतेऽसौ पदे पदे ।।९।।

भगवन्निर्मलं शीलं यद्ययं खण्डयिष्यति । भावी ध्रुवं कलङ्को मे, शरच्चन्द्रोज्ज्वले कुले ।।१०।।

मुनिरूचे विषादीर्मा, नैवाकृत्यं करिष्यति । पुण्यानुबन्धिपुण्यानुभावादेष महामतिः ।।११।।

श्रुत्वेति परितुष्टोऽसौ, नत्वाऽप्राक्षीत्पुनर्मुनिम् । किं कृतं सुकृतं पूर्वभवेऽनेनेति कथ्यताम् ।।१२।।

मुनिराख्यदसौ वाराणसीपुर्यां पुराभवे । राज्ञोऽरिमर्दनस्याऽभूज्जयमालीति नन्दनः ।।१३।।

सोऽगात्क्रीडार्थमुद्याने, वसन्ततिलकेऽन्यदा । चारणश्रमणं तत्रैक्षिष्टाशोकतरोस्तले ।।१४।।

नत्वा तं भक्तितस्तस्य, पुरो यावन्निषेदिवान् । तावत्तत्राययौ स्त्रीयुक्, खेचरोऽनङ्गकेतुकः ।।१५।।

वन्दित्वाऽथ निषण्णं तं मुनिः पप्रच्छ खेचरम् । सुरूपा दृश्यते केयमबला बलशालिका ।।१६।।

मुनिं नत्वाऽथ सोऽवादीत्, त्रपावनतकन्धरः । ताराचन्द्राभिधानस्य, सुतेयं खेचरेशितुः ।।१७।।

मातङ्गीपुत्रिकासक्तमियं ज्ञात्वा निजं पतिम् । ततस्तस्मिन् विरक्तत्वात्स्वीचक्रे मयका प्रभो!।।१८।।
मुनिराख्यदथो भद्र ! परस्त्रीगमनं नृणाम् । कलङ्कः स्वकुलस्यात्र, वैराकीर्त्योश्च कारणम् ।।१९।।
अमुत्र तु तदासक्ता, नरके दुःखमुज्ज्वलम् । सासह्यन्ते ज्वलत्ताम्रपुत्रिकालिङ्गनादिकम् ।।२०।।
अत्रान्तरे स्त्रियस्तस्याः, पतिरागादुदायुधः । उच्चैरनङ्गकेतुं तं तर्जयन् वीक्ष्य सोऽप्यथ ।।२१।।
रे मातङ्गीपते ! नूनं मृतोऽस्यद्य स्वकर्मभिः । क्षिपत्रेवमढौकिष्टानङ्गकेतुर्युधे(धि) द्रुतम् ।।२२।।
तौ द्वावपि चिरं युद्धा, मिथोघातान्मृतिं गतौ । स्त्री साप्युपपतेर्देहं गृहीत्वाऽग्रिमसाधयत् ।।२३।।
शोचन्तं तमथो वीक्ष्य, चारणश्रमणं मुनिम् । जयमाली जगादैवं किं यूयं शोकसङ्कुलाः ।।२४।।
सोऽवादीदेष मे भ्राता, नमस्कारविवर्जितः । पापादस्मादकस्माद्धि, मृत्युमापेति शुक् मम ।।२५।।
जयमाली मुनिं नत्वा, परस्त्रीगमनव्रतम् । ययाचे सोऽप्युवाचास्य, स्वरूपं प्रथमं शृणु ।।२६।।
परेषामात्मभिन्नानां स्त्रियस्ताश्च पुनर्द्विधा । वैक्रियौदारिकभेदाद्देवतिर्यग्नरस्त्रियः ।।२७।।
द्विधा ताः परिणीताश्च, संगृहीताश्च तासु या । यथागृहीतभङ्गेन, विरतिस्तदिह व्रतम् ।।२८।। युग्मम्।।
अत्रापरिगृहीताद्या वर्ज्याः पञ्चातिचारकाः । फलमस्य यशःकीर्त्तिसौभाग्यस्वर्गितादिकम् ।।२९।।
व्रतमेतन्न गृह्णन्ति, गृहीत्वातिचरन्ति ये । लभन्ते ते हि दौर्भाग्यं षण्ढत्वं दुर्गदुर्गतिम् ।।३०।।
श्रुत्वेति नृपपुत्रोऽपि, ज्ञाततत्त्वो विशेषतः । जग्राह तन्मुनेः पार्श्वे, तुरीयं तदणुव्रतम् ।।३१।।
मुनिस्ताक्ष्र्य इवोत्पत्य, व्योम्नान्यत्र ततो ययौ । मन्यमानः कृतार्थं स्वं राजपुत्रोऽप्यगाद् गृहम् ।।३२।।
सोऽथापरिगृहीतादिदोषाणां विषयीकृतः । सौभाग्यात्पुरनारीभिर्नातिचारीव्रिजं व्रतम् ।।३३।।
सभासीनेऽन्यदा तस्मिन्, प्रवृत्तं वर्णवर्णनम् । वर्णेषु सर्ववर्णानां रक्षणात् क्षत्रियो वरः ।।३४।।
श्रुत्वेति स मदं जातेः, कृत्वा मृत्वा च नाक्यभूत् । आद्यस्वर्गे ततश्च्युत्वा, सोऽयं ते तनयोऽजनि।।३५।।
तदेष प्राग्भवे सम्यक्, तुर्याणुव्रतपालनात् । सुभगोऽपि सुरूपोऽपि, शीलं न स्खलयिष्यति ।।३६।।
सुरप्रिय इति श्रुत्वा, जातजातिस्मृतिर्जगौ । व्रतायास्य मुनेः पार्श्वे, द्राक् विसर्जय मां पितः !।।३७।।
यज्ञप्रियो जगादैवं कियत्कालं विलम्बय । प्रस्तावे प्रव्रजिष्यावः, श्रीप्रभासस्य संनिधौ ।।३८।।
ततो धर्मरुचेः पार्श्वे, यतिधर्मप्रियोऽपि हि । गृहिधर्मं पितुर्वाक्यात्, प्रतिपेदे सुरप्रियः ।।३९।।
मुनिस्ताननुशिष्यैवं विजहार ततः पुरात् । सुरप्रियस्तु तं धर्मं पालयामास शुद्धधीः ।।४०।।

गत्वोद्यानेऽन्यदा सोऽथ, प्रसुप्तः कदलीगृहे । कुतश्चिदथ तत्रागात्, व्यन्तर्येका सुरूपिका ।।४१।।

तद्रूपमोहिता साऽथ, तत्पत्नीरूपधारिणी । सविकारवचांस्युच्चैर्वदन्ती तमुपस्थिता ।।४२।।

दध्यौ सुरप्रियोऽप्येवं नूनमेषा न मे प्रिया । निस्त्रपाऽनिमिषाक्षीति, त्यक्त्वा तां स्वगृहं ययौ ।।४३।।

गत्वा पत्ये शसंसैषा, यथानेन द्विजन्मना । प्रार्थिताऽहं ततो दुष्टान्नष्टा कष्टेन धाष्टर्यतः ।।४४।।

क्रुद्धस्तं व्यन्तरो हन्तुं यावदागाद्दिनात्यये । वासागारं ययौ तावत्, सप्रियोऽपि सुरप्रियः ।।४५।।

स्वप्रिया तेन पृष्टाऽथ, किमद्य त्वं वनेऽगमः । कर्णौ पिधाय साऽवोचदाः किमेवमिहोच्यते ।।४६।।

न यान्त्यन्या अपि स्वामिन्नेकाकिन्यः कुलस्त्रियः । स्नुषापि श्रीप्रभासस्य, कथं यास्याम्यहं वने ।।४७।।

परमाख्याहि मे सत्यं किमत्र प्रश्नकारणम् । यथावृत्तमथाचख्यौ, व्यन्तर्याश्चेष्टितं ततः ।।४८।।

श्रुत्वेति व्यन्तरो ज्ञात्वा, स्वपत्न्या दुष्टचेष्टितम् । दध्यौ धिगस्तु नारीणां दुःशीलत्वकुलौकसाम् ।।४९।।

ततः सुरप्रियं प्रोचे, वृत्तान्तं स्वं निवेद्य सः । तुष्टोऽस्मि तव शीलेन, महासत्त्व ! वरं वृणु ।।५०।।

सोऽप्यूचे यन्मया प्राप्तो धर्मस्तदपरेण किम् । भूयोऽपि व्यन्तरोऽवादीदमोघं देवदर्शनम् ।।५१।।

सोऽवदत्तर्हि मे ब्रूहि, स्फुटमायुः कियच्चिरम् । व्यन्तरोऽथ जगादैवं मासमात्रमतः परम् ।।५२।।

श्लाघमानस्ततस्तस्मै, तथा तस्य गृहाङ्गणे । स्वर्णवृष्टिं विधायोच्चैर्व्यन्तरोऽसौ तिरोदधे ।।५३।।

सुरप्रियोऽर्हतोऽर्चित्वा, लात्वा संस्तारकव्रतम् । मासं संलिख्य मृत्वा च, देवोऽभूदच्युते दिवि ।।५४।।

उत्कृष्टस्थितिरुत्कृष्टान्, भोगांस्तत्रानुभूय सः । च्युत्वोत्कृष्टव्रतात्सर्वोत्कृष्टस्थानमवाप्स्यति ।।५५।।

इति निशम्य सुरप्रियवृत्तकं विदुरचित्तचमत्कृतिकारकम् ।
सुखयशःशिवभूरुहकाननं कुरुत तुर्ययमप्रतिपालनम् ।।५६।।

।। इति शीले सुरप्रियकथा ।।

[इइ सीलं]

[तवो]

[१३-तपः]

अथ **तपः** प्रपञ्चयति ।

"[1]संवच्छरमुसभजिणो छम्मासा वद्धमाणजिणचंदो ।
इय विहरिया निरसणा, जएज्ज एओवमाणेण ।।" [उपदेशमाला-२]

यदि जिनैरप्यात्मना केवलोत्पत्त्या निर्णीतमोक्षसाधनेऽपि वार्षिक-षाण्मासिकाद्या नाना-प्रकारास्तपोविधयोऽत्युग्रतरतमा विधीयन्ते, तदान्येषां बहु-बहुतरकर्मणां साम्प्रतकालीनजीवानां तपोविधानं विना कथं कर्मक्षयः ? इत्यवगत्य तद्विधौ यतनीयमेव । यतः-

"यद्दूरं यदुराराध्यं यच्च दूरे व्यवस्थितम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ।।" [सुक्तमुक्तावली-१०९/१]

तथा -

"तपः सर्वाक्षसारङ्ग-वशीकरणवागुरा ।
कषायतापमुद्विका, कर्माजीर्णहरीतकी ।।" [आचाराङ्ग - १/५४]

"नाना नियमयन्त्रान्तः परिताप्य तपोग्निना ।
कोष्टवत्कुटिलं स्वान्तं शनैः सरलयेद्बुधः ।।
लोलेन्द्रियैर्यौवनेऽपि यत्तपस्तत्तपो न तु [अन्य ?]।
दारुणास्त्रे रणे यो हि शूरः शूरः स उच्यते ।।
[2]तवसुसिअमंसरुहिरा, अंतो विप्फुरिअ-गुरुअमाहप्पा ।
सलहिज्जंति सुरेहि वि, जे मुणिणो ताण पणओ हं ।।" [पुष्पमाला-७७]
"[3]न कुलं एत्थ पहाणं, हरिएसबलस्स किं कुलं आसि ? ।
आकंपिया तवेणं, सुरा वि जं पज्जुवासंति ।। [उपदेशमाला-४३]

---

1. संवत्सरं ऋषभजिनः षट्मासान् वर्धमानजिनचन्द्रः । इति विहतौ निरशनौ यतेत एतदुपमानेन।।
2. तपशोषितमांसरुधिराः अन्तर्विस्फुरित-गुरुकमाहात्म्याः । श्लाघ्यन्ते सुरैरपि ये मुनयस्तेषां प्रणतोऽहम् ।।
3. न कुलमत्र प्रधानं हरिकेशबलस्य किं कुलमासीत् । आकम्पितास्तपसा सुरा अपि यं पर्युपासते ।।

[4] किं आसि नंदिसेणस्स, कुलं ? जं हरिकुलस्स विउलस्स ।
आसी पियामहो सु-चरिएण वसुदेवनामो त्ति ।। [उपदेशमाला-५२]

[5] विज्जाहरीहिं सहरिसं, नरिंददुहियाहिं अह महंतीहिं ।
जं पत्थिज्जइ तइया, वसुदेवो तं तवस्स फलं ।। [उपदेशमाला-५३]

[6] सुंदरसुकुमालसुहोइएण विविहेहिं तवविसेसेहिं ।
तह सोसविओ अप्पा, जह न वि नाओ सभवणे वि ।।" [उपदेशमाला-८६]

अपि च -

"[7] सत्तलवा जइ आउं, पहुप्पमाणं तओ हु सिज्झंति ।
तत्तिअमित्तं न हुअं, तत्तो लवसत्तमा जाया ।।

[8] नणु केवईअं कम्मं, अणुत्तरसुराण चिट्ठए सेसं ।
जावईअं छट्ठेणं, तवसा निज्जरइ उवउत्तो ।।" [ ]

यद्येवं मोक्षगमनयोग्येऽपि जीवे सर्वार्थसिद्धावेव गमनं जातं तत्र तु तस्य जीवस्यैक-षष्टस्यैवावशेषता कारणम्, नान्यत्किमपि । षष्टशोध्यमेव कर्म जीवे स्थितम् । तर्हि न कृतं कस्मात् षष्टतपः ? उच्यते, तस्मिन् तपस्यवशिष्यमाण एवायुःपूर्त्यौ । अतो भव्यजीवैस्तपसो महिमानमनल्पवीर्यमवगम्य स्वशक्त्या यथानिर्वाहं तपोविषयोद्यमो न मोक्तव्य एव । यतः-

"वासरे च रजन्यां च, यः खादन्नेव तिष्ठति ।
शृङ्गपुच्छपरिभ्रष्टः, स्पष्टं स पशुरेव हि ।।" [योगशास्त्र-३/६२]

श्राद्धैस्तु रात्रौ चतुर्विधाहारपरित्याग एव विधेयो मुख्यवृत्या । तथैव श्राद्धदिनकृत्यादौ

---

4. किमासीन्नन्दिषेणस्य कुलम् ? यद् हरिकुलस्य विपुलस्य । आसीत्पितामहो सुचरितेन वासुदेवनामा इति।।
5. विद्याधरीभिः सहर्षं नरेन्द्रदुहितृभिरथ प्रधानाभिः । यत्प्रार्थ्यते तदा वसुदेवः तत्तपसः फलम् ।।
6. सुन्दरसुकुमारसुखोचितेन विविधैस्तपोविशेषैः । तथा शोषित आत्मा यथा न ज्ञातः स्वभवनेऽपि ।।
7. सप्तलवाः यदि आयुः, प्रभूयमानं ततो खलु सिध्यन्ति । तावन्मात्रं न भूतम्, तस्मात् लवसप्तमा जाता ।।
8. ननु कियत् कर्म, अनुत्तरसुराणां तिष्ठति शेषम्, यावत् षष्ठेन तपसा, निर्जरयति उपयुक्तः ।।

पूर्वाचार्यैर्बहुनिर्णीतत्वात् । तपसि - ईशानेन्द्रो राजगृहे श्रीवीरं शुद्धभावं नत्वा भक्तिभावितनिजस्वान्तो द्वात्रिंशद्बद्धं नाट्यं विधाय दिवि प्रापत् । श्रीगौतमपृष्टः श्रीवीरस्तद्भवं प्राह -

।। अथ तामलितापसकथा ।।

ताम्रलिप्त्यां मौर्यपुत्रस्तामलिनामा गृहपतिर्धनी, वैराग्यात्सर्वेषां देवनृपश्वादीनामविशेषेण प्रणामकरणरूपां प्रणामीं दीक्षां प्रपन्नः । ऊर्ध्वबाहुरभिसूर्यमातापयन्नित्यषष्टतपाः पारणके केवलौदनम् एकविंशतिवारान् जलेन प्रक्षाल्य पारयन् षष्ठीसहस्रवर्षपर्यायः पादपोगमनानशनमाश्रितः । तदानीं बलिचञ्चावास्तव्यैरसुरैरनिन्द्रैरागत्य द्वात्रिंशद्बद्धनाट्यविधिं विधाय, बलीन्द्रत्वनिदानाय भृशं प्रार्थितोऽपि मौनी तदकृत्वा ईशाने इन्द्रत्वेनोत्पेदे । तदानीं बलिचञ्चासुरैरागत्य कदर्थ्यमानं निजशरीरमवधिना देवेभ्यश्च ज्ञात्वा रुष्टो दृशैव बलिचञ्चा भस्मीचकार । तैर्भीतैः क्षमितः स्वतेजोलेश्यां संहृत्य तां तथावस्थां चकार। ततो बलिचञ्चासुरा ईशानेन्द्रस्याज्ञापरा बभूवुः । ईशानेन्द्रः साधिकद्विसागरायुरनन्तरं महाविदेहे सेत्स्यति । ।। श्री भगवती ३ शतके १ उद्देशे ।।

।। इति तामलितापसकथा ।।

अनादिनिधनैर्जीवैस्त्वाहारादय एवं भुक्ताः । यतः -

"[9]हिमवंत-मलय-मंदर-दीवोदहि-धरणिसरिसरासीओ ।
अहिअयरो आहारो, छुहिएणाहारिओ होज्जा ।।
[10]जं णेण जलं पीयं, घम्मायवजगडिएण तं पि इहं ।
सव्वेसु वि अगड-तलाय-नई-समुद्देसु न वि होज्जा ।।"[उपदेशमाला-१९८-१९९]

किं बहुना -

"[11]पीयं थणयच्छीरं, सागरसलिलाओ होज्जा बहुययरं ।
संसारम्मि अणंते, माऊणं अन्नमन्नाणं ।।" [उपदेशमाला-२००]

---

9. हिमवन्त-मलय-मन्दर-दीपोदधि-धरणिसदृशराशेः । अधिकतर आहारो क्षुधितेनाहारितो भवेत्।।
10. यदनेन जलं पीतं ग्रीष्मातपाभिभूतेन तदपि इहलोके । सर्वेष्वपि अवट-तडाग-नदी-समुद्रेषु नापि भवेत् ।।
11. पीतं स्तनकक्षीरं सागरसलिलाद् भवेद् बहुतरम् । संसारेऽनन्ते मातृणामन्यान्यासाम् ।।

तपस्तु यादृशं तादृशं क्रियमाणं विरतितयैव ख्याप्यते । विरतिस्तु मनुष्यजन्मन्येव नान्येषु त्रिषु । तेन भो भव्याः -

विरतिसाधनसाधनमुत्तरं नरभवं समवाप्य सुदुर्लभम् ।

भविजना ! अवदातमनोधना ! विरतिरूपतपः कुरुतानिशम् ।। [ ]

तपःफलं तु -

"सदोषमपि दीप्तेन, सुवर्णं वह्निना यथा ।

तपोऽग्निना तप्यमान-स्तथा जीवो विशुध्यति ।।" [योगशास्त्र-४/८८]

तपस्तु श्रीवीरवत्कृतं निर्जरायै मोक्षाय च स्यात् । तथा -

"[12]नव किर चाउम्मासे छक्किर दोमासिए उवासीय ।

बारस य मासियाइं बावत्तरि अद्धमासाइं ।।" [आवश्यकनिर्युक्ति-५२८]

इत्यादि । कथा -

।। अथ तपसि हरिकेशबलर्षिकथा ।।

मथुरायां शंखनृपः स राज्यं प्रपाल्य प्रव्रजितो गीतार्थो हस्तिनापुरमागतः ।

[13]तत्थ य भिक्खानिमित्तं णिग्गएण हुअवहरत्था । आसन्नगवक्खसंठिओ पुच्छिओ सोमदेवाभिहाणो पुरोहिओ, किमणेण मग्गेण वच्चामि, तेण वि एएण हुअवहपहेण गच्छन्तं डज्झन्तं पेच्छिस्सामिति चिन्तिऊण भणिअं वच्चसु । पयट्टो मुणी । पुरोहिओ अतुरिअमिरिंउवउत्तं तं वच्चन्तं दट्ठूण विम्हिओ गओ, तेण मग्गेण जाव हिमफाससरिसो ।

ततः स्वदुरध्यवसाय पश्चात्तापपरो गत्वा ननाम ऋषिं धर्मं श्रुत्वा प्रव्रजितः । जातिरूपादिमदवान् मृत्वा स्वः च्युत्वा गङ्गातीरे बलकोट्टाख्यहरिकेशपतेर्गौरीजः कुसुमितचूतस्वप्नसूचितः पुत्रो जातः । सोमदेव जीवः बलो नाम,

---

12. नव किल चातुर्मासिकानि षट् किल द्विमासिकानि उपोषितवान् । द्वादश च मासिकानि द्विसप्तत्यर्द्धमासिकानि।।

13. तत्र च भिक्षानिमित्तं निर्गतेन हुतवहरथ्या । आसन्नगवाक्षसंस्थितः पृष्टः सोमदेवाभिधानः पुरोहितः, किमनेन मार्गेण व्रजामि ? तेनापि खु एतेन हुत वहपथेन गच्छन्तं दह्यमानं प्रेक्षीष्ये इति चिन्तयित्वा भणितं व्रज । प्रगतो मुनिः । पुरोहितोऽतुर्यमिर्यामुपयुक्तं तं व्रजन्तं दृष्ट्वा विस्मितो गतः, तेन मार्गेण यावत् हिमस्पर्शसदृशः ।

"[14]जाईमयावलेवा मायंगकुलंमि एस उप्पन्नो ।
सोहग्गरूवरहिओ, निअबन्धूणं पि हसणिज्जो ।।"

विषवृक्ष इव सर्वेषामुद्वेजकः, कलहित्वाद्बालैर्बहिष्कर्षितः । ताइं रमन्ताइं पेच्छइ । [तान् रममाणान् पश्यति] [१]तस्मिन्नवसरे तत्र सर्पो निर्गतः । सविष इति कृत्वा चाण्डालैर्मारितः, पुनस्तत्र प्रलंबमलशिकं निर्गतम्, निर्विषमिति कृत्वा तैर्न विनाशितम्, तादृशमारणं दृष्ट्वा तेन बलबालेन चिन्तितम् - निजेनैव दोषेण प्राणिनः पराभवं सर्वत्र प्राप्नुवन्ति । यद्यहं सर्पसदृशः सविषस्तदा पराभवपदं प्राप्तः, यद्यलसिकवन्निरपराधोऽभविष्यम्, तदा न मे कश्चित्पराभवोऽभविष्यदिति सम्यग् विभावयन् जातिं स्मृत्वा विरक्तो मातङ्गमहर्षिर्जातः । विहरन् वाणारस्यां तिण्डुकोद्याने स्थितः । तत्र गण्डी तिण्डुकाख्यो यक्षस्तद्गुणरञ्जितो नित्यमुपास्ते । सोऽन्ययक्षेण पृष्टः, 'किं चिराद्दृश्यसे ?' 'महर्षिसेवा वैयग्र्यात्,' स प्रत्याह - 'धन्यस्त्वं, ममाप्युद्याने सन्ति ऋषयः । उभावपि गतौ, दृष्टास्ते विकथां कुर्वाणाः । ततः-

"[15]इत्थीण कहित्थ वट्टई जणवयरायकहित्थ वट्टई ।
भिक्खाईकहित्थ वट्टई, गच्छामो पुण तिण्डुअं वणं ।।"

इत्युक्त्वा पश्चादेवागतौ । अन्यदा कोशलिकनृपसुता भद्राख्या सपूजोपस्करपरिकरा यक्षमभ्यर्च्य प्रदक्षिणयन्ती कुरूपं कृशाङ्गं तमृषिं दृष्ट्वा मौढ्याज्जुगुप्सापरा निष्ठ्यूतवती, रुष्टेण यक्षेण गृहिली कृता। राज्ञा बहुप्रतीकारैरपि गुणेऽजाते यक्षः पात्रेऽवतीर्णः प्राह - 'अनया ऋषिर्निन्दितः । यदीमां तस्यैव दत्तं तदा मुचे ।' प्रतिपन्ने मुक्ता, ततः कृतश्रृंगारात्तविवाहोपस्कारा गत्वांहिलगनेन ऋषिं व्यजिज्ञपत्। स्वयंवरां मां स्वीकुरु । ऋषिणा निजाचारकथने निषिद्धा, यक्षेण त्वमर्षाद् ऋषिरूपं प्रच्छाद्य नानारूपैरुद्वाह्य सव्विंपि रयणिं वेलविआ । [सर्वामपि रजनिं वञ्चिता ।] प्रातः सा तत्स्वप्नवद्विदन्ती गृहमायन्ती रुद्रदेवपुरोधसा ज्ञातवृतान्तस्य नृपस्याग्रे उक्ता देवेयमृषिपत्नी, तन्मुक्ता, विप्राणामर्हति । राज्ञापि तदेवोचितं ज्ञात्वा दत्तास्यैव, तस्स भोगे [16]भुंजओ जाइ कालो, अण्णया बाहिं रुद्देदेवेण जणं कयं, सा जण्णपत्नी कया, अणेगे तत्थ भट्टचट्टाइणो आगया। तत्थ भिक्खट्ठाए विहरन्तो हरिएसबलो आगओ । शेषं श्रीउत्तराध्ययनसूत्राज्ज्ञेयम् ।।

।। इति तपसि हरिकेशबलर्षिकथा ।।

।। इइ तवो ।।

---

१. 'तस्मिन्...सम्यग्' इति पाठस्थाने 'अन्यदा सर्प चाकलुण्ड व्यतिकरेण दोषगुणयोरेव विपत्संपद्धेनुताम्' हस्तप्रतौ ।

14. जातिमदावलेपो मातङ्गकुले एष उत्पन्नः । सौभाग्यरूपरहितो निजबन्धूनामपि हसनीयः ।।

15. स्त्रियाः कथाऽत्र वर्तते, जनपदराजकथाऽत्र वर्तते । भिक्षादिकथाऽत्र वर्तते, गच्छामः पुनः तिण्डुकं वनम् ।।

16. तस्य भोगान् भुञ्जन् याति कालः, अन्यदा बाहिं रूद्रदेवेन यज्ञः कृतम्, सा यज्ञपत्नी कृता, अनेकास्तत्र भट्टचट्टादय आगताः । तत्र भिक्षार्थं विहरन् हरिकेशबल आगतः ।

[भावो]

[१४-भावः]

अथ **भावनां** दर्शयति । सकलोऽपि श्रीजिनधर्मो भावनापूर्वकं एव कृतः पुंफलीति, नान्यथा । यतः -

"घनं[१] वित्तं दत्तं जिनवचनमभ्यस्तमखिलम्,
क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत् ।
तपस्तप्तं तीव्रं चरणमपि चीर्णं चिरतरम्,
न चेच्चित्ते भावस्तुषवपनवत्सर्वमफलम् ।।" [सुक्तमुक्तावली-१११/१३]

तथा -

"ज्वालाभिः शलभाः जलैर्जलचराः स्फूर्जज्जटाभिर्वटाः[२],
मौण्ड्यैरूरणकाः समस्तपशवो नाग्न्यैः खरा भस्मभिः ।
कष्टाङ्गीकरणैर्द्रुमाः शुकवराः पाठैर्बका[३] ध्यानकैः,
किं सिध्यन्ति[४] न भावशुद्धिविकलाः स्युश्चेत्[५] क्रियाः सत्फलाः ।।"

[गुरुगुणषट्त्रिंशिका-२ वृत्ति]

सर्वमपि धर्मानुष्ठानं विधानं परापेक्षमेव, भावना त्वेकैवात्मापेक्षा । यतः -

"वित्तसाध्यमिह दानमुत्तमं, शीलमप्यविकलं सुदुर्द्धरम् ।
दुष्कराणि च तपांसि भावना, स्वीयचित्तवशगेति भाव्यताम् ।।"

भावनाधर्म एव केवलो विधीयमानो महागुणः श्रीजिनादिभिः प्रदर्शितः । यतः -

"विश्वश्रीवश्यमूलं विषयरतिमहाशाकिनीमोक्षमन्त्रः,
कल्याणाम्भोजवापी स्फुर[प्रविषम]दुरितोदन्वदुत्तारपोतः ।
वैराग्याकृष्टविद्या सदुपशमपयः पुष्करावर्तमेघः,
कैवल्याद्वैतमूलं जगति विजयते भावनाधर्म एकः ।।" [ ]

१.'दत्तं वित्तं' सुक्तमुक्तावल्याम् । २.'भटाः' हस्त० । ३.'वाग्भिर्बका ध्यानतः' हस्त० । ४.'शुध्यन्ति' हस्त० । ५.'शश्वत्क्रिया निष्फलाः' हस्त० ।

यथा सलवणैव रसवती सुस्वादास्तथा सर्वेऽपि दानादिधर्माः । यतः -

"दानशीलतपः सम्पद्भावेन भजते फलम् ।
स्वादः प्रादुर्भवेद्भोज्ये किं नाम लवणं विना ? ।।" [सुक्तमुक्तावली-१११/८]

तथा -

"[1]तक्कविहूणो विज्जो लक्खणहीणो अ पंडिओ लोए ।
भावविहूणो धम्मो तिन्नि वि नूणं हसिज्जंति ।।" [सुक्तमुक्तावली-१११/२]

भावप्रधानस्यैव परमपदगमनं सुदुर्लभं नान्यस्य -

"भावस्यैकाङ्गवीरस्य, सान्निध्याद्बहवः शिवम् ।
ययुर्नैकोऽपि दानाद्यैर्भावहीनैर्घनैरपि ।।" [सुक्तमुक्तावली-१११/९]

दृष्टान्ताश्च -

[2]खवगनिमंतणपुव्वं, वासिअभत्तेण सुद्धभावेणं ।
भुंजंतो वरनाणं, संपत्तो कूरगडुओ ।।
[3]सुहभावणावसेणं, विलासदप्पणहरे गिहत्थो वि ।
छक्खंडभरहनाहो, भरहनिवो केवली जाओ ।। [भावनाकुलक - ८,४]

तथा -

समुसरण भत्त उग्गह अंगुलि झय सक्क सावया अहिआ ।
जेआ वड्ढइ कागिणिलंछण अणुसज्जणा अट्ठ ।।

राया आइच्चजसे[६] महाजसे अइबले अ बलभद्दे ।
बलविरिए कत्तविरिए जलविरिए दंडविरिए य ।।

---

६. '...जसो' आवश्यकनिर्युक्तौ ।

1. तक्रविहीनो वैद्यो लक्षणहीनश्च पण्डितो लोके । भावविहीनो धर्मो त्रीण्यपि नूनं हस्यन्ते ।।
2. क्षपकनिमन्त्रणपूर्वं वासितभक्तेन शुद्धभावेन । भुञ्जानो वरज्ञानं सम्प्राप्तः कूरगडुकः ।।
3. शुभभावनावशेन विलासदर्पणगृहे गृहस्थोऽपि । षट्खण्डभरतनाथो भरतनृपः केवली जातः ।।

एएहिं अद्धभरहं सयलं भुत्तं सिरेण धरिओ अ ।
पवरो जिणिंदिमउडो सेसेहिं न चाइओ वोढुं ।।

अस्सावगपडिसेहो छट्ठे छट्ठे अ मासि अणुओगो ।
कालेण य मिच्छत्तं जिणंतरे साहुवोच्छेओ ।।

दाणं च माहणाणं वेए कासी अ पुच्छ निव्वाणं ।
कुंडा थूभ जिणहरे कविलो भरहस्स दिक्खा य ।। [आवश्यकनिर्युक्ति-३६२-३६६]

समवसरणं भगवतोऽष्टापदे खल्वासीत्, **भक्तं** भरतेनानीतम्, तदग्रहणोन्माथिते सति भरते देवेशो भगवन्तमवग्रहं पृष्टवान् । कतिविधो**ऽवग्रहः** ? भगवानाह - पञ्चविधोऽवग्रहः, तद्यथा - देवेन्द्रावग्रहः, राजावग्रहः, गृहपत्यवग्रहः, सागारिकावग्रहः साधर्मिकावग्रहश्च । राजा - भरताधिपो गृह्यते, गृहपतिः - माण्डलिको राजा, सागारिकः - शय्यातरः, साधर्मिकः - संयत इति, एतेषां चोत्तरेण पूर्वः पूर्वो बाधितो द्रष्टव्य इति, यथा राजाऽवग्रहेण देवेन्द्रावग्रहो बाधित इत्यादि प्ररूपिते देवराडाह - भगवन् ! य एते श्रमणा मदीयावग्रहे विहरन्ति, तेषां मयाऽवग्रहोऽनुज्ञात इत्येवमभिधाय अभिवन्द्य च भगवन्तं तस्थौ, भरतोऽचिन्तयत् - अहमपि स्वमवग्रहमनुजानामीति, एतावताऽपि नः कृतार्थता भवतु, भगवत्समीपेऽनुज्ञातावग्रहः शक्रं पृष्टवान् -

भक्तपानमिदमानीतम्, अनेन किं कार्यमिति, देवराडाह-गुणोत्तरान् पूजयस्व, सोऽचिन्तयत्, के मम साधुव्यतिरेकेण जात्यादिभिरुत्तराः ?, पर्यालोचयता ज्ञातं-श्रावका विरताविरतत्वाद्गुणोत्तराः, तेभ्यो दत्तमिति । पुनर्भरतो देवेन्द्ररूपं भास्वरमाकृतिमद् दृष्ट्वा पृष्टवान्-किं यूयमेवंभूतेन रूपेण देवलोके तिष्ठत उत नेति, देवराज आह–नेति, तत् मानुषैर्द्रष्टुमपि न पार्यते, भास्वरत्वात्, पुनरप्याह भरतः-तस्याकृतिमात्रेणापि अस्माकं कौतुकम्, तन्निदर्श्यताम्, देवराज आह–त्वमुत्तमपुरुष इतिकृत्वा एकमङ्गावयवं दर्शयामीत्यभिधाय योग्यालङ्कारविभूषितां अङ्गुलीमत्यन्तभास्वरामदर्शयत्, दृष्ट्वा च तां भरतोऽतीव मुमुदे, शक्राङ्गुलीं च स्थापयित्वा महिमामष्टाह्निकां चक्रे, ततः प्रभृति शक्रोत्सवः प्रवृत्त इति । भरतश्च श्रावकानाहूय उक्तवान् - भवद्भिः प्रतिदिनं मदीयं भोक्तव्यम्, कृष्यादि च न कार्यम्, स्वाध्यायादिपरैरासितव्यं भुक्ते च मदीयगृहद्वारासन्नव्यवस्थितैः वक्तव्यम्–जितो भवान्, वर्धते भयं तस्मान्मा हन मा हनेति, ते तथैव कृतवन्तः, भरतश्च रतिसागरावगाढत्वात् प्रमत्तत्वात् तच्छब्दाकर्णनोत्तर-कालमेव केनाहं जित इति, आः ज्ञातं-कषायैः, तेभ्य एव च वर्धते भयमित्यालोचनापूर्वं संवेगं यातवान्

इति । अत्रान्तरे लोकबाहुल्यात् सूपकाराः पाकं कर्त्तुमशक्नुवन्तो भरताय निवेदितवन्तः–नेह ज्ञायते-कः श्रावकः को वा नेति, लोकस्य प्रचुरत्वात्, आह भरतः–पृच्छापूर्वकं देयमिति । ततस्तान् पृष्टवन्तस्ते-को भवान् ?, श्रावकः, श्रावकाणां कति व्रतानि ?, सँ आह–श्रावकाणां न सन्ति व्रतानि, किन्त्वस्माकं पञ्चाणुव्रतानि, कति शिक्षाव्रतानि?, ते उक्तवन्तः–सप्त शिक्षाव्रतानि, य एवंभूतास्ते राज्ञो निवेदिताः, स च काकिणीरत्नेन तान् लाञ्छितवान्, पुनः षण्मासेन येऽन्ये भवन्ति तानपि लाञ्छितवान्, षण्मासकालादनुयोगं कृतवान्, एवं ब्राह्मणाः संजाता इति । ते च स्वसुतान् साधुभ्यो दत्तवन्तः, ते च प्रव्रज्यां चक्रुः, परीषहभीरवस्तु श्रावका एवासन्निति । इयं च भरतराज्यस्थितिः, ँआदित्ययशसस्तु काकिणीरत्नं नासीत्, सुवर्णमयानि यज्ञोपवीतानि कृतवान्, महायशःप्रभृतयस्तु केचन रूप्यमयानि, केचन विचित्रपट्टसूत्रमयानि, इत्येवं यज्ञोपवीतप्रसिद्धिः ।

'अणुसज्जणा अट्ठ'त्ति अष्टौ पुरुषान् यावदयं धर्मः प्रवृत्तः, अष्टौ वा तीर्थकरान् यावत् तत ऊर्ध्वं मिथ्यात्वमुपगता ।

एभिरर्धभरतं सकलं भुक्तं शिरसा धृतश्च, कोऽसावित्याह–**प्रवरो** जिनेन्द्रमुकुटो देवेन्द्रोपनीतः **शेषैः** नरपतिभिः **न शकितो वोढुं,** महाप्रमाणत्वात् ।

अश्रावकाणां प्रतिषेधः कृतः, ऊर्ध्वमपि **षष्ठे षष्ठे मासे अनुयोगो** बभूव, अनुयोगः-परीक्षा, **कालेन** गच्छता **मिथ्यात्वमु**पगताः, कदा ?, नवमजिनान्तरे, किमिति ?, यतस्तत्र साधुव्यवच्छेद आसीत् ।

दानं च माहनानां लोको दातुं प्रवृत्तो, भरतपूजितत्वात् । **'वेदे कासी अ'**त्ति आर्यान् वेदान् कृतवांश्च भरत एव, तत्स्वाध्यायनिमित्तमिति, तीर्थकृत्स्तुतिरूपान् श्रावकधर्मप्रतिपादकांश्च, अनार्यास्तु पश्चात् सुलस-याज्ञवल्क्यादिभिः कृता इति ।

द्रव्यपूजा-द्रव्यस्तव-द्रव्य[दा]नाद्य-द्रव्यप्रतिक्रान्ति-द्रव्यप्रत्याख्यान-द्रव्यश्राद्धधर्म-द्रव्यचारित्राणि जीवैर्बहु बहु भवेषु प्राप्तानि, न तैः कापि कार्यसिद्धिर्जाता । सूत्रेऽपि 'सद्धा एव' इत्युक्तम्-

"सव्वस्स जीवरासिस्स भावओ धम्मनिहिअनिअचित्तो ।"

इत्यादिसूत्रेषु भावः प्रधानं कारणं मोक्षस्य। श्रीआवश्यकेऽपि -

---

७. 'भरतः काकणीरत्नेन तेषां लांछनं चिन्हं कृतमासीत् । त्रिरेखः पुनः षण्मासेन योग्या भवन्ति ।' हस्त० ।

८. 'अणुसज्जणा...मिथ्यात्वमुपगताः, आदित्ययशसस्तु... यज्ञोपवीत प्रसिद्धः ।' एतादृशः पाठः हस्त प्रतौ ।

"[4]सचरित्तपच्छयावो निंदा तीए चउक्कनिक्खेवो ।
दव्वे चित्तयरसुआ भावेसु बहू उदाहरणा ।।
[5]गरहा वि तहा जाईअमेव नवरं परप्पगासणया ।
दव्वंमि मरुअनायं भावेसु बहू उदाहरणा ।।" [आवश्यकनिर्युक्ति-१०४९, १०५०]

इति सम्बन्धः ।

।। अथ भावे सुकोशलर्षिकथा ।।

अयोध्यायां प्रजापालनृपस्य श्रेष्ठीभ्यः सिद्धार्थनामा धनपतिरिति नामान्तर द्वात्रिंशत्कोटीशः, द्वात्रिंशत् भार्याः, तासु जयवती अतिप्रिया अपुत्रा, पुत्रेच्छुः, अन्यदा श्रेष्ठी पलितं विज्जारयुसं च दृष्ट्वा जातिस्मृत्या प्रव्रज्यायै उपस्थितः, मन्त्रिभिः पुत्रोत्पत्तिं यावत् स्थापितोऽन्यदा जयवत्याः पुत्रार्थं यक्षमर्चन्त्या ज्ञानमुनिनोक्तम्- 'जिनधर्मं कुरु, सप्तदिने ते पुत्रो भावी' । क्रमेण जातः पुत्रः सुकोशलः, सिद्धार्थस्तस्य श्रेष्ठिपदं पट्टं बद्ध्वा बहुसामन्तैः सह विनयन्धराचार्यपार्श्वे प्रव्रजितः । जयवतीवर्जाः सर्वपत्न्योऽपि [प्रव्रजिताः] सा च क्रुधा, मम पुत्रो बालो मुक्त इति । सुकोशलो युवा द्वात्रिंशत्कन्या विवाहितः । अन्यदा नैमित्तिकेनोक्तम्- 'यदायं सुकोशलः साधुं द्रक्ष्यति तदा प्रव्रजिष्यत्येव ।' ततो अनया स्वगृहे साधुप्रवेशो निषिद्धः, गृहान्तरे च क्रीडास्थानानि कृतानि, अन्यदा तेन गवाक्षस्थेन मासोपवासनं मुनिं कृशतरं गृहान्तः प्रविश्य कुट्टितं निर्गच्छन्तं दृष्ट्वा पृष्टम् - कोऽयम् ? साह - 'अनाथः कोऽपि भिक्षार्थं भ्रमती'ति । तावता सूपकारेण भोजनवेला निवेदिता । जयवत्या द्वात्रिंशत्भार्याभिरपि स्वयम्प्रभा-श्रीदत्ता-मित्रवती-सुप्रभाद्याभिरूचे - 'स्वामिन् ! मज्जणयं काउं भुञ्जह । वेला वोलेत्ति ।' सुकोशलः प्राह - 'इममर्थमज्ञात्वा न भोक्ष्ये ।' ततो निर्बन्धे धात्र्योक्तम् - 'सिद्धार्थर्षिरयं बाल्ये ते पट्टं बद्ध्वा [6]पव्वईओ । सो आगन्तुं तुह मायाए दुट्ठपुरिसेहिं कुट्टाविओ निग्गओत्ति ।' सुकोशल आह - एवं [7]मए वि कायव्वं, मुणिं पृष्टतो गओ उज्जाणे, तं दृष्ट्वा जातिस्मृतिः । आत्मनस्तस्य च प्राग्भवा दृष्टाः । यथा-

मलयाद्रौ मलयसुन्दरो गजः, अहं तु मलयसुन्दरी करिणी, [8]बीआवि पउमा नाम गजेन दाहिण पासं मलयाए दिन्नं, वामं पउमाए । अन्यदा त्रयोऽपि स्नात्वा पद्मानि करे लात्वा यान्ति । [9]तानि पढमं पउमाए कुम्भे दिन्नाइं । पच्छा मलयाए । सा ईसालू गिरिवडणेण मया । कलिंगदेशे काञ्चनपुरे नागदत्तेभ्यसुता

4. सचरित्रपश्चातापो निन्दा तस्यां चतुष्कनिक्षेपः । द्रव्ये चित्रकारसुता भावेषु बहव उदाहरणाः ।।
5. गर्हाऽपि तथा जातीयैव नवरं परप्रकाशनया । द्रव्ये मरुको ज्ञातं भावेषु बहव उदाहरणाः ।।
6. प्रव्रजितः । स आगन्तुं तव मात्रा दुष्टपुरुषैः कुट्टायितो निर्गतः, इति ।
7. *मयाऽपि कर्तव्यम्, मुनिं पृष्टतो गत उद्याने ।*
8. द्वितीया पद्मा । गजेण दक्षिणपार्श्वं मलयायै दत्तम्, वामं पद्मायै ।
9. *तानि प्रथमं पद्मया कुम्भे दत्तानि, पश्चात् मलयया । सा ईर्ष्यालुः गिरिपतनेन मृता ।*

सुकेशिनी जाता, गन्धभाजनराज्ञोढा[10] । इष्टा चाऽन्यदा वनगजं पुरे नीयमानं जातिं स्मृत्वा सापत्न्य-रोषादचिन्तयत् । तथा कुर्वे यथा पउमामलयाणं विरहो होइत्ति, ततो मायया नृपमाह-'अहं प्राग्भवे विद्याधरी आसम् । पत्या सह मलयाद्रौ यान्त्या मलयसुन्दरेभो दृष्टः पद्मेभीयुग्, तं हत्थिरयणं[11] आणेहि'त्ति, ततो राजा सर्वबलेन गतः । जया[12] न सक्किओ आणेउं, तया मारेउं दता मोत्तिआणियेतुं सुकेशिन्या अर्प्पितानि । सा तद्दृष्ट्वा हा मए [मया] निरपराधः प्राक्पतिर्मारापितः । इति पश्चात्तापपरा मृत्वा गिरिनगरे तिरथनृपगौरी सुता जाता मनोहरी नाम, मलयोऽपि तत्रैव मन्त्रिपुत्रः कुबेरकान्तो नाम । यौवने जातिस्मृतिः, मलयायाः स्वरूपं ज्ञातम् । स्वप्राग्भवचरितं लिखित्वा चित्रपटो नगरद्वारे दत्तः । कौमुदीमहे तं दृष्ट्वा मनोहार्या जातिस्मृतिः । कुबेरकान्तरूपं च पत्तए[13] दट्ठुं मुच्छिआ जाया जाव परिणाआ, तओ भोगे भुंजन्ताणि असणि पडणेण दोवि समं मरिउं वैताढ्ये दक्षिणश्रेणौ चण्डवेगो विमलवेगा च विद्याधरौ, द्वयोरपि जातिस्मृत्या विवाहः । चिरं भोगान् भुक्त्वाऽन्यदा हिमवति गच्छन्तो चण्डवेगो विमलवेगा मेहुणेण[14] दिट्ठो, तेण वेरउंरणं काउं पाडिओ सिद्धकूडजिणालयंगणे, चारणर्षिणाऽनशननमस्कारौ दत्तौ, मृत्वाऽयं सिद्धार्थश्रेष्ठी, विमलवेगापि तद्विरहे पञ्चविंशति वर्षाणि प्रव्रज्यां कृत्वा तस्यैवाहं पुत्रो भूयासमिति, निदानात्मृत्वा जयवतीजः सुकोशलोऽहमिति ।

एवं चिन्तयति जयवती द्वात्रिंशत्भार्यादिपरिजनः सर्वोऽप्यागतः। तत्र सुभाख्या सुकोशलभार्या गुर्विण्यस्ति । तस्या गर्भस्थपुत्रस्य श्रेष्ठिपट्टं बध्वा प्रव्रजितः । जयवती आर्तध्यानात्मृत्वा मगधेषु मोगिल्लगिरौ व्याघ्री जाता । ततो द्वावपि पुत्रः पिता च दीक्षादिनादारभ्य नित्यं षष्ठतपसौ मोगिल्लाद्रौ चतुर्मासक्षपणे चतुर्मासीं स्थितौ । पारणकदिने गुहाओ[15] पुव्वं सिद्धत्थो निग्गओ । पच्छा मग्गओ सुकोशलः, उपसर्गं दृष्ट्वा निराकाराऽनशनेन प्रतिमया स्थितौ । एवं[16] ठिआणं वग्घीए पढमं सिद्धत्थो खध्धो तओ सुकोसलो, द्वावपि सर्वार्थसिद्धे सुरौ । व्याघ्रापि डिम्भत्रययुता भर्तृपुत्रमांसं खादन्ती सुकोसलस्स[17] हत्थे कालतिलयं दट्ठुण जाईसरा पच्छायावपराणसणेण स्वर्गे गता ।।

।। इति भावे सुकोशलर्षिकथा ।।

[इइ भावो]

---

10. पद्मामलययोः विरहो भविष्यति ।
11. हस्तिरत्नं आनयत, इति ।
12. यदा न शक्यमानेतुं तदा मारयित्वा दत्तानि मौक्तिकान्यानीय ।
13. पट्टे दृष्ट्वा मुर्च्छिता जाता, यावत् परिणिता । ततो भोगान् भुञ्जन्तौ अशनिपतनेन द्वौऽपि समं मृत्वा,
14. मैथुनेन दृष्टः, तेन वैरहृदयं कृत्वा पातितः सिद्धकूटजिनालयाङ्गणे ।
15. गुहायाः पूर्वं सिद्धार्थो निर्गतः । पश्चात्मार्गतः सुकोशलः ।
16. एवं स्थितयोः व्याघ्रा प्रथमं सिद्धार्थः खात्तस्ततः सुकोशलः ।
17. सुकोशलस्य हस्ते कालतिलकं दृष्ट्वा जातिस्मृतिः पश्चातापपराऽनशनेन स्वर्गे गता ।

[सज्झाय]

[१५-स्वाध्यायः]

अथ **स्वाध्यायः -**

"[1]वेयावच्चे अब्भुज्जएण तो वायणाइपंचविहो ।
विच्चम्मि उ सज्झाओ कायव्वो परमपयहेऊ ।।" [पुष्पमाला - ४२७]

"[2]सज्झाएण पसत्थं, झाणं जाणइ य सव्वपरमत्थं ।
सज्झाए वट्टंतो, खणे खणे जाइ वेरग्गं ।।
[3]उड्ढमहतिरियलोए, जोइसवेमाणिया य सिद्धी य ।
सव्वो लोगालोगो, सज्झायविउस्स पच्चक्खो ।।" [उपदेशमाला-३३७, ३३८]

"[4]कम्ममसंखिज्जभवं, खवेइ अणुसमयमेव आउत्तो ।
अन्नयरंमि वि जोगे, सज्झायंमि विसेसेणं ।।" [पुष्पमाला-४३०]

अकरणे -

"[5]जो निच्चकालतवसंजमुज्जुओ न वि करेइ सज्झायं ।
अलसं सुहसीलजणं न वि तं ठावेइ साहुपए ।।" [उपदेशमाला-३३९]

"[6]गोयमा ! णं पव्वज्जादिवसप्पभिईए जहुत्तविणओवहाणेणं जे केई साहू वा साहुणी वा अपुव्व-नाण-गहणं न कुज्जा, तस्स सुअं विराहिअं सुत्तत्थोभयं सरमाणे एगग्गचित्ते पढम-चरम-पोरिसीसु दिया राओ य नाणुगुणेज्जा, से णं गोयमा ! नाण-कुसीले णेए ।

---

1. वैयावच्चेऽभ्युद्यतेन ततो वाचनादिपञ्चविधः । वर्त्मनि तु स्वाध्यायः कर्तव्यः परमपदहेतुः ।।
2. स्वाध्यायेन प्रशस्तं ध्यानं जानाति च सर्वपरमार्थम् । स्वाध्याये वर्तमानः क्षणे क्षणे याति वैराग्यम् ।।
3. उर्द्ध्वमधस्तिर्यग्लोको ज्योतिष्कवैमानिकाश्च सिद्धिश्च । सर्वो लोकालोकः स्वाध्यायविदः प्रत्यक्षः ।।
4. कर्माण्यसंख्येयभवानि क्षपयत्यनुसमयमेवाऽऽयुक्तः । अन्यतरेऽपि योगे स्वाध्याये विशेषेण ।।
5. यो नित्यकालतपःसंयमोद्युक्तः नापि करोति स्वाध्यायम् । अलसं सुखशीलजनं नापि तं स्थापयति साधुपदे।।
6. गौतम । प्रव्रज्यादिवसप्रभृत्या यथोक्तविनयोपधानेन यः कश्चिद् साधुः वा साध्वी वा अपूर्वज्ञानग्रहणं न करोति, तस्य श्रुतं विराधितं सुत्रार्थोभयं स्मर्यमाणो एकाग्रचित्तो प्रथम-चरमपौरुष्यां दिवा रात्रौ च नानुगुणयति । स गौतम ! ज्ञान-कुशीलो ज्ञेयः ।

से भयवं ! जस्स अइगरुयनाणावरणोदएणं अहंनिसं पहोसेमाणस्स ण संवत्सरेणा वि सिलोगद्धमवि थिरपरिचियं भवेज्जा ? तेणा वि जावज्जीवाभिग्गहेणं सज्झाय-सीलाणं वेयावच्चं, तहा अणुदिणं अड्ढाइज्जे सहस्से [२५००] पंचमंगलाणं सुत्तत्थोभए सरमाणेगग्गमाणसे पहोसेज्जा ।

से भयवं ! केणं अट्ठेणं ? गोयमा ! जे भिक्खू जावज्जीवाभिग्गहेणं चाउक्कालियं वायणाइ जहासत्तीए सज्झायं न करेज्जा, से णं नाणकुसीले णेए । अन्नं च जे केई जावज्जीवाभिग्गहेण अपुव्वं नाणाहिगमं करेज्जा, तस्सासत्तीए पुव्वाहियं गुणेज्जा, तस्सावि यासत्तीए पंचमंगलाणं अड्ढाइज्जे सहस्से परावत्ते, से वि आराहगे । तं च नाणावरणं खवेत्ताणं तित्थयरे इ वा गणहरे इ वा भवेत्ताणं सिज्झेज्जा ।

से भयवं ! केण अट्ठेणं एवं वुच्चइ, जहा णं चाउक्कालियं सज्झायं कायव्वं ? गोयमा !

"मणवयणकायगुत्तो नाणावरणं च खवेइ अणुसमयं ।
सज्झाए वट्टंतो खणे खणे जाइ वेरग्गं ।।" इति श्रीमहानिशीथे ।

[महानिशीथ-३।३६, ३७, ३८, १११]

स्वाध्यायकरणं महाफलम्, दशवैकालिकेऽपि स्थाने दर्शितम् ।

"[7]निद्दं च न बहुमन्निज्जा, सप्पहासं विवज्जए ।
मिहोकहाहिं न रमे, सज्झायंमि रओ सया ।।

स भगवन् ! यस्य अतिगरुक - ज्ञानावरणोदयेन अहर्निशं प्रघोषयतो न संवत्सरेणापि श्लोकार्द्धमपि स्थिरपरिचितं भवति, तेनाऽपि यावज्जीवाभिग्रहेण स्वाध्यायशीलानां वैयावृत्त्यम्, तथा अनुदिनं सार्धद्विसहस्रं [२५००] पञ्चमङ्गलानां सुत्रार्थोभयं स्मर्यमाणैकाग्र्यमानसो प्रघोषयेत् ।

स भगवन् ! केन अर्थेन ? गौतम ! यः भिक्षू यावज्जीवाभिग्रहेण चतुष्कालिकं वाचनादि यथाशक्त्या स्वाध्यायं न करोति, स ज्ञानकुशीलो ज्ञेयः । अन्यश्च यः कश्चित् यावज्जीवाभिग्रहेण अपूर्वं ज्ञानाधिगमं करोति, तस्यापि चाशक्त्या पूर्वाधीतं गुणयति, तस्यापि चाशक्त्या पञ्चमङ्गलानां सार्धद्विसहस्रं परावर्तते, *सोऽपि आराधकः । तं च ज्ञानावरणं क्षपयित्वा तीर्थकरो वा गणधरो वा भूत्वा सिध्यति ।'*

स भगवन् ! केन अर्थेन एवं उच्यते, यथा चतुष्कालिकं स्वाध्यायं कर्तव्यम् ? गौतम !

"मनवचनकायगुप्तो, ज्ञानावरणं च क्षपयति अनुसमयम् । स्वाध्याये वर्त्तमानो, क्षणे क्षणे याति वैराग्यम् ।।"

7. निद्रां च न बहु मन्येत सप्रहासं विवर्जयेत् । मिथःकथासु न रमेत स्वाध्याये रतः सदा ।।

8
तवं चिमं संजम-जोगयं च, सज्झायजोगं च सया अहिट्ठिए ।
सुरे व सेणाइ समत्तमाउहे, अलमप्पणो होइ अलं परेसिं ।।

9
सज्झाय-सज्झाणरयस्स ताइणो, अपाव-भावस्स तवे रयस्स ।
विसुज्झइ जं सि मलं पुरेकडं, समीरिअं रुप्पमलं व जोइणा ।।

10
अमज्ज-मंसासि अमच्छरीआ, अभिक्खणं निव्विगइं गया अ ।
अभिक्खणं काउस्सग्गकारी, सज्झायजोगे पयओ हविज्जा ।।"

[दशवैकालिक-८/४२, ६२, ६३, चूलिका/२/७]

दृष्टान्ताश्चात्रानेके । अवन्तिसुकुमाल-श्रीहरिभद्रसूरि-श्राद्धप्रतिबोधितसुरदेव्यः ।

11
सज्झायं सुणिऊणं जाईसरणाइ जायवेरग्गो ।
इगरयणीए पत्तो इट्ठगमवंतिसुकुमालो ।। [ ]

इत्येवमवगत्य सर्वैरपि प्रतिदिनं प्रतिसमयं प्रतिक्षणं प्रतिक्षणं स्वाध्यायपरैरेव भाव्यम्। इति स्वाध्यायः ।

।। अथ स्वाध्याये सेनश्राद्धसम्बन्धः ।।

कान्तीपूर्यां वरुणदेवो नृपः, श्रेष्ठी मिथ्यादृष्टिः सेनाख्यः, कुवलयमाला भार्या, हरि-हर-ब्रह्माणस्त्रयः पुत्राः । अन्यदा चतुर्ज्ञानी मुनिर्मासक्षपणपारणे तद्गृहमागतो भिक्षार्थम्, दृष्ट्वा श्रेष्ठी हृष्टः । बहुदिन-सक्तु-दिनद्वितीयातीतदधि-विषमिश्रमोदकादि दीयमानं निषिध्य श्रेष्ठी प्रतिबोधितः । क्रमेण श्राद्धधर्मं पालयति मुनेः कुटुम्बजीवनोपकारिणो निरन्तरं गुणस्मरणपरः । एकदा सुतकलत्रकलहपरं दृष्ट्वा सुताः पृथक्कृता यथोचितद्रव्यादि दत्त्वा, लघुभ्राता ज्येष्ठेन सह कलहं कुरुते 'त्वया सर्वमपलपितमिति' कथयन् राजकुलादौ च यथातथा वक्ति च, सेनश्रेष्ठिना पापभीरुणा स्वगृहविभागं दत्त्वोपशामितः ।

8. तपश्चेदं संयमयोगकं च स्वाध्याययोगं च सदाधिष्ठाता ।
शूर इव सेनया समस्तायुधोऽलमात्मनो भवत्यलं परेषाम् ।
9. स्वाध्याय-सद्ध्यानरतस्य तायिनोऽपापभावस्य तपसि रतस्य ।
विशुद्ध्यते यदस्य मलं पुराकृतं समीरितं रूप्यमलमिव ज्योतिषा ।।
10. अमद्यमांसाशी अमत्सरी च अभीक्ष्णं निर्विकृतिं गतश्च ।
अभीक्ष्णं कायोत्सर्गकारी स्वाध्याययोगे प्रयतो भवेत् ।।
11. स्वाध्यायं श्रुत्वा जातिस्मरणेन जातवैराग्यः । एकरजन्यां प्राप्तः, इष्टकमवन्तिसुकुमालः ।।

सज्झाय ~~~

कृतः। तेन क्रुधेन विषादिप्रयोगतो मारितः । शुभभावतोऽहं व्यन्तरो जातः । लघुबन्धुरपि ज्येष्ठभ्रात्रा राजकुले समर्प्पितः, गुप्तौ क्षिप्तो मृतः । विभङ्गज्ञानेन ज्येष्ठविलसितं ज्ञातम्, सकुटुम्बोऽपि मारितः । अन्योऽपि योऽत्र वसति तं मारयामि निश्चितम्, साम्प्रतं त्वं धर्मगुरुः सञ्जातः, दत्तमिदं गृहं तव इदं मन्निधानं गृहाण । आनीयाग्रे मुक्तं विलोकितं दश-दश-लक्षद्रव्यस्य । सेनो ब्रूते, 'हे बान्धव ! मम परिग्रहपरिमाणव्रते एकलक्षं मुक्तफलमस्ति । शेषा नव मम कार्ये नायान्तीति नादास्ये । व्यन्तरः, [प्राह-] पुण्यव्ययं कुर्याः । सेनः [प्राह-] परद्रव्यव्ययेन यत्पुण्यं तन्नाहं वाञ्छामि । व्यन्तरः [प्राह-] 'मत्सत्कमेव व्ययीकुरु पुण्यांशस्तव मम च भावी, अद्य वैरं त्यक्तं जीवदया प्रतिपन्नेति न तवाऽनृणी भवामि कदापि धर्मगुरुत्वात् । यतः -

"[16]सम्मत्तदायगाणं, दुप्पडियारं भवेसु बहुएसु ।
सव्वगुणमेलियाहि वि, उवयारसहस्सकोडीहिं ।।" [उपदेशमाला-२६९]

प्रभाते भार्यापि विलोकयन्ती तत्रागता, सेनं तथार्द्धिमहर्ध्याभरणविभूषितं दृष्ट्वा पृष्टवती, 'प्रियतम! कुत इयं ऋद्धिः ?' सेनः - 'धर्मादेव ।' एतज्ज्ञात्वा मित्रपुत्रादयो मिलिताः । सर्वेषां धर्मे स्थैर्यमजनि । एकदा प्रतिबोधकमुनेरुपदेशमेवमश्रृणोत् ।

"सहस्रलक्षसंख्यातैर्विशुद्धैः श्रावकैरिह ।
यद्भोजितैर्भवेत्पुण्यं मुनिदानात्ततोऽधिकम् ।।"

"शत्रुञ्जयसमं तीर्थं पात्रं चारित्रिणः समं ।
जीवरक्षासमो धर्मो, नास्ति विश्वत्रयेऽपरः ।।"

तदनु त्रिर्जिनार्चा-द्विरावश्यक-साधर्मिकवात्सल्यादिपुण्यपरायणैः व्यन्तरसत्कनवलक्ष्याः प्रासादं कारयामास । कलशारोपणसमये व्यन्तरेण रजन्यां राज्ञः श्रीगृहात् सौवर्णकलशशतमानीय समर्प्पितम्, राज्ञो भयं च नैव कार्यम्, प्रातः सेनो नृपनामाङ्कितान् कलशान् प्रेक्ष्य गतो राजभवने, कथितो व्यन्तरव्यतिकरः, राजा कलशानानाय्य निजनामांकांश्च दृष्ट्वा पप्रच्छ - 'एते क्व स्थापयिष्यन्ते ?' सेनेनोक्तम्- 'नव्यकारितम् प्रासादे,' राजा हृष्टो 'यथेच्छया स्थापयेत्याह ।' सेनोऽपि प्रासादकृत्यं समाप्य तीर्थयात्राऽष्टाह्निकादिपरः परिग्रहपरिमाणव्रतं निरतिचारं प्रतिपालयन् क्रमेण तत्रैव भवे प्रव्रज्यां प्रतिपाल्य केवलज्ञानं प्राप्य मोक्षसौख्यं प्राप्तवान् ।

।। इति स्वाध्याये सेनश्राद्धसम्बन्धः ।।

[इइ सज्झाय]

---

16. सम्यक्त्वदायकानां दुष्प्रतिकारं भवेषु बहुषु । सर्वगुणमीलिताभिरपि, उपकारसहस्रकोटिभिः ।।

[नमुक्कारो]

[१६-नमस्कारः]

अथ **नमस्कारं** दर्शयति -

"[1]**नाणावरणाईणं अणंतपुग्गलक्खयं तु कम्माणं ।**
नवकारक्खरमिक्कं पढमाणो लहइ भव्वजिओ ।।
[2]एसो मंगलनिलओ [१]भवविलओ सव्वसंतिजणओ अ ।
नवकारपरममन्तो चिन्तिअमित्तो सुहं देइ ।। [उपदेशतरङ्गीणी]
[3]नवकारइक्कअक्खरं पावं फेडेइ सत्तअयराणं ।
पन्नासं च पएणं पंचसयाइं समग्गेणं ।। [पञ्चनमस्कारफल-२९]
[4]अपुव्वो कप्पतरू [२]एसो चिंतामणी अपुव्वो अ ।
जो झायइ सयाकालं सो पावइ सिवसुहं विउलं ।। [सुक्तमुक्तावली-६५/५]
[5]करावत्ते अ जो पंचमंगलं बारसासंखं ।
आवत्तइ नववारा छलं नो तस्स कस्स वि ।।" [ ]

तथा -

"[6]**जाए वि जो भणिज्जइ[३], जेण य जायस्स होइ फलरिद्धी ।**
अवसाणे वि भणिज्जइ[३], जेण मुओ सुग्गइं जाइ ।।" [पञ्चनमस्कारफल-५]

नमस्कारलक्षगुणनेऽयं विधिः -

प्रातः श्रीमूलनायकस्य स्नात्रं पूजां च कृत्वा पञ्चशक्रस्तवैर्देवान् वन्दित्वा पञ्च-

---

१. 'भयविलओ सयलसंघसुहजणओ' रत्नसञ्चये । २. चिंतामणिकामकुंभकामगवी । रत्नसञ्चये । ३. 'पढिज्जइ' पञ्चनमस्कारफले ।

1. **ज्ञानावरणादीनामनन्तपुद्गलक्षयं तु कर्मणाम् । नमस्काराक्षरमेकं पठन् लभते भव्यजीवः ।।**
2. **एष मङ्गलनिलयो भवविलयः सर्वशान्तिजनकश्च । नवकारपरममन्त्रश्चिन्तितमात्रः सुखं ददाति ।।**
3. **नमस्कारैकाक्षरं पापं स्फेटयति सप्तसागराणाम् । पञ्चाशच्च पदेन पञ्चशतानि समग्रेण ।।**
4. **अपूर्वः कल्पतरुरेष चिन्तामणिरपूर्वश्च । यो ध्यायति सदाकालं स प्राप्नोति शिवसुखं विपुलम् ।।**
5. **करावर्त्ते च यो पञ्चमङ्गलं द्वादशसङ्ख्यम् । आवर्त्तते नववारान्, छलं नो तस्य कस्यापि ।।**
6. **जातेऽपि यो भण्यते येन च जातस्य भवति फलरिद्धी । अवसानेऽपि भण्यते येन मृतः सद्गतिं याति ।।**

परमेष्ठि-आराधनार्थं लोगस्स-कायोत्सर्गं कृत्वा पञ्चपरमेष्ठिनां पञ्चप्रतिमां मण्डयित्वा वासकर्पूरादिना पूजा क्रियते । ततो नमस्कारो जप्यते । तज्जापे पञ्चपरमेष्ठिनः पञ्चवर्णा ध्यायन्ते । जापे प्रति नमस्कारं देवस्य तिलकम्, पुष्पचटापनम्, वासक्षेपः, धूपोद्गहनम्, दीपकरणम्, चौक्षढौकनम्, जयतीति करणम्, सहस्रे पूर्णे जाते पूगढौकनम्, सम्पत्तौ लाङ्गलिफलदानं देववन्दनं च । सन्ध्यायां गुणनमोचने पञ्चशक्रस्तवैर्देवा वन्द्यन्ते । पञ्चपरमेष्ठि-आराधनार्थं चतुर्विंशतिलोगस्सकायोत्सर्गः, मोचने 'अविधि-आशातना हुई हुइ ते मनवचनकायकरी मिच्छामि दुक्कडमि'ति वाच्यम् । यथाशक्ति-निर्विकृत्याचाम्लादितपः कार्यः, स्त्रियः संघट्टोऽपि त्याज्यः, स्त्रिया पुरुषस्य इति । इति नमस्कारलक्षजापविधिः । अत्र दृष्टान्तश्च ।

।। नमस्कारलक्षजापे श्रीदेवकथा ।।

7
मणवंछिअरिद्धीओ इहपरलोए वि लहइ सुक्खाइं ।
जस्स मणे नवकारो सिरिदेवो इत्थुदाहरणं ।।

काम्पील्यपुरे श्रीहर्षो राजा, श्रीदेवः पुत्रः, अन्यदा दिग्विजयाय प्राप्तः, अनेकदेशाधिपान् जित्वा गतः कामरूपदेशम् । ततः कामरूपदेशाधिपेन सह घोरसमरमारभत । श्रीहर्षश्चिन्तयति - 'किमेभिर्वराकै-र्विनाशितैः ?' इति विचिन्त्य कामरूपदेशाधिपेन सह द्वंद्वयुद्धं चक्रे, परं नैकस्य जयः पराजयो वा । ततः सङ्ग्रामावलोकनदेवैर्वारितौ द्वावपि सङ्ग्रामात् । अनाप्तजयौ गतौ स्वस्थाने, श्रीहर्षः सम्प्राप्तवैराग्यः श्रीदेवं पुत्रं राज्ये निवेश्य शिक्षयति ।

8
अट्ठ न कीरन्ति सया, अट्ठ य कीरन्ति अट्ठ मुच्चन्ति ।
अट्ठ धरिज्जन्ति मणे न वीससे अट्ठमट्ठण्हं ।।१।।

9
खलसंगो १ कुकलत्तं २ कोहो ३ वसणं ४ मओ अ ५ कुधणं च ६ ।
कुग्गाहो ७ मुक्खत्तं ८ अट्ठ न कीरन्ति एआइं ।।२।।

---

7. *मनोवाञ्छितर्द्धय इहपरलोकेऽपि लभन्ते सौख्यानि । यस्य मनसि नमस्कारः श्रीदेवोऽत्रोदाहरणम् ।।*

8. *अष्टा न क्रियन्ते सदा, अष्टा च क्रियन्तेऽष्टा मुच्यन्ते । अष्टा धार्यन्ते मनसि न विश्वसेताष्टमष्टानाम् ।।*

9. खलसङ्गः कुकलत्रं क्रोधो व्यसनं मदश्च कुधनं च । कुग्राहो मुर्खत्वमष्टानि न क्रियन्ते एतानि ।।

मित्ती[10] १ सुगुणब्भासो २ कलासु कुसलत्तणं ३ सुमित्तो अ ४ ।
दक्खन्नं ५ करुणा ६ उज्जमो अ ७ इंदिदमो अट्ठ कीरन्ति ।।३।।

निलज्जिमा[11] १ अविणओ २ अकुसलया ३ निट्ठुरत्तण ४ माया ५ ।
अनओ ६ असच्च ७ मजसं ८ अट्ठ विमुच्चन्ति निच्चंपि ।।४।।

उवयारो[12] १ पडिवन्नं २ सुभासिअं ३ साहसं ४ सुविज्जा य ५ ।
देवो ६ सुगुरु ७ धम्मो ८ अट्ठ धरिज्जन्ति हिअयंमि ।।५।।

काम[13] १ भुअंगम २ जल ३ जलण ४ जुवइ ५ रोग ६ रिउ ७ भूमिनाहाणं ८ ।
अट्ठण्हं मा पुत्तय, सुमिणंमि वि वीससिज्जासि ।।६।।

इति शिक्षयित्वा श्रीहर्षः प्राव्राजीत्, श्रीदेवो राज्यं कुरुते, अन्यदा पितृवैरं स्मरन् कामरूपेशजयाय मन्त्रिभिर्वार्यमाणोऽपि गतः । चिरं युद्धम्, नष्टः सर्वसैन्यः, स्वयमप्येकाकी नष्टः । प्राप्तो महाटव्यां तृषार्तः, केनापि पुलिन्देण नीरं पायितः । ततो वने भ्राम्यन् ऋषिमेकं ददर्श ववन्दे च । ऋषिणा संसारानित्यतादिधर्मदेशना कृता । राजा प्राह - 'भगवन् ! न शक्तोऽहं यतिधर्मकरणे, सुकरं धर्ममादिश येनापदो निस्तरामि। ऋषिणा पञ्चपरमेष्ठि-नमस्कारगुणनविधिः प्रोक्तः ।

"करआवत्ते[14] जो पंचमंगलं, साहुपडिमसंखाए ।
नववारा आवत्तइ, छलंन्ति तं नो पिसायाई ।। [कहारयणकोस-१४३]

अट्ठेव[15] य अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ ।
जो गुणइ भत्तिजुत्तो, [४]सो पावई सासयं ठाणं ।। [चंदकेवलिचरिय-५९, ६०]

जो[16] गुणइ लक्खमेगं, पूएइ विहीए जिणनमुक्कारं ।
तित्थयरनामगोत्तं, सो [५]बन्धइ नत्थि सन्देहो ।।" [पञ्चनमस्कारफल-३१, १२]

---

४. 'तइय भवे लहइ सिद्धिं ।' चन्द्रकेवलिचरित्रे रत्नसञ्चये च । ५. 'सो पावई सासयं ठाणं ।।' रत्नसञ्चये ।

10. **मैत्री सुगुणाभ्यासः कलासु कुशलत्वं सुमित्रं च । दाक्षिण्यं करूणा उद्यमश्चेन्द्रियदमोऽष्टा क्रियन्ते ।।**
11. **निर्लज्जत्वमविनयोऽकुशलता निष्ठुरत्वं माया । अन्यायोऽसत्यमयशः अष्टा विमुच्यन्ते नित्यमपि ।।**
12. **उपकारः प्रतिपन्नं सुभाषितं साहसं सुविद्या च । देवः सुगुरुः धर्मोऽष्टा धार्यन्ते हृदये ।।**
13. **काम-भुजङ्गम-जल-ज्वलन-युवति-रोग-रिपु-भूमिनाथानाम् । अष्टानां मा पुत्र ! स्वप्नेऽपि विश्वसिष्यसि ।।**
14. **करावर्ते यः पञ्चमङ्गलं साधुप्रतिमासंख्यया । नववारमावर्तते छलन्ति तं नो पिशाचादयः ।।**
15. **अष्टैव चाष्टशता अष्टसहस्रं चाष्टकोट्यः । यो गुणयति भक्तियुक्तः स प्राप्नोति शाश्वतं स्थानम् ।।**
16. **यो गुणयति लक्षमेकं पूजयति विधिना जिननमस्कारम् । तीर्थकरनामगोत्रं स बध्नाति नास्ति सन्देहः ।।**

"यः करोति जनो लक्षजापमस्या नमस्कृतेः ।
विधिना तस्य जायन्ते, सम्पदश्च पदे पदे ।।"

राजन् ! विधिना लक्षजापे सर्वसम्पदः सर्वत्र जयश्रियश्च, राजानं मन्त्रं पपाठ, ऋषिः प्राह 'हे राजन्! पुरः प्रासादं यं पश्यसि, एतदपि पञ्चनमस्काराराधनफलं शृणुः ।

सौधर्मदेवलोके हेमप्रभनामा देवः केवलीपार्श्वे पृच्छति-'अहं क्वोत्पत्स्ये ? तत्र बोधिलाभो भावी न वे'ति । ज्ञानी प्राह - 'वानरो भविष्यसि, धर्मप्राप्तिर्दुःखेन भवित्री ।' ततः सुरेण स्वप्रतिबोधायास्यामटव्यां प्रतिशिलं नमस्कारपदान्युत्कीर्णानि। च्युत्वा वानरो जातः । नमस्कारपदानि दृष्ट्वा जातजातिस्मृति-रनशनेन मृत्वा पुनस्तत्रैव देवो जातः। तेन श्रीशान्तिनाथ-प्रासादोऽयं कारितः । इति श्रुत्वा देवराजापि तत्र प्रासादे विधिना लक्षनमस्कारजापं प्रारब्धवान् । क्षेत्रपालादयोऽप्युपसर्गान् कुर्व्वते । जापसमाप्तौ हेमप्रभदेवस्तुष्टः प्राह - 'राजन्नेतल्लक्षजापे ऐकाग्र्ये, तीर्थकृत्त्वम्, मध्यमभावे विद्याधर-चक्रित्वम्, स्वल्पैकाग्र्ये एकातपत्रम्, तवोपसर्गभवने स्वल्पैकाग्र्यं जातं तेन राजा भविष्यसीत्युक्त्वा काम्पील्यपुरे नीतः, स्थापितो निजे राज्ये, नमस्कारप्रभावात्कामरूपदेशाधिपादयः सेवका जाताः । चिरमेकातपत्रं राज्यं कृतवान् । नमस्कारप्रभावादेव मृत्वा माहेन्द्रो देवो जातः । तृतीयभवे मुक्तिं गमी ।

।। इति नमस्कारलक्षजापे श्रीदेवकथा ।।

श्रीआवश्यकनमस्कारनिर्युक्तौ -

17 "मग्गे १ अतिप्पणासो २ आयारे ३ विणयया ४ सहायत्तं ५ ।
पंचविहनमुक्कारं करेमि एएहिं हेऊहिं ।।

18 अडवीइ देसिअत्तं तहेव निज्जामया समुद्दंमि ।
छक्कायरक्खणट्ठा महगोवा तेण वुच्चंति ।।

19 अडविं सपच्चवायं वोलित्ता देसिओवएसेणं ।
पावंति जहिट्ठपुरं भवाडविंपि तहा जीवा ।।

---

17. मार्गोऽविप्रणाश आचारो विनयता सहायत्वम् । पञ्चविधनमस्कारं करोमि एभिर्हेतुभिः ।।

18. अटव्यां देशकत्वं तथैव निर्यामकाः समुद्रे । षट्कायरक्षणार्थं महागोपास्तेनोच्यन्ते ।।

19. अटवीं सप्रत्यपायामुल्लंध्य देशिकोपदेशेन । प्राप्नुवन्ति यथेष्टपुरं भवाटवीमपि तथा जीवाः ।।

नमुक्कारो ~~~

28
निज्जामगरयणाणं अमूढनाणमइकण्णधाराणं ।
वंदामि विणयपणओ तिविहेण तिदंडविरयाणं ।।
29
पालंति जहा गावो गोवा अहिसावयाइदुग्गेहिं ।
पउरतणपाणिआणि अ वणाणि पावंति तह चेव ।।
30
जीवनिकाया गावो जं पालंति ते महागोवा ।
मरणाइभया उ जिणा निव्वाणवणं च पावंति ।।
31
तो उवगारित्तणओ नमोऽरिहा भविअजीवलोगस्स ।
सव्वस्सेह जिणिंदा लोगुत्तमभावओ तह य ।।
32
अरहंत नमुक्कारो जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो होइ पुणो बोहिलाभाए ।।
33
अरिहंतनमुक्कारो धन्नाण भवक्खयं कुणंताणं ।
हिअयं अणुम्मुअंतो विसुत्तियावारओ होइ ।।
34
अरहंतनमुक्कारो एवं खलु वण्णिओ महत्थुत्ति ।
जो मरणंमि उवग्गे अभिक्खणं कीरए बहुसो ।।
35
अरिहंतनमुक्कारो सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं पढमं हवइ मंगलं ।।" [आ.नि.-९०३-९१७, ९२३-९२६]

---

28. निर्यामकरत्नेभ्योऽमूढज्ञानमतिकर्णधारेभ्यः । वन्दामि विनयप्रणतस्त्रिविधेन त्रिदण्डविरतेभ्यः ।।

29. पालयन्ति यथा गावो गोपा अहिश्वापदादिदुर्गैः । प्रचुरतृणपानियानि च वनानि प्राप्नुवन्ति तथैव च ।।

30. जीवनिकाया गाः, यत्पालयन्ति ते महागोपाः । मरणादिभयात्तु जिनाः, निर्वाणवनं च प्राप्नुवन्ति ।।

31. तस्मादुपकारित्वेन नमोऽर्हा भव्यजीवलोकस्य । सर्वस्येह जिनेन्द्राः, लोकोत्तमभावतस्तथा च ।।

32. अर्हन्नमस्कारो जीवं मोचयति भवसहस्रेभ्यः । भावेन क्रियमाणो भवति पुनः बोधिलाभाय ।।

33. अर्हन्नमस्कारो धन्यानां भवक्षयं कुर्वताम् । हृदयमनुन्मुञ्चन् विस्रोतसिकावारको भवति ।।

34. अर्हन्नमस्कार एवं खलु वर्णितो महार्थ इति । यो मरण उपाग्रेऽभिक्ष्णं क्रियते बहुशः ।।

35. अर्हन्नमस्कारः सर्वपापप्रणाशनः । मङ्गलानां च सर्वेषां प्रथमं भवति मङ्गलम् ।।

नमुक्कारो ~~~

44
सिद्धाण नमुक्कारो धन्नाण भवक्खयं कुणंताणं ।
हिअयं अणुम्मुअंतो विसुत्तियावारओ होइ ।।

45
सिद्धाण नमुक्कारो एवं खलु वण्णिओ महत्थुत्ति ।
जो मरणंमि उवग्गे अभिक्खणं कीरए बहुसो ।।

46
सिद्धाण नमुक्कारो सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं बिइअं हवइ मंगलं ।।

47
पंचविहं आयारं आयारमाणा तहा पभासंता ।
आयारं दंसंता आयरिया तेण वुच्चंति ।।

48
आयारो नाणाई तस्सायरणा पभासणाओ वा ।
जे ते भावायरिया भावायारोवउत्ता य ।।

49
आयरियनमुक्कारो जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो होइ पुणो बोहिलाभाए ।।

50
आयारियनमुक्कारो धन्नाणं भवक्खयं कुणंताणं ।
हिअयं अणुम्मुअंतो विसुत्तियावारओ होइ ।।

51
आयरियनमुक्कारो एवं खलु वण्णिओ महत्थुत्ति ।
जो मरणंमि उवग्गे अभिक्खणं कीरए बहुसो ।।

---

44. सिद्धानां नमस्कारो धन्यानां भवक्षयं कुर्वताम् । हृदयमनुन्मुञ्चन् विस्रोतसिकावारको भवति ।।

45. सिद्धानां नमस्कार एवं खलु वर्णितो महार्थ इति । यो मरण उपाग्रेऽभिक्ष्णं क्रियते बहुशः ।।

46. सिद्धानां नमस्कारः सर्वपापप्रणाशनः । मङ्गलानां च सर्वेषां द्वितीयं भवति मङ्गलम् ।।

47. पञ्चविधमाचारमाचरन्तस्तथा प्रभासमाणाः । आचारं दर्शयन्त आचार्यास्तेनोच्यन्ते ।।

48. आचारो ज्ञानादिस्तस्याचरणात् प्रभाषणाद्वा । ये ते भावाचार्या भावाचारोपयुक्ताश्च ।।

49. आचार्यनमस्कारो जीवं मोचयति भवसहस्रेभ्यः । भावेन क्रियमाणो भवति पुनर्बोधिलाभाय ।।

50. आचार्यनमस्कारो धन्यानां भवक्षयं कुर्वताम् । हृदयमनुन्मुञ्चन् विस्रोतसिकावारको भवति ।।

51. आचार्यनमस्कार एवं खलु वर्णितो महार्थ इति । यो मरण उपाग्रेऽभिक्ष्णं क्रियते बहुशः ।।

नमुक्कारो ~~~

60
उवज्झायनमुक्कारो सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं चउत्थं हवइ मंगलं ।।

61
निव्वाणसाहए जोए, जम्हा साहंति साहुणो ।
समा य सव्वभूएसु, तम्हा ते भावसाहुणो ।।

62
किं पिच्छसि साहूणं तवं व निअमं व संजमगुणं वा ।
तो वंदसि साहूणं ? एअं मे पुच्छिओ साह ।।

63
विसयसुहनिअत्ताणं विसुद्धचारित्तनिअमजुत्ताणं ।
तच्चगुणसाहयाणं सहायकिच्चुज्जयाण नमो ।।

64
असहाइ सहायत्तं करंति मे संजमं करिंतस्स ।
एएण कारणेणं नमामिऽहं सव्वसाहूणं ।।

65
साहूण नमुक्कारो जीवं मोएइ भवसहस्साओ ।
भावेण कीरमाणो होइ पुणो बोहिलाभाए ।।

66
साहूण नमुक्कारो धन्नाणं भवक्खयं कुणंताणं ।
हिअयं अणुम्मुअंतो विसुत्तियावाराओ होइ ।।

67
साहूण नमुक्कारो एवं खलु वण्णिओ महत्थुत्ति ।
जो मरणंमि उवग्गे अभिक्खणं कीरए बहुसो ।।

68
साहूण नमुक्कारो सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं पंचमं हवइ मंगलं ।।

---

60. उपाध्यायनमस्कारः सर्वपापप्रणाशनः । मङ्गलानां च सर्वेषां चतुर्थं भवति मङ्गलम् ।।
61. निर्वाणसाधकान् योगान् यस्मात् साधयन्ति साधवः । समाश्च सर्वभूतेषु तस्मात्ते भावसाधवः ।।
62. किं प्रेक्ष्यसि साधूनां तपश्च नियमश्च संयमगुणं वा । तस्मात्वन्दसे साधूनामेतद् मया पृष्टः कथय ।।
63. विषयसुखनिवृत्तानां विशुद्धचारित्रनियमयुक्तानाम् । तत्त्वगुणसाधकानां सहायकृत्योद्यतानां नमः ।।
64. असहायस्य सहायत्वं कुर्वन्ति मम संयमं कुर्वतः । अनेन कारणेन नमाम्यहं सर्वसाधुभ्यः ।।
65. साधूनां नमस्कारो जीवं मोचयति भवसहस्रेभ्यः । भावेन क्रियमाणो भवति पुनर्बोधिलाभाय ।।
66. साधूनां नमस्कारो धन्यानां भवक्षयं कुर्वताम् । हृदयमनुन्मुञ्चन् विस्रोतसिकावारको भवति ।।
67. साधूनां नमस्कार एवं खलु वर्णितो महार्थ इति । यो मरण उपाग्रेऽभिक्ष्णं क्रियते बहुशः ।।
68. साधूनां नमस्कारः सर्वपापप्रणाशनः । मङ्गलानां च सर्वेषां पञ्चमं भवति मङ्गलम् ।।

नमुक्कारो ~~~

अत्र कथा -

।। अथ नमस्कारफले राम-लक्ष्मण-सीता-रावण-सुग्रीवानां पूर्वभवकथा ।।

क्षेमपुरं पुरं, तत्र नयदत्तश्रेष्ठी, वसुनन्दा भार्या, तयोः धनदत्त-वसुदत्तौ द्वौ पुत्रौ, तयोरेको द्विजः प्रकृत्या दुर्जनो मित्रमभूत् । तथा तत्रैव पुरे समुद्रदत्तश्रेष्ठी, तत्पुत्री गुणवती रूपसौभाग्याद्यतिशयवती । समुद्रदत्तेन सा कन्या सर्वसमक्षं धनदत्ताय दत्ता । तस्मिन्नवसरे तत्पुरनिवासिना श्रीकान्तश्रेष्ठिना धनादिना समुद्रदत्तं प्रलोभ्यान्तराले परिणीता गुणवती कन्या, अयं वृतान्तो द्विजमित्रेण धनदत्तलघुभ्रात्रे निवेदितः । तेन भृशमसहिष्णुना परावज्ञारोषेण खड्गप्रहारेण श्रीकान्तो मारितः, श्रीकान्तेनाऽपि म्रियमाणेन वसुदत्तोऽपि । गुणवती पित्रा समाश्वासिता, धर्मोद्यमाय प्रेरिताऽपि बहुलकर्मतया धर्मनिन्दा-गुणद्वेषिणी-साधूपहासादिपरा कालेन मृत्वा वने मृगी जज्ञे । वसुदत्त-श्रीकान्तौ तत्रैव वने मृगौ । तस्या मृग्याः कृते युद्धपरौ मृतौ, एवं हरिण्या हारिणे भवे, महिष्या माहिषे भवे, हस्तिन्या हस्तिने जन्मन्यन्योन्यं तौ मृतिं गतौ । एवं त्रयोदशभवान् वैरानुबन्धेन तस्याः कृते निधनं गतौ । अथ एतत्स्वरूपं धनदत्तेन ज्ञातम्, स वैराग्याद्गृहादि त्यक्त्वा पृथ्वीं भ्राम्यन् राजपुरे गतस्तत्र साधवो दृष्टाः । रात्रौ क्षुत्पिपासापीडितः साधुपार्श्वे भोजनं याचितवान् साधुभिरुक्तम् - भद्र ! अस्माकमुपाश्रयेऽन्नपानादिकं ध्रियते न, विशेषतो रात्रौ तवापि पापहेतुत्वान्न युक्तं रात्रिभोजनम्।

यतः -

"स कालः कश्चिदत्रास्ति, यत्र नैवोपभुज्यते ।
हित्वाऽकालं ततः काले, यो भुञ्जीत स धर्मवित्।।

आयुर्वर्षशतं लोके, तदर्धं स उपोषितः ।
करोति विरतिं धन्यो यः सदा निशिभोजने ।।

घटिकार्धं घटीमात्रं यो नरः कुरुते व्रतम्।
स स्वर्गी किं पुनर्यस्य, व्रतं यामचतुष्टयम् ।।

जीवितं देहिनां यस्मादनेकापायसङ्कुलम् ।
कथञ्चिद्दैवयोगः स्यान्नक्तं सोऽनशनी भवेत् ।।"

इत्यादि श्रुत्वा सम्यक्त्वमूलोऽणुव्रतादिको गृहिधर्मो गृहीतः । तं सम्यक् पालयित्वा सौधर्मे सुरो जातस्ततश्च्युत्वा रत्नपुरे मेरुप्रभवणिक्पुत्रः पङ्कजमुखनामा जातः । क्रमेण यौवनं प्राप्तः, अन्यदा अमी अश्वा वाह्या इति प्रतिशिक्षितोऽन्यदा अश्वारूढो बहिरुद्याने क्रीडार्थं गतः । तत्रैकं वृषभं वृद्धं दुर्बलाङ्गं पृथिव्यां पतितं मुमूर्षं विभाव्य संवेगनिर्वेदागतचित्तो वृषभकर्णे पञ्चपरमेष्ठिनमस्कारो दत्तः। वृषभोऽपि कोऽप्ययं ममोपकारी परमबन्धुः कमपि महामन्त्रं ददानोऽस्तीति भावनया श्रुतनमस्कारो मृतः । तत्रैव रत्नपुरे सप्तच्छदराजा, भुवनीराज्ञी, तयोः पुत्रो वृषभध्वजः सञ्जज्ञे ज्ञान-विज्ञान-द्वासप्ततिकला-सौभाग्यसागरः । यथाऽयं

नमुक्कारो ~~~

[परोवयारो]

[१७-परोपकारः]

अथ **परोपकारं** भावयति ।

"पिबन्ति नद्यः स्वयमेव नाम्भः, खादन्ति न स्वादु फलानि वृक्षाः ।
नादन्ति[१] सस्यं खलु वारिवाहाः, परोपकाराय सतां विभूतयः ।।" [ ]

उत्तमतापि परार्थसाधनेनैव । यदुक्तम् -

"नम्रत्वेनोन्नमन्तः परगुणकथनैः[२] स्वान् गुणान् ख्यापयन्तः;
स्वार्थान्[३] सम्पादयन्तो विततबहुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मुखान्[४]दुःखयन्तः;
सन्तः साश्चर्यचर्या[५] जगति बहुनताः कस्य नाभ्यर्थनीयाः ।।" [ ]

ये जात्योत्तमास्ते परेषामुपकारं कृत्वापि प्रत्युपकारं न समीहन्ते । यतः -

"स्थितिः सतां कानप्युपकृत्य यत्ते प्रयान्ति तत्प्रत्युपकारभीताः ।
निर्वाप्य पृथ्वीं तपतापतप्तां न वारिदा नेत्रपथे स्फुरन्ति ।।" [ ]

उपकारकरणं दूरे तत्समीहापि धन्यत्वातिधन्यत्वख्यापका । यतः -

"धन्यास्ते प्राणिनो येषां भवत्युपकृतिस्पृहा ।
ते धन्यतमा येषां सा सद्यः सिद्धिमश्नुते ।।" [ ]

आगमेऽपि परोपकारः पुण्याङ्गतया प्रमाणीकृतः । यतः -

[1]आयारवत्थुतइअं जहन्नयं होइ नवमपुव्वस्स ।
तहिअं कालण्णाणं दस उक्कोसेण भिन्नाइं ।।" [बृहत्कल्पभाष्य-१३८५]

जिनकल्पिकानां जघन्यकं श्रुतं **नवमपूर्वस्य** प्रत्याख्याननामकस्या**चारा**ख्यं **तृतीयं वस्तु,** तस्मिन्**नधीते** सति **कालज्ञानं भवती**त्यतस्तदर्वाक्-श्रुतपर्याये वर्त्तमानस्य न जिनकल्पप्रतिपत्तिः ।

---

१. *'पयोमुचां किंव्वचिदस्ति शस्यं'* हस्त० । २. *'...नुतिभिः'* हस्त० । ३. *'पुष्णतः स्वीयकार्यं सततकृतमहारम्भयत्नाः'* हस्त० । ४. 'दुर्जनान् खर्वयन्तः' हस्त० । ५. 'त्रिभुवनभुवने वन्दनीया भवन्ति' हस्त० ।

1. आचारवस्तुतृतीयं जघन्यं भवति नवमपूर्वस्य । तदधीतं कालज्ञानं दशोत्कर्षेण भिन्नानि ।।

परोवयारो ~~~

"[7]उप्पण्णंमि अणंते नट्ठंमि य छाउमत्थिए नाणे ।
राईए संपत्तो महसेणवणंमि उज्जाणे ।।" [आवश्यकनिर्युक्ति-५३९]

प्रथमसमवसृतौ देवमनुष्येषु कस्यापि सम्यक्त्वमात्रप्राप्तेरभावाद् श्रीअपापामहापुर्यां परोपकारलाभमेवावधार्य प्राप्तः श्रीवीरः, तत्र च चतुश्चत्वारिंशच्छतद्विजप्रतिबोधोपकारः । देवकृतसमवसृतिरपि परोपकारकरणप्रवणोपदृश्यमानाऽस्ति। यतः- श्रीमरुदेवास्वामिन्याः, [श्रीगौतमः] अष्टापदे यात्रां कृत्वा पश्चाद्वलनसमये स्वहस्तदीक्षितत्र्यधिकपञ्चदशशततापसानां मध्ये एकाधिक[पञ्च]शततापसानां श्रीआदिजिन-श्रीवीरजिन-समवसरणदर्शनमात्र एव केवलोत्पत्तिः ।

श्रीमुनिसुव्रतस्वामिनो भृगुकच्छे केवलमुपकारमेव हृदि निधाय षष्टियोजनान्यतिक्रम्य समवसृताः ।

श्रीवीरेण स्वनिर्वाणसमये परोपकारार्थमेव षोडशप्रहरान् धर्मदेशनां कुर्वता पञ्चपञ्चाशदध्ययनानि पापफलविपाकानि पञ्चपञ्चाशदध्ययनानि पुण्यफलविपाकानि प्रकटीकृतानि, तत्रापि परोपकारमेव हृदि निधाय ।

यत्सर्वेभ्यस्तीर्थकरेभ्यः सर्वे गणधारिणस्त्रिपदीमधिगम्य द्वादशाङ्गीभङ्गीं विदधते तत्रापि परोपकार एव मुख्यः । यतः श्रीआवश्यके -

"[8]तवनियमनाणरुक्खं आरूढो केवली अमियनाणी ।
तो मुयइ नाणवुट्ठिं भवियजणविबोहणट्ठाए ।।
[9]तं बुद्धिमएण पडेण गणहरा गिण्हिउं निरवसेसं ।
तित्थयरभासियाइं गंथंति तओ पवयणट्ठा ।।

7. उत्पन्नेऽनन्ते नष्टे च छाद्मस्थिके ज्ञाने । रात्र्यां संप्राप्तो महसेनवनमुद्यानम् ।।

8. तपनियमज्ञानवृक्षमारूढः केवली अमितज्ञानी । ततो मुञ्चति ज्ञानवृष्टिं भव्यजनविबोधनार्थम् ।।

9. तां बुद्धिमयेन पटेन गणधरा ग्रहीतुं निरवशेषाम् । तीर्थंकरभाषितानि ग्रथ्नन्ति ततः प्रवचनार्थम् ।।

परोवयारो ~~~

अस्संजयस्स कहं चलणेसु निवडिज्जइ ? आयरिओ भणइ - दुप्पडिआरं जओ तिण्हं दुक्खं उवगारिस्स पच्चुवयारो किज्जइ ।

'तं जहा - अम्मापिउणो, भट्टिस्स, धम्मायरियस्स ।

संपातो वि अ णं केइ पुरिसे अम्मापियरं सयपागसहस्सपागेहिं तेल्लेहिं अब्भंगेत्ता, सुरभिणा गंधट्टएणं उव्वट्टित्ता, तिहिं उदगेहिं मज्जावित्ता, सव्वालंकारविभूसियं करेत्ता, मणुन्नं थालीपागसुद्धं अट्ठारसवंजणाउलं भोयणं भोयावेत्ता जावज्जीवं पिट्ठिवडेंसियाए परिवहेज्जा, तेणावि तस्स अम्मापिउस्स दुप्पडियारं भवइ । अहे णं से त्तं अम्मापियरं केवलिपण्णत्ते धम्मे आघवइत्ता पन्नवइत्ता परूवइत्ता ठावइत्ता भवइ, तेणामेव तस्स अम्मापिउस्स सुप्पडियारं भवइ समणाउसो !

केइ महच्चे दरिद्दं समुक्कसेज्जा, तते णं से दरिद्दे समुक्किट्ठे समाणे पच्छा पुरं च णं विउलभोगसमितिसमन्नागए यावि विहरेज्जा, तते णं से महच्चे अन्नया कयाइ दरिद्दीहूए समाणे तस्स दरिद्दस्स अंतिए हव्वमागच्छेज्जा, तए णं से दरिद्दे तस्स भट्टिस्स सव्वस्समवि

चरणेषु निपात्यते ? आचार्यो भणति- दुष्प्रतिकारं यतस्त्रयाणां दुःखमुपकारिणः प्रत्युपकारो क्रियते । 'तद् यथा - अम्बापितुः, भर्त्तुः, धर्माचार्यस्य ।

संप्रातरपि च कश्चित् पुरुषः अम्बापितरं शतपाकसहस्रपाकाभ्यां तैलाभ्यां अभ्यज्य, सुरभिना गन्धाट्टकेन उद्वर्त्य, त्रिभिः उदकैः मज्जयित्वा, सर्वालङ्कारविभूषितं कृत्वा, मनोज्ञं स्थालीपाकशुद्धम् अष्टादशव्यञ्जनाकुलं भोजनं भोजयित्वा यावज्जीवं पृष्ठ्यवतंसिक्या परिवहेत्, तेनाऽपि तस्य अम्बापितुः दुष्प्रतिकारं भवति । अथ स तं अम्बापितरं केवलिप्रज्ञप्ते धर्मे आख्याय प्रज्ञाप्य प्ररूप्य स्थापयिता भवति, तेनैव तस्य अम्बापितुः सुप्रतिकारं भवति आयुष्मन् ! श्रमण !

कश्चित् महार्चो दरिद्रं समुत्कर्षयेत् । ततः स दरिद्रः समुत्कृष्टः सन् पश्चात् पुरश्च विपुलभोगसमिति-समन्वागतश्चापि विहरेत् । ततः स महार्चः अन्यदा कदापि दरिद्रीभूतः सन् तस्य दरिद्रस्य अन्तिके शीघ्रमा-गच्छेत् । ततः स दरिद्रस्तस्मै भर्त्रे सर्वस्वमपि ददत् तेनापि तस्य दुष्प्रतिकारं भवति । अथ स तं भर्तारं केवलिप्रज्ञप्ते धर्मे आख्याय प्रज्ञाप्य प्ररूप्य स्थापयिता भवति, तेनैव तस्य भर्तुः सुप्रतिकारं भवति ।

कश्चित् तथारूपस्य श्रमणस्य वा माहनस्य वा अन्तिके एकमपि आर्यं धार्मिकं सुवचनं श्रुत्वा निशम्य कालमासे कालं कृत्वा अन्यतरेषु देवलोकेषु देवतया उपपन्नः । ततः स देवः तं धर्माचार्यं दुर्भिक्षात् वा देशात् सुभिक्षं देशं संहरेत्, कान्तारात् वा निष्कान्तारं कुर्यात्, दीर्घकालिकेन वा रोगातङ्केन अभिभूतं सन्तं विमोचयेत्, तेनापि तस्य धर्माचार्यस्य दुष्प्रतिकारं भवति । अथ स तं धर्माचार्यं केवलिप्रज्ञप्तात् धर्मात् भ्रष्टं सन्तं भूयोऽपि केवलिप्रज्ञप्ते धर्मे आख्याय यावत् स्थापयिता भवति, तेनैव तस्य धर्माचार्यस्य सुप्रतिकारं भवति । अतस्तस्य पादेष्वपि निपतता न दोषः ।

परोवयारो ~~~

।। अथोपकारे श्रीकृष्णसम्बन्धः ।।

अन्यदा सौधर्मेन्द्रो निजसभायां प्राह - 'भो देवाः ! श्रीकृष्णः कस्याप्यवगुणं न जल्पति ।' तच्च श्रुत्वा कश्चित्सुरः परीक्षार्थमागत्य कृष्णस्य मार्गे गच्छत एकः श्वा मृतः श्यामो दुर्गंधो विकृतस्तेन, कृष्णोऽपि तं तथाविधं दृष्ट्वा सतानवगुणान्मुक्त्वा दन्तनैर्मल्यं प्रशंसितवान् । यथा -

"दोषजालमपहाय मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपहाय गृह्णते वारिधेः सलिलमेव वारिदाः ।।" [ ]

तद् दृष्ट्वा [स[६] देवस्तुष्टः सन् शक्रप्रशंसनवृत्तान्तकथनपूर्वकं 'हे महाभाग ! वरं वृणु' इति केशवमुवाच । कृष्णोऽपि] प्राह - 'भो देव ! यदि तुष्टोऽसि तदा तथा कुरु यथा सर्वजनानां रोगो न भवति ।'

"उपकर्तुं प्रियं [७]वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ।।" [शार्ङ्गधरपद्धति-२३१]

"अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।।" [ ]

देवेन चन्दनभेरी समर्प्पिता प्रोक्तं चास्याः शब्देन षण्मासान् जने रोगा न भविष्यन्तीत्युक्त्वा सुरस्तिरोदधे । एवं नश्यति रोगे कालान्तरे भेरीपालकस्तान् लोलेन खण्डिकृतवान् पुनः रोगोपशमनाय धन्वन्तरि-वैतरिणीनाम्नो वैद्यं चकार ।

।। इत्युपकारे श्रीकृष्णसम्बन्धः ।।

तथा श्रीहरिभद्रसूरिप्रबन्धः -

।। परोपकारे श्रीहरिभद्रसूरिसम्बन्धः ।।

श्रीचित्रकूटे हरिभद्रो विप्रश्चतुर्दशविद्याज्ञानज्ञः । वि[८]द्ययोदरं स्फुटतीति उदरे पट्टः, जालं, कुद्दालो निःश्रेणी [च, तैः] सह चलति । यत्पठितमहं न जानामि तस्य शिष्यो भवामीति प्रतिज्ञा । एकदा चतुष्पथासन्नभूमिमव्रजत् । याकिनी नाम साध्वी, तया

"चक्किदुगं[16] हरिपणगं पणगं चक्कीण केसवो चक्की ।
केसव चक्की केसव दु चक्की केसी य चक्की य ।।" [आवश्यकनिर्युक्ति-४२१]

---

६. *[X X X] अयं पाठः श्रीगुणविजयकृत - श्री नेमिनाथचरित्रादुद्धृत्यात्र पूरितः ।* ७. 'कर्तुं' हस्त० । ८. 'दृश्यां पादुकाः, पञ्चमदूरीकृतदर्शनाऽन्यानि पञ्चमाद्य इति कृत्वा, उदरे पट्टः' वा 'स्वविद्यया तिरस्कृतपंचदर्शनानि वदति च जनेषु विद्ययोदरं स्फाटयति, अतो मयोदरे पट्टबन्धः क्रियते ।' वा एतादृशः पाठः मुद्रितप्रबन्धकोशे ।

16. **चक्रवर्त्तिद्वयं हरिपञ्चकं पञ्चकं चक्रवर्त्तिनां केशवश्चक्रवर्ती ।
केशवश्चक्रवर्ती केशवो द्वौ चक्रवर्त्तिनौ केशवश्च चक्रवर्ती च ।।**

परोवयारो ~~~

हंसस्य शिरश्छित्त्वा राज्ञे दर्शितं तैः । तेनापि गुरवे दत्तम् । गुरुराह-किमनेन कपलिकामानायय । गता भटाः । रात्रौ चित्रकूटे प्राकारकपाटयोर्दत्तयोस्तदासन्ने सुप्तस्य परमहंसस्य शिरश्छित्त्वा तैस्तत्रार्पितम् । तेषां बौद्धानां तत्सूरेश्च सन्तोषः । प्रातः श्रीहरिभद्रसूरिभिः शिष्यकबन्धो दृष्टः । कोपः । तैलकटाहाः कारिताः । अग्निना तापितं तैलम् । १४४४ बौद्धा होतुं खे आकृष्टाः[शकुनिकारूपेण पतन्ति] । गुरुभिर्वृत्तान्तो ज्ञातः [प्रतिबोधाय] साधू प्रहितौ । ताभ्यां चत्वारः गाथा दत्ताः -

18
गुणसेण-अग्गिसम्मा सीहा-णंदा य तह पिया-पुत्ता ।
सिहि-जालिणि माइ-सुया, धण-धणसिरिमो य पइ-भज्जा ।।
19
जय-विजया य सहोयर धरणो लच्छी य तह पई-भज्ञा ।
सेण-विसेणा पित्तिय-उत्ता जर्म्मंमि सत्तमए ।।
20
गुणचन्द-वाणवंतर-समराइच्च-गिरिसेणपाणो उ ।
एगस्स तओ मुक्खोऽणंतो बीयस्स संसारो ।।
21
जह जलइ जलउ लोए कुसत्थपवणाहओ कसायग्गी ।
तं चुज्जं जं जिणवयणअमियसित्तो वि पज्ज़लइ ।।

बोधः । शान्तिः । १४४४ ग्रन्थाः प्रायश्चित्तपदे कृताः । चित्रकूटतलहट्टिकास्थेन तैलवणिजा प्रतयः कारिताः । तत्प्रथमं याकिनीधर्मसूनुरिति हारिभद्रग्रन्थेष्वन्तेऽभूत्। १४४० पुनर्भवविरहान्तता । 'गुणसेणअग्गिसम्मा' इत्यादिगाथात्रयप्रतिबद्धं समरादित्यचरित्रं नव्यं शास्त्रं क्षमावल्लीबीजं कृतम् । १०० शतक-पञ्चाशत्-षोडशक-अष्टक-पञ्चलिङ्गी-अनेकान्तजयपताका-न्यायावतारवृत्ति-पञ्चवस्तुक-पञ्चसूत्रक-श्रावकप्रज्ञप्ति-नाणायत्तकप्रभृतीनि हारिभद्राणि ।

।। श्रीसिद्धर्षिगणिप्रबन्धः ।।

अत्रान्तरे श्रीमालपुरे कोऽपि धनी श्रेष्ठी जैनश्चतुर्मासके सपरिकरो देवतायतनं व्रजन् सिद्धाख्यं राजपुत्रं द्यूतकारयुवानं देयकनकपदे निर्दयैर्द्यूतकारैर्गर्तायां निक्षिप्तं कृपया तद्देयं दत्त्वा अमोचयत् । गृहमानीयाभोजयत् । अपाठयत् । सर्वकार्याध्यक्षमकरोत्। पर्यणाययत् । माता प्रागप्यासीत् । पृथग् गृहमण्डनिका । श्रेष्ठिप्रसादाद्धनम्।

18. गुणसेन-अग्निशर्माणौ सिंहा-ऽऽनन्दौ च तथा पितृ-पुत्रौ ।
शिखि-जालिन्यौ मातृ-सुते धन-धनश्रियौ च पति-भार्ये ।।

19. जय-विजयौ च सहोदरौ धरणो लक्ष्मीश्च तथा पति-भार्ये । सेन-विसेनौ पितृव्य-पुत्रौ जन्मनि सप्तमके ।।

20. गुणचन्द्र-वानव्यन्तरौ समरादित्यः गिरिसेनप्राणस्तु । एकस्य ततो मोक्षोऽनन्तो द्वितीयस्य संसारः ।।

21. यथा ज्वलति ज्वलयित्वा लोकान् कुशास्त्रपवनाहतः कषायाग्निः ।
तं भ्रष्टं यं जिनवचनामृतसिक्तोऽपि प्रज्वलति ।।

परोवयारो ~~~

[जयणा]

[१८-यतना]

अथ **यतना** सम्यक्तया विधेया । यतना श्रीआगमोक्त-गुणदोषाश्रयत्यागरूपा, सा तु प्रतिपालयितुं सुकरैव । यतः -

"[1]**कालस्स य परिहाणी, संजमजोगाइं नत्थि खित्ताइं ।**
जयणाए वट्टियव्वं, न हु जयणा भंजए अंगं ।।" [उपदेशमाला- २९३]

ओघनिर्युक्तावपि साधूनाश्रित्य यतना यथा -

"[2]**पडिलेहणं कुणन्तो, मिहो कहं कुणइ जणवयकहं वा ।**
देइ व पच्चक्खाणं, वाएइ सयं पडिच्छइ वा ।।
[3]**पुढवी-आउक्काए, तेऊ-वाऊ-वणस्सइ-तसाणं ।**
पडिलेहणापमत्तो, छण्हं पि विराहओ होइ ।।
[4]**पुढवी-आउक्काए तेऊ-वाऊ-वणस्सइ-तसाणं ।**
पडिलेहणा आउत्तो छण्हंपि आराहओ होइ ।।" [ओ.नि.-२७३, २७४, २७६]

तथोपदेशमालायामपि -

"[5]**समिई-कसाय-गारव-इंदिय-मय-बंभचेरगुत्तीसु ।**
सज्झाय-विणय-तव-सत्तिओ य जयणा सुविहियाणं ।।"[उपदेशमाला-२९४]

श्राद्धानामपि यतना -

"[6]**वंदइ उभओ कालं पि, चेइयाइं थयथुईपरमो ।**
जिणवरपडिमाघरधूव-पुप्फगंधच्चणुज्जुत्तो ।।

---

1. कालस्य च परिहाणिः संयमयोग्यानि न सन्ति क्षेत्राणि । यतनया वर्त्तितव्यं न हु यतना भनक्त्यङ्गम् ।।
2. *प्रतिलेखनां कुर्वन् मिथः कथां करोति जनपदकथां वा । ददाति वा प्रत्याख्यानं वाचयति स्वयं प्रतीच्छति वा।।*
3. पृथ्व्यप्काययोस्तेजोवायुवनस्पति-त्रसानाम् । प्रतिलेखनायां प्रमत्तः षण्णामपि विराधको भवति ।।
4. पृथ्व्यप्काययोस्तेजोवायुवनस्पति-त्रसानाम् । प्रतिलेखनायामावृत्तः षण्णामप्याराधको भवति ।।
5. समिति-कषाय-गौरव-इन्द्रिय-मद-ब्रह्मचर्यगुप्तिषु । स्वाध्याय-विनय-तप-शक्तितश्च यतना सुविहितानाम्।।
6. वन्दते उभयकालमपि चैत्यानि स्तवस्तुतिपरमः । जिनवरप्रतिमागृहधूपपुष्पगन्धार्चनोद्युक्तः ।।

[7]सुविणिच्छियएगमई, धम्मम्मि अणण्णदेवओ य पुणो ।
न य कुसमएसु रज्जइ, पुव्वावरवाहयत्थेसु ।।

[8]दट्ठूणं कुलिंगीणं, तस-थावरभूयमद्दणं विविहं ।
धम्माओ न चालिज्जइ, देवेहिं सइंदएहिं पि ।।

[9]वंदइ पडिपुच्छइ, पज्जुवासेइ साहुणो सययमेव ।
पढइ सुणेइ गुणेइ य, जणस्स धम्मं परिकहेई ।।

[10]दढसीलव्वयनियमो, पोसइ-आवस्सएसु अक्खलिओ ।
महुमज्जमंसपंचविह - बहुविहफलेसु पडिक्कंतो ।।

[11]नाहम्मकम्मजीवी, पच्चक्खाणे अभिक्खणमुज्जुत्तो ।
सव्वं परिमाणकडं, अवरज्झइ तं पि संकंतो ।।

[12]निक्खमण-नाण-निव्वाण-जम्मभूमीओ वंदइ जिणाणं ।
न य वसइ साहुजणविरहियंमि देसे बहुगुणे वि ।।

[13]परतित्थियाण पणमण-उब्भावण-थुणण-भत्तिरागं च ।
सक्कारं सम्माणं, दाणं विणयं च वज्जेई ।।

[14]पढमं जईण दाऊण, अप्पणा पणमिऊण पारेई ।
असई य सुविहियाणं, भुंजइ य कयदिसालोओ ।।

---

7. सुविनिश्चितैकमतिः धर्मेऽनन्यदेवतश्च पुनः । न च कुसमयेषु रज्यते पूर्वापरव्याहतार्थेषु ।।
8. दृष्ट्वा कुलिङ्गिनां त्रस-स्थावरभूतमर्दनं विविधम् । धर्मान्न चाल्यते देवैः सेन्द्रैरपि ।।
9. वन्दते प्रतिपृच्छति पर्युपास्ते साधून् सततमेव । पठति शृणोति गुणयति च जनस्य धर्मं परिकथयति ।।
10. दृढशीलव्रतनियमः पौषधावश्यकेष्वस्खलितः । मधु-मद्य-मांस-पञ्चविध-बहुविधफलेषु प्रतिक्रान्तः ।।
11. नाधर्मकर्मजीवी प्रत्याख्यानेऽभीक्ष्णमुद्युक्तः । सर्वं परिमाणकृतमपराध्यति तमपि सङ्क्रान्तः ।।
12. निष्क्रमण-ज्ञान-निर्वाणजन्मभूमयो वन्दते जिनानाम् । न च वसति साधुजनविरहिते देशे बहुगुणेऽपि ।।
13. परतीर्थिकानां प्रणमनोद्भावनस्तवनभक्तिरागं च । सत्कारं सन्मानं दानं विनयं च वर्जयति ।।
14. प्रथमं यतिभ्यो दत्वाऽऽत्मना प्रणम्य पारयति । असति च सुविहितानां भुङ्क्ते च कृतदिगालोकः ।।

15 साहूण कप्पणिज्जं, जं नवि दिन्नं कहिं चि किंचि तहिं ।
धीरा जहुत्तकारी, सुसावगा तं न भुंजंति ।।

16 वसही-सयणा-ऽसण-भत्त-पाण भेसज्जवत्थपत्ताई ।
जइ वि न पज्जत्तधणो, थोवा वि हु थोवयं देइ ।।

17 संवच्छर-चाउम्मासिएसु, अट्ठाहियासु य तिहीसु ।
सव्वायरेण लग्गइ, जिणवरपूयातवगुणेसु ।।

18 साहूण चेइयाण य, पडणीयं तह अवण्णवाइं च ।
जिणपवयणस्स अहियं, सव्वत्थामेण वारेइ ।।

19 विरया पाणिवहाओ, विरया निच्चं च अलियवयणाओ ।
विरया चोरिक्काओ, विरया परदारगमणाओ ।।

20 विरया परिग्गहाओ, अपरिमियाओ अणंततण्हाओ ।
बहुदोससंकुलाओ, नरयगईगमणपंथाओ ।।

21 मुक्का दुज्जणमित्ती, गहिया गुरुवयणसाहुपडिवत्ती ।
मुक्को परपरिवाओ, गहिओ जिणदेसिओ धम्मो ।।

22 तवनियमसीलकलिया, सुसावगा जे हवंति इह सुगुणा ।
तेसिं न दुल्लहाइं, निव्वाणविमाणसोक्खाइं ।।" [उपदेशमाला-२२९-२४५]

अत्र कथा -

चंद्रोदयं च कुर्व्वन्ति, चुल्हकोपरिके नराः ।
तेषां तत्फलमाहात्म्यात्, स्वर्गो नूनं प्रजायते ।।

---

15. साधूनां कल्पनीयं यन्नापि दत्तं कस्मिंश्चित् किञ्चित् तस्मिन् । धीराः यथोक्तकारिणो सुश्रावकास्तन्न भुञ्जते।।
16. वसति-शयनासनभक्तपानभैषजवस्त्रपात्राणि । यद्यपि न पर्याप्तधनो स्तोकादपि स्तोकं ददाति ।।
17. संवत्सर-चातुर्मासिकेष्वष्टाह्निकासु च तिथिषु । सर्वादरेण लगन्ति जिनवरपूजातपोगुणेषु ।।
18. साधूनां चैत्यानां च प्रत्यनीकं तथावर्णवादिनं च । जिनप्रवचनस्याऽहितं सर्वस्थेम्ना वारयति ।।
19. विरताः प्राणिवधात् विरता नित्यं चालीकवचनात् । विरताश्चौर्यात् विरताः परदारगमनात् ।।
20. विरताः परिग्रहादपरिमितातनन्ततृष्णात् । बहुदोषसङ्कुलात् नरकगतिगमनपथात् ।।
21. मुक्ता दुर्जनमैत्री गृहिता गुरुवचनसाधुप्रतिपत्तिः । मुक्तः परपरिवादो गृहितो जिनदेशितो धर्मः ।।
22. तपोनियमशीलकलिताः सुश्रावका ये भवन्तीह सगुणाः । तेषां न दुर्लभानि निर्वाणविमानसौख्यानि ।।

।। अथ चन्द्रोदयकथा ।।

श्रीपुरे श्रीषेणो नृपः, तस्य पुत्रो देवराजोऽनेकगुणः, यौवने दैववशात्कुष्टी जातः । [सप्तवर्षावधिविविधप्रतीकारैरप्यपटुः] वैद्यैस्त्यक्तः । यो [मत्पुत्रं] नीरोगं करोति तस्यार्द्धराज्यं ददामीति राजा पटहमवादयत् । तत्र व्यवहारि यशोदत्तपुत्री लक्ष्मीवती शीलादिगुणमयी, तया पटहं निवार्य हस्तस्पर्शेन कुष्टः स्फेटितः । यतः -

"यस्य स्मरणमात्रेण, सर्वाः संसारजा रुजः ।
शरीरिणो विशीर्यन्ते, सोऽयं शीलभिषग् नवः ।।"

ततः [तयोः] पाणिग्रहणम्, पुत्रं राज्ये निवेश्य दीक्षां ललौ राजा । तत्र चेकदा पाटलाचार्या ज्ञानिन ऐयुः । गुरुनमस्करणार्थं राजा गमनम्, देशनान्ते पृच्छा, कुतः सप्तवार्षिको व्याधिः समुत्पन्नः । गुरुः प्राह - प्राच्य कर्मतः ।

"नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि ।
अवश्यमेव हि भोक्तव्यं, कृतं कर्म शुभाशुभम् ।।"

तथाहि - वसन्तपुरे देवदत्तव्यवहारिणः चत्वारः पुत्राः धनदेवो धनदत्तो धनमित्रो धनेश्वरश्च मिथ्यात्विनः । इतश्च मृगपुरे जिनदत्तः श्रेष्ठी [जैनः]। तत्पुत्री मृगसुन्दरी, तस्या अभिग्रहत्रयं - जिनं पूजयित्वा १, साधूनां दानं दत्त्वा भोक्ष्येऽहं २ रात्रिभोजनं न कुर्व्वे ३ । अन्यदा व्यवसायार्थं धनेश्वरो मृगपुरे ययौ। दृष्ट्वा मृगसुन्दरीं सानुरागोऽसौ जातः । तव मिथ्यात्विनो नैनां दत्ते श्रेष्ठी पितेति जिनभक्त्या ज्ञात्वा स कपट-श्रावकीभूय तां परिणीतवान्, स्वगृहे चानीता सा, धर्मेर्ष्यालुभिस्तस्या जिनपूजनादि निषिद्धम् । तस्या उपवासत्रयं जातम् । तया गुरवः पृष्टाः, पूजां दानं च कर्तुं नालभेऽहं किं कुर्व्वे, तैर्गुरुभिर्गुणागुणं विचार्य कथितम्-'चुल्हकोपरि चन्द्रोदयं बध्नीयं तेन पञ्चसाधुदानेन पञ्चतीर्थे नमस्कृतैर्यादृशं फलं तादृशं [फलं] जायते ।' ततस्तया स्वगृहमागत्य तथाकृतम्, ततश्च श्वशुरादिभिः किमपि कार्मणं कृतमनयेति विचार्य धनेश्वरस्य कथितम् । ततस्तेन चन्द्रोदयः प्रज्वालितः। तया पुनर्द्वितीयो बद्धः, सोऽपि प्रज्वालितः । एवं सप्त प्रज्वालिताः, ततः श्वशुरेणोक्तम् - 'भद्रे ! किं मण्डितमिति ।' तयोक्तम् - 'जीवदयार्थम्', पुनस्तेन सरोषमूचे - 'एवं तर्हि पितृगृहे गच्छ ।' तयोक्तम् - 'सकुटुम्बेन त्वयाऽहं पितृगृहे मोच्या ।' श्वशुरेणोक्तम् - यथा मद्गृहान्निर्याति तथा करणीयम् ।' ततः सर्वेऽपि तया सार्धं चलिताः, क्वापि मार्गग्रामे श्वशुरपक्षीयैः प्राघूर्णकार्थं रात्रौ पाको विहितः । सा वधूर्बहुकथनेऽपि न भुङ्क्ते, अतः कोऽपि न भुक्तः । ततो यस्य गृहेऽन्नं जातं, तस्यैव कुटुम्बं भुक्तम् । तेन भुक्तेन सर्वे मृताः । प्रभाते यावद्विलोकयन्ते तावदन्नस्थाल्यां सर्प्पो दृष्टः । सर्वैश्चिन्तितं रात्रौ पच्यमाने धूमेन व्याकुलः सर्प्पोऽन्नस्थाल्यां पपातेति। तैः पश्चाद्वधूः क्षामिता, तयोक्तम्-'अत एव चुल्हकोपरि चन्द्रोदयं दद्मि रात्रौ

च न भुञ्जेऽहम् ।' अत्र तेषां तयोपदेशदानं श्राद्धीकरणं च, पश्चाद्वलनं प्रशंसाकरणं च तस्याः साक्षात्कुलदेवीयमित्यादि ।

ततो गुरुभिरुक्तम् - 'वत्स ! यत्त्वया अस्मिन् भवे सप्त चन्द्रोदया दग्धास्तस्य फलं ते च सप्तवार्षिको व्याधिर्जातः । सा मृगसुन्दरी जीवदयया स्वर्गे गत्वा यशोदत्तश्रेष्ठिनः पुत्री तव लक्ष्मीवती नाम्ना प्रिया बभूव । अस्याः शीलप्रभावेण तव व्याधिर्ययौ, तत उभयोरपि जातिस्मरणम्, पुत्रं राज्ये विन्यस्य दीक्षा-ग्रहणम्, विधितपस्करणम्, ततः स्वर्गं गतौ ।

।। इति यतनायां चुल्हकोपरि चंद्रोदयकथानकम् ।।

[इइ जयणा]

।। इति द्वितीयगाथाव्याख्याने प्रबोधदीपिकायां द्वितीयः प्रस्तावः ।।

।। अथ तृतीयगाथाव्याख्याने प्रबोधदीपिकायां तृतीयः प्रस्तावः ।।

अथ तृतीयगाथाव्याख्या -

जिणपूआ जिणथुणणं, [१]गुरुथुइ साहम्मिआण वच्छल्लं ।
ववहारस्स य सुद्धी, रहजत्ता तित्थजत्ता य ।।

[जिनपूजा जिनस्तवनं गुरुस्तुतिः साधर्मिकाणां वात्सल्यम् ।
व्यवहारस्य च शुद्धिः रथयात्रा तीर्थयात्रा च ।।]

[जिणपूआ]

[१९-जिनपूजा]

जिनानां पूजा - जिनपूजा । सा च द्विधा द्रव्यतो भावतश्च । यदुक्तं श्रीआवश्यके-

"x x x x[1]दव्वथओ पुप्फाई संतगुणुक्कित्तणा भावे ।।"
[2]दव्वथओ भावथओ, दव्वथओ बहुगुणित्ति बुद्धि सिआ ।
अनिउणमइ-वयणमिणं छज्जीवहिअं जिणा[२] बिंति ।।

---

१. 'गुरुथुअ' प्रबोधटीकायाम्, D,E,F,K हस्त० । २. 'जिअं जिणा' हस्त० ।

1. x x x द्रव्यस्तवः पुष्पादिः सद्गुणोत्कीर्तना भावे ।
2. द्रव्यस्तवो भावस्तवो द्रव्यस्तवो बहुगुण इति बुद्धिः स्यात् ।
अनिपुणमतिवचनमिदं षड्जीवहितं जिना ब्रुवते ।।

[3]छज्जीवकायसंजम[३], दव्वत्थए सो विरुज्झई कसिणो ।
तो कसिणसंजमविऊ, पुप्फाईयं न इच्छंति ।।

[4]अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो ।
संसारपयणुकरणो[४], दव्वथए कूवदिट्ठंतो ।।" [आवश्यकभाष्य-९९१-९९४]

उपदेशमालायामपि -

"[5]दो चेव जिणवरेहिं, जाइजरामरणविप्पमुक्केहिं ।
लोगम्मि पहा भणिया, सुस्समणसुस्सावगो वा वि ।।
[6]भावच्चणमुग्गविहारया य दव्वच्चणं तु जिणपूया ।
भावच्चणाउ भट्ठो, हविज्ज दव्वच्चणुज्जुत्तो ।।" [उपदेशमाला-४९०-४९१]

यस्तूभयभ्रष्टस्तस्य किं स्यादित्याह -

"[7]जो पुण निरच्चणो च्चिय, सरीरसुहकज्जमित्ततल्लिच्छो ।
तस्स न य बोहिलाभो, न सुग्गई नेव परलोगो ।।" [उपदेशमाला-९९२]

भावार्चनं प्रधानम् -

"[8]कंचणमणिसोवाणं, थंभसहस्सूसियं सुवण्णतलं ।
जो कारिज्ज जिणहरं, तओ वि तवसंजमो अहिओ ।।" [महानिशीथतृतीयाध्ययन]

अन्यत्रापि -

---

३. 'संजमु' आ०नि० । ४. '...करणं' हस्त० ।

3. षड्जीवकायसंजमो द्रव्यस्तवे स विरुध्यते कृत्स्नः । ततः कृत्स्नसंयमविद्वांसः पुष्पादिकं नेच्छन्ति ।।

4. अकृत्स्नप्रवर्त्तकानां विरताविरतानामेष खलु युक्तः । संसारप्रतनुकरणो द्रव्यस्तवे कूपदृष्टान्तः ।।

5. द्वावेव जिनवरैर्जातिजरामरणविप्रमुक्तैः । लोके पन्थानौ भणितौ सुश्रमणः सुश्रावको वापि ।।

6. भावार्चनमुग्रविहारता च द्रव्यार्चनं तु जिनपूजा । भावार्चनाद् भ्रष्टो भवेत् द्रव्यार्चनोद्युतः।।

7. यः पुनः निरर्चन एव शरीरसुखकार्यमात्रतल्लिप्सुः । तस्य न च बोधिलाभो न सुगतिः नैव परलोकः ।।

8. काञ्चनमणिसोपानं स्तम्भसहस्रोच्छ्रितं सुवर्णतलम् । यः कारयेज्जिनगृहं ततोऽपि तपःसंयमोऽधिकः।।

"[9]मेरुस्स सरिसवस्स य, जत्तिअमित्तं तु अंतरं होइ ।
[६]भावत्थय-दव्वत्थयाण, अंतरं तत्तिअं नेअं ।।"
[10]उक्कोसं दव्वत्थयं, [७]आराहिय जाइ अच्चुअं जाव ।
भावत्थएण पावइ, अंतमुहुत्तेण निव्वाणं ।।" [सम्बोधसित्तरि-४४-४५]

जिनपूजा क्रियमाणा इह परत्र च सुखावहा । यतः -

"[11]पूआए मणसंती, मणसंतीए हि [८]उत्तमं झाणं ।
सुहझाणेण य मुक्खो, मुक्खे सुक्खं [९]निराबाहं ।।" [सम्बोधप्रकरण-२०२]

श्रीभगवत्यां श्रीगौतमपृष्टः श्रीवीरः प्राह -

"[12]गोयमा ! से जहानामए - इहं सबरा इ वा टंकणा इ वा बब्बरा इ वा [१०]चुचुया इ वा पल्हया इ वा पुलिंदा इ वा एगं महं रण्णं वा गड्ढं वा दुग्गं वा दरिं वा विसमं वा पव्वयं वा नीसाए सुमहल्लमवि आसबलं वा हत्थिबलं वा जोहबलं वा धणुबलं वा आगलेंति, एवामेव असुरकुमारावि देवा णण्णत्थ अरहंते वा अरहंतचेइयाणि वा अणगारे वा भावियप्पणो निस्साए उड्ढं उप्पयंति जाव सोहम्मो कप्पो ।।" [भगवतीसूत्र-३/२/१४२]

पुनरपि इन्द्रचिन्तनाधिकारे -

"[13]नो खलु समत्थे चमरे असुरिंदे असुरराया, नो खलु विसए चमरस्स असुरिंदस्स असुररण्णो

---

६. दव्वत्थय-भावत्थयाणं सम्बोधसित्तरौ । ७. 'आराहओ जाव अच्चुअं जाइ' सम्बोधसित्तरौ । ८. 'उज्जलं' हस्त० । ९. 'अणाबाहं' सम्बोधप्रकरणे 'निराबाहं' श्राद्धविधिवृत्तौ ।। १०. 'चुचुया इ वा' हस्त० नास्ति, 'पहू इ वा' हस्त० ।

9. मेरोः सर्षपस्य च यावन्मात्रमन्तरं भवति । भावस्तवद्रव्यस्तवयोरन्तरं तावद् ज्ञेयम् ।।

10. उत्कर्षेण द्रव्यस्तवमाराध्य यात्यच्युतं यावत् । भावस्तवेन प्राप्नोत्यन्तर्मुहूर्त्तेन निर्वाणम् ।।

11. पूजया मनःशान्तिः मनःशान्त्या ह्युत्तमं ध्यानम् । शुभध्यानेन च मोक्षो मोक्षे सुखं निराबाधम्।।

12. गौतम ! तद् यथानाम-इह शबरा इति वा, टंकणा इति वा, बर्बरा इति वा, चुचुका इति वा, पल्हा इति वा, पुलिन्दा इति वा, एकं महत् अरण्यं वा गर्तं वा दुर्गं वा दरीं वा विषमं वा पर्वतं वा, निश्रया सुमहदपि अश्वबलं वा हस्तिबलं वा योद्धबलं वा धनुर्बलं वा आकलयन्ति एवमेव असुरकुमारा अपि देवाः नान्यत्र अर्हतो वा अर्हच्चैत्यानि वा अनगारान् वा भावितात्मनः निश्रया ऊर्ध्वमुत्पतन्ति यावत् सौधर्मः कल्पः ।

13. नो खलु समर्थः चमरः असुरेन्द्रः असुरराजः, नो खलु विषयः चमरस्य असुरेन्द्रस्य असुरराजस्य आत्मनः

अप्पणो निस्साए उड्ढं उप्पतित्ता जाव सोहम्मो कप्पो, नण्णत्थ अरहंते वा, अरहंतचेइयाणि वा, अणगारे वा भाविअप्पणो नीसाए उड्ढं उप्पयति जाव सोहम्मो कप्पो, तं महादुक्खं खलु तहारूवाणं अरहंताणं भगवंताणं[११] अणगाराण य अच्चासायणाए[१२] त्ति कट्टु ओहिं पउंजइ, ममं ओहिणा आभोएति, आभोएत्ता हा ! हा ! अहो ! हतो अहमंसि त्ति कट्टु ताए उक्किट्ठाए जाव दिव्वाए देवगईए वज्जस्स वीहिं अणुगच्छमाणे-अणुगच्छमाणे तिरियमसंखेज्जाणं दीवसमुद्दाणं मज्झंमज्झेणं जाव जेणेव असोगवरपायवे, जेणेव ममं अंतिए तेणेव उवागच्छइ, उवागच्छित्ता ममं चउरंगुलमसंपत्तं वज्जं पडिसाहरइ ।।" [भ.सू.-३/२/१४४]

पूजाविधिश्च -

प्रातः पूर्वं निर्माल्योत्सारणं प्रक्षालनं संक्षेपपूजा आरात्रिकं मंगलप्रदीपश्च । ततः स्नात्रादिसविस्तरद्वितीयपूजाप्रारम्भे देवस्य पुरः सकुङ्कुमजलकलशः स्थाप्यः । ततः[१३] -

"मुक्तालंकारविकारसारसौम्यत्वकान्तिकमनीयम् ।
सहजनिजरूपनिर्जितजगत्त्रयं पातु जिनबिम्बम् ।।" [श्राद्धविधिवृत्ति]

इत्युक्त्वाऽलङ्कारोत्तारणम् ।

"[14]अवणिअकुसुमाहरणं पयइपइट्ठिअमणोहरच्छायं ।
जिणरूवं मज्जणपीढसंठिअं वो सिवं दिसउ ।।" [श्राद्धविधिवृत्ति]

इत्युक्त्वा निर्माल्योत्सारणम्[१४] । ततः प्रागुक्तकलशढालनं पूजा च । अथ धौतधूपितकलशेषु

---

११. 'भगवंताणं' हस्त० नास्ति । १२. 'अच्चासाणयाए' हस्त० । १३. 'निर्माल्योत्सारणं, ततः 'मुक्ता...' श्लोकः, ततः 'अवणिअ...' श्लोकः, ततः 'द्वाभ्यां जिनांघ्रितले पुष्पक्षेपः' इति पाठो हस्तप्रतौ । १४. ' निर्माल्योत्तारणम्' श्राद्धविधौ ।

निश्रया ऊर्ध्वमुत्पतितुं यावत् सौधर्मः कल्पः, नान्यत्र अर्हतो वा, अर्हच्चैत्यानि वा, अनगारान् वा भावितात्मनः निश्रया ऊर्ध्वमुत्पतन्ति यावत् सौधर्मः कल्पः तन्महादुःखं खलु तथारूपाणामर्हतां भगवतामनगाराणां च अत्याशातनया इति कृत्वा अवधिं प्रयुनक्ति मामवधिना आभोगयति, आभोग्य हा ! हा ! अहो ! हतः अहमस्मि इति कृत्वा तया उत्कृष्टया यावद् दिव्यया देवगत्या वज्रस्य वीथिमनुगच्छन्-अनुगच्छन् तिर्यग् असंख्येयानां द्वीपसमुद्राणां मध्यं मध्येन यावत् यत्रैव अशोकवरपादपः यत्रैव मम अन्तिकं तत्रैव उपागच्छति, उपागत्य मम चतुरङ्गुलमसंप्राप्तं वज्रं प्रतिसंहरति ।

14. अपनितकुसुमाभरणं प्रकृतिप्रतिष्ठितमनोहरछायम् । जिनरूपं मज्जनपीठसंस्थितं वः शिवं ददातु ।।

स्नात्रार्हसुगन्धजलक्षेपः, श्रेण्या तेषां व्यवस्थापनम्, सद्वस्त्रेणाच्छादनं च । ततः[१५] स्वचन्दनधूपादिना कृततिलकहस्तकंकणहस्तधूपनादिकृत्याः श्रेणिस्थाः श्रावकाः कुसुमाञ्जलिपाठान् पठन्ति । तथाहि-

"सयवत्त[15]-कुंद-मालइबहुविहकुसुमाइं पंचवन्नाइं ।
जिणनाहण्हवणकाले, दिंति सुरा कुसुमंजलिं हिट्ठा ।।" [श्राद्धविधिवृत्ति]

इत्युक्त्वा देवस्य मस्तके पुष्पारोपणम् ।

"गंधायड्ढिअमहुअरमणहरझंकारसद्दसंगीआ[16] ।
जिनचलणोवरि मुक्का हरउ तुम्ह कुसुमंजली दुरिअं ।।" [श्राद्धविधिवृत्ति]

इत्यादिपाठैः प्रतिगाथादिपाठं जिनचलनोपर्येकेन श्रावकेण कुसुमाञ्जलिपुष्पाणि क्षेप्याणि । सर्वेषु कुसुमाञ्जलिपाठेषु च तिलकपुष्पपत्रधूपादिविस्तरो ज्ञेयः । अथोदारमधुरस्वरेणाधिकृतजिनजन्माभिषेककलशपाठः । ततो घृतेक्षुरसदुग्धदधिसुगन्धिजलैः पञ्चामृतैः स्नात्राणि । स्नात्रान्तरालेषु च धूपो देयः । स्नात्रकालेऽपि जिनशिरः पुष्पैरशून्यं कार्यम् । यदाहुर्वादिवेतालश्रीशान्तिसूरयः -

"आस्नात्रपरिसमाप्तेरशून्यमुष्णीषदेशमीशस्य ।
सान्तर्धानाऽब्धारापातं पुष्पोत्तमैः कुर्यात् ।।" [अर्हदभिषेक-३/४]

स्नात्रे च क्रियमाणे निरन्तरं चामरसङ्गीततूर्याद्याडम्बरः सर्वशक्त्या कार्यः । सर्वैः स्नात्रे कृते पुनरकरणाय शुद्धजलेन धारा देया । तत्पाठश्चायम्[१६] -

"अभिषेकतोयधारा, धारेव ध्यानमण्डलाग्रस्य ।
भवभवनभित्तिभागान्, भूयोऽपि भिनत्तु भागवती ।।" [अर्हदभिषेक-३/१२]

---

१५. 'ततः.. कृत्याः' इति पाठो हस्तप्रतौ नास्ति । १६. 'सा चेयम्' हस्त० ।

15. शतपत्रकुन्दमालतिबहुविधकुसुमानि पञ्चवर्णानि ।
जिननाथ-स्नपनकाले ददाति सुराः कुसुमाञ्जलिं हृष्टाः।।

16. गन्धाढ्यमधुकर-मनोहरझंकारशब्दसङ्गीताः । जिनचरणोपरि मुक्ता हरतु तव कुसुमाञ्जलिर्दुरितम् ।।

[१७] ततोऽङ्गरूक्षणविलेपनादिपूजा प्राक्पूजातोऽधिका कार्या । अथारात्रिकं समङ्गलप्रदीपमर्हतः पुरस्तादुद्योत्यम् । आसन्नं च वह्निपात्रं स्थाप्यम्, तत्र [१८] लवणं जलं च पातयिष्यते ।

"[17] उवणेउ मंगलं वो, जिणाण मुहलालिजालसंवलिआ ।
तित्थपवत्तणसमए, तिअसविमुक्का कुसुमवुट्ठी ।।" [श्राद्धविधिवृत्ति]

इत्युक्त्वा प्रथमं कुसुमवृष्टिः । ततः -

"[18] उयह पडिभग्गपसरं, पयाहिणं मुणिवइं करेऊणं ।
पडइ सलोणत्तेण लज्जियं व लोणं हुअवहंमि ।।" [श्राद्धविधिवृत्ति]

इत्यादिपाठैर्विधिना जिनस्य त्रिः सपुष्पलवणजलोत्तारणादि कार्यम् । [१९] ततः सृष्ट्या पूजयित्वा आरात्रिकं सधूपोत्क्षेपमुभयत उच्चैः सकलशजलधारं परितः श्राद्धैः प्रकीर्यमाण-पुष्पप्रकरम् -

"[19] मरगयमणिघडिअविसालथालमाणिक्कमंडिअपईवं ।
ण्हवणयरकरुक्खित्तं भमउ जिणारत्तिअं तुम्हं ।। [श्राद्धविधिवृत्ति]
[20] आरत्तियं नियच्छह जिणस्स सरूवं कसिणागुरुच्छायं ।
पासेसु भमइ नज्जइ संगमओ विभिन्नदिट्ठिव्व ।।
[21] पसमेउ वो भवंतरसमज्जिअं कम्मरेणुसंघायं ।
आरत्तिआणुलग्गा उच्छलंती सलिलधारा ।।"

---

१७. 'अथाङ्गरूक्षणविलेपनादिका पूजा सर्वा कार्या । अथ लूणपाणी गाथा ।' रात्रिकं पुरोद्योत्यम्, पूज्जं सृष्ट्या,' हस्त० । १८. 'लवणं पातयिष्यते जलं च' 'उवणे उ' इत्यनया गाथया कुसुमवृष्टिः क्रियते । प्रथमारात्रिक एवेयमिति वृद्धाः । तथाप्यारात्रिकेषु सामान्यतो लिखिता लूणपाणिविधिः । १९. 'अथारात्रिकं सधूपोत्क्षेप-सजलकलशढालनं । आसन्नस्थितैर्जनैः पूज्यमानं भाजनस्थमुत्तार्यते पाठपूर्वम्, पाठः पुनरमी-मरगयेति ३ गाथा ।' इति हस्तप्रतौ ।

17. उपनयतु मङ्गलं वो जिनानां मुखरालिजालसंवलिता । तीर्थप्रवर्तनसमये, त्रिदशविमुक्ता कुसुमवृष्टिः ।।

18. पश्यत प्रतिभग्नप्रसारं प्रदक्षिणं मुनिपतिं कृत्वा । पतति सलवणत्वेन लज्जितमिव लवणं हूताशने ।।

19. मरकतमणिघटितविशालस्थालमाणिक्यमण्डितप्रदीपम् । स्नपनकरोत्क्षिप्तं भ्रमतु जिण ! आरात्रिकं तव ।।

20. आरात्रिकं नियच्छतु जिनस्य स्वरूपं कृष्णागरुच्छायम् । पार्श्वयोः भ्रमति राजते सङ्गमतो विभिन्नदृष्टिरिव ।।

21. प्रशमतु वः भवान्तरसमार्जितं कर्मरेणुसंघातम् । आरात्रिकानुलग्ना उच्छलन्ती सलिलधारा ।।

इत्यादिपाठपूर्वं प्रधानभाजनस्थं सोत्सवमुत्तार्यते त्रिवारम् । एतच्चारात्रिकं[२०] तत्र देवतोद्देशेन दिगनुसारेणोत्तार्यम् ।

अथ मङ्गलप्रदीपः[२१] । सोऽप्यारात्रिकवत्पूज्यः, पाठाभ्यामुत्तार्यः तौ चामू -

"कोसंबिसंठिअस्स[22] व, पयाहिणं कुणइ मउलिअपईवो ।
जिण ! सोमदंसणे दिणयरुव्व तुह मंगलपईवो ।।
भामिज्जंतो[23] सुरसुंदरीहिं तुह नाह ! मंगलपईवो ।
कणयायलस्स नज्जइ भाणुव्व पयाहिणं दिंतो ।।"

तथैव देदीप्यमानो जिनचलनाग्रे मुच्यते[२२] । आरात्रिकं तु विध्याप्यते न दोषः । अत्राहुः वृद्धाः - प्रथमारात्रिके-३, द्वितीये-२, तृतीये-१ फेरकाः, चैत्यवन्दनादि ।

"संघस्स[24] पवयणस्स, जिणस्स जणदिट्ठिदोसहरणत्थं ।
लवणाइ कीरइ जओ, वामावत्तं[२३] हवइ तेण ।।"

शक्त्या चाष्टधा सा विधेया । यदाह -

"वरगंध[25]-धूव-चक्खुक्खएहिं कुसुमेहिं पवरदीवेहिं ।
नेविज्ज-फल-जलेहिं जिणपूआ अट्ठहा भणिआ ।।"

अत्र ज्ञातम् -

---

२०. 'एतच्चारात्रिकं...णोत्तार्ये ।' मुद्रितश्राद्धविधौ नास्ति । २१. 'मङ्गलप्रदीपोऽप्यारात्रिकवत्पूज्यते' इति मुद्रितश्राद्धविधिवृत्तौ । २२. जिनचलनोपरिमोच्यः आरात्रिकविध्यापने न दोषः । इति हस्त० । २३. 'इह लवणारात्रिकाद्युत्तारणं संप्रदायेन सर्वगच्छेषु परदर्शनेष्वपि च सृष्टयैव क्रियमाणं दृश्यते । श्री जिनप्रभसूरिकृतपूजाविधौ त्वेवमुक्तम् 'लवणाइउत्तारणं पालित्तयसूरिमाइपुव्वपुरिसेहिं संहारेण अणुन्नायंपि संपयंसिट्ठिए कारिज्जइ ।' इति श्राद्धविधिवृत्तौ ।

22. **कौशाम्बिसंस्थितस्य इव प्रदक्षिणां करोति मुकुलितप्रदीपः ।**
जिन ! सौम्यदर्शन ! दिनकर इव तव मङ्गलप्रदीपः ।।
23. **भ्रामयन् सुरसुन्दरिभिः तव नाथ ! मङ्गलप्रदीपः । कनकाचलस्य ज्ञायते भानु इव प्रदक्षिणां ददन् ।।**
24. **संघस्य प्रवचनस्य, जिनस्य जनदृष्टिदोषहरणार्थम् । लवणादि क्रियते यतः वामावर्तं भवति तेन ।।**
25. **वरगन्ध-धूप-चोक्षक्षतैः कुसुमैः प्रवरदीपैः । नैवद्य-फल-जलैः जिनपूजा अष्टधा भणिता ।।**

।। अथाष्टविधजिनपूजाफले कथा ।।

महाविदेहे पुष्कलावतीविजये पुण्डरीकिणीनगर्यां विजयसेनचक्री राज्यं करोति । अन्यदा सुयशातीर्थकृत्समवसृतः। "आगासगएणं छत्तेणमित्यादि..." ऋद्धि-विधिना चक्री जिनागमनज्ञापकदत्तप्रीतिदानो वन्दितुं महर्ध्या गतः । पञ्चविधाभिगमादि, विधिपूर्वं जिनवन्दनम्, तस्मिन्नवसरेऽष्टौ देवा जिनवन्दनायायाताः, राज्ञा दृष्टाः, तेषां ३२ बद्धनाटककरणं संहरणं च, चक्रवर्त्यादीनां विस्मयः, देवैः पृच्छा कृता - 'वयं भव्या अभव्या वा ?' भगवतादिष्टम्- 'भव्या एव यूयम् ।' पुनः पृच्छा-'किमासन्नसिद्धिका दूरभव्या वा ?' जिनः प्राह- 'आसन्नसिद्धिका एव ।' पुनरपि पृच्छा- 'कस्मिन् भवे मुक्तिं यास्यामः ?' स्वामिना कथितम्- 'देवलोकाच्च्युत्वाऽत्र विजये नृपीभूय दीक्षां लात्वा मुक्तिं यास्यथ ।' चक्रिणा पृष्टम्- 'एभिः पूर्वजन्मनि किं सुकृतं कृतम् ?' जिनेनोक्तम्- 'धातकीखण्डे भरते महामलयपुरे सुदत्तश्रेष्ठिनो रुक्मिणीभार्यायामष्टौ पुत्राः । धन-विमल-शिख-आरक्ष-वरसेन-शिव-वरुण-सुयशाः सुव्रताः। एकदा सुव्रतजिनदेशना एवमश्रावि ।

"[26]जो पुएइ तिसंझं, जिणिंदरायं सया विगयदोसं ।
सो तइयभवे सिज्झइ, अहवा सत्तट्ठमे जम्मे ।।" [सम्बोधप्रकरण-२१८]

सा पूजा द्रव्य-भावाभ्यां द्विधा, तत्र -

"द्रव्यतोऽष्टविधा पूजा फलैः सद्गन्धचन्दनैः ।
पुष्पैस्तथाक्षतैर्धूपै-र्नैवेद्यै-र्दीपकै-र्जलैः ।।" [ ]

भावतस्तु एवम् -

"श्रद्धानीरं मनःपुष्पं धीधूपं ज्ञानदीपकम् ।
विषयत्यागनैवेद्यं सा पूजा परमेश्वरे ।।" [ ]

स्तोकापि शुभाध्यवसायरूपा पूजादिका क्रिया विशिष्टगुणपात्रविषयाऽक्षयफलैव । यदुक्तम् -

"[27]एगं पि उदगबिंदुं, जह पिक्खित्तं महासमुद्दम्मि ।
जायइ अक्खयमेवं, पूजा वि हु वीयरागेसु[२४] ।।
[28]उत्तमगुणबहुमाणो, पयमुत्तमसत्तमज्झयारम्मि ।
उत्तमधम्मपसिद्धी, पूजाए वीयरागाणं[२५] ।।" [उपदेशपद-१०२३, १०२४, पञ्चाशक-१९१-१९२]

---

२४. 'जिणगुणसमुद्देसु' पञ्चाशके । २५. 'जिणवरिंदाणं' पञ्चाशके ।

26. यः पूजयति त्रिसन्ध्यं जिनेन्द्रराजं सदा विगतदोषम् । स तृतीयभवे सिध्यत्यथवा सप्ताष्टमे जन्मनि ।।

27. एकोऽप्युदकबिन्दुः यथा प्रक्षिप्तो महासमुद्रे । जायतेऽक्षतः एवं पूजापि हु वीतरागेषु ।।

28. उत्तमगुणबहुमानः पदमुत्तमसत्त्वमध्यकारे । उत्तमधर्मप्रसिद्धिः पूजया वीतरागाणाम् ।।

"एएणं[29] बीएणं, दुक्खाइं अपाविऊण भवगहणे ।
अच्चंतुदारभोए, भोत्तुं सिज्झंति भव्वजिया ।।" *[सम्बोधप्रकरण-२०१]*

इत्यादिदेशनां श्रुत्वा संजातदृढतमजिनपूजारुचिभिरष्टभिरपि बान्धवैरष्टप्रकारपूजानियमग्रहणं पञ्चविंशतिपूर्वलक्षाणि यावज्जिनराजपूजापराणां मासानशनेन प्रान्ते मृत्वा सप्तमे देवलोके १७ सागरायुषो देवा जातास्ततश्च्युत्वा मोक्षं यास्यन्ति ।' एवमष्टधाजिनपूजाफलम् ।

।। इत्यष्टविधपूजाफले कथानकम् ।।

"न वैषम्ये न पादस्थे, न चैवोत्कटकासने ।
नैवोर्ध्वे वामपादे तु, न पूजा वामहस्ततः ।।" [ ]

"पुष्पाद्यर्चा तदाज्ञा च, तद्द्रव्यपरिरक्षणम् ।
उत्सवास्तीर्थयात्रा च, भक्तिः पञ्चधा जिने ।।" [सुक्तमुक्तावली-६१/६]

एवं पञ्चप्रकारापि जिनपूजा सामान्यतो द्रव्यभावाभ्यां द्विधा, तत्रापि पुष्पादिद्रव्यपूजा सर्वसिद्धिनिबन्धनं सततारम्भकारिणाम् । यतः -

"आरंभ[30]पसत्ताणं, गिहीण छज्जीववहअविरयाणं ।
भवअडवीनिवडियाणं, दव्वत्थओ चेव आलंबो ।।" [सम्बोधप्रकरण-२१६]

एषा पूजा जिनागमे त्रिधा -

"अंग[31]ग्गभावभेया, पुप्फाहारथुईहिं पूअतिगं ।
पंचोवयार[२६] अट्ठोवयार सव्वोवयारा वा ।।" [चैत्यवन्दनभाष्य-१०]

अन्यत्रापि -

"अंगं[32]मि पढमपूआ आमिसपूआ जिणग्ग[२७]ओ बीआ ।
तइआ थुइ[२८]थुत्तिमया तासिं सरूवं इमं होइ ।।" [उपदेशतरङ्गिणी]

---

२६. 'पंचुवयारा' मुद्रितचैत्यवन्दनभाष्ये । २७. 'तओभवे' चैत्यवन्दनमहाभाष्ये । २८. 'थोत्तगगय' चैत्यवन्दन महाभाष्ये ।

29. एतेन बीजेन दुःखान्यप्राप्य भवगहने । अत्यन्तोदारभोगान् भुक्त्वा सिध्यन्ति भव्यजीवाः ।।
30. आरम्भप्रसक्तानां गृहिणां षड्जीववधाविरतानाम् । भवाटवीनिपतितानां द्रव्यस्तव एवालम्बः ।।
31. अङ्गाग्रभावभेदाः पुष्पाहारस्तुतिभिः पूजात्रिकम् । पञ्चोपचारः अष्टोपचारः सर्वोपचारो वा ।।
32. अङ्गे प्रथमपूजा, आमिषपूजा जिनाग्रतो द्वितीया । तृतीया स्तुति-स्तोत्रमया तासां स्वरूपमिदं भवति।।

बृहत्भाष्ये -

"[33]न्हवणविलेवणआहरण-वत्थफलगंधधूवपुप्फेहिं ।
कीरइ जिणंगपूआ तत्थ विही एस नायव्वो ।।" [सम्बोधप्रकरण-५७]

यथा श्रीवस्तुपालः स्वकारितसपादलक्षबिम्बानां श्रीशत्रुञ्जयसर्वबिम्बानां च रत्न-सुवर्णाभरणानि कारितवान् ।

परिधापनिका नव्यपट्टदुकूलादि-चन्द्रोदयादिविधापनम्, जिनहस्तोपरि सौवर्णबीजपूर-नालिकेरादिमोचनम्, धूपोत्क्षेप-सुगन्धवासप्रक्षेपाद्यपि च सर्वमङ्गपूजायां भवति । पूजावसरे -

"[34]कायकंडूयणं वज्जे, तहा खेलविगिंचणं ।
[२९]थुइथुत्तभणनं चेव, पूअंतो जगबंधुणो ।। [श्राद्धदिनकृत्य-५८]
[35]जिणभवणबिंबपूआ, कीरंति जिणाण नो कए किंतु ।
सुहभावणानिमित्तं, बुहाण [३०]इयराण बोहत्थं ।। [चैत्यवन्दनमहाभाष्य-१४२]
[36]चेइहरेण य केई, पसंतरूवेण केइ बिंबेण ।
पूयाइसया अन्ने, अन्ने बुज्झंति उवएसा ।।" [सम्बोधप्रकरण-५९, ७०, ७१]

"निःशूकत्वादशौचोऽपि देवपूजां तनोति यः ।
पुष्पैर्भूपतितैर्यश्च भवतः श्वपचाविमौ ।।" [श्राद्धविधिवृत्ति]

यथा-

।। अथ पुण्यसारकथा ।।

कामरूपपत्तने मातंगस्यैकस्य पुत्रो जातः स जातमात्र एव पूर्वभववैरिणा व्यंतरेणापहृत्य वने मुक्तः, इतश्च कामरूपपत्तनाधिपो राजा राजपाटिकायां निर्गतः, वने स बालको दृष्टः, अपुत्रत्वेन गृहीतः पालितश्च

२९. 'मोणं वा कइभण्णं कुज्जा' सम्बोधप्रकरणे । ३०. 'अबुहाण' सम्बोधप्रकरणे ।

33. स्नपनविलेपनाभरणवस्त्रफलगन्धधूपपुष्पैः । क्रियते जिनाङ्गपूजा तत्र विधिरेषो ज्ञातव्यः ।।

34. कायकण्डूयनं वर्जेत् तथा श्लेश्मविवेचनम् । स्तुतिस्तोत्रभणनं चैव पूजन् जगद्बन्धून् ।।

35. जिनभवनबिम्बपूजा क्रियते जिनानां नो कृते किन्तु । शुभभावनानिमित्तं बुधानामितरेषां बोधार्थम् ।।

36. चैत्यगृहेण च केचित् प्रशान्तरूपेण केचित् बिम्बेन । पूजातिशयादन्येऽन्ये बुध्यन्ते उपदेशात् ।।

'पुण्यसार' इति नाम दत्तम्, स उद्यौवनो जातः, राजा तस्मै राज्यं दत्वा दीक्षां जग्राह, कालेन केवली जातः, कामरूपे पुरे समागतः, पुण्यसारो वंदनाय गतः, पौराः सर्वे समागताः, पुण्यसारजननी मातंग्यपि तत्रायाता, राजानं दृष्ट्वा तस्याः स्तन्यप्रस्रवो जातः[३१], राज्ञा कारणं पृष्टः केवली प्राह-'हे राजन् ! एषा तव माता, मया त्वं वने पतितो लब्धः,' राज्ञा पृष्टम्-'केन कर्मणाहं मातङ्गो जातः[३२] ?' ज्ञानी प्राह-'पूर्वभवे त्वं व्यवहारी अभूः, त्वयैकदा जिनं पूजयता पुष्पं भूमौ पतितं देवस्यानारोप्यं जानताप्यवज्ञयारोपितम्[३३], तेन त्वं मातङ्गो जातः ।' यतः-

"उच्चिट्ठं[37] फलकुसुमं, नेविज्जं वा जिणस्स जो देइ ।
सो नीअगोअकम्मं, बंधइ पायन्नजम्मंमि ।।" [श्राद्धविधिवृत्ति]

तव पूर्वभवे या माताभूत्तयैकदा स्त्रीधर्मेऽपि देवपूजा कृता, तत्कर्मणा सैषा मातङ्गी जाता, ततो वैराग्याद् राज्ञा दीक्षा गृहीता । अतः स्नानाद्यकृत्वा देवपूजा न कार्या । भूपतितं पुष्पं सुगन्ध्यपि देवानां नारोप्यम्, स्वल्पेऽप्यपावित्र्ये देवानां नाभ्यर्चनीयम्, विशिष्य चोच्छिष्टदिने स्त्रीभिर्बृहदाशातनादिदोषात् । इति देवपूजा शुचितया कर्तव्या । [श्राद्धविधिवृत्ति]

।। इति पुण्यसारकथा ।।

अष्टप्रकारपूजा विवेकिना प्रत्यहं त्रिधा विधेया[३४] तदभाव एकधा वा । अष्टप्रकारोपचारा-पर्याप्तौ प्रदीपाक्षतादि कार्यमेव । यतः -

**"निच्चं[38] चिअ संपुन्ना, जइ वि हु एसा न तीरए काउं ।
तहवि अणुचिट्ठिअव्वा, अक्खयदीवाइदाणेण ।।"** [चैत्यवन्दनमहाभाष्य-२१६]

तृतीया सर्वोपचारा प्रायोऽङ्गाग्रभावविषया । तथैवाह -

**"सव्वोवयारपूया[39], न्हवणच्चणवत्थभूसणाईहिं ।
फलबलिदीवाइनट्ट-गीयआरत्तियाईहिं ।।"** [सम्बोधप्रकरण-१८८]

पूजावसरे शक्तौ प्रदीपो घृत-अगुरु-कर्पूरादिभिरेव कार्यः । तथा -

---

३१. 'अजनि' हस्त० । ३२. 'अजनि' हस्त० । ३३. 'अपि सौरभतया देवस्य चढापितम्' हस्त० । ३४. 'त्रिर्विधेया तदभावेकधा वा, अष्टप्रकारोपाचारा...' हस्त० ।

37. उच्छिष्टं फल-कुसुमं नैवेद्यं वा जिनस्य यः ददाति । सः नीचगोत्रकर्म बध्नाति प्रायोऽन्यजन्मनि ।।

38. नित्यमेव संपूर्णा यद्यपि खल्वेषा न तीर्यते (शक्यते) कर्तुम् । तथाऽप्यनुष्ठातव्याऽक्षत-दीपादिदानेन ।।

39. सर्वोपचारपूजा स्नपना-ऽर्चन-वस्त्र-भूषणादिभिः । फल-बलि-दीपादि-नाट्य-गीता-ऽऽरात्रिकादिभिः ।।

[40] **"सोहम्मे कप्पे सुहम्माए सभाए माणवए चेइयक्खंभे षष्टियोजनप्रमाणे [सट्ठिजोअणप्पमाणे] हिट्ठा उवरिं च अद्धतेरसअद्धतेरस जोअणाणि वज्जित्ता मज्झएण पणतीस[३५]जोअणेसु वइरामएसु गोलवट्टसमुग्गएसु बहू[३६]ओ जिणसकहाओ पन्नत्ता ।।"**

[समवायाङ्गसूत्र-३५]

सर्वेषामपि देवानां स्वस्वसुधर्मासभासु माणवकचैत्यस्तम्भे निक्षिप्तानि जिनास्थीनि तेषां पूजनीयानि स्युरिति । ते तासु मैथुनादिना न चरन्ति । यदि जिनास्थिनां पूजा सुरैरपि क्रियमाणास्ति, ततो ज्ञायते जिनप्रतिमापूजा सर्वविरतिव्यतिरिक्तैः सर्वैर्देशविरतैर्विधीयते, न दोषः ।

[इइ जिणपूआ]

३५. 'तीसाए' हस्त० । ३६. 'बहूओ' मुद्रितसमवायाङ्गे नास्ति ।

40. सौधर्मे कल्पे सुधर्मायां सभायां माणवके चैत्यस्तम्भे षष्टियोजनप्रमाणे अधः उपरिं च अर्धत्रयोदश-अर्धत्रयोदश- योजनानि वर्जयित्वा मध्ये पञ्चत्रिंशत्योजनेषु वज्रमयेषु गोलवृत्तसमुद्गकेषु बहवः जिनसक्थिनः प्रज्ञप्ताः ।

[जिणथुणणं]

[२०-जिनस्तवनम्]

जिणथुणणं जिनानां स्तवनम् । तद्विधेयं मोक्षार्थिभिः । जिनस्तुतेर्मोक्षसाधनत्वे किं वक्तव्यम् ? यतः कल्याणमन्दिरस्तोत्रे -

"आस्तामचिन्त्यमहिमा जिनसंस्तवस्ते,
नामापि पाति भवतो भवतो जगन्ति ।
तीव्रातपोपहततपान्थ-जनान्निदाघे,
प्रीणाति पद्म-सरसः सरसोऽनिलोऽपि ।।" [कल्याणमन्दिरस्तोत्र-७]

जिनस्तुतिः क्रियमाणा इहलोकेऽपि फलदायिनी । यथा श्रीभद्रबाहुस्वामिभिरुपसर्गहरस्तोत्रं श्रीपार्श्वनाथस्तुतिरूपं विधाय श्रीसङ्घमध्ये मरकिमांद्यनिवार्य शान्तिः कृता । तथा श्रीसिद्धसेनदिवाकरैः श्रीपार्श्वनाथस्तुतिरूपं कल्याणमन्दिरस्तोत्रं कृत्वा 'यस्मिन् हरे'ति-११ कवित्वे प्रोच्यमाने महाकालप्रासादे शम्भुलिङ्गद्विखण्डीभवनेन श्रीपार्श्वनाथप्रतिमाप्रकटनेन श्रीजिनशासनोन्नतिं विरचय्य परगृहीतं स्वायत्तीकृतम् । तथा श्रीमानदेवसूरिभिः भयहरस्तोत्रेण सप्तभयनिवृत्तिर्विदधे तदा, अद्यापि तथैव तत्स्मरणेन सर्वत्रापि प्रायः सप्तभयनिवृत्तिरनुभूयमानास्ति ।

।। अथ श्रीमानतुङ्गाचार्यसम्बन्धः ।।

अथ मयूर-बाणाभिधानौ भावुकशालकौ पण्डितौ निजविद्वत्तया मिथः स्पर्द्धमानौ नृपसदसि लब्धप्रतिष्ठावभूताम् । कदाचिद्बाणपण्डितो जामिमिलनाय तद्गृहं गतो निशि द्वारप्रसुप्तो भावुकेनानुनीयमानां [१]समानां जामिं निशम्य तत्र दत्तावधान इत्यशृणोत् -

"गतप्राया रात्रिः कृशतनु शशी ! शीर्यत इव,
प्रदीपोऽयं निद्रावशमुपगतो घूर्णित इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो,"

[४]इति भूयो भूयस्तेन त्रिपदीमुदीर्यमाणामाकर्ण्य,

"कुचप्रत्यासत्या हृदयमपि ते चण्डि ! कठिनम् ।।"

---

१. 'समानां' हस्त० नास्ति । २. 'इमां' हस्त० ।

इति भ्रातृमुखात्तुर्यं पदमाकर्ण्य [३]क्रुद्धा सा सत्रपा च 'कुष्ठी भवे'ति तं भ्रातरं शशाप। ततस्तस्याः पतिव्रताव्रतप्रभावादङ्गे प्रभूतरोगः प्रसूतः । प्रातः शीतरक्षापटपिहिततनुर्नृपसभायामायातो मयूरेण मयूरेणेव कोमलगिरा 'वरकोढी' इति तं प्रति प्राकृतशब्दे प्रोक्ते चतुरचक्रवर्ती नृपो बाणं सविस्मयं प्रेक्ष्यमाणस्तेन प्रस्तावान्तरे देवताराधनोपायश्चेतसि [४]चिन्तयांचक्रे । बाणस्तु सत्रपस्तत उत्थाय नगरसी[५]मनि स्तम्भमारोप्य खादिराङ्गारपूर्णमधःकुण्डं विधाय स्तम्भाग्रवर्तिनि सिक्कके स्वयमधिरूढः सूर्यस्तुतौ प्रतिकाव्यप्रान्ते सिक्ककपदं क्षुरिकया छिन्दन् पञ्चभिः काव्यै[६]स्तेन पञ्चसु पदेषु छिन्नेषु सिक्ककाग्रविलग्नः षष्ठेन काव्येन प्रत्यक्षीकृत-भानुस्तत्प्रसादात्सद्यः सञ्जातजात्यकाञ्चनकायकान्तिः, अन्यस्मिन्नहनि सुवर्णचन्दनावलिप्ताङ्गः संवीतसित-स्वच्छदिव्यवसनः समाजगाम । तद्वपुःपाटवं पश्यता नृपेण [७]सूर्यवरप्रसादं मयूरे विज्ञपयति सति बाणो बाणनिभया गिरा तं मर्मणि विव्याध । 'यदि देवताद्याराधनं सुकरं तदा त्वमपि किमपीदृक् चित्रमाविःकुरु' इत्यभिहिते तेन मयूरेण तं प्रति प्रतिवचः सन्दधे । 'निरामयस्य किमायुर्वेदविदाः तथापि तव वचः सत्यापयितुं निजपाणी पादौ च छुर्या विदार्य, त्वया षष्ठे काव्ये सूर्यः परितोषितः, अहं तु पूर्वस्य काव्यस्य षष्ठेऽक्षरे भवानीं परितोषयामी'ति प्रतिश्रुत्य सु[८]खासनसमासीनश्चण्डिकाप्रासादपश्चाद्भागे निविष्टो '[९]मा भाङ्क्षीर्विभ्रम'मिति षष्ठेऽक्षरे प्रत्यक्षीकृतचण्डिकाप्रसादात्प्रत्यग्रप्रथमानवपुःपल्लवः स्वसन्मुखं च तत्प्रासादमालोक्या-भिमुखागतैर्नृपतिप्रमुखराजलोकैः कृतजयजयारवो महता महेन पुरं प्राविक्षत् ।

एतस्मिन्नवसरे मिथ्यादृशां शासने विजयिनि सम्यग्दर्शनद्वेषिभिः कैश्चित्प्रधानपुरुषैर्नृपोऽभिदधे-'यदि जैनमते कश्चिदीदृक्प्रभावः प्रभवति तदा सिताम्बराः स्वदेशे स्थाप्यन्ते[१०] नो चेज्जवान्निर्वास्यन्ते' इति तद्वचनादनु श्रीमानतुङ्गाचार्यास्तत्राकार्य 'निजदेवतातिशयं कमपि दर्शयन्तु'-इति राज्ञा [११]भणितम् । ते प्राहुः -

"रवेरेवोदयः श्लाघ्यः कोऽन्येषामुदयग्रहः ।
न तमांसि न तेजांसि यस्मिन्नभ्युदिते सति ।। [प्रबन्धकोश]

आलोकमात्रतरला गगनान्तराला, उच्चावचाः कति न दन्तुरयन्ति ताराः ।
एकेन तेन रजनीपतिना विनाद्य, सर्वा दिशो मलिनमाननमुद्वहन्ति ।।

कथासु ये लब्धरसाः कवीनाम्, ते नानुरज्यन्ति कथान्तरेषु ।
न ग्रन्थिपर्णप्रणयाश्चरन्ति, कस्तूरिकागन्धमृगास्तृणेषु ।।" [प्रबन्धकोश]

राजन् ! 'मुक्तानामस्मद्देवतानामत्र कोऽतिशयः सम्भवति, तथापि तत्किङ्कराणां सुराणां प्रभावाविर्भावः

३. 'क्रुद्धा' हस्त० नास्ति । ४. 'चेतस्यवतारयाञ्चक्रे' प्रबन्धचिन्तामणौ । ५. 'सीम्नि' हस्त० । ६. 'तत्' हस्त० । ७. 'सूरवर' हस्त० । ८. 'प्रतिपद्य' हस्त० । ९. मा भाङ्क्षीविभ्रमं भ्रूरधरविधुरता केयमास्यस्य रागम्; प्राणौ प्राण्येव नायं कलयसि कलहश्रद्धया किं त्रिशूलम् । इत्युद्युत्कोपकेतून्प्रकृतिमवयवान्प्रापयन्त्येव देव्याः; न्यस्तो वो मरुदसुहृदसून्संहरन्नंघ्रिरंहः ।। १०. 'नो वा जवा...' हस्त० । ११. 'अभिहिते' हस्त० ।

जिणथुणणं ~~~

"दर्पणार्पितमालोक्य मायास्त्रीरूपमात्मनः ।
आत्मन्येवानुरक्तो वः श्रियं दिशतु केशवः ।।" [शार्ङ्गधरपद्धति - ११७]

"सन्ध्यां यत्प्रणिपत्य लोकपुरतो बद्धाञ्जलिर्याचते;
धत्से यत्व परां विलज्जशिरसा तच्चापि सोढं मया ।
श्रीर्जाताऽमृतमन्थने यदि हरेः कस्माद्विषं भक्षितम्;
मा स्त्रीलम्पट ! मां स्पृशेत्यभिहितो गौर्या हरः पातु वः ।।" [उपदेशरत्नाकरवृत्तौ]

"उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा;
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः ।
सद्यस्तत्कायकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः;
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ।।

कुलं पवित्रं जननी कृतार्था वसुन्धरा भाग्यवती त्वयैव ।
अबाह्यसंवित्सुखसिन्धुमग्नं लग्नं परे ब्रह्मणि यस्य चित्तम् ।।"

इत्यादि कर्णकटुः स श्रुत्वा नासिकामाकूण्य विमनाः प्राह- 'अमूनि रसकाव्यानि समयस्तवितानि मित्र ! त्वया कुत उच्यते ? सम्प्रति पारमार्थिकवचोभिर्मम प्रतिबोधावसरः।' गुरुः प्राह- 'साधु साधूक्तम्। मित्र ! किञ्चित्तु प्रष्टव्यमस्ति । इदं देवानां स्वरूपं सत्यमसत्यं वा ? यदि सत्यं तदा किं विमनायसे ? अथासत्यं तदा देवादीन् त्वं विचारय ।' वाक्पतिः प्राह- 'मित्र ! कथय तत्त्वम् ।' गुरुराह- 'धर्मोपदेशं देवादितत्त्वस्थापकम् ।' ततः प्रबुद्धः स प्राह- 'भगवन्मम मनस्येकः सन्देहोऽस्ति । अनन्ताः प्राणिनो मुक्तिं याता यान्ति यास्यन्ति च, एवं संसारो रिक्तः कथं न भवेत् ?' गुरुः प्राह-

"[2]आसंसारं सरिआसएहिं हीरंतरेणुनिवहेहिं ।
पुहवी न निट्ठिय च्चिअ उदही वि थली न संजाओ ।।"

वाक्पतिश्चमत्कृतः प्राह- 'ईयन्तं कालं भगवन् परमार्थबहिष्कृता वयम् । उक्तं च तेन -

"[3]मयनाहिकलुसिएणं इमिणा किं किर फलं निडालेण ।
इच्छामि अहं जिनवर-पणामकिणकलुसियं काउं ? ।।"

ततः बप्पभट्टिराह - 'त्वं संन्यस्त एव जैनं धर्मं श्रय । इति श्रुत्वा स गुरुभिः सह तद्भवनादुदस्थात् । आजगामाशु पार्श्वस्य स्तूपे श्रीपार्श्वमन्दिरे तदात्मस्वरूपोपदेशप्रतिबोधितः सन् 'शान्तो वेषः'

---

2. आसंसारं सरिताशतैर्हरत्तरेणुनिवहैः । पृथ्वी न निष्ठितैव उदधिरपि न स्थली सञ्जातः ।।
3. मृगनाभिकलुषितेनानेन किं किल फलं ललाटेन । इच्छाम्यहं जिनवरप्रणामकिणकलुषितं कर्तुम् ? ।।

[शान्तो वेषः शमसुखफलाः श्रोतृगम्या गिरस्ते,
कान्तं रूपं व्यसनिषु दया साधुषु प्रेम शुभ्रम् ।
इत्थम्भूते हितकृतपतेस्त्वय्यसङ्गा विबोधे,
प्रेमस्थाने किमिति कृपणा द्वेषमुत्पादयन्ति ।।१।।

अतिशयवती सर्वा चेष्टा वचो हृदयङ्गमं,
शमसुखफलः प्राप्तौ धर्मः स्फुटः शुभसंश्रयः ।
मनसि करुणा स्फीता रूपं परं नयनामृतं,
किमिति सुमते ! त्वय्यन्यः स्यात् प्रसादकरं सताम् ।।२।।

निरस्तदोषेऽपि तरीव वत्सले कृपात्मनि त्रातरि सौम्यदर्शने ।
हितोन्मुखे त्वय्यपि ये पराङ्मुखाः पराङ्मुखास्ते ननु सर्वसम्पदाम् ।।३।।

सर्वसत्त्वहितकारिणि नाथे न प्रसीदति मनस्त्वयि यस्य ।
मानुषाकृतितिरस्कृतमूर्तेरन्तरं किमिह तस्य पशोर्वा ? ।।४।।

त्वयि कारुणिके न यस्य भक्तिर्जगदभ्युद्धरणोद्यतस्वभावे ।
नहि तेन समोऽधमः पृथिव्यामथवा नाथ ! न भाजनं गुणानाम् ।।५।।

एवंविधे शास्तरि वीतदोषे महाकृपालौ परमार्थवैद्ये ।
मध्यस्थभावोऽपि हि शोच्य एव प्रद्वेषदग्धेषु क एष वादः ? ।।६।।

न तानि चक्षूंषि न यैर्निरीक्ष्यसे न तानि चेतांसि न यैर्विचिन्त्यसे ।
न ता गिरो या न वदन्ति ते गुणान्न ते गुणा ये न भवन्तमाश्रिताः ।।७।।

तच्चक्षुर्दृश्यसे येन तन्मनो येन चिन्त्यसे ।
सज्जनानन्दजननी सा वाणी स्तूयसे यया ।।८।।

न तव यान्ति जिनेन्द्र ! गुणा मितिं मम तु शक्तिरुपैति परिक्षयम् ।
निगदितैर्बहुभिः किमिहापरैरपरिमाणगुणोऽसि नमोऽस्तु ते ।।९।।]

इति स्तोत्रं बभाण । मिथ्यात्विवेषं त्यक्त्वा स्वीकृतजैनवेषः श्रीबप्पभट्टिदीक्षितोऽष्टादशपापस्थानान्युत्सृज्य अष्टादशदिनानशनं प्रपाल्य देवीभूयैकावतारी सिद्धो भविता ।

।। इति श्रीबप्पभट्टिसूरिप्रतिबोधितस्य वाक्पतेः सम्बन्धः ।।

[इइ जिणथुणणं]

[गुरुथुइ]

[२१-गुरुस्तुतिः]

गुरुथुइ गुरूणां स्तुतिर्विधेया भविभिः। यतः -

"निघण्टोक्तौवशब्दार्थः प्रमाणं यदि धीमताम्[१] ।
तत्किं गुरुर्विधेये तकः सार्थः सरलेऽध्वनि ।।"

[ ]

पुरा संप्रत्यागामिकालेऽपि च तारकाः श्रीगुरव एव । यतः -

"विदलयति कुबोधं बोधयत्यागमार्थम् ;
सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ।
अवगमयति कृत्याकृत्यभेदं गुरुर्यः ;
भवजलनिधिपोतस्तं विना नास्ति कश्चित् ।।" [सिन्दूरप्रकरण-१४]

गुरुयोगं विना.जिनधर्मयोगोऽपि दुर्बोधः । यदुक्तम् -

"दिनं न तपनं विना, न शशिनं विना कौमुदी;
श्रियो न सुकृतं विना, न जगति विना विक्रमम् ।
कुलं न तनयं विना, न समतां विना निवृत्तिः ;
गुरुं च न विना नृणाम्, भवति धर्मतत्त्वश्रुतिः ।।"

[ ]

गुरूपदेशोऽभव्येष्वपि किञ्चिद्गुणाभिमुख्यं कुर्यात् । यतः -

"भवेदभव्येऽपि गुरूपदेशाद्गुणो बहिः कोऽपि न वास्तवस्तु ।
सौधाश्रया स्यात् गृहगोधिकाऽपि[२] न चात्र शुद्धा न पुनर्दयालुः ।।"

[ ]

---

१. अस्य श्लोकस्य भावार्थो न ज्ञातः । संपा० २. 'त्वद् चात्र' हस्त० ।

[३]तत्त्वनिरूपणेऽपि -

"[1]अरिहंतुवएसेणं सिद्धा नज्जंति तेण अरिहाई ।
नवि कोई परिसाए पणमित्ता पणमई रन्नो ।।" [आवश्यकनिर्युक्ति-१००९]

"[2]सिद्धांतेऽपि-भयवं ! केरिसे गुरूपन्नत्ते ? गो० धम्मायत्ते गुरू दुविहे पन्नत्ते । तवोवत्ते-१ नाणवत्ते अ-२ तत्थ तवोवत्ते वडवत्तसमाणे केवलं अप्पाणं तारेइ । नाणवत्ते पुण जाणवत्तुव्व । अप्पाणं च परं च तदुभयं च तारेइ ।।" [ ]

शुद्धधर्मप्ररूपकाश्च ये प्रायः सुसाधव एव ज्ञायन्ते । यतः -

"सर्वत्रापि च सम्भवन्ति बहवः पापोपदेशप्रदाः ;
लोकोऽपि स्वयमेव पापकरणे गाढं निबद्धादरः ।
[४]के ते सत्त्वहितोपदेशविशदव्यापारिणः साधवः ;
यत्संसर्गनिसर्गनष्टतमसो [५]निर्वान्त्यमी देहिनः ।।" [ ]

तथा -

"[3]तहारूवस्स णं भंते ! समणस्स पज्जुवासणा किं फला ?, गोयमा ! सवणफला, सवणे नाणफले, नाणे विन्नाणफले, विन्नाणे पच्चक्खाणफले, पच्चक्खाणे संजमफले, संजमे अणण्हयफले, अणण्हवे तवफले, तवे वोदाणफले, वोदाणे अकिरिआफले, अकिरिआ सिद्धिफला पण्णत्ता ।

---

३. 'तत्त्वत्त्वायेऽपि' हस्त० । ४. 'क्वैते सर्वजनोपदेश' हस्त० । ५. 'बद्धमनसो' हस्त० ।

1. अर्हदुपदेशेन सिद्धा ज्ञायते तेन अर्हदादि । नापि कश्चित् परिषदं प्रणम्य प्रणमति राज्ञः ।।

2. सिद्धान्तेऽपि भगवान् किदृशो गुरुप्रज्ञप्तः ? गौ० - धर्मायत्वे गुरुः द्विविधः प्रज्ञप्तः । तपःपात्रो ज्ञानपात्रश्च, तत्र तपःपात्रो वटपत्रसमानः केवलमात्मानं तारयति । ज्ञानपात्रः पुनः यानपात्रिरव, आत्मानं च परं च तदुभयं च तारयति ।

3. तथारूपस्य भदन्त ! श्रमणस्य पर्युपासना किं फला ? गौतम ! श्रवणफला, श्रवणात् ज्ञानफलम्, ज्ञानात् विज्ञानफलम्, विज्ञानात् प्रत्याख्यानफलम्, प्रत्याख्यानात् संयमफलम्, संयमात् अनाश्रवफलम्, अनाश्रवात् तपःफलम्, तपसः व्यवदानफलम्, व्यवदानात् अक्रियाफलम्, अक्रिया सिद्धिफला प्रज्ञप्ता ।

सवणे नाणे अ विन्नाणे, पच्चक्खाणे अ संजमे ।
अणण्हए तवे चेव, वोदाणे अकिरिआ सिद्धी ।।" [भगवतीसूत्र २/५/२१]

केचन गुर्वर्थिनः कथयन्ति षड्त्रिंशद्गुणयुक्ता एव गुरवो नान्ये, हिनास्ते श्रीआगमेन निवार्याः । तद्यथा -

"[4]दंसणनाणचरित्तायारा अट्ठट्ठभेअभिन्ना उ ।
बारसविहतवजुत्ता छत्तीसगुणा इमे हुंति ।।" [पुष्पमाला-१३४ वृत्ति]

[5]कालाइदोसवसओ इत्तो एक्काइगुणविहीणोऽवि ।
होइ गुरू गीयत्थो उज्जुत्तो सारणाईसु ।।"

इतः षट्त्रिंशद्गुणसमुदाया**देकद्वित्र्यादिगुणैर्विहिनोऽपि गुरुर्भवति,** तावद्यावद्गीतार्थतागुणः सारणा-वारणा-प्रेरणा-प्रतिप्रेरणा-स्वनिर्विण्णतागुणश्च गुरोर्विशेषतोऽन्वेषणीयः । अतो विशेषतो **गीतार्थः उद्युक्तश्च सारणादिष्विति ।** अगीतार्थो ह्यैहिकामुष्मिकमहाव्यसनसागरे आत्मानं परं च प्रक्षिपतीत्यर्थः । अत एतद्गुणद्वयं गुरोः प्रयत्नतोऽन्वेषणीयम् । [पुष्पमाला-३३५]

सारणाद्यभावे दोषानाह -

"[6]जह सीसाइं निकिंतइ कोई सरणागयाण जंतूणं ।
तह गच्छमसारंतो गुरू वि सुत्ते जओ भणिअं ।।

[7]जणणीए अनिसिद्धो निहओ तिलहारओ पसंगेण ।
जणणी वि थणच्छेयं पत्ता अनिवारयंती उ ।।" [पुष्पमाला-३३७-३३८]

श्रवणः ज्ञानं च विज्ञानम्, प्रत्याख्यानं च संयमम् । अनाश्रवः तपश्चैव, व्यवदानोऽक्रिया सिद्धिः ।।

4. दर्शनज्ञानचारित्राचाराः, अष्टाष्टाभेदभिन्नास्तु । द्वादशविधतपयुक्ताः, षट्त्रिंशद्गुणा इमे भवन्ति ।।

5. *कालादिदोषवशतः इतः एकादिगुणविहीनोऽपि । भवति गुरुः गीतार्थः, उद्युक्तः सारणादिषु ।।*

6. यथा शिरांसि निकृन्तति कश्चित् शरणागतानां जन्तूनाम् । तथा गच्छमसारयन् गुरुरपि सूत्रे यतो भणितम्।।

7. जनन्याऽनिषिद्धो निहतस्तिलहारकः प्रसङ्गेण । जनन्यपि स्तनच्छेदं प्राप्ताऽनिवारयन्ती तु ।।

[एतद् स्पष्टयति] तिलाः शरीरेणानीता मात्रा निवारितो न, एवं धान्यमध्ये आद्रशरीरः पतन्मुष्ट्या-दिभिर्धान्यमानयति तथापि माता न निवारयति । ततश्चौर्यलग्नस्तथापि न निवारयति । ततो धृतः । जननी दर्शनार्थमागता । तेन क्षुरिकया निहता । लोकानां च कथयति 'एत्तियमित्ताणत्थाण कारणं मह इमा जाया ।' अनिवारणात् । एवं गुरुरपि *शिष्यान-निवारयन्ननर्थकारणं स्यात् ।*

तथा दशवैकालिके -

"[8]अमोहं वयणं कुज्जा, आयरिअस्स महप्पणो ।
तं परिगिज्झ वायाए, कम्मुणा उववायए ।।" [दशवैकालिक-८/३३]

एवमुत्तराध्ययनावश्यकादिषु श्रीगुरवः प्रधानकारणतया स्थापिताः सन्ति । यदि तेषां सिद्धान्तोक्तगुरूणां विरहिणस्ते प्रष्टव्याः, एतानि शास्त्राणि युष्माकं प्रमाणान्यप्रमाणानि वा? यदि प्रमाणानि तदा गुरुविरहमतिर्न विधेया, यद्यप्रमाणानि तदा जिनोक्तसूत्राशातनया श्रीजिन एवाऽऽशातितः । दुप्पसहं चरणमित्युक्तेः, 'अड्ढाइज्जेसु' सूत्रे 'जावंत केवि साहू' इत्यादि सूत्रेषु साधुसत्ताक्षरेषु दृश्यमानेषु ये गुरुविरहं स्वीकुर्वन्ति ते महाधृष्टाः । केचन कथयन्ति- 'श्रीमहाविदेहक्षेत्रे श्रीसीमंधरकालीनाः साधवः प्रमाणमितिकृत्वा तदपेक्षयैव स सर्वं धर्मानुष्ठानं कुर्व्वति,' तेऽपि युक्त्या निवार्याः । यदि ते एव तीर्थंकरादयः सर्वानुष्ठानविधिविधाने प्रमाणं स्युस्तदा श्रीवीरजिनैः तपस्याक्षणे 'नमो सिद्धाणमि'ति कस्मादुच्यते ? तत्र तदापि तीर्थंकरसत्ता । सामायिकोच्चारे 'भंते' इत्यकथनाज्जायते अत्रत्या एव प्रमाणीकृता न महाविदेहस्थाः । तेनात्मनामपि सर्वेष्वनुष्ठानेष्वत्रत्या एव प्रमाणम् । तथा यत्र साधुयोगस्तत्रैव जिनधर्मसत्ता, नान्यत्र । अन्यथा श्रीभगवत्याम् -

---

8. अमोघं वचनं कुर्याद्, आचार्याणां महात्मानाम् । तद् परिगृह्य वाचा, कर्मणोपपादयेत् ।

9. चतुर्विंशतिनां तीर्थंकराणां कति जिनान्तराः प्रज्ञप्ताः ? गौतम ! त्रयोविंशतय जिनान्तराः प्रज्ञप्ताः । एतेषां भदन्त ! त्रयोविंशतीषु जिनान्तरेषु कस्य कस्मिन् कालिकश्रुतस्य व्यवच्छेदः प्रज्ञप्तः ? गौतम ! एतेषु त्रयोविंशतीषु जिनान्तरेषु पूर्वपश्चिमेष्वेष्टास्वष्टासु जिनान्तरेष्वेतेषु कालिकश्रुतस्याव्यवच्छेदः प्रज्ञप्तः, मध्यमेषु सप्तसु जिनान्तरेष्वेतेषु कालिकश्रुतस्य व्यवच्छेदः प्रज्ञप्तः, सर्वत्रापि व्यवच्छिन्नो दृष्टिवादः ।

"चउवीसाए[9] तित्थगराणं कति जिणंतरा पन्नत्ता ?, गोयमा ! तेवीसं जिणंतरा पन्नत्ता । एएसि णं भंते ! तेवीसाए जिणंतरेसु कस्स कहिं कालियसुयस्स वोच्छेदे पन्नत्ते ?, गोयमा ! एएसु णं तेवीसाए जिणंतरेसु पुरिमपच्छिमएसु अट्ठसु अट्ठसु जिणंतरेसु एत्थ णं कालियसुयस्स अवोच्छेदे पन्नत्ते मज्झिमएसु सत्तसु जिणंतरेसु एत्थ णं कालियसुयस्स वोच्छेदे पन्नत्ते, सव्वत्थवि णं वोच्छिन्ने दिट्ठिवाए ।" [भगवती २०/८/७९५]

तत्र साधूनामभावादेवासंयतपूजा प्रवृत्तिरभवत् । तेन सम्प्रत्यपि साधुविरहस्वीकारात् तथैव विलोक्यते । तथा तु नास्ति । तेन धर्म्माव्युच्छित्तिहेतुत्वेनापि साधवः स्वीकार्या एव। अव्युच्छित्तिरपि गरियान् हेतुः । लोकेऽपि श्रूयते-कल्पकमन्त्रिणः सकुटुम्ब-स्याऽन्धकूपक्षेपेऽपि प्रत्यहं प्रत्यहं कियत्स्वल्पप्रमाणकोद्रव्यादिधान्यमोचनेऽपि सर्वैर्मिथो दीर्घसूत्रबुद्ध्या विमृश्य स्वकुलोद्धारणसमर्थकल्पकमन्त्रिण एव सर्वं दत्त्वा स एव स्थापितः, एवमत्रापि शासनस्थितिकराः साधवः, तेनैव हेतुनाराध्यमाना आराधकानां दीर्घदर्शित्वं जिनाराधकत्वं सूचयति । ये तु गणनायकास्तेषामनेनैव प्रकारेणासन्नसिद्धिकत्वं ज्ञापितम्।[10]

"गच्छं तु उवेहंतो, कुव्वइ दीहं भवं विहीए उ ।
पालंतो पुण सिज्झइ, तइअ-भवे भगवईसिद्धं ।।" [पु.मा.-३४२, सं.सि.-४९]

तथा -

"आयरिय-उवज्झाए णं भंते ! सविसयंसि गणं अगिलाए संगिण्हमाणे, अगिलाए उवगिण्हमाणे कतिहिं भवग्गहणेहिं सिज्झति जाव सव्वदुक्खाणमंतं करेति ? गोयमा ! अत्थेगइए तेणेव भवग्गहणेणं सिज्झति, अत्थेगतिए दोच्चेणं भवग्गहणेणं सिज्झति, तच्चं पुण भवग्गहणं नाइक्कमति ।" [भगवती-५/६/२१०]

---

10. गच्छं तु उपेक्षयन्, कुर्वते दीर्घं भवं विधिना तु । पालयन् पुनः सिध्यते, तृतीयभवे भगवतीसिद्धम् ।।

11. आचार्योपाध्यायः भदन्त ! स्वविषये गणमग्लान्या सङ्गृह्णन्ग्लान्या उपगृह्णन् कतिभिः भवग्रहणैः सिद्ध्यति यावत् सर्वदुःखानामन्तं करोति ? गौतम ! अस्त्येककस्तेनैव भवग्रहणेन सिद्धयति, अस्त्येकक: द्वितीयेन भवग्रहणेन सिद्धयति, तृतीयं पुनः भवग्रहणं नातिक्रामति ।

गुरुगुरुता ज्ञेया ।

"[12]बहुसोक्खसयसहस्साण, दायगा मोयगा दुहसयाणं ।
आयरिया फुडमेयं, केसिपएसी व्व ते हेऊ ।।
[13]नरयगइगमणपडिहत्थए कए तह पएसिणा रन्ना ।
अमरविमाणं पत्तं, तं आयरियप्पभावेणं ।।" [उपदेशमाला-१०१, १०२]

राजप्रश्नीयोपाङ्गोक्तं तत्स्वरूपं चेदम् -

"[14]तत्थ णं सेयवियाए नगरीए पएसी नामं राया होत्था, महया हिमवंत जाव विहरइ। अहम्मिए [६]अहम्मिट्ठे अहम्मक्खाई अहम्माणुए अहम्म[७]पलोई अहम्मपजणणे अहम्मसीलसमुयारे अहम्मेण चेव वित्तिं कप्पेमाणे हणछिंदभिंदापवत्तए पावे चंडे रुद्दे खुद्दे लोहियपाणी साहस्सीए उक्कंचण-वंचण-मा[८]याया-नियडि-कूडकवड-सायिसंपओगबहुले निस्सीले निव्वए निग्गुणे निम्मेरे निप्पच्चक्खाण-पोसहोववासे बहूणं दुपय-चउप्पयमिय-प[९]सु-पक्खी-सिरीसवाण घायए वहाए उच्छेणयाए अहम्मकेऊ समुट्ठिए, गुरूणं नो अब्भुट्ठेति नो विनयं पउंजइ ।"

इत्यादिस्वरूपोऽपि श्रीगुरुयोगेनैव योग्यतां प्राप्तः । अन्यथा एवंविधदोषबाहुल्ये तस्य नरकयोग्यतैव सम्भाविता ज्ञैः ।

---

६. 'अहम्मिए' हस्त० नास्ति । ७. 'अहम्मपलाई अहम्मपज्जणे अहम्मसीलसमयारे' हस्त० । ८. '...मायातिय-डेकूडकवडसातिसिएपंडगबहुले' हस्त० । ९. '...सुपक्खिसरिसवाणं घाताए' हस्त० ।

12. बहुसौख्यशतसहस्राणां दायका मोचका दुःखशतेभ्यः । आचार्याः स्फुटमेतत् केशिप्रदेशिवत् ते हेतुः ।।

13. नरकगतिगमनपरिहत्थे कृते तथा प्रदेशिना राज्ञा । अमरविमानं प्राप्तं तदाचार्यप्रभावेन ।।

14. तत्र श्वेतविकायां नगर्यां प्रदेशी नाम राजाऽभवत् । महत्तया महाहिमवान् [पर्वतवत्] यावत् विहरति । अधार्मिकः, अधार्मिष्ठः, अधर्माख्यातिः, अधर्मानुगः, अधर्मप्रलोकी, अधर्मप्रजननः, अधर्मशीलसमुच्चारः, अधर्मेणैव वृत्तिं कल्पमानः, हन-छिन्द-भिन्दप्रवर्तकः, पापी, चण्डः, रुद्रः, क्षुद्रः, लोहितपाणी, साहसिकः, उत्कञ्चन-वञ्चन-माया-निकृति-कुट-कपट-सातिसम्प्रयोगबहुलः, निःशीलः, निर्व्रतः, निर्गुणः, निर्मर्यादः, निर्प्रत्याख्यान-पौषधोपवासः, बहूनां द्विपद-चतुष्पद-मृग-पशु-पक्षी-सरीसृपानां घाताय वधायोच्छेदनायाधर्मकेतुः समुत्थितः, गुरूणां नाभ्युत्तिष्ठति न विनयं प्रयुङ्क्ते ।

गुरुप्रत्यनीकत्वे फलम् -

"माणी गुरुपडणीओ, अणत्थभूओ अमग्गचारी य ।[15]
मोहं किलेसजालं, सो खाइ जहेव गोसालो ।।" [उपदेशमाला-१२९]

अत्र कूलवालकसम्बन्धः ।[१०]

श्री गुरुभक्तिश्च विविधफला -

"गुरुभत्तिखंति-करुणा-वय-जोग-कसायविजय-दाणजुओ ।[16]
दढधम्माई अज्जइ, सायमसायं विवज्जयओ ।।" [प्रथमकर्मग्रन्थ-५५]

अत्र चण्डरुद्राचार्यसम्बन्धः । यथा -

।। अथ चण्डरुद्राचार्यसम्बन्धः ।।

[17]चंडरुद्दो आयरिओ, उज्जेणिं बाहिरगामाओ अणुजाणपेक्खओ आगओ, सो य [११]अईव रोसणो, तत्थ समोसरणे गणियाघरविहेडिओ जाइकुलाइसंपण्णो इब्भदारओ सेहो उवट्ठिओ, तत्थ [१२]अण्णेहिं असद्दहंतेहिं चंडरुद्दस्स पासं पेसिओ, [१३]कलिणा कली घस्सउत्ति, सो तस्स उवट्ठिओ, तेण सो [१४]तहेव लोयं काउं पव्वाविओ, पच्चूसे गामं वच्चंताणं पुरओ सेहो पिट्ठओ चंडरुद्दो, [१५]पत्थारआवडिओ रुट्ठो सेहं [१६]दंडेण मत्थए अभिहणइ, कहं ते पत्थरो ण दिट्ठोत्ति ?, सेहो सम्मं सहइ, आवस्सयवेलाए रुहिरावलित्तो दिट्ठो, चंडरुद्दस्स तं पासिऊण [१७]मिच्छामि दुक्कडत्ति वेरग्गेण केवलणाणं उप्पण्णं, सेहस्सावि कालेण केवलणाणमुप्पण्णं ।।

---

१०. प्रसिद्धा चेयं कथा श्री उत्तराध्ययनादिग्रन्थेष्वतो नालिखेता वृत्तिकृतेति सम्भाव्यते । - संपा० । ११. 'अवीव' हस्त० । १२. 'अण्णे' हस्त० । १३. 'कलिणा कली घस्सउ' हस्त० नास्ति । १४. 'ताहेवेव' हस्त० । १५. 'पत्थार' आवश्यकनिर्युक्तौ नास्ति । १६. 'दंडेण' हस्त० नास्ति । १७. 'मिच्छामि दुक्कंड' हस्त० नास्ति ।

15. मानी गुरुप्रत्यनीकोऽनर्थभृतोऽमार्गचारी च । मौधं क्लेशजालं स खादति यथा गोशालः ।।

16. गुरुभक्ति-क्षान्ति-करुणा-व्रत-योग-कषायविजय-दानयुक्तः । दृढधर्मादि अर्जयति, सातमसातं विपर्ययात्।

17. चण्डरुद्र आचार्यः, उज्जयिनीं बहिर्ग्रामादनुयानप्रेक्षक आगतः, स चातीव रोषणः, तत्र समवसरणे गणिकागृहविनिर्गतो जातिकुलादिसम्पन्न इभ्यदारकः शैक्ष उपस्थितः, तत्रान्यैरश्रद्दधद्भिश्चण्डरुद्रस्य पार्श्वं प्रेषितः, कलिना धृष्यतां कलिरिति, स तस्योपस्थितः, तेन स तथैव लोचं कृत्वा प्रव्राजितः, प्रत्यूषे ग्रामं व्रजतोः पुरतः शैक्षकः पृष्ठतश्चण्डरुद्रः, प्रस्तर आपतितो रुष्टः शिष्यं दण्डेन मस्तके हन्ति, कथं त्वया प्रस्तरो न दृष्ट इति ?, शैक्षः सम्यक् सहते, आवश्यकवेलायां रुधिरावलिप्तो दृष्टः, चण्डरुद्रस्य तद् दृष्ट्वा मिथ्या मे दुष्कृतमिति वैराग्येण केवलज्ञानमुत्पन्नम्, शैक्षस्यापि कालेन केवलज्ञानमुत्पन्नम् ।

इत्यावश्यकबृहद्वृतौ ।

अतो गुरुभक्तौ यतनीयमेवायतिसुखार्थिभिर्भा[र्भ]विभिः ।

।। अथ सुनक्षत्रकथा ।।

स्थितप्रतिष्ठिते जितशत्रुः, धनावहेभ्यधारणीसूः सुनक्षत्रः स्वाम्युक्तं जीवकर्मणोरष्टलेपलिप्ताऽलाबुदृष्टान्तं श्रुत्वा प्रव्रजितः । इतश्च गोशालोत्पत्तिः, श्रीवीरप्रद्वेष-पार्श्वागमादिवाच्यम्, श्रीवीरनिर्भत्सनावसरे सर्वानुभूतिमुनिः-'त्वं स्वामिनैव प्रव्राजितस्तस्यैव प्रत्यनीकोऽसी'ति ब्रुवन् रुष्टगोशालेन तेजोलेश्यया भस्मीकृतः सहस्रारेऽष्टादशाब्ध्यायुर्देवस्ततो विदेहे सेत्स्यति । ततो द्वितीयवारमाक्रोशनेऽसहमानः सुनक्षत्रोऽपि तेजसा तापितः, सर्वं क्षमयित्वा मृतोऽच्युते द्वाविंशत्यब्ध्यायुः विदेहे सेत्स्यति ।

।। इति सुनक्षत्रकथा ।।

गुरुभक्तौ परलोकफलम् -

।। अथ श्रीमदाम्रभट्टकथा ।।

अथ विश्वैकसुभटेन श्रीमदाम्रभटेन पितुः श्रेयसे श्रीभृगुपुरे शकुनिकाविहारप्रासादप्रारम्भे खन्यमाने गर्त्तापूरे नर्मदासानिध्यादकस्मान्मिलितायां भूमौ बाधितेषु कर्मकरेषु कृपापरवशतयात्मानमेवामन्दं निन्दन् सकलत्रपुत्रस्तत्र झम्पां ददौ । अधःपातेऽप्यक्षताङ्गो निस्सीमं तत्सत्त्वोद्रेकप्रीणितया कयाचिद्देवतया स्त्रीरूपतयाऽबाधितः का त्वमित्यपृच्छत् । अहमस्य क्षेत्रस्याधिष्ठात्री, तव सत्त्वपरीक्षार्थमेतन्मया कृतम् ।

"स्तुत्यस्त्वं वीरकोटीरय-स्येदृग् सत्त्वमुत्कटम् ।
नोचे जने धनेऽप्येवं, मृते त्वद्वन्म्रियेत कः ।।"

ते सर्वेऽपि कर्मकरा अक्षताङ्गाः सन्ति । असमाधिर्न कार्या, कुरु स्वकार्यमित्याद्युक्त्वा देवी तिरोहिता। मन्त्र्यपि सकुटुम्बः कर्मकराश्च निर्गताः। ततो देवीनां भोगं कारयित्वा अष्टादशहस्तोच्चः श्रीसुव्रतप्रासादः शकुनिका-मुनि-न्यग्रोधादिमूर्त्तयश्च लेप्यमय्यः कारिताः ।

"विक्रमाद्[१८]व्योमनेत्रार्कवर्षे [१]२२० हर्षादचीकरत् ।
वीराग्रणीः शकुनिकाविहारोद्धारमाम्बडः ।।"

प्रतिष्ठार्थं श्रीकुमारपालनृप-श्रीहेमाचार्य-सकलश्रीसंङ्घानामाकारणम्, महामहैः श्रीसुव्रतप्रतिष्ठा-मल्लिकार्जुनकोशीय - श्रीकुमारपालप्रसादित - द्वात्रिंशत्स्वर्णघटीमितकलश-हैमदण्डपट्टकूलमयध्वजान् यथाविधिं प्रतिष्ठाप्य दत्तवान् प्रासादे, हर्षोत्कर्षावेशात् प्रासादमूर्ध्नि चटित्वा स्वर्णरत्नोत्करान् ववर्ष ।

निरीक्षिता पुराप्यासीद्वृष्टिर्जलमयी जनैः ।
तदा तु ददृशे क्षौम- स्वर्णरत्नमयी पुनः ।।

१८. अत्र विक्रमाद् १२२० वर्षे ज्ञेयः, वर्षसहस्रं न गणितम् ।

"स्रष्टुर्विष्टपसृष्टिनैपुणमयात्पाणेरपि त्वत्करे,
शक्तिः काप्यतिशायिनी विजयते यद्याचकानां ययौ ।
भाले तेन निवेशितामतिदृढां दारिद्र्यवर्णावलीम्,
दानिन्नाम्रभटैष भूरिविभवैर्निर्मार्ष्टि मूलादपि ।।"

"द्वात्रिंशद्द्रम्मलक्षा, भृगुपुरवसतेः सुव्रतस्याऽर्हतोऽग्रे,
कुर्वन्मङ्गल्यदीपं ससुरनरवरश्रेणिभिस्तूयमानः ।
योऽदादर्थिव्रजस्य त्रिजगदधिपतेः, सद्गुणोत्कीर्त्तनायाम्,
स श्रीमानाम्रदेवो जगति विजयतां दानवीराग्रयायी ।।" [ ]

इत्यादि कविजनैः स्तूयमानः प्रासादादवतीर्य श्रीचौलिक्यप्रेरित आम्रभटमन्त्री आरात्रिकादि कर्तुमारेभे श्रीसुव्रतपुरः। तत्र श्रीकुमारपालदेवो विधिकारकः । द्वासप्ततिसामन्ताः कनकदण्डचामरधारिणः । श्रीवाग्भटादिमन्त्रिणा सर्वोपस्करः सम्पादितः । तत्रारात्रिकमुत्तार्य मङ्गलप्रदीपे क्रियमाणे-

"प्रथमं पृथिवीभर्त्रा भ्रात्रा सामन्तमण्डलैः ।
सङ्घाधिपैस्ततः श्राद्धैर्भ्रातृभगीनिसुतादिभिः ।।"

श्रीखण्डमिश्रघुसृणैर्नवांगार्चापुरःसरम् ।
भालस्थले मुहुः क्लृप्तो, भाग्यलभ्यविशेषकः ।।

कण्ठे च रोपितानेक - स्मेरसूनचतुःसरः ।
निरीक्षितो मुखाम्भोजो निस्पृहैरपि सस्पृहम् ।।

तुरङ्गान् द्वारभट्टेभ्यः शेषेभ्यः कनकोत्करान् ।
तदभावे परिष्कारा-नर्प्पयन्निजदेहतः ।।

धृत्वा कराभ्यां भूपेन, बलादपि विधापितम् ।
आरात्रिकविधिं चक्रे, स धार्मिकशिरोमणिः ।।"

ततश्चैत्यवन्दनां कृत्वा गुरूंश्च नत्वा, साधर्मिकवन्दनापूर्वं नृपतिं सत्वरारात्रिकहेतुं पप्रच्छ । 'यथा द्यूतकारो द्यूतरसातिरेकाच्छिरःप्रभृतीनपि पदार्थान् पणीकुरुते, तथा भवानप्यतः परमर्थिप्रार्थितस्त्यागरसातिरेकाच्छिरोऽपि तेभ्यो ददासी'ति नृपेणादिष्टे सति भवल्लोकोत्तरचरित्रेणापहृतहृदया विस्मृताजन्ममनुष्यस्तुतिनियमाः प्रभुश्रीहेमचन्द्राचार्याः प्राहुः -

"किं कृतेन न यत्र त्वं यत्र त्वं किमसौ कलिः ।
कलौ चेद्भवतो जन्म कलिरस्तु कृतेन किम् ।।" [शार्ङ्गधरपद्धति-१२२२ कुमारपालप्रबोधप्रबन्ध-५०६]

इत्थमाम्रभटमनुमोद्य गुरुक्षमापती यथागतं जग्मतुः । अथ तत्रागतानां प्रभूणां श्रीमदाम्रभटस्याकस्मिक-देवीदोषात्पर्यन्तदशां गतस्य प्रच्छन्नविज्ञप्तिकायामुपागतायां सत्यां तत्कालमेव- 'तस्य महात्मनः प्रासादशिखरे नृत्यतो मिथ्यादृशां देवीनां दोषः सञ्जातः' इत्यवधार्य प्रदोषकाले यशश्चन्द्रतपोधनेन समं खेचरगत्योत्पत्य निमेषमात्रादलङ्कृतभृगुपुरपरिसरभुवः प्रभवः सैन्धवां देवीमनुनेतुं कृतकायोत्सर्गास्तया जिह्वाकर्षणादवगणनास्पदं नीयमानाः [श्रीहेमसूरयः], उदूखले शालितन्दुलान् प्रक्षिप्य यशश्चन्द्रगणिना प्रदीयमाने मुशलप्रहारे प्राक् प्रासादः कम्पितः, द्वितीये प्रहारे दीयमाने सा देवीमूर्तिरेव स्वस्थानादुत्पत्य 'वज्रपाणिवज्रप्रहारेभ्यो रक्ष रक्ष इत्युच्चरन्ती प्रभोश्चरणयोः निपपात । इत्थमनवद्यविद्याबलात्तन्मूलानां मिथ्यादृग्व्यन्तरामरीणां दोषं निगृह्य श्रीसुव्रतप्रासादमासेदिवांसः ।

"संसारार्णवसेतवः शिवपथप्रस्थानदीपाङ्कुराः,
विश्वालम्बनयष्टयः परमतव्यामोहकेतूद्गमाः ।
किं वास्माकं मनोमतङ्गजदृढालानैकलीला-
जुषस्त्रायन्तां नखरश्मयश्चरणयोः श्रीसुव्रतस्वामिनः ।।" [प्रबन्धचिन्तामणि]

इति स्तुतिभिः श्रीमुनिसुव्रतमुपास्य श्रीमदाम्रभटमुल्लाघस्नानेन पटूकृत्य यथागतमागुः । श्रीमदुदयनचैत्ये शकुनिकाविहारे घटीगृहे च राज्ञा कौङ्कणनृपतेः कलशत्रितयं न्यास्थत श्रीमानाम्रभटो राजपितामहः ।।

।। इति श्रीमदाम्रभट्टकथा ।।

तथा -

।। अथाऽऽमराजकथा ।।

सुराष्ट्रायां गोमण्डलनगरात् सप्तपुत्रैः सप्तदशशतयोद्धैस्त्रयोदशशतशकटैस्त्रयोदशकनककोटीस्वामी धाराकः श्रावकः सङ्घं कृत्वा श्रीतीर्थनमस्करणाय चलितः । श्रीशत्रुञ्जये युगादिजिनमानम्य रैवतकतल - हट्टिकायां सङ्घः स्थितः । तीर्थं पुनरग्रे दिगम्बरैरधिष्ठितम्, दिगम्बरैर्वादे बौद्धान् जित्वा पञ्चाशद्वर्षाणि यावत् श्वेताम्बरः कोऽपि न गतः । धाराकश्रावकेण ज्ञापितमस्ति । चतुरशीतिमण्डलाचार्याणां समीपे यदहं तीर्थवन्दनायागच्छन्नस्मि । तैर्भणितम्, दिगम्बरश्रावको भूत्वा समागच्छ । धाराकेन चिन्तितम्- यदहं प्राणान्तेऽपि गुरुक्रमं न मोचयिष्यामि । अन्यत् श्रीउज्जयन्ततीर्थनमस्कारं विना प्राणान्तेऽपि न गमिष्यामि । धाराकश्चिन्तायामापतत्, पुत्रैः पृष्टे ज्ञाते च प्रोक्तं किं प्रयोजनं दिगम्बरतीर्थं बलान्नमस्करिष्यामः । मण्डलाचार्यैः श्रावकखंगारराज्ञां ज्ञापितम्, तत्सैन्येन युद्धम् । सप्तपुत्रा मृत्वा क्षेत्रपतयो बभूवुः । तेषां नामानीमानि कालमेघादयः सप्त । ततः सङ्घो धाराकश्च न जेमति । तृतीयोपवासेऽम्बिकया भणितम् - 'अहो धाराक ! षट्त्रिंशल्लक्षप्रमाणदेशे कन्यकुब्जाभिधे गोपालपुरे आमो नाम राजा यस्य एकसहस्रनगराणि त्रिकोटिपञ्चाशतलक्षाणि पदातयः, चतुर्दशसहस्रा इभाः, द्विलक्षाश्वादिसमृद्धिः । तत्र श्रीबप्पभट्टिसूरीन् विना दिगम्बराः केनापि न जीयन्ते, एषां मन्त्रा व्यन्तराश्च

सकला इति ज्ञातव्यम् ।' सङ्घं विमुच्याष्टभिः श्राद्धैः सह धारको गतः । तत्र श्रीबप्पभट्टिसूरिणा श्रीआमप्रमुखश्रावकाणामग्रे व्याख्यानं प्रारब्धं महारसेन । धाराकेन श्रावकैश्च वन्दिताः श्रीगुरवः। श्रीजैनशासनपक्षपातकारिणां श्रीगुरूणां व्याख्याने आज्ञास्ति । राज्ञा सावष्टम्भं विलोकिताः । श्रीबप्पभट्टिसूरिभिः धाराकपार्श्वात् पूर्ववृत्तान्तः पृष्टः । पूर्ववृत्तान्तोऽम्बिकादेशश्च कथितः । श्रीसूरिभिरुज्जयन्तमाहात्म्यं कथितम् ।

"गत्वा शत्रुञ्जयं तीर्थं दृष्ट्वा रैवतकाचलम् ।
स्नात्वा गजपदे कुण्डे पुनर्जन्म न विद्यते ।।"

हर्षवशादभिग्रहो गृहीतो राज्ञा । श्रीनेमिं पूजितं विना न भोजनं करिष्ये । राज्ञः पृष्टे च सहस्रश्रावकैः भार्यया कामलदेव्या च सोमेश्वरनमस्कारं विना भोजनं न हि । सर्वसामग्र्या चलितम् । एकलक्षपोठिका, उष्ट्रसहस्रद्वि - हस्तिसप्ततिशत-अश्वलक्षैक-पत्तिलक्षैक-श्रावकसहस्रद्वाविंशति, द्वात्रिंशत्तमे उपवासे श्रीस्तम्भतीर्थे देहापाटवम् । श्रीसङ्घाग्रहोऽभिग्रहमोचने ।

"यस्मिन् कुले यः पुरुषः प्रधानः, सदैव यत्नेन स रक्षणीयः ।
तस्मिन् विनष्टे हि कुलं विनष्टम्, न नाभिभङ्गे ह्यरका वहन्ति ।।"

नृपवचः -

"राज्यं यातु श्रियो यान्तु, यान्तु प्राणा अपि क्षणात् ।
या मया स्वयमेवोक्ता, वाचा सा यातु शाश्वती ।।"

अथ सत्वाद्रात्रावम्बिकादेशः । प्रातः श्रीनेमिस्तव सत्त्वेनागमिष्यति, पारणकं कर्तव्यम् । यत्राद्रदूर्वोपरि पुष्पप्रकरं द्रक्षसि । तत्र हस्तेन खरः चलनीयम् । श्रीनेमिस्तत्र प्रकटीभविष्यति, प्रभाते तदेव जातम्, राज्या भणितम् - 'स्वामिन् ! पारणं क्रियताम् ।' राजाह - 'त्वां विना नहि करिष्ये । पुना रात्रौ सोमेश्वरमूर्तिः । तथापि न मन्यते । प्रातः नदीस्थाने समुद्रागमः पारणं कृतं द्वाभ्यां प्रासादद्वययोग्यं द्रव्यमर्पितम् । ततः प्रयाणके रैवतकतलहट्टिकायां नरः प्रेषितः सूरिभिर्मण्डलाचार्याणां पार्श्वे -यदि युध्यते ततो बहुजीवसंहारोऽतो आत्मनोर्मध्ये वादं गृहीष्यामः । मन्यामासं यावत् । विवादे केनापि न जीयते । आमराज्ञा धाराकेन च विज्ञप्तं बहवो दिना जाताः । प्रभुणा भणितम्-'अद्य निर्वाहयिष्यामः ।' एकत्रिंशे दिने कुमारिका यस्य तीर्थं समर्प्ययिष्यति तस्यैव तीर्थम्, मण्डलाचार्यैर्भणितमेतत्प्रमाणम् । मंडिता पूर्वं कुमारी तैः । पात्रं न पूरितम् । बप्पभट्टिसूरयो ध्याने उपविष्टाः, प्रभुणा धाराको वासान् दत्त्वा प्रेषितस्तेन कुमारीमस्तकोपरि क्षिप्ताः । तदनन्तरं तया भणितम् -

[18] इक्को वि नमुक्कारो, जिणवर-वसहस्स वद्धमाणस्स ।
संसार-सागराओ, तारेइ नरं व नारि वा ।।

---

18. एकोऽपि नमस्कारः, जिनवर-वृषभाय वर्द्धमानाय । संसारसागरात्, तारयति नरं वा नारिं वा ।।

[19] *उज्जिंतसेल-सिहरे, दिक्खा नाणं निसीहिआ जस्स ।*
तं धम्म-चक्कवट्टिं, अरिट्ठनेमिं नमंसामि ।।२।।

श्रीसङ्घ उपरि चटितः । ते दिगम्बरा निष्कासिताः । विनययाञ्चायां पश्चादपापामठोऽर्प्पितः स्वकीय एव तेषाम् । महती प्रभावना जाता । द्वौ श्रीसंघौ यात्रां कृत्वा स्वस्थानं गतौ । तद्दिनादात्मीयं जातं पुनरपि । अन्यदा राज्ञीं दृष्ट्वा राजा गाथार्धम् -

[20] "बाला चंक्कमंती पए पए, कीस कुणइ मुहभंगं ? ।"

सूरिः -

[21] "नूणं रमणपएसे मेहलया छिवइ नहपंति ।।"

श्रुत्वा राजा सशङ्कः । गुरुः कपाटे रहःकाव्यानि लिखित्वा गतः ।

"अस्मान् विचित्रवपुषश्चिरपृष्टलग्नान्,
कस्माद्विमुञ्चसि विभो ! यदि वा विमुञ्च ।
हा हन्त ! केकिवर ! हानिरियं तवैव,
भूपालमूर्द्धनि पुनर्भविता स्थितिर्नः ।।
यामः स्वस्ति तवाऽस्तु रोहणगिरे ! मत्तः स्थितिप्रच्युता,
वर्त्तिष्यन्त इमे कथं कथमिति स्वप्नेऽपि मैवं कृथाः ।
श्रीमंस्ते मणयो वयं यदि भवल्लब्धप्रतिष्ठास्तदा,
ते शृङ्गारपरायणाः क्षितिभुजो मौलौ करिष्यन्ति नः ।।
[१९]इक्काण वि तरुवर फिट्टइ पत्तमुत्तणं न पत्ताणं ।
तुहं पुण छाया जइ होइ तह विन्ता तेहिं पत्तेहिं ।।"

गौडदेशे लक्षणावत्यां बहिरारामे स्थिताः । श्री धर्म्मेण प्रवेशोत्सवः कारितः । स्वयमागत्यामाकारणे त्वां ज्ञापयित्वा त्वदनुज्ञया गन्तव्यमिति तस्य वचोऽदात् ।

[22] तइया मह निग्गमणे पिआइ घोरसुएहिं जं रुण्णं ।

---

१९. अस्पष्टार्थासौ गाथा । - संपा०

19. उज्जयन्तशैलशिखरे दीक्षा ज्ञानं नैषेधिकी यस्य । तं धर्मचक्रवर्तिनमरिष्टनेमिं नमस्यामि ।।

20. बाला चङ्क्राम्यती पदे पदे कुतः कुरुते मुखभङ्गम् ? ।

21. नूनं रमणप्रदेशे मेखलया स्पृश्यते नखपङ्क्तिः ।।

22. तदा मम निर्गमने प्रियया घोराश्रुभिर्यद् रुदितम् ।

गाथार्द्धसमस्यापूरयितुं प्रष्टकलक्षमामो दत्ते तम्-

[23] "करपत्तयजलबिन्दुअनिवडणेण तं मज्झ संभरियं ।।"

इति सूरिरपूरयत् । तस्य लक्षदानं, राज्ञा तुष्टेन सूरेराकारणाय प्रधानाः प्रेषिताः । उपालम्भश्च ।

"न गङ्गां गाङ्गेयं सुयुवतिकपोलस्थलगतम् ;
न वा शुक्तिं मुक्तामणिरुरसिजस्पर्शरसिकः ।
न कोटीरारूढः स्मरति च सवित्री मणिचयः ;
ततो मन्ये विश्वं स्वसुखनिरतं स्नेहविरतम् ।।"

गुरुः प्रतिवाचिकम् ।

[24] गय १ [२०] माणस २ चन्दण ३ भमर ४ रयणायर ५ ससिखण्ड ६ ।
जड ७ उज्जुअ ८ बपभट्टि किअ अट्ठह गाहा सुट्ठु ।।१।।

एवं ८ गाथाः । तत आम आगत आकारणार्थम् । ततः सभायां सूरयश्छलेन ज्ञापयन्ति 'आम आवउं' ३ बीजपूरकं करे कृत्वा 'बीजउरा' तुबरीपत्रं कर्णे कृत्वा 'तुंअरिपुत्त' आमोऽपि एककंकणं राजद्वारे, एक वेश्याया ग्रहणके मुक्त्वा प्रातः स्वराज्ये गतो मार्गमुक्ताश्ववारैः । प्रातः सूरिभिर्मुत्कलापितम् । राज्ञोक्तम् प्रतिज्ञा याति । आह - नैवं सा पूर्णा, केनाप्येकमामनामांकम्, द्वितीयं वेश्यया चार्पितम्, धर्मरज्ञः खेदः ।।

।। इत्यामराजसम्बन्धः ।।

इति गुरुभक्तिरिह जिनशासनप्रभावनयाऽमुत्र सुगतिप्रापकतयाऽऽराध्या एव ।।

[इइ गुरुथुइ]

---

२०. *अत्र गाथाष्टकं सम्भाव्यते परमस्माभिः शब्दशः न प्राप्तं केषु ग्रन्थेषु । - संपा० ।*

23. करपत्रकबिन्दुकनिपतनेन तत् *मया स्मृतम्* ।।

24. गज-मानस-चन्दन-भ्रमर-रत्नाकर-शशिखण्ड । जड-ऋजुकः बप्पभट्टिः कृताष्टकगाथा सुष्ठु ।।

[साहम्मिआण वच्छल्लं]

[२२-साधर्मिकानां वात्सल्यम्]

समानधर्माणां **साधर्मिकाणां वात्सल्ये** यत्नो विधेयः । यदुक्तम् -

"[1]**साहम्मिअंमि पत्ते घरंगणे जस्स होइ न हु नेहो ।**
इअ जिणवरेण भणिअं संमत्ते तस्स संदेहो ।।"

सर्वत्रापि साधर्मिकदुर्लभतोक्ता । यतः -

"[2]**दुल्लहो माणुसो जम्मो, धम्मो सव्वनुदेसिओ ।**
साहुसाहम्मिआणं च सामग्गी पुण दुल्लहा ।।" [श्राद्धदिनकृत्य-२१५]

साधर्मिकैः सहोत्पन्नेऽपि सम्बन्धे विवादादयो न विधेया एव । यतः -

"[3]**विवायं कलहं चेव, सव्वहा परिवज्जए ।**
साहम्मिएहिं सद्धिं तु, जओ एअं विआहिअं ।।

[4]**जो किर पहणइ साहम्मिअंमि कोवेण दंसणमयम्मि ।**
आसायणं तु सो कुणइ निक्किवो लोगबंधूणं ।।" [श्राद्धदिनकृत्य-२०३, २०४]

श्रीआगमेऽपि -

"[5]**कहं णं भंते जीवा सुहं कम्मं बन्धंति ? गो० ! सम्मद्दंसणसुद्धीए-१, पसत्थमणवयणकायजोगेणं-२, इंदिअनिग्गहेणं-३, कोहाइविजएणं-४, धम्मसुक्कज्झाणेणं-५, आयरिअ उवज्झायसाहुसाहम्मिअभत्तीए-६, दाणसीलतवभावप्पभावणाए-७, वेरग्गेणं-८, निसग्गेणं-९, संविभागेणं-१०, इच्चेहिं दसहिं ठाणेहिं जीवा सुहं कम्मं बंधंति ।।"**

---

1. साधर्मिके प्राप्ते गृहांगणे यस्य भवति न खलु स्नेहः । इति जिनवरेण भणितं सम्यक्त्वे तस्य संदेहः ।।
2. दुर्लभः मनुष्य-जन्म, धर्मः सर्वज्ञ-देशितः । साधु-साधर्मिकानां च सामग्री पुनः दुर्लभा ।।
3. विवादं कलहं एव, सर्वथा परिवर्जयेत् । साधर्मिकैः सार्धं तु यतः एतत् व्याख्यातम् ।।
4. यः किर प्रहन्ति साधर्मिके कोपेन दर्शनमते । आशातनां तु स करोति निष्कृपो लोकबन्धूनाम् ।।
5. कथं भंते ! जीवाः शुभं कर्म बध्नन्ति ? गौ० सम्यग्दर्शनशुद्ध्या-१, प्रशस्तमनवचनकाययोगेन-२, इन्द्रियनिग्रहेण-३ क्रोधादिविजयेन-४, धर्मशुक्लध्यानेन-५, आचार्योपाध्यायसाधुसाधर्मिकभक्त्या-६, दानशीलतपभावप्रभावनया-७, वैराग्येन-८, निसर्गेण-९, संविभागेन-१०, इत्यादिभिर्दशभिः स्थानैर्जीवाः शुभं कर्म बध्नन्ति ।

अत्र श्रीवज्रस्वामिसम्बन्धः ।

तुम्बवनसन्निवेशे धनगिरिः श्राद्धः, स तारुण्येऽपि प्रियां न गच्छति । पिता तदर्थं यत्र यत्र कनीं याचति, तत्र तत्र प्रव्रजिष्यामीत्युक्त्वा निषेधयति । धनपालमहेभ्यसुतां सुनन्दां पितृवशादसौ उपायंसू, सुनन्दाभ्रातार्यसमितः सिंहगिरिगुरुपार्श्वे पुरा गृहीतव्रतोऽस्ति । अन्यदा धनगिरिर्ब्रह्मप्रियोऽपि प्रियां भेजे । इतश्चाऽष्टापदे यो भूमिगोचरे स्वशक्त्यारुह्य देवान् वन्दते स चरमशरीरी स्यादिति - श्रीवीरवाक्यं श्रुत्वा गौतमः सूर्यकिरणानालम्ब्य तत्र गत्वा देवान् ववन्दे । तदा धनदामरः श्रीवीरपार्श्वे -

"[6]कालीपव्वंगसंकासे, किसे धमणिसंतए ।
मायन्ने असणपाणस्स, अदीणमणसो चरे ।।" [उत्तराध्ययन - २/३]

इत्यादि श्रुतश्रवणस्वरूपे प्रौढं सुकुमालं दृष्ट्वा जातसंशयो गौतमेन पुण्डरीक-कण्डरीकाध्ययनाभ्यां प्रतिबोधितोऽस्ति पुरा, स तदा च्युत्वा सुनन्दाकुक्षावुत्पन्नः । ज्ञात्वा धनगिरिः सगर्भां तां गर्भोऽयं ते द्वितीयको भावीत्युक्त्वा प्रव्रजितः सिंहगिरिं सकाशे । सुनन्दा सुतं प्रसूता, तत्प्रतिजागरितुमागतः सखीजनोऽवदत् - 'यद्यस्यार्भकस्य पिता तदा व्रतं न लास्यत तदा अद्याऽतुच्छमुत्सवमकारयिष्यत् । सो बालो बलधीः तच्छ्रुतेनोहापोहेन जातिस्मृतिमायातः । कथं व्रताय माता मे मोक्ष्यति ? बालस्य रुदनं बलमिति विचिन्त्य दिवानिशं रुदन्नेवाऽस्ते । तस्यैवमेवाविश्रान्तं रुदतः षण्मासा अतिक्रान्ताः, ततः सुनन्दा तद्रुदितात् भग्ना, चिन्तयति - यद्यऽस्याऽत्र पिताऽऽगच्छति तन्नूनं तस्मायर्प्ययाम्यमुम् ।

इतश्च सिंहगिरिर्धनगिर्यार्यसमितयुतस्तत्राऽगात् । धनगिर्यार्यसमितौ गुरुं पप्रच्छतुः - 'भगवन्नावां भिक्षाचर्यार्थं नगरमध्ये व्रजावः ?' गुरुः श्रुतोपयोगेन भाविव्यतिकरं ज्ञात्वोचे - 'गच्छताम्, परं यत्किञ्चित् सचित्तमचित्तं वा लभेथाः तदानेतव्यम्, तावित्थमित्युक्त्वा गतौ । क्रमेण विहरन्तौ सुनन्दागृहं गतौ। सा सुतमादायोत्थिता भणति - अहमुद्वेजिताऽश्रान्तं रुदताऽनेन सूनुना, कृतं मे तेन, त्वं गृहाणाङ्गजं निजम्, स प्राह - 'त्वं तु पश्चात् पश्चात्तापं करिष्यसि,' सा प्राह - 'न करिष्ये ।' ततो धनगिरिणाऽऽसन्नाः सख्यः साक्षिकाः कृताः । सुनन्दयाऽसौ पात्रकबन्धे मुक्तः । रुदनादुपासरत्, तं नीत्वा, तद्भारनमद्बाहुर्मुनिरुपाश्रयं प्राप्तः, तं वीक्ष्य गुरुः सन्मुखं गत्वा तद्बाहुविश्रामार्थं बालकं कराभ्यां गृहीत्वा चाऽह-'वज्रभारोऽयं तीर्थाधारो भविष्यति, अतो यत्नेन रक्षणीयः ।' ततो वज्रेति नामं दत्त्वा पालनार्थं संयत्युपाश्रये मुक्तः । शय्यातर्यः तं स्तन्यपानांगक्षालनाभिः स्वसुतेभ्योऽधिकं लालयन्ति । यदा स बालो मूत्रादि चिकीर्षति तदा सदा सुव्यक्तां संज्ञां चक्रे । सुनन्दा तं क्रीडन्तं दृष्ट्वा शय्यातरेभ्यो याचते, ते कथयन्ति - 'अयं गुरुसत्को न त्वत्कः ।' सा तं महता उपरोधेन तत्रागत्य स्तन्यपानादिना लालयामास ।

इतश्चाचलपुरे तापसशतयुतो पादलेपवित्कश्चित्तापसो पादुकारूढो पादलेपाज्जलेऽपि स्थलवच्चलन् जनयति विस्मयं जने । तद्भक्तजनः श्रावकाणामित्थं निन्दते - 'यादृक्षोऽस्मद्धर्मप्रभावः प्रत्यक्षो दृश्यते, न युस्माकं तादृग्' इत्याकर्ण्यार्यसमिताचार्यो वज्रमातुलस्तत्राऽगात् । तस्मै तापसवृत्तान्तो न्यवेदि । स प्राह - नाऽस्य

---

6. कालीपर्वसङ्काशाङ्गः कृशो धमनीसन्ततः । मात्रज्ञोऽशनपानस्यादीनमनाश्चरेत् ।।

कोऽपि तपःप्रभावः किंत्वेषो पादलेपेन मुग्धजनं वञ्चति । ततोऽसौ श्रावकैः कपटेन भोजनाय निमन्त्रितः । स एकः पाटकगृहे आगतः । तैः कपटभक्त्या पादपादुके पयसा प्रक्षाल्य भोजितः । तापसो विगोपनाभीरुरन्नस्वादं नाज्ञासीत् । भुक्त्वा पौरपरिवृतोऽन्यदिनवद्वेणातीरं गत्वा पादलेपाभावेऽपि साहसात्तदंतःप्रतिष्ठो ब्रुडति स्म । तावदद्दत्तालं लोककलकलं श्रुत्वार्यसमितगुरुस्तत्रागतो बेणामध्ये चूर्णं क्षिप्त्वोवाच - 'हे बेणे ! मार्गं देहि, यास्याम्यहं परतटे, ततस्तया दत्तमार्गेणाचार्यो द्वितीयतटं प्राप्तः तं दृष्ट्वा तापसाः चमत्कृताः प्रव्रजिताः ते ब्रह्मद्वीपवास्तव्याः । तदन्वये ब्रह्मद्वीपकनामानः श्रमणा जाताः ।

अथ वज्रस्तत्रस्थ एव त्रिहायणो जातः । धनगिर्यादयस्तत्रागताः, सुनन्दा सुतं ययाचे, ते न ददुः । ततो नृपकुले व्यवहारः । ततो नृपोत्संगे वज्रोऽस्थापि, एकतः संघगुरुः, एकतः सुनन्दा, पंथानं स्थिताः पौरजनाः कौतुकं विलोकयन्ति । राज्ञोक्तम्-'येनाकारित आयाति तदीयोऽयं बालकः,' प्रथमं सुनन्दा बालक्रीडनकैः प्रलोभयन्ती पुनराह्वयति । वज्रः 'संघापमानेनानन्तसंसारी भविष्यामी'ति ध्यात्वा मातृसंमुखं मनागपि न विलोकयति । ततो नृपप्रेरितो धनगिरिः रजोहरणमुत्क्षिप्योवाच - 'वत्स ! चेद् व्रतमिच्छसि तदमुं गृहाण,' तदा वज्रः शीघ्रमागत्य रजोहरणमाददे । ततो जीयात् श्रीवीरशासनमिति जनप्रघोषोऽभूत् । ततो वैराग्यात्सुनन्दा वज्रेण सह प्रव्रजिता । वज्रो गुरुभिः गृहीतव्रतोऽपि लघुत्वात्पुनः संयत्युपाश्रय एव मुक्तः । स साध्वीभ्यः श्रृण्वन्नेकादशान्यप्यऽङ्गान्यऽध्यैष्ट, महर्षिभिः असौ संयत्युपाश्रयादष्टवार्षिकः स्ववसतिं नीतः ।

अन्यदा सिंहगिरिः वज्रयुक् उज्जयिन्यां ययौ । तत्रावच्छिन्नधारं वर्षा ववर्ष, तदा वज्रपूर्वपरिचिता जृम्भकामराः वज्रसत्वपरिक्षार्थं वणिग्रूपेण विकुर्वितसार्थाः स्थितप्राये घने भिक्षार्थं गुरुं निमन्त्रयति । गुरुभिः क्षुल्लकः प्रेषितः । वज्रो विहर्तुं निर्गतः । स सूक्ष्मवृष्टिं वीक्ष्य शीघ्रं प्रतिनिवृत्तः । सर्वथा वृष्टिं रुद्ध्वा देवैराहूय यत्पुनः इर्यासमितो तदावासं गतो भिक्षाग्रहणसमये द्रव्याद्युपयोगं ददौ । द्रव्यतः कूष्माण्डपाकः, क्षेत्रत उज्जयनी, कालतो वर्षा, भावतोऽनिमेषाक्षा एतेऽतो नूनं देवपिण्डोऽयं यतीनां न कल्पते इति विचिन्त्यागृहीततद्भिक्षा स्वमाश्रयं ययौ । तत्सत्वतुष्टैः सुरैस्तस्मै वैक्रियलब्धिर्दत्ता । अथाऽन्यदा वज्रो ज्येष्ठमासे बहिर्भुविगतो तैरेव वणिजरूपेण घृतपूरैर्निमन्त्रयत तेन पूर्ववदुपयोगेन भिक्षा न गृहीता । ततः प्रमोदादेवैराकाशगामिनी विद्या दत्ता । स एकादशाङ्गधरो पूर्वगतमपि यद्यच्छृणोति तत्तल्लीलया गृह्णाति । गुरुभिः पठेत्युक्तो किञ्चिदस्फुटसुच्चरन्पुनरपरान्पठतो श्रृणोति ।

अन्यदा साधवो भिक्षार्थं गताः । गुरवो बहिर्भुवि गताः, वज्रस्तु वसतावेकाक्येवास्ति। वेष्टिकाः साधुमण्डल्यां विन्यस्य स्वयं मध्ये निषद्यैकादशाङ्गानां पूर्वगतस्य च वाचनां दातुमारेभे, इतीव गुरव उपाश्रयमागताः । सूरयो गद्गद्स्वरं निशम्येति विचिन्तयन् किमाप्तभिक्षाः साधव आगताः ? क्षणाद्वज्रस्य वाचनास्वरं श्रुत्वा चिन्तयामासुः किमयं गर्भस्थोऽध्यैष्ट मास्यास्मद् श्रवणात्क्लंका स्यात्ततोऽपसृत्योच्चैर्नैषेधिकीं चक्रुः । तामाकर्ण्य वज्रो स्वस्थानं वेष्टिकाकृतिं मुक्त्वा समेत्य गुरुपादावमार्जयत् । ततो गुरुभिः वज्रविक्रमज्ञापनाय साधून् प्रत्युक्तम्-वयं श्वोऽमुकं ग्रामं गतास्मस्तत्र द्वित्राऽहं स्थितिर्भाविनी । ततः प्रारब्धयोगा मुनयोऽब्रुवन् कोऽस्मद्वाचनाप्रदः ? गुरुः प्राह - 'वज्रो दास्यति ।' तैर्विनीतविनयैस्तथैवाभ्युपगतम् । प्रातः गुरौ गतेऽनुयोगसामग्र्यं कृत्वा वज्रो गुरुवदासनस्थो वाचनामदात् । मन्दमतयोऽपि वज्रोऽमोघगिरादुष्टमतयोऽभूवन्, तदाश्चर्यं

वीक्ष्य मुनयः पूर्वपठितान्निस्तुषानप्यालापकान् संवादहेतोरपृच्छन् यावद्‌ब्रूतं, गुरुबहुवाचनाभिरधीतम् तावद्वज्रादेकवाचनयाधीयन् । यदि गुरुर्विलम्बेत तदास्मद्श्रुतस्कन्धो वज्रान्तिके तूर्णं समाप्यते इति चिन्तयन्ति। अथागात् गुरुः पृष्टाश्च साधवो वाचना निर्वाहन्ते ? यथास्थितमुक्त्वा गुरुं नत्वा व्यजिज्ञपन् - 'भगवन् ! वाचनाचार्यो वज्र एव सदाऽस्तु नः ।' गुरुः प्राह - 'न त्वऽस्य वाचनाचार्यत्वं युज्यतेऽधुना यदनेन कर्णश्रुत्याऽधीतं न गुरोर्मुखात् । ततः गुरुर्वज्रं विधायोत्सारकल्पं सूत्रार्थं ग्राहितवान् । सिंहगिरिर्वज्रं प्रति प्राह-न ह्यलम्भूष्णवो सर्वे, अहमत्र कडसमो । त्वं भद्रगुप्तगुरोर्मुखात् अधीत्य दशपूर्वाणि शीघ्रमेहि मदाज्ञया ।

सिंहगिरिर्विहरन् दशपुरं ययौ, वज्रमुज्जयिन्यां दशपूर्वधरभद्रगुप्ताचार्यसमीपे पूर्वश्रुतग्रहणायाप्रैक्षीत्। स गतो निशि बहिरस्थात् तन्निशि भद्रगुप्तः स्वप्नमैक्षीत् । यत्केनाप्यागन्तुकेनास्मत्पतद्ग्रहः पयःपूर्णः पीतः । आचार्येण स्वशिष्येभ्यरुक्तमद्य कश्चित्प्राघूर्णक आयास्यति । स मत्तः सर्वं श्रुतमध्येष्यति । व्रज्रो निशान्ते भद्रगुप्तपार्श्वे गतः । तैः प्रमोदादालिंग्यागमनकार्यं पृष्टः । प्राह-पूर्वाणि दशाध्येतुम् । तैरसौ पूर्वश्रुतमध्यापयितुमारब्धः। स प्रज्ञाप्रकर्षतो दशाऽपि पूर्वाण्यचिरेणाधीत्यतदनुज्ञार्थं भद्रगुप्तमापृच्छ्य तदादेशाद् दशपुरे सिंहगिरिपार्श्वे गतः । यतः श्रुतं यत्रोद्दिश्यते तत्रैवानुज्ञाप्यते, ततः सिंहगिरिणा तस्य पूर्वानुज्ञां कृत्वा जृम्भकदेवकृतमहिम्ना वाचनाचार्यपदवीं गणं च दत्त्वा स्वयं कृतानशनः स्वर्गं ययौ ।

वज्रस्वामी पञ्चशतसाधुयुतो विहरन् पाटलीपुत्रं गतः । तत्र धनश्रेष्ठी, तत्सुता रुक्मिणी, सा स्वगृहासन्नस्थितसाध्वीभ्यो वज्रसौभाग्यादिगुणान् श्रुत्वेति कृतप्रतिज्ञा पुरास्ति । यथा-'वज्रं विनाऽन्यं पतिं न करिष्ये, चेत्संयती नेच्छिष्यति तदाहमपि प्रव्रजिष्यामि,' पुनः साध्वीभ्यो तत्रागतं वज्रं श्रुत्वा तद्दर्शनकरग्रहणोत्सुका तातमुवाच । पितः ! चिरात्तद्गुणानुरक्तां मामद्योऽऽगतेन वज्रेणोद्वाहय । ततः श्रेष्ठी मिथ्यादृग्त्वात् साधु-स्वरूपमजानन् तत्प्रेरितो तां विवाहार्थं सर्वालङ्कारभूषितां द्रव्यकोटियुतां नीत्वा तस्य पार्श्वं गतः । तदा वैक्रिय- लब्ध्या संक्षिप्तरूपेण धर्मदेशनां कुर्वन्तं वीक्ष्य तद्रूपसौभाग्यरञ्जितो पौरजनो परस्परं भणति - 'यद्यस्य भगवतो शेषगुणानुरूपं रूपं स्यात्तत्सुवर्णे सौरभ्यम्, वज्रो तेषां मनोगतभावं ज्ञात्वा वैक्रियलब्ध्या स्वं स्वाभाविकरूपं सुवर्णाम्बुजं च विधाय तत्रस्थो देशनां चक्रे । तद्रूपं दृष्ट्वा सर्वः पौरजनो शिरांस्यधूनयत् । वज्रेण मां प्रति कस्या अपि स्त्रियः स्वान्तं न क्षुभत्विति विचिन्त्य पुरप्रवेशे सामान्यरूपं तमभूत् । देशनान्ते श्रेष्ठी वज्रं प्राह - 'स्वामिन् ! त्वदनुरक्तामिमां कन्यामुद्वह, करमोचने त्वद्धनं दास्यामि ।' गुरुः प्राह - 'कृतं मे धनकन्याभ्याम्, चेदेषा मय्यनुरक्ता ततो लात्वेषापि दीक्षाम् ।' रुक्मिणी वज्रान्तिके प्रव्रजिता ।

अन्यदा पदानुसारी वज्रो महापरिज्ञातो नभोगविद्यामुद्दध्रे भणति चानया विद्यया मे मानुषोत्तरं गन्तुं शक्तिरस्ति, पुनर्न मयेमा विद्या कस्याऽपि दातव्या, यतोऽतः परं जीवा अल्पसत्त्वा भविष्यन्ति । विहरन्नन्यदा भगवान् पूर्वदिग्देशादुत्तरदेशं ययौ। तत्र दुष्कालः पतितः । मार्गा अपि व्युच्छिन्नाः । कोऽपि कुत्रापि गमनागमने कर्तुं न क्षमति । ततः दुःस्थितो संघो व्यजिज्ञपत् गुरुम्- 'भगवन्नस्मान्नतो दुःखात्कथमपि तारय ।' वज्रेण पटः कृतस्तमारुह्य संघयुतो वज्रो नभस्युत्पतितस्तावत्पुरा वारिकृते गतो शय्यातर आगतो वज्रं विज्ञपयामास - 'भगवन् ! मां शय्यातरं मुक्त्वा कथं यासि ? ततो वज्रो कृपानिधिः पटाञ्चलेन तं नीत्वा संघयुतो पूषापुरी प्राप्तस्तत्रत्यलोको नृपश्च बौद्धभक्तो श्रावकैर्धर्मस्पर्धया बौद्धा जिताः । जिनार्चायां सोत्कण्ठाः श्रावका बहुमूल्येनाऽपि पुष्पादि गृह्णन्ति । बौद्धास्तु मूल्यदानेऽक्षमाः पुष्पाद्यनाप्नुतो नृपं व्यजिज्ञपयत् । 'देव ! सर्वं

पुष्पादि जैनायतने याति, न किमपि बौद्धायतनेष्वायात्य'तो नृपेण तथाकृते श्राद्धा दानशौण्डा अपि पुष्पादि न लभन्ते । अथ पर्युषणावसरे जिनार्चाचिकीर्षवः पुष्पाद्यप्राप्त्या विषादाद्वाष्पार्द्रनेत्राः वज्रं विज्ञपयामासुः - 'भगवन् ! पर्युषणावसरे पुष्पाणि न लभन्ते किं कुर्मो वयम् ?' वज्रस्तीर्थप्रभावनाचिकीर्षुः श्रावकाणां धीरा भवतेत्युक्त्वा नभस्युत्पत्य माहेश्वरीं पुर्यां हुताशनयक्षोपवने गतस्तत्र योऽऽरामिकः स वज्रपितुः मित्रम्, स वज्रं दृष्ट्वा मुदितः प्राह - 'हे स्नातृज ! तवातिथेरद्य किमातिथ्यं कुर्वे ?' स ऊचे - 'पुष्पैर्नः कार्यम् ।' आरामिक ऊचे - 'स्युरत्र विंशतिलक्षाः पुष्पाणाम् ।' 'तावत्पुष्पाणि सज्जीकुरु, यावत्कार्यान्तरं कृत्वा नागच्छामि' इत्युक्त्वा वज्रो पृषदश्व इवोत्पत्य विहायसा क्षुद्रहिमवद्गिरिं ययौ । पाणिपद्मस्थिता पद्मा श्रीदेवी अर्पयत् । तं नीत्वा पुनर्हुताशनगृहमागतः । विकुर्व्य विमानं तन्मध्ये श्रीदत्तपंकजपार्श्वतो विंशतिलक्षपुष्पाण्यस्थापयत् । स्मृत्यागतर्जृम्भिकामरावृतो बौद्धपुरीं प्रति चलितस्तं वीक्ष्य नभस्यायान्तं बौद्धा जल्पन्ति-किं दृष्टो बौद्धशासनानुभावो यद्यात्रायां सुरा अप्यागच्छन्ति । तानिति जल्पतो बौद्धायतनं च मुक्त्वा वज्रो जिनायतनं ययौ। तत्र देवैः, स कोऽपि महिमा कृतः, यो हि भूमिस्पृशां गोचरेऽपि न । तद्वीक्ष्य नृपः पुरीजनश्चार्हद्भक्तो जातः । विहरनन्यदा वज्रो दक्षिणापथं ययौ । तत्रैकदा वज्रेण श्लेष्मणि संजाते सुंठिः भोजनानन्तरं भोक्ष्ये इति ज्ञात्वा स्थापिता, विस्मृता, सायमावश्यकसमये मुखवस्त्रिकया वपुः प्रतिलेखयतः पतितां तां दृष्ट्वा व्यचिन्तयच्चाऽसौ धिक् प्रमादः । कथं प्रमत्तस्य संयमोऽतोऽनशनमेव श्रेयरितश्च वार्षिको दुष्कालो जज्ञे । वज्रस्वामिना वज्रसेनशिष्यो यदा त्वं स्थाल्यां लक्षपक्वौदनं पश्यसि तदा सुभक्ष्यं भविष्यति इत्यनुशिष्यान्यत्र विहर्तुं प्रेषितः ।

अन्ये वज्रशिष्या भृशं धात्र्यां भ्रमन्तोऽपि भिक्षां न लभन्ते । ततो वज्रेण विद्यापिण्डो आनीय दत्तः । तैरुक्तम्-'भगवन् ! कोऽयं पिण्डो यतीनां कल्पते न वा ?' वज्रः प्रोचे-'अकल्प्योऽयं विद्यापिण्डः,' साधुभिरुक्तम्-'विद्यापिण्डं न गृह्णामः किन्त्वनशनं गृहीष्यामो ।' वज्रस्वामी सर्वसाधुयुतोऽनशनग्रहणार्थं कञ्चन क्षुल्लकं विप्रतार्य मुक्त्वा गिरिमारोह । स गुरुणा वारितोऽपि नगाधोभूमौ कृतानशनो मध्याह्ने मृतो सुरोऽभूत्। तद्देहार्च्चार्थं यातो देवान् दृष्ट्वा साधवो वज्रमपृच्छन् । क्व यान्तीमे देवाः, स श्रुतेन ज्ञात्वोचे-क्षुल्लकोऽसाधयत् कार्यम् । तद्देहार्च्चार्थं यान्तीत्याकर्ण्य यतयो देहत्यागे विशेषत उद्यताः । तन्नगाधिष्ठायिका मिथ्यादृग्देवता साधून्पारणकदिने ऊचे-वोऽद्य पारणकं तन्मद्दत्तं मोदकादि गृह्णीध्वम् । ततो वज्रोऽप्रीत्यवग्रहं ज्ञात्वाऽन्यगिरिं ययौ । तत्रत्यदेवतानुज्ञया कृतानशनो वज्रः साधुयुतः स्वर्गमगात् । तदा वज्रेण सह दशमं पूर्वं तुर्यं संहननं च व्युच्छिन्नम् । वज्रं दिवं गतं ज्ञात्वा वज्री तत्रागत्य रथारूढो तं नगं प्रदक्षिणीचक्रे । स नगोऽद्यापि रथावर्त इति ख्यातः । अथ स वज्रसेनो भ्रमत्सोपारपत्तनं ययौ । तत्र जिनदत्तश्रावक ईश्वरीभार्या तस्याश्च- त्वारः सुताः। नागेन्द्र-चंद्र-निवृत्ति-विद्याधराख्याः । ईश्वरी धान्याभावे कथं जीवितव्यमिति विचिन्त्य पतिपुत्रयुता मरणार्थं लक्षमूल्येनान्नपाकं कृत्वा यावद्विषं क्षिपति तावद्वज्रस्वाम्युक्तेन निमित्तेन वज्रसेनस्तां वारयामास, पश्चाज्जाते सुभिक्षे प्रवहणागतधान्यैः जिनदत्तेश्वरीप्रमुखाः प्रव्रजिताः । ते सुताश्चत्वारोप्याचार्या अभूवन् । तन्नामोपलक्षिता नागेन्द्राद्याश्चत्वारोऽपि शाखाः पृथक् पृथगभूवन् ।

।। इति साधर्मिकवात्सल्ये वज्रस्वामिकथा ।।

[इइ साहम्मिआण वच्छल्लं]

[ववहारस्स य सुद्धी]

[२३-व्यवहारशुद्धिः]

ववहारस्स य सुद्धी-व्यवहारस्य शुद्धिर्व्यवहारशुद्धिस्तस्यां यतनीयम् । व्यवहारिणस्त एवोच्यन्ते ये व्यवहारेणान्यायमार्ग-कूट-कपट-परवञ्चनाऽदत्तग्रहण-कूटकर्षक-कार्षपण-गृहीतापलपन-नव्य-जीर्णैकीकरणवर्जनतत्पराः । धनमपि न्यायोपार्जितमेव स्थिरं स्यान्नान्यत् । यदुक्तम् -

"अन्यायोपार्जितं वित्तं दशवर्षाणि तिष्ठति ।
प्राप्ते च षोडशे[१] वर्षे समूलं च विनश्यति ।।" [चाणक्यशतक १५/६]

दृश्यतेऽपि च सम्प्रत्यपि येऽन्यायमार्गधनमेलकाश्चौरा घाटीवाहा मार्गमूषकाः सर्वेऽपि लोकेभ्यः सुवर्ण-रत्न-मणि-मौक्तिक-पट्टसूत्र-रौप्य-बहुविधनाणकरूपद्रविणापहारेऽपि बुभुक्षाक्षामा एव । ये च श्रीजिनशासनमध्यवर्जितपञ्चदशकर्मादान-कूटमानमाप-सदृशवस्तुमिथःसम्मीलन-बहुमूल्याल्पमूल्यक्रयाणकैकीकरणव्यापारितचीवरादि-नव्यमूल्यमार्गणादिप्रकारैर्व्यवसायं विदधते, तेऽप्यन्यायोपार्जका एव। तेषां श्राद्धसूत्रे प्रतिक्रमणमुक्तम् -

"[1]तइए अणुव्वयम्मी, थूलग-परदव्वहरण-विरईओ ।
आयरिअमप्पसत्थे, इत्थ पमायप्पसंगेणं ।।१।।
[2]तेनाहडप्पओगे, तप्पडिरूवे विरुद्धगमणे अ ।
कूडतुलकूडमाणे, पडिक्कमे देसियं सव्वं ।।२।।
[3]इंगालीवणसाडीभाडीफोडी सुवज्जए कम्मं ।
वाणिज्जं चेव दंत-लक्ख-रस-केस-विस-विसयं ।।" [श्राद्धप्र.-१३, १४, २२]

---

१. 'चैकादशे' चाणक्यशतके ।

1. तृतीये अणुव्रते स्थूलक-परद्रव्यहरणविरतितः । आचरितमप्रशस्ते, अत्र प्रमादप्रसङ्गेन ।।
2. स्तेनाहृतप्रयोगे, तत्प्रतिरूपे विरुद्धगमने च । कूटतूला-कूटमाने, प्रतिक्रमामि दैवसिकं सर्वम् ।।
3. *आङ्गारी-वन-शकटी-भाटी-स्फोटं कर्म सुवर्जयेत् । वाणिज्यं चैव दन्त-लाक्षा-रस-केश-विष-विषयम् ।।*

तथा यदि न्यायोपार्जितवित्तेनाजीविका स्यात् तदा प्रायः सद्बुद्धिः सद्वासना सत्कार्यकरणतत्परता स्यादन्यथा त्वन्यथैव । आहारसदृशोद्गार इत्युक्तेः । अत्र सम्बन्धः-

"[4]देहो अ पुग्गलमओ, आहाराईहिं विरहिओ न भवे ।
तयभावे य न नाणं, नाणेण विणा कओ तित्थं ?" [पुष्पाला-४२]

।। अथ व्यवहारशुद्धौ द्विजकथा ।।

एकः कश्चिद्विप्रः शुल्कमनाः कणवृत्याजीविकां करोति । एकदा दुर्भिक्षे पतितेऽनिर्वहन्

"मातात्मजं त्यजति याति पिताऽपि तापम्, न स्नेहमावहति हन्त सुहृज्जनोऽपि ।
भृत्ये गुणिन्यपि नृपा न कृपालवः स्युः, त्वय्यम्बुवाह ! जगतः प्रतिकूलभाजि ।।"

मालवासन्ने क्वापि चरटैरन्यायिद्विजैश्च भृते ग्रामेऽगमत् । तत्रापि शुल्काजीविकां करोति । केनचिदधमेन सह मैत्री जाता । स स्वविश्वासेन कणमूटकं तन्निश्रया मुक्त्वा देशान्तरेऽगमत् । एकदा तस्मिन् द्विजे केनापि हेतुना ग्रामान्तरं गते साधानया तद्भार्यया ततो मुद्गमाणकं पुनः कालान्तरे प्राप्तियोगे तत्तत्र क्षेप्स्यते इति बुद्ध्या गृहीत्वा स्वयं व्यापारितम् । तत्क्षणं तत्र प्रक्षेपायोगेन[२] बहुकालभवनेन [च] विस्मृतम् । पुनः सुभिक्षे जातेऽसौ स्वदेशेऽप्रापत् । तस्याः सुताजन्म जातम् । एकदा स्नातुकामे द्विजे तद्भार्या वाप्यां जलार्थं गच्छन्त्यभूत्परं कौतुकं प्रेक्षणार्थं वर्त्ममध्यस्थ-बहुजनसमुदायसंघट्टभयान्नागात् । पश्चादागमने पुत्र्या मातुरुक्तम्- 'त्वं केन हेतुना न गता ?' तया जनसम्मीलनमार्गसङ्कीर्णताभवनं हेतुरुक्तः । ततः पुत्री स्वयं घटं मौलौ कृत्वा जलाय गता मातुरनुक्तैव । तया शम्बलीभाषणेन लोको मार्गं मोचितः । पित्रा तथाविसदृशस्वरूपं ज्ञात्वा पत्नी पृष्टा[३], किं हेतुकं नीचत्वम् ? तया विमृश्य संस्मार्य प्रोक्तम्- 'आधानावस्थायां तन्मूटकान् मुद्गमाणकं व्यापारितं मये'ति ।

आगमेऽपि व्यवहारशुद्धिदुर्लभता दर्शिता । यतः -

"[5]आहारे खलु सुद्धी दुलहा समणाण समणधम्मंमि ।
ववहारे पुण सुद्धी गिहिधम्मे दुक्करा भणिअं ।।" [अन्नायउंछकुलक-२]

---

२. 'प्रक्षेपायोगो न' हस्त० । ३. 'पृष्ट्वा' हस्त० ।

4. देहश्च पुद्गलमयः, आहारादिभिर्विरहितो न भवति । तदभावे च न ज्ञानम्, ज्ञानेन विना कुतस्तीर्थम्।।

5. आहारे खलु शुद्धिः दुर्लभा श्रमणानां श्रमणधर्मे । व्यवहारे पुनः शुद्धिः गृहस्थधर्मे दुष्करा भणितम् ।।

तथापि ये आत्मशक्त्या तद्विषये उपक्रमं कुर्वते ते सुखिनो धनिन इहलोके परलोके च स्वर्गादिसौख्यभाजः स्युः। [४]अत्र सम्बन्धो जैनो लौकिकश्च ।

।। अथ न्यायोपार्जितवित्ते देव-यशःकथा ।।

देव-यशोनामानौ द्वौ वणिक्पुत्रौ [मिथः प्रीत्या सह व्यवहरन्तौ] । अन्यदाऽन्यत्र [क्वापि] नगरे व्रजन्तौ मार्गे मणिकुण्डलं पतितं[५] ददृशतुः । आद्यः सुश्रावकत्वात् [दृढव्रतः परद्रव्यं सर्वथानर्थभूतं मत्वा] नोऽपेक्षते तन्मार्गान्निवृत्तः । द्वितीयोऽपि सह निवृत्तः [परं न पतितग्रहणेऽधिकदोषः इति ध्यात्वा वृद्धस्य दृष्टिं वञ्चयित्वा तद्] गृहीतवान्, परं स्वचित्ते '[६]धन्योऽयं यस्येदृशी निःस्पृहता । परं [मित्रत्वात्] संविभागिनं करिष्यामी'ति विचिन्त्यान्यत्र गुप्तीकृतम् । अन्यत्र नगरे गत्वा भाण्डेन कुण्डलेन च क्रयाणकमादाय स्वस्थाने समागतौ । विभजितं क्रयाणकं प्रभूतं जातम् । देवेन पृष्टम् - 'किमिति वर्धते ?' तेन प्रथमं न कथितम्, पश्चात् कथितम् । देवेन [उक्तमन्यायार्जितमिदं सर्वथा न ग्राहणार्हम् । अनेन न्यायार्जितस्वधनस्याप्यवश्यं विनाशः स्यात् काञ्जिकेनेव दुग्धस्येत्युक्त्वा] तत्सर्वं पृथक् कृत्य तस्मै दत्तम् । [एवमागतं वित्तं कथं त्यज्यते ? इति लोभात्] स सर्वं निजभाण्डं शालायां नीत्वा गतः । रात्रौ च चौरैः सर्वं मुषितम् । सर्वं निर्गम्य प्रभाते देवसमीपे समागतः । प्रभातेऽन्यदिग्भ्यो [तद्वस्तु-] ग्राहका घनतराः समागताः । द्विगुणं मूल्यं समुत्पन्नम् । द्वितीयस्तु सर्वमपि निर्गम्य रिक्त एव जातः । तस्मात् न्यायोपार्जिताद्वित्तादेवाकृत्रिमं सुखम् । तेन न्यायेनैव व्यवहर्त्तव्यम् ।

।। इति न्यायोपार्जितवित्ते देव-यशःकथा ।।

।। अथ लौकिकः पुरोहितसम्बन्धः ।।

चम्पायां सोमः क्ष्मापतिः सूर्यपर्वणि दानार्थं शुभं द्रव्यं योग्यं च पात्रं मन्त्रिपार्श्वे पप्रच्छ । स चाह- 'पात्रमेकोऽत्र विप्रोऽस्ति परं शुभद्रव्यं दुर्लभम्, विशिष्य च राज्ञः ।' ततो राजा 'पात्रे दत्तमनन्तगुणमि'ति वचनात्पर्वोपरिपात्रदानाय सप्ताष्टदिनै रजन्यां वणिजां हट्टेषु वणिक्पुत्रार्हं कर्म निर्माय [तन्मूल्ये] अष्टौ द्रम्मानप्रापत् । पर्वणि सर्वान् द्विजानाकार्य पात्रविप्राकारणाय प्रधानं प्रैषीत् । तेनाकारितश्च । [प्रत्याह-]

"राजप्रतिग्रहदग्धानां ब्राह्मणानां युधिष्ठिर ! ।
शटिनामिव बीजानां पुनर्जन्मनि विद्यते ।।"

इति प्रोवाच । पुनः -

"राज्ञः प्रतिग्रहो घोरो मधुमिश्रविषोपमः ।
पुत्रमांसं वरं भुक्तम् न तु राज्ञः प्रतिग्रहः ।।"

यतः -

४. 'अनत्रसं०' हस्त । ५. 'द्वितीयो निवृत्य गृहितवान्' हस्त० । ६. 'धन्य एष देवो यस्ये यस्य द्रोहा बुद्धिः' हस्त० ।

"दशशूनासमश्चक्री, दशचक्रिसमो द्विजः ।
दशद्विजसमा वेश्या, दशवेश्यासमो नृपः ।।" [ ]

इति पुराणोक्तैर्दुष्टत्वाद्राजप्रतिग्रहमहं न गृह्णामीति । तदाकारितोऽपि न तत्र गतवान् । राजा च तस्मै शुभं द्रव्यं दित्सुः । [राज्ञा न्यायेन स्वभुजार्जितम् सद्वित्तमेव दास्यति तद्ग्रहणे तव न कश्चिद्दोषः] पुनस्तदाकारणाय पुरोहितं प्रैषीत् । तेन च -

"वृद्धौ मातापितरौ साध्वी भार्या लघूनि च शश्रूनि ।
कृत्वा पापशतान्यपि भर्त्तव्यानि युधिष्ठिर ! ।।" [ ]

इति वेदोक्तात् प्रतिबोध्य तं राज्ञोऽन्तिके नीतः । [राज्ञा हृष्टेन स्वासनढौकनपादधावनादिबहुविनयेन तेऽष्टौ द्रम्मास्तन्मुष्टिमध्येऽक्षिप्यन्त । 'अस्मै किञ्चित्सारमर्पितं' इति किञ्चित्सरुषोऽप्यन्ये विप्रा हेमादिदानतः समतोष्यन्त ।] सन्तोष्य विसृष्टवान् । [षण्मास्यादिना तत्सर्वं क्षीणं तेषाम् ।] ते च [अष्टौ द्रम्माः] न्यायोपार्जितत्वेन प्रतिदिनं [भोजनवेषप्रमुखकार्येषु] व्यापार्यमाणा अपि नाक्षीयन्त । [चिरेणाप्यक्षय-निधिवत्सुबीजवच्च श्रियो वृद्ध्यै जज्ञिरे ।] एतद्वार्तां सर्वैरपि ज्ञात्वा चमत्कृतैर्न्यायोपार्जितद्रव्ये यत्नो व्यधीयत ।

।। इति पुरोहितसम्बन्धः ।।

तथा यद्यपि -

**"सुप्रसन्नवदनस्य भूपतेर्यत्र विलसन्ति दृष्टयः ।
तत्र तत्र शुचिता कुलीनता दक्षता सुभगता च जायते ।।"** [ ]

तथापि ये नृपव्यापारं ग्रामपट्टक-मण्डपिका-तलाटकर्म-श्रेष्ठिकर्म-श्रीकरण-भाण्डागारिकादि स्वयं समादाय कदाचित्तद्योगेन धनिनो भूत्वा जिनप्रासादजीर्णोद्धार-पद-प्रतिष्ठा-श्रीतीर्थयात्रादिशुभकरणीयकारिणः स्वल्पतरतमा एव । बहवस्तु तन्मदेनोन्मत्ता अहंमानिनः सन्तो नानान्यायोन्मार्ग-नव्यकरस्थापन-सकललोकक्लेशोत्पादन-मरण-बन्धन-छेदनादिभिरशुभपापकर्मोपार्ज्य शोफस्थूलतासदृशगुरुतामपहाय बहुकालमायतौ दुःख-दौर्गत्य-परनिर्मितक्लेशादिभाजो भवेयुः । यतः-

**"[6]जो तुह सेवाविसुहस्स हुन्तु माता य महसमिद्धीओ ।
अहियारसंपया इव परत विडंबनफलाओ ।।"** [ ]

तेन व्यवहारशुद्धिरेव विधेया । भो जीवाः ! चेद्यूयमात्महितैषिणस्तर्हि बह्वारम्भ-

6. या तव सेवाविशुद्धस्य भवन्ति माता इव महासमृद्धयः । अधिकारसंपद इव परतो विडम्बनफलाः ।।
गाथार्थोऽयं सम्भाव्यते - सम्पा० ।।

मदन-मधु-लोह-विष-लाक्षा-क्षार-तिलप्रमुखक्रयाणकक्रयविक्रये न प्रवर्त्तव्यम् । यतो भर्तव्यमुदरमेकं मर्तव्यं तु निश्चयेन । यतः -

"[7]**संझरागजलबुब्बुओवमे, जीविए य जलबिंदुचंचले ।**
जोव्वणे य नईवेगसन्निभे, पावजीव ! किमियं न बुज्झसे ।।"[उपदेशमाला-२०७]

अत्र साधुजगडूज्ञातम् । यथा -

।। अथ व्यवहारशुद्धौ जगडूकथा ।।

भद्रेश्वरग्रामे जगडूसाधुः सामान्यः, समुद्रतीरे हट्टं मण्डयामास । एकदा जगडूपार्श्वे यानपात्रस्तेनाः समागताः । तैरुक्तम्- 'अस्माकमेकं मदनभृतं यानपात्रं चटितमस्ति यदि भवतो रोचते तदा धनं दत्त्वा ग्राह्यम् ।' ततो जगडूसाधुना तत्र गत्वा मूल्यं कृत्वा पूर्णं यानपात्रमेव गृहीत्वा तूर्णं शकटानि भृत्वा गृहे प्रेषितानि। शकटनायकास्तत्पत्न्याः पुरः प्रोचुः, 'यत्साधुना मदनं प्रेषितं तत् क्वोत्तार्यते ?' सा प्राह - 'अस्माकं गृहे मदनं पापसदनं नोत्तार्यते ।' इत्युक्त्वा तया नोत्तारयितुं दत्तम् । ततो मदनेष्टिका गृहाङ्गणनिम्बवृक्षस्याध उत्तारिताः । जगडूः पत्न्याः समं कलहं चक्रे, हक्किता वक्ति मदनव्यवसाये बहुपापं लगति, ततो मिथः कलिं कृत्वा रुष्टौ, जगडूः प्रियां न जल्पयति, पत्नी प्रियं न जल्पयति, एवं मासत्रये जाते शीतर्तुः समागात् । जगडूपुत्रेण तापनार्थमङ्गीष्टके कृते तृणेषु क्षिप्यमाणेषु बालचापल्यादेका मदनेष्टिकामङ्गीष्टकामध्ये चिक्षेप । मदनं गलितम्, स्वर्णमयी [-ष्टिका दृष्टा पत्न्या । पत्नी अजल्पन्त्यपि धनलोभात् जगडूं प्रति 'इतो विलोक्यताम्' ततो जगडूः संमुखमपि रुष्टो न विलोकयति, ततः पत्न्योक्तम्- आत्मनो] मदनेष्टिका स्वर्णेष्टिका जाता, ततः संमुखं यावद्विलोकयति तावत्स्वर्णेष्टिका दृष्टा । ततोऽपरासामिष्टिकानां परिक्षा कृता सर्वाः स्वर्णेष्टिका ज्ञाताः, ततः छन्नं स्वर्णेष्टिका गृहमध्ये आनीता मदनं पृथक्कृत्वा विक्रीतं पञ्चशतप्रमाणः । स्वर्णेष्टिका जाता ततः पत्नी पतिं प्रति प्राह - 'गुरव आकार्यन्ते, श्रीगुर्वादिष्टे स्थाने स्थाप्यन्ते धनं शाश्वतं स्यात् ।' ततो गुरव आकारिताः सुमहोत्सवपूर्वम्, गुरवो मदनव्यवसायं जगडूसाधुना कृतं श्रुत्वा जगडूसाधुगृहे साधून् विहर्तुं न प्रेषयन्ति । ततो गुरवः प्रोचुरस्माभिश्चल्यते, ततो गुरवो देववन्दनार्थं क्षुल्लकयुता आगताः । गुरवो गृहे देवान् वन्दन्ते तदा क्षुल्लकः प्राह- 'हे भगवन् ! जगडूगृहे किं लङ्का समागता ? इतो वीक्ष्यताम्,' ततो गुरुभिः सन्मुखविलोकनेन स्वर्णेष्टिका दृष्ट्वा जगडूः पृष्टः काः [कुत इमाः ?] स्वर्णेष्टिकाः ? जगडूः प्राहेष्टिकाग्रहणसम्बन्धं सर्वम् । ततो साधोरिष्टिकाग्रहणसम्बन्धं कथितं श्रुत्वा गुरवो हृष्टाः । पश्चाज्जगडूसाधुना विहारिताः स्वोपाश्रये आगताः । ततो जगडूः प्राहः- 'मया मदनभ्रान्त्या इष्टिका गृहीता जातास्तु सुवर्णमयाः, उच्चैर्न जल्प्यते राजभयात् ।' टङ्कानां कोटिर्जाता जगडूगृहे ।

।। इति जगडूकथा ।।

एवंविधदृष्टान्तान् श्रुत्वा सपापव्यापारं विमुच्य जिनोक्तमार्गेणाजीविकाविधौ यतनीयम् ।।

[इइ ववहारस्स य सुद्धी]

7. सन्ध्यारागजलबुद्बुदुपमे जीविते च जलबिन्दुचञ्चले । यौवने च नदीवेगसन्निभे पापजीव ! किमिदं न बुध्यसे।।

[रहजत्ता]

[२४-रथयात्रा]

अथ **रहजत्ता** इति रथयात्रा, श्री जिनप्रतिमां रथे समारोप्य नगरान्तः सर्वगृहेषु प्रापणेन तत्र महापूजोत्सवकरणेन पश्चाद् देवगृहप्रापणेन संपूर्णा स्यात् । यतः -

"रथयात्रामहापुण्यं ये कुर्व्वन्ति नरोत्तमाः ।
नृजन्मसफलीकर्तुं ते लभन्ते शिवश्रियम् ।।" [ ]

यदुक्तम् -

"त्रिभेदयात्रा-जिनबिम्ब-साधु-प्रौढप्रतिष्ठा-जिनचैत्यकृत्यैः ।
श्रीसंघचिन्ताकरणादिभिश्च प्रभावकाः श्रावकपुङ्गवाः स्युः ।।

अष्टाह्निकाभिधामेकां रथयात्रामथापराम् ।
तृतीयां तीर्थयात्रां चेत्याहुर्यात्रां त्रिधा बुधाः ।।"

श्रीआवश्यकचूर्णौ । अत्र सम्बन्धः -

"जीवन्तस्वामिप्रतिमारथयात्रां निरीक्षितुम् । आयातावन्यदाऽवन्त्यां महागिरिसुहस्तिनौ ।।१।।
निर्ययौ चोत्सवेनाथ जीवन्तस्वामिनो रथः । मनोमयूरजलदः पौराणां भक्तिशालिनाम् ।।२।।
ताभ्यामाचार्यवर्याभ्यां श्रीसङ्घेनाखिलेन च ।अन्वीयमानः स रथः पुर्यां पर्याटदस्खलन् ।।३।।
गते राजकुलद्वारं रथेऽथ पृथवीपतिः । वातायनस्थितो दूराद्ददर्शार्यसुहस्तिनम् ।।४।।
सुहस्त्याचार्यपादानामवन्त्यामेव तस्थुषाम् । चैत्ययात्रोत्सवश्चक्रे सङ्घेनान्यत्रवत्सरे ।।५।।
मण्डपं चैत्ययात्रायां सुहस्ती भगवानपि । एत्य नित्यमलञ्चक्रे श्रीसङ्घेन समन्वितः ।।६।।
सुहस्तिस्वामिनः शिष्यपरमाणुरिवाग्रतः । कृताञ्जलिस्तत्र नित्यं निषसाद च सम्प्रतिः ।।७।।
यात्रोत्सवान्ते सङ्घेन रथयात्रा प्रचक्रमे । यात्रोत्सवो हि भवति सम्पूर्णो रथयात्रया ।।८।।
रथोऽथ रथशालाया दिवाकररथोपमः । निर्ययौ स्वर्णमाणिक्यद्युतिद्योतितदिङ्मुखः ।।९।।
श्रीमदर्हत्प्रतिमाया रथस्थाया महर्द्धिभिः । विधिज्ञैः स्नात्रपूजादि श्रावकैरुपचक्रमे ।।१०।।
क्रियमाणेऽर्हतः स्नात्रे स्नात्राम्भो न्यपतद्रथात् । जन्मकल्याणके पूर्वं सुमेरुशिखरादिव ।।११।।
श्राद्धैः सुगन्धिभिर्द्रव्यैः प्रतिमाया विलेपनम् । स्वामिविज्ञीप्सुभिरिवाकारि वक्त्राहितांशुकैः ।।१२।।

मालतीशतपत्रादिदामभिः प्रतिमार्हतः । पूजिताभात्कलेवेन्दोर्वृता शारदवारिदैः ।।१३।।

दह्यमानागरूत्थाभिर्धूमलेखाभिरावृता । अशुभत्प्रतिमा नीलवासोभिरिव पूजिता ।।१४।।

आरात्रिकं जिनार्चायाः कृतं श्राद्धैर्ज्वलच्छिखम् । दीप्यमानौषधीचक्रशैलशृङ्गविडम्बकम् ।।१५।।

वन्दित्वा श्रीमदर्हन्तमथ तैः परमार्हतैः । रथ्यैरिवाग्रतोभूय स्वयमाचकृषे रथः ।।१६।।

नागरीभिरुपक्रान्तसहल्लीसकरासकः । चतुर्विधातोद्यवादसुन्दरप्रेक्षणीयकः ।।१७।।

परितः श्राविकालोकगीयमानोरुमङ्गलः । प्रतीच्छन्विविधां पूजां प्रत्यट्टं प्रतिमन्दिरम् ।।१८।।

बहलैः कुङ्कुमाम्भोभिरभिषिक्ताग्रभूतलः । सम्प्रतेः सदनद्वारमाससाद शनै रथः ।।१९।।

त्रिभिर्विशेषकम् ।।

राजापि सम्प्रतिरथ रथपूजार्थमुद्यतः । आगात्पनसफलवत्सर्वाङ्गोद्भिन्नकण्टकः ।।२०।।

रथाभिरूढां प्रतिमां पूजयाष्टप्रकारया । अपूजयन्नवानन्दसरोहंसोऽवनीपतिः ।।२१।।

प्रावर्तयन्रथयात्रां तत्रानुगमनं तथा । रथाग्रे पुष्पवृष्टिं च चैत्यपूजां च ते व्यधुः ।।२२।।

इत्यादि श्रावकाचारं ते सर्वे चक्रिरे तथा । प्रान्तदेशा अपि साधुविहारार्हा यथाभवन् ।।२३।।"

[परि.प.-११/२४, २६-२८, ६६-८४]

इति परिशिष्टपर्वणि सम्प्रतिराजचरित्राधिकारे ।

"[1]दिणयरसरिसावयवा, कम्पिल्लपुरे कया रयणचित्ता ।
हरिसेणेण जिणरहा, वप्पाए भामिया बहवे ।।" [पद्मचरित्र-८/२०७]

इति पद्मचरित्रे ।

।। अथ विष्णुकुमारस्य सम्बन्धः ।।

"[2]हत्थिणाउरे पउमुत्तरो राया जाला य तस्स देवी । तीसे दो पुत्ता - विण्हुकुमारो महापउमो अ । [जिट्ठे

1. दिनकरसदृशावयवाः, कांपिल्यपुरे कृताः रत्नचित्राः । हरिषेनेन जिनरथा वप्रया भ्रामिता बहवः ।।
2. हस्तिनापुरे पद्मोत्तरो राजा जाला च तस्य देवी । तयोः द्वे पुत्रौ विष्णुकमारो महापद्मश्च । ज्येष्ठे अनिच्छति महापद्माय युवराजपदं पित्रा दत्तम् । नमुचिस्तस्य मन्त्री जातः । तेन सिंहरथो रणे विजितः, महापद्मस्तुष्टः, वरं प्रदत्ते तेन न्यासीकृतः वरः । एकदा जालादेव्याऽर्हद्रथः कारापितः, तस्याः सपत्न्या लक्ष्म्या मिथ्यादृष्ट्या पुनः ब्रह्मरथः । प्रथमं रथकर्षणे द्वयोरपि देव्योः विवादे द्वेऽपि रथौ राज्ञा वारितौ । मातरि अपमानं दृष्ट्वा महापद्मो देशान्तरं गतः, क्रमेण मदनावलिं परिणीय साधितषट्खण्डभरतो हस्तिनापुरमागतः। पित्रा राज्यं दत्तम् । विष्णुकुमारेण समं पद्मोत्तरः सुव्रताचार्यपादमूले दिक्षां गृहीत्वा शिवं प्राप्तः । विष्णुकुमारस्य च षष्टिं वर्षशतानि तपः कुर्वतोऽनेका लब्धयः समुत्पन्नाः । महापद्मचक्री जिनभवनमण्डितं महिं कृत्वा रथयात्रा पूजा कारापिता, पूरयति मातुः मनोरथान् ।

अणिच्छंते महापउमस्स जुवरायपयं पिउणा दिन्नं । नमुई तस्स मंती जाओ । तेण सीहरहो रणे विजिओ । महापउमो तुट्ठो । वरं पदिण्णे तेण नासीकओ वरो ।] एगया जालादेवीए अरिहंतरहो कारिओ । [तीसे सवत्तीए लच्छीए मिच्छद्दिट्ठीए पुण बंभरहो ।] पढमं रहकड्ढणे दुण्ह वि देवीणं विवाए दोवि रहा रण्णा वारिया । माऊए अवमाणं दट्ठुं महापउमो देसंतरं गओ । कमेण मयणावलिं परिणित्ता साहियच्छक्खंडभारहो हत्थिणाउरमागओ। पिउणा रज्जं दिण्णं । विण्हुकुमारेण समं पउमुत्तरो [सुव्वयायारियपायमूले] दिक्खं गिण्हित्ता सिवं पत्तो । [विण्हुकुमारस्स य सट्ठिं वाससयाइं तवं कुणंतस्स अणेगाओ लद्धीओ समुप्पण्णाओ] महापउमो चक्की जिणभवणमंडियं [महिं] काउं रहजत्ताओ पूआओ कारित्ता, पूएइ माऊए मणोरहे ।" इति श्रीजिनप्रभसूरिकृते दीपालिकाकल्पे ।

।। इति विष्णुकुमारस्य सम्बन्धः ।।

"अन्यदा रथयात्रायां दिव्यरत्नमये रथे ।
रोहणाद्राविवाचले सौधद्वारमुपेयुषि ।।

सानन्दः श्रेयसी भक्तिः श्रीसंप्रतिनरेन्द्रवत् ।
जगतीपतिरानर्च्च जगदर्च्यं जिनोत्तमम् ।।" प्रत्येकबुद्धचरित्रे ।

[इइ रहजत्ता]

[तित्थजत्ता]

[२५-तीर्थयात्रा]

अथ [१]**तित्थजत्ता** इति तीर्थानां यात्रा तीर्थयात्रा । सा चतुर्विधश्रीसङ्घस्य विधेयतया ज्ञेया । 'तीर्थानि' त्वष्टापद-सम्मेतशिखर-रैवताचल-श्रीशत्रुञ्जयाऽर्बुदाचल-कामिकतीर्थ-श्रीजीरापल्लीपार्श्व-श्रीस्थम्भनक-श्रीगउडी-श्रीफलवर्द्धि-लोडण-नवपल्लव-चिन्तामणि-कलिकुण्डान्तरिक्ष-मगसी-कुर्कटेश्वर-श्रीश्यामलपार्श्वादितीर्थानि, तेषां यात्रां ये भविनः स्वोपार्जितवित्तसफलीकरणाय तन्वन्ति ते ऐहिकामुष्मिकसुखादिफलभाजः स्युः । यतः -

"आरम्भाणां निवृत्तिर्द्रविणसफलता सङ्घवात्सल्यमुच्चैः,
नैर्मल्यं दर्शनस्य प्रणयिजनहितं जीर्णचैत्यादिकृत्यम् ।
तीर्थोन्नत्यं प्रभवो जिनवचनकृतिस्तीर्थकृत्कर्मकत्वम्,
सिद्धेरासन्नभावः सुरनरपदवी तीर्थयात्राफलानि ।।" [सुक्तमुक्तावली-६६/१२]

पुरापि श्रीतीर्थयात्रा श्रीभरतनृपादारभ्य बहूभिः सङ्घपतीभूय कृता । यतः -

"न प्राप्यते विना भाग्यं सङ्घाधिपपदं नृप ! ।
यथा तीर्थंकरपदं सङ्घाधिपपदं तथा ।।

ऐन्द्रपदं चक्रिपदं श्लाघ्यं श्लाघ्यतरं पुनः ।
सङ्घाधिपपदं ताभ्यां नवीनसुकृतार्जनात् ।।

तीर्थकरनामगोत्रमर्जयत्यतिदुर्लभम् ।
लब्ध्वा दर्शनसंशुद्धिं सङ्घाधिपतिरुत्तमाम् ।।" [ ]

यथा - उम्बरराजस्थापित[२]श्रीअर्बुदाचलतलहट्टिकालङ्कारश्रीउम्बरणीनगरतः सा॰ पारससुतः सा॰ देसलसाधुः श्रीशत्रुञ्जयादि[३]सप्ततीर्थेषु चतुर्दशकोटिद्रव्यव्ययेन चतुर्दशयात्रां कृतवान् । उक्तं च -

---

१. 'तित्थजत्तायमिति' हस्त० । २. '...श्री अबुदोपत्यकास्थ...' हस्त० । ३. '७ तीर्थयात्रा चतुर्दशकृतवान्' हस्त० ।

"श्रीदेसलः सुकृतपेशलवित्तकोटीश्चञ्चच्चतुर्दश जगज्जनितावदातः ।
शत्रुञ्जयप्रमुखविश्रुतसप्ततीर्थयात्राश्चतुर्दश चकार महामहेन ।।" [ ]

तथा -

"वर्षे खवेदवेदेन्दु १४४० मिते पञ्चमी ।
या सितासीत्तत्र मन्त्री निमित्तैः प्रास्थितोत्तमैः ।।"

[४]मण्डपदुर्गे साधुपेथडेन[५] प्रथमयात्रायां एकादशलक्षानां रूप्यटङ्कानां व्ययश्चक्रे। सङ्घे सप्तलक्षा[६] मनुष्याः[७], ५२ [द्विपञ्चाशत्-]देवालयाः ।

मण्डपदुर्गे शतत्रयमितेषु जैनप्रासादेषु सौवर्णकलशाः कारिताः ।

श्रीधर्मघोषसूरिणां पेथडसङ्घपतिना प्रवेशमहोत्सवे ७२ [द्विसप्तति] सहस्रटङ्कानां व्ययश्चक्रे ।

भृगुकच्छे भाण्डागारमलीलिखत्। चतुरशीतिप्रासादाः कारिताः ।

श्रीगिरनारमहातीर्थे समकालमेव श्वेताम्बर-दिगम्बराणां सङ्घः प्राप्तः । परस्परं तीर्थवादो जातः । ततो वृद्धचतुर्जनैरुक्तं सङ्घपतिद्वयमध्ये य इन्द्रमालां परिधास्यति तस्य तीर्थमिदम् । ततः पेथडसङ्घपतिना सुवर्णस्यैव ५६ [षट्पञ्चाशद्-]धडीप्रमाणस्येन्द्रमाला परिधापनं चक्रे तीर्थं च स्वकीयं कृतम् ।

येन श्रीधर्मघोषसूरीणां पार्श्वे परिग्रहपरिमाणं [८]पूर्वं गृहीतं टङ्कद्वयशतप्रमाणाभिग्रहे सति पुरुषभाग्यं निःसीमत्वमिति श्रीगुरुवचनेन लक्षत्रयप्रमाणद्रव्याभिग्रहो गृहीतः । ततोऽप्यधिकद्रव्यप्राप्तौ देवगुरुनामाङ्कितं करिष्ये इति निर्णीतवान् ।

तस्य सुतो झांझणदेवः स्वपितुः कृतयात्रस्य प्रवेशमहःक्षणे प्रस्थानं श्रीशत्रुञ्जययात्रायै चकार । सङ्घपतिझांझणस्य १२ [द्वादश-]सङ्घपतियुतस्य राज्ञा सारङ्गदेवेन गजारूढस्य प्रवेशमहः कारितः । तस्य सङ्घमध्ये पञ्चलक्षमनुष्याणां सद्भावात्, राज्ञा सार-सारमनुष्याणां भोजननिमन्त्रणं दत्ते, झांझणदेवेन ज्ञापितं मम सङ्घे [९]सर्वः सार एव । राज्ञोक्तम् -

४. 'मण्डपदयदुर्गे' हस्त० । ५. 'सङ्घपतिपेथडेन प्रथमयात्रायां १ लक्षा टङ्का रूप्यमयानां' प्रबन्धपञ्चशतौ । ६. '...लक्षं' प्रबन्धपञ्चशतौ । ७. 'मनुष्याणां' हस्त० । ८. 'गृहीतं पूर्वं शतद्वयमितेऽभिग्रहं गृह्णतः सङ्घपतेर्गुरुभिरुक्तं न निर्वहिष्यति, पुरुषभाग्यस्य निस्सीमत्वात् । ततो लक्षत्रयं कृतम् ।' इति हस्त० । ९. 'सर्वः कोऽपि सारः' हस्त० ।

[10]'अस्मद्देशे इयं रीतिः नास्ति, भवद्देशे चेदियं रीतिः वर्त्तते 'तर्हि वयं निमन्त्रणीयाः, विलोक्यते मालवीयानां रीतिः ।' ततः सारङ्गनृपः समग्रगुर्जरजनयुतो निमन्त्रितोऽपूर्वविधिना भक्त्या च भोजितः साभ्रमतीनदीतीरे, भोजनान्तरं प्राभृतावसरे कर्पूरार्थं राजा करद्वययोजनं कारितः । तदवसरे ५४ [चतुर्पञ्चाशत्-] धडीसुवर्णदानं मार्गणानाम् [दत्तम्] । तेन च श्री शत्रुञ्जयगिरनारतीर्थयोरेकैव स्वर्णरूप्यमया ध्वजा दत्ता ३३ (त्रयत्रिंशत्) लक्षरूप्यटङ्कमया ।

श्रीआभूकस्य यात्रायां ७०० [सप्तशत-] देवालयाः, १५१० [एकसहस्रपञ्च-शतदशोत्तरजिन] बिम्बानि, ७४००० [चतुर्सप्ततिसहस्राणि] शकटानि, ५००० [पञ्चसहस्राः][11] अश्वाः, ४२००० [द्विचत्वारिंशत् सहस्राः] उष्ट्राः, २२९० [द्विसहस्रद्विशतनवत्युत्तराणि] सुखासनानि, ९९ [नवनवति-]श्रीकर्यः, ७ [सप्त-]प्रपाः, ४२ [द्विचत्वारिंशत्-] जलवाहिबलिवर्द्दाः, ३० [त्रिंशत्-] जलवाहिमहिषाः, १३ [त्रयोदश-]जलपट्टाः, १०० [शतानि] रन्धनकटाहकानि, १०० [शताः] कान्दविकाः, १०० [शताः] सूपकाराः, २२० [द्विशतोत्तरविंशत्यः] मालाकाराः, १०० [शताः] ताम्बूलिकाः, १३६ [एकशतषट्त्रिंशतानि] हट्टानि, १४ [चतुर्दशः] लोहकाराः, १६ [षोडश]सूत्रधाराः, १०५२ [एकशतद्विपञ्चा- शत्-] भारवाहकाः, १० [दश-]चर्मकराः, १० [दश-] अन्त्यजाः, ३६ [षट्त्रिंशत्-] सूरयः, १२ [द्वादश-]कोटिसुवर्णव्ययः ।

श्रीकुमारपालेन १८ [अष्टादश-]सहस्रसङ्घपतियुतेन श्रीशत्रुञ्जययात्रायां मालाऽवसरे प्रथमं टङ्ककानां चतुर्लक्षैर्माला मार्गणम्, तत उदयनमन्त्रिणा ८ [अष्ट-] लक्षा, एवं तावद्यावत्कोटी, ततः सा० हंसासुतझगडकेन सपादकोट्या गृहीतेन्द्रमाला । एवं रैवते, देवपत्तने श्रीचन्द्रप्रभचैत्ये च रत्नत्रयं मुक्तम् ।

श्रीविक्रमादित्ययात्रायां १४ [चतुर्दश-]मुकुटबद्धनृपाः, ७० [सप्तति-] लक्षाः श्राद्धकुटुम्बाः श्रीसिद्धसेनदिवाकराद्याः ५ [पञ्च-]सहस्रसूरयः, १६९ [एकशतैकोनसप्ततिः] सौवर्णदेवालयाः, एककोटिदशलक्षनवसहस्राः शकटाः, १८ [अष्टादश-] लक्षास्तुरङ्गाः, ७६ [षट्सप्तति-]शतानि हस्तिवराः, [एवं करभवृषभादीनां मानं ज्ञेयम्]।

---

१०. 'भवद्देशे ईयं रीतिर्न वर्त्तते । राज्ञोक्तमस्मद्देशे चेदियं रीतिर्नास्ति' हस्त० । ११. ५१० अश्वाः' हस्त० ।

श्रीवस्तुपालतीर्थयात्रायां द्रव्यव्ययः ३ [त्रि]शतकोटि १४ [चतुर्दश]लक्ष १८ [अष्टादश]सहस्र ८ [अष्ट]शतानि ।

एवं यथा प्राचीनपुरुषरत्नैरेतेषु तीर्थेषु स्वधनव्ययेन कृताः कारिताश्च संख्यातीतमनुष्याणां तदा च सातिशयः पूर्वगतागमवेदिनः श्रीसिद्धसेनसूरिप्रमुखास्तैरपि न निषिद्धाः साम्प्रतं च ये निषेधयन्ते, ईयत् श्रीजिनयात्रा-प्रासाद-प्रतिमासम्बन्धिद्रव्यव्यय-सुकृतोपार्जननिषेधका न ज्ञायन्ते केन शास्त्रबलेन कैरतिशयैश्च। श्रीजिनवचनात्त्वेवं ज्ञायते । ये धर्मलाभभवनोपायनिषेधकास्ते [त]दुद्भूतपापेन सांसारिकसावद्यव्यापारानुमोदनेनेव लिप्यन्ते। यतः श्रीवन्दनकनिर्युक्तौ-

"[1]**पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होइ ।**
कायकिलेसं एमेव कुणई तह कम्मबंधं च ।।" [आवश्यकनिर्युक्ति - ११०८]

तस्मात्तन्निषेधे निरुद्यमैः भाव्यं बहु-बहुतर-धर्मोपार्जनफलत्वात् ।

[इइ तित्थजत्ता]

।। इति तृतीयगाथाव्याख्याने प्रबोधदीपिकायां तृतीयप्रस्तावः ।।

1. पासत्थादीन् वन्दमाणस्य नैव कीर्तिः न निर्जरा भवति । कायक्लेशमेवमेव करोति तथा कर्मबन्धं च ।।

।। अथ चतुर्थगाथाव्याख्याने प्रबोधदीपिकायां चतुर्थः प्रस्तावः ।।

उवसम-विवेग-संवर, भासासमिई [१]अ जीवकरुणा य ।
धम्मिअजणसंसग्गो, करणदमो चरणपरिणामो ।।

[उपशम-विवेक-संवराः, भाषासमितिश्च जीवकरुणा च ।
धार्मिकजनसंसर्गः, करणदमश्चरणपरिणामः ।।]

[उवसम]

[२६-उपशमः]

अथ चतुर्थगाथा व्याख्या । तत्र **उपशमः** क्रोधनिग्रहः । यतः -

"[1]**कोहो अ माणो अ अणिग्गहीआ, माया अ लोभो अ पवड्ढमाणा ।**
चत्तारि एए कसिणा कसाया, सिंचन्ति मूलाइं पुणब्भवस्स ।।" [द.वै-८/४०]

तथा क्रोधादयोऽनिगृहीता एवं जीवानां हानिं कुर्वन्ति । यतः -

"[2]**कोहो पीइं पणासेइ, माणो विणयनासणो ।**
माया मित्ताणि नासेइ, लोभो सव्वविणासणो ।।" [दशवैकालिक-८/३८]

---

१. 'छज्जीवकरुणा य' मुद्रितसम्बोधप्रकरणे, प्रबोधटीकायां, K हस्त० ।

1. क्रोधश्च मानश्चानिगृहीतौ माया च लोभश्च प्रवर्धमानौ । चत्वार एते कृत्स्नाः कषायाः सिञ्चन्ति मूलानि पुनर्भवस्य ।।

2. क्रोधः प्रीतिं प्रणाशयति मानो विनयनाशनः । माया मित्राणि नाशयति लोभः सर्वविनाशनः ।।

क्रोधादयश्चतुर्गतिषु यथेष्टं प्राप्यन्ते । यदुक्तमर्थतः श्रीप्रज्ञापनायाम् -

"[3]**चउसु वि गईसु सव्वे नवरं देवाण समहिओ लोहो ।**
नेरइआणं कोहो माणो मणुआण अहिअरो ।।

[4]**माया तिरिआणाऽहिआ मेहुण-आहार-मुच्छ-भयसन्ना ।**
सभवे कमेण अहिआ मणुस्स-तिरि-[३]अमर-निरयाणं ।।" [पुष्पमाला-२८९, २९०]

तथा श्रीभगवती-त्रयोदशशतके द्वितीयोद्देशवृत्तौ -

"देवेषु क्रोधमानमायाकषायोदयवन्तः कादाचित्काः । लोभकषायोदयवन्तस्तु सार्वदिकाः । नैरयिकेषु क्रोधकषायोदयवन्तस्तु सार्वदिकाः, इतरोदयवन्तस्तु कादाचित्काः ।"

अतश्चतुर्गतिषु सुलभत्वेनोपशमादीनामत्रैव प्राधान्येन तदाद्याश्रयणेन क्रोधादयो निगृह्या एव । यदुक्तम् -

"[5]**उवसमेण हणे कोहं, माणं मद्दवया जिणे ।**
मायं चज्जवभावेण, लोभं संतोसओ जिणे ।।" [दशवैकालिक-८/३९]

तथा श्रीस्थानाङ्गे -

'[6]**चत्तारि धम्मदारा पन्नत्ता, तं जहा - खंती मुत्ती अज्जवे मद्दवे ।**'
[स्थानाङ्ग-४/४/३७२]

क्रोधादयो जीवानामुदयप्राप्ताः सन्तो गुणान्नाशयन्ति । यदुक्तं श्रीस्थानाङ्गे -

---

३. 'तिरिअसुरनरयाणं' पुष्पमालायाम् ।

3. चतसृष्वपि गतिषु सर्वे नवरं देवानां समधिको लोभः । नारकाणां क्रोधो मानो मनुष्याणामधिकतरः ।।

4. माया तिरश्चामधिका मैथुनाहारमुर्च्छाभयसंज्ञा । स्वभवे क्रमेणाधिका मनुष्य-तिरश्चामरनारकाणाम् ।।

5. उपशमेन हन्यात्क्रोधं मानं मार्दवेन जयेत् । मायां चार्जवभावेन लोभं सन्तोषतो जयेत् ।।

6. चत्वारि धर्मद्वाराणि प्रज्ञप्तानि, तानि यथा - क्षमा मुक्तिः आर्जवो मार्दवः ।

"[7]चउहिं ठाणेहिं संते गुणो नासेज्जा, तं० - कोहेणं पडिनिसेवेणं अकयण्णुयाए मिच्छत्ताभिनिवेसेणं ।"

क्रोधादीनामुदयवन्तः श्रुतपूर्णा अपि श्रीहरिभद्रसूरय इव, बाहुबलिरिवाषाढाभूतिरिव विकारं भजन्ते केचन जीवाः । सर्वेभ्यः क्रोधः पुनः सर्वथा विनाशक एव । यतः -

"[8]फरुसवयणेण दिणतवं, अहिक्खिवंतो य हणइ मासतवं ।
वरिसतवं सवमाणो, हणइ हणंतो अ सामण्णं ।।" [उपदेशमाला-१३३]

"[9]जं अज्जियं चरित्तं, देसूणाए अ पुव्वकोडीए ।
तं पि कसाइयमित्तो, हारेइ नरो मुहुत्तेण ।।
[10]दड्ढो अ तवो फुसिओ अ, संजमो मिसिकि[४]अं च चारित्तं ।
हारविअं [५]सम्मत्तं कोहकसायं वहंतेण ।।
[11]कोवानलस[६]गाणं पसमायसंठिआ[७]ण य हवंति ।
इहयं चिअ दोसगुणा नायमचंकारिभट्टि त्ति ।।" [क्षमाकुलक-१३, २३, २४]

तद्यथा -

।। अथाच्चंकारिभट्टाकथा ।।

"[12]वणिधूया[८]ऽचंकारियभट्टा, अट्ठसुयमग्गओ जाया ।
[९]वरगपडिसेह सचिवे, अणुयत्तीहं पयाणं च ।।"

---

४. 'मइलियं' क्षमाकुलके । ५. 'सामन्नं' क्षमाकुलके । ६. 'कोवनलवग्गाणं' हस्त० । ७. 'पसमामयभावियाण' क्षमाकुलके। ८. 'धणधूया...' निशिथभाष्ये । ९. 'चरणपडिसेव' निशिथभाष्ये ।

7. चतुर्भिः स्थानैः सतो गुणान्नाशयेत्, तद्० - क्रोधेन प्रतिनिवेशेनाकृतज्ञतया मिथ्यात्वाभिनिवेशेन ।

8. परुषवचनेन दिनतपोऽधिक्षिपन् च हन्ति मासतपः । वर्षतपः शपमानो हन्ति घ्नन्तश्च श्रामण्यम् ।।

9. यदर्जितं चारित्रं देशोनया च पूर्वकोट्या । तदपि कषायमात्रात् हारयति नरः मुहूर्त्तेन ।।

10. दग्धं च तपो लुषितं च, संयमं मषीकृतं च चारित्रम् । हारापितं सम्यक्त्वं क्रोध-कषायं वहता ।।

11. कोपानलवशगानां प्रशमात्मसंस्थितानां च भवन्ति । इहकं चैव दोषगुणौ ज्ञातमच्चङ्कारिभट्टीति ।।

12. वणिग्दुहिताऽचङ्कारिभट्टाऽष्टसुतपश्चात् जाता । वरकप्रतिषेधः सचिवोऽनुवर्त्यहं प्रदानं च ।।

"[13]णिवचिंत विगालपडिच्छणा य दारं न देमि निवकहणं ।
खिंसा निसि निग्गमणं चोरा सेणावईगहणं ।।
[14]निच्छइ जलूगवेज्जगहणं तं पि य अणिच्छमाणी तु ।
[१०]गिण्हावेइ जलूगा वण भाउणकहण मोअणया ।।
[15]सयगुणसहस्सपागं, वणभेसज्जं जइस्स जायणया ।
तिक्खुत्त दासीभिंदण, वण य कोव सयं पदाणं च ।।" [निशिथभाष्य. - ३१९४-९७]

[16]धणो नाम सिट्ठी, तस्स धूआ अच्चंकारिअभट्टा । अट्ठण्हं सुआणं मग्गओ जाया, वरगाण पडिसेहो, सुबुद्धिसचिवेण भणिअं - 'अणुअत्ती' अहं अणुवत्तिस्सामि, 'पयाणं' सा तस्स दिण्णा, निवस्स चिन्ता, किमेष सवेलाए गच्छइ ? 'विआलं' उत्सूरं जायं । 'पडिच्छणा य'त्ति, चिरं अच्छिओ 'दारं न देइ'त्ति, दुवारं न उग्घाडेइ । 'निव कहणं' तुमे सेवलाए न गन्तव्वं ति । एअं च पढमं संबज्झइ । तउं पडिच्छणा य दारं न देइत्ति । 'खिंसा' अहो मए आलो अंगीकओ त्ति । 'निसि' पिउघरं निग्गया । अन्तरा चोरेहिं गहिआ, सेणावइणा भज्जत्तेण गहिआ, सा न इच्छइ । तओ तस्स हत्थाओ जलूगाविज्जेण गहिआ, तं पि अ विज्जं पइत्तणेण अणिच्छमाणा तेण रुट्ठेण 'वण' त्ति - पाणीअं ताओ जलूगा गिण्हाविआ, तओ ताए निअभाउणो तत्थागयस्स कहिअं, तेण मोआविआ आणिआ य पुणो सा नयरे, लक्खपागं 'वणभेसज्जं' वणसंरोहणत्थं ओसहं तीसे घरे आसि । 'जइस्स जायणय'त्ति-साहुणा मग्गिअं, तिक्खुत्तो दासीए तिल्लभायणं भिन्नं । न य कोवो कओ, चउत्थवाराए सयं पयाणं, एयाए कोवपुरस्सरो माणो जिओ ।

।। इति कोधमानयोः सम्बन्धः ।।

---

१०. 'गेण्हावे जलूगवणा भाउयदूए कहण मोए ।' निशिथभाष्ये ।

13. नृपचिन्ता विकालप्रतिक्षणा च द्वारं न ददामि नृपकथनम् । खिंसा निशायां निर्गमनं चौराः सेनापतिग्रहणम् ।।
14. नेच्छति जलौकसवैद्यग्रहणं तमपि चानिच्छमाणी तु । ग्राहीता जलौकसो व्रणो भ्रातृकथनं मोचनता ।।
15. शतगुणसहस्रपाकं व्रणभेषजं यतेः याचनता । त्रिकृत्वो दासीभेदनं न च कोपः स्वयं प्रदानं च ।।
16. धनो नाम श्रेष्ठिः, तस्य दुहिताऽच्चंकारिभट्टा । अष्टानां सुतानां पश्चात् जाता । वरकानां प्रतिषेधः, सुबुद्धिसचिवेन भणितम् - 'अनुवर्त्यहं' अनुवर्त्तिष्यामि। 'प्रदानं' सा तस्मै दत्ता । नृपस्य चिन्ता [सञ्जाता] - किमेष सवेलायां गच्छति ? 'विकालं' उत्सूरं जातम् । 'प्रतिक्षणा च' त्ति - चिरं आस्तः 'द्वारं न ददाती'ति - द्वारं नोद्घाटयति, 'नृपकथनम्' - त्वया सवेलायां न गन्तव्यमिति । एवं च प्रथमं सम्बध्नाति, ततः प्रतिक्षणा द्वारं न ददातीति । 'खिंसा' अहो मयाऽऽलोऽङ्गीकृत इति । 'निशायां' पितृगृहं निर्गता । अन्तरा चौरैः गृहिता, सेनापतिना भार्यात्वेन गृहीता, सा नेच्छति । ततस्तस्य हस्ताज्जलौकसवैद्येन गृहीता, तमपि च वैद्यं पतित्वेनानिच्छती तेन रुष्टेन 'वण' इति - जलान्तात् जलौकसः ग्राहयिता, ततस्तया निजभ्रातुस्तत्रागतस्य कथितम्, तेन मोचयिताऽऽनीता च पुनः सा नगरे, लक्षपाकं 'व्रणभेसजं' व्रणसंरोहणार्थमौषधं तस्या गृहेऽऽसीत् । 'यतेः याचना' इति - साधुना मार्गितम् । त्रिकृत्वः दास्या तेलभाजनं भिन्नम् । न च कोपः कृतः, चतुर्थवारके स्वयं प्रदानम्, एतया कोपपुरस्सरो मानो जितः ।

मायाए इमं -

।। अथ मायायां पाण्डुरार्याकथा ।।

"[17]पासत्थि पण्डरज्जा, परिन्न गुरुमूल णायअभिओगा ।
पुच्छइ[११] अ पडिक्कमणे, पुव्वब्भासा चउत्थम्मि ।।
[18]अपडिक्कम सोहम्मे, अभिओगा देवि सक्क ओसरणं ।
हत्थिणि वायनिसग्गो, गोयमपुच्छा य वागरणं ।।" [निशिथभाष्य-३१९८-३१९९]

[19]नाणाइतियस्स पासे ठिता पासत्थी, सरीरोवकरणबउसा निच्चं सुक्किल्लवासपरिहरित्ता विचिट्ठइ त्ति । लोगेण से णामं कयं पंडरज्ज त्ति । सा य विज्जा-मंत-वसीकरणुच्चाटणकोउएसु य कुसला जणेसु पउंजइ । जणो य से पणयसिरो कयंजलिओ चिट्ठइ । अद्धवयातिक्कंता वेरग्गमुवगता गुरुमूले परिण्णं करेइ । नायं गुरुणा जहा जणो एइ । अभिओगो वसीकरणं, गुरु पुच्छइ-किं कारणं जणो एइ ? तीए सब्भावे कहिए पडिक्कमणे त्ति, सम्मं पडिक्कंता तिन्निवारे, चउत्थवाराए भणइ - पुव्वब्भासा जणो एइ त्ति, न सम्मं पडिक्कंता । [अणालोएउ कालगता] सोहम्मे कप्पे सक्कस्स जो अभिओगो एरावणो तस्स [एरावणस्स अग्गमहिसी] देवी जाता । ताहे सा भगवतो वद्धमाणस्स समोसरणे आगता, धम्मकहावसाणे हत्थिणिरूवं काउं भगवतो पुरतो ठिच्चा महता सद्देण वातं कम्मं करेइ । [ताहे भगवं गोयमो पुच्छति] भगवता पुव्वभवो से वागरितो । मा अण्णो वि को ति साहु साहुणी वा मायं काहिति, तेणेयाए वायकम्मं कतं, भगवता वागरियं । [तम्हा एरिसी माया दुरंता ण कायव्वा ।]

।। इति मायायां सम्बन्धः ।।

---

११. 'पृच्छा तिपडिक्कमणे' निशिथभाष्ये ।

17. पासत्थी पाण्डुरार्या प्रतिज्ञा गुरुमूले ज्ञाताऽभियोगा । पृच्छति च प्रतिक्रमणं पूर्वाभ्यासाश्चतुर्थे ।।

18. अप्रतिक्रमणं सौधर्मेऽऽभियोगी देवी शक्र-समवसरणम् । हस्तिनी वातनिसर्गो गौतमपृच्छा च व्याकृतम् ।।

19. ज्ञानादित्रिकस्य पार्श्वे स्थिता पासत्थी, शरीरोपकरणबकुशा नित्यं शुक्लवासांसि परिधाय तिष्ठतीति । लोकेन तस्या नाम कृतं पाण्डुरार्या इति । सा च विद्या-मन्त्र-वशीकरणोच्चाटनकौतुकेषु च कुशला जनेषु प्रयुङ्क्ते । जनश्च तस्याः प्रणतशिरः कृताञ्जलिस्तिष्ठति । अर्धवयाऽतिक्रान्ता वैराग्यमुपगता गुरुमूले प्रतिज्ञां करोति । ज्ञातं गुरुणा यथा जनः एति । अभियोगो वशीकरणम्, गुरुः पृच्छति - किं कारणं जनः एति ? तया सद्भावे कथिते प्रतिक्रमणे इति, सम्यग् प्रतिक्रान्ता त्रिवारम्, चतुर्थवारके भणति - पूर्वाभ्यासाद् जनः एतीति, न सम्यग् प्रतिक्रान्ता । [अनालोचिते कालगता] सौधर्मे कल्पे शक्रस्य योऽऽभियोगिक ऐरावतस्तस्यैरावत-*स्याग्रमहिषी देवी जाता । तस्मात् सा भगवतो वर्धमानस्य समवसरणेऽऽगता, धर्मकथाऽवसाने हस्तिनीरूपं* कृत्वा भगवतः पुरतः स्थित्वा महता शब्देन वातकर्म करोति । [तदा भगवन्तं गौतमः पृच्छति] भगवता पूर्वभवस्तस्या व्याकृतः । माऽन्योऽपि कोऽपि साधुः साध्वी वा मायां करिष्यति तेनैतया वातकर्म कृतम्, [इति] भगवता व्याकृतम् । [तस्मादिदृशी माया दुरन्ता न कर्तव्या ।]

लोभे -

।। अथ लोभे सम्बन्धः ।।

[20]महुरा मंगू आगम, बहुसुय वेरग्ग सड्ढपूआ य ।
सायाइलोभनितिए, मरणे जीहाइ निद्धमणे ।।" [निशिथभाष्य-३२००]

'[21]आगम' त्ति - महुराए आगमणं, [अज्जमंगू आयरिया बहुस्सुया अज्झागमा बहुसिस्सपरिवारा उज्जयविहारिणो ते विहरंता महुरं णगरीं गता । ते 'वेरग्गिय' त्ति काउं सड्ढेहिं वत्थातिएहिं पूइता, खीर-दधि-घय-गुलातिएहिं दिणे दिणे पज्जतिएण पडिलाभयंति । सो आयरिओ लोभेण सातासोक्खपडिबद्धो ण विहरति ।] 'नितिए'त्ति णितिओ जातो । सेसा साहू विहरिआ, सो वि [अणालोइयपडिक्कंतो] विराहिअसामण्णो वंतरो निद्धमणो जक्खो जाओ । तेण पएसेण जया साहू निग्गमण-पवेसं करंति, ताहे सो जक्खो पडिमं अणुप्पविसित्ता महापमाणं जीहं निल्लालेइ । [साहूहिं पुच्छिओ भणति-] अहं [सायासोक्खपडिबद्धो जीहादोसेण अप्पिड्ढिओ] इह निद्धमणाओ भोमिज्जे नयरे वंतरो जाओ । [तुज्झ पडिबोहणत्थमिहागतो तं मा तुब्भे एवं काहिह । अन्ने कहेंति - जदा साहू भुंजुंति तदा सो महप्पमाणं हत्थं सव्वालंकारं विउव्विऊण गवक्खदारेण साधूण पुरतो पसारेति । साहूहिं पुच्छितो भणति - सो हं अज्जमंगू इड्ढिरसपमादगरुओ मरिऊण णिद्धमणे जक्खो जातो, मा कोइ तुब्भे एवं लोभदोसं करेज्जा ।] एवं अप्पणो परस्स वा सव्वकसायाणं उवसमणं कायव्वं ।।

।। इति लोभे सम्बन्धः ।।

श्रीजिनमते धर्मेऽप्युपशमस्यैव गुरुता ज्ञेया । यदुक्तं कल्पे-

"[22]उवसमसारं खु सामण्णं । जो उवसमइ तस्स अत्थि आराहणा, जो न उवसमइ तस्स नत्थि आराहणा।"

---

20. मथूरा-मंगू-आगम-बहुश्रुत-वैराग्य-श्राद्धपूजा च । शातादिलोभ-नित्यवासी मरणं जिह्वया निर्धानः ।।

21. 'आगमरि'ति - मथुरायामागमनम्, [आर्यमङ्गव आचार्या बहुश्रुता अध्यागमा बहुशिष्यपरिवारा उद्यतविहारिणस्ते विहरन्तो मथुरानगरीं समागताः । ते 'वैरागी'ति कृत्वा श्राद्धैः वस्त्रादिभिः पूजिताः, क्षीर-दधि-घृत-गुडादिभिः दिने दिने पर्याप्तया प्रतिलाभयन्ते । सोऽचार्यो लोभेन शातासौख्यप्रतिबद्धो न विहरति ।] 'नित्ये'ति नित्यवासी जातः। शेषाः साधवो विहारिताः । सोऽपि [अनालोचितप्रतिक्रान्तः] विराधितश्रामण्यो व्यन्तरो निर्धाणो यक्षो जातः । तेन प्रदेशेन यदा साधवो निर्गमन-प्रवेशं कुर्वन्ति तदा स यक्षः प्रतिमामनुप्रविश्य महाप्रमाणां जिह्वां निर्लालयति । [साधूभिः पृष्टो भणति-] अहं [शातासौख्यप्रतिबद्धो जिह्वादोषेणाल्पऋद्धिकः] इह निर्धाणो भोमिज्जे नगरे व्यन्तरो जातः । [युष्माकं प्रतिबोधनार्थमिहागतः । ततो मा यूयमेवं करिष्यथ । अन्ये कथयन्ति - यदा साधवो भुञ्जन्ति तदा स महाप्रमाणं हस्तं सर्वालङ्कारं विभूष्य गवाक्षद्वारेण साधुनां पुरतः प्रसारयन्ति । साधूभिः पृष्टो भणति - सोऽहं आर्यमङ्गूः ऋद्धि-रस-प्रमादगुरुको मृत्वा निर्धाणो यक्षो जातः, मा कोऽपि युष्माकमेवं लोभदोषं करोति ।] एवं आत्मनो परस्य वा सर्वकषायानामुपशमनं कर्तव्यम् ।

22. उपशमसारं खलु श्रामण्यम् । य उपशमति तस्याऽस्त्याराधना, यो नोपशमति तस्य नास्त्याराधना ।

अन्यत्राऽपि -

"[23]जाणिउं जाणिउं जाण जाणेवउं जाणिओ नही ।
जाणिओ पह पमाण जइ हिअडइ उवपसम वसइ ।।" [ ]

सारत्वादुपशमेयत्वमेव 'दुरूवग'दृष्टान्तेन । यथाहि -

।। अथोपशमे कुम्भकारसम्बन्धः ।।

[24]आरियजणवयस्स अंतग्गामे इक्को कुंभकारो, सो[१२] कोलालाणं भंडिं भरिऊण [१३]पच्चंतगामं दुरूवगं नामयं गओ। तेहिं अ [१४]दुरूवगिच्चेहिं एगं बइल्लं हरिउकामेहिं भणइ-

"[25]एग[१५]बइल्लागड्डी पासह तुब्भे वि [१६]डज्झंत खलहाणे ।
हरणे ज्झामण भाणग घोसणया [१७]मल्लजुद्धे अ ।।" [निशिथभाष्य-३१८०]

[26]['भो भो पिच्छह इमं अच्छेरं, एगेण बइल्लेण भंडी गच्छति ।' तेण वि] कुंभकारेण भणिअं 'पिच्छह पिच्छह भो इमस्स गामस्स खलहाणाणि डज्झंति ।' [अतिगया भंडी गाममज्झे ठिता तस्स तेहिं] दुरूवगव्वेहिं च्छिद्दं लहिऊण एगो बइल्लो हडो । [विक्कयं गया कुलाला, ते य गामिल्लया जातिता - देह बइल्लं । ते भणंति - 'तुमं एक्केण चेव बइल्लेण आगयो । ते पुणो जातिता । जोह ण देंति ताहे सरयकाले सव्वधण्णाणि खलधाणेसु कतानि, ताहे अग्गी दिण्णो । एवं तेण] कुलालेण सत्तवरिसाणि झामिआ

---

१२. 'कुडगाणं' नि. भा. । १३. 'पच्चंतगा' नि. भा. । १४. 'दुरुतगव्वेहिं गेहिहिं' नि. भा. । १५. 'एगबतिल्लं भंडिं' नि. भा. १६. 'सत्तखलहाणे' हस्त० । १७. 'मल्लजुद्धेसु' नि. भा. ।

23. ज्ञातुं ज्ञातुं जानीहि, ज्ञापयितुं ज्ञानं नहि । ज्ञातः पन्था प्रमाणं यदि हृदये उपशमो वसति ।।

24. आर्यजनपदस्य अन्तर्ग्रामे एकः कुम्भकारः, स कौलालानां भण्डीं भृत्वा प्रत्यन्तग्रामं दुरूपकं नामकं गतः । तैः दुरूपकैः एकं बईल्लं हरितुकामैः भणति-

25. एकबइल्ला गड्डी पश्यत यूयमपि दह्यमान-खलधान्यानि । हरणं दहनं नायक-घोषणा मल्लयुद्धे च ।।

26. [भो ! भो ! पश्यत इदमाश्चर्यमेकेन बइल्लेन भण्डी गच्छति । तेनाऽपि] कुम्भकारेण भणितम् - 'पश्यत पश्यत भो ! अस्य ग्रामस्य खलधान्यानि दह्यन्ते ।' [अतिगता भण्डी ग्राममध्ये स्थिता । तस्य तैः] दुरूपकैः छिद्रं लब्ध्वा एको बइल्लो हतः । [विक्रयं गताः कुलालाः, तैश्च ग्रामेभ्याः याचिताः - ददातु बइल्लम् । ते भणन्ति - 'त्वं एकेनैव बइल्लेनाऽऽगतः । ते पुनः याचिताः । यदा न ददाति तदा शरत्काले सर्वधान्यानि खलधान्येषु कृतानि ततोऽग्निः दत्तः । एवं तेन] कुलालेन सप्तवर्षाणि दग्धानि खलधान्यानि । ततोऽष्टमे वर्षे दुरूपकग्रामिकैः मल्लयुद्धमहोत्सवे वर्तमानः नायको भणितः - 'उद्घोषयत भो ! यस्याऽस्माभिः अपराद्धं तद् क्षामयामः । यद् च गृहीतं तद् दद्मः, मा अस्माकं सस्यानि दहतु ।' [यदा नायकेन उद्घोषितम् । तदा] कुम्भकारेण नायको भणितः- 'भो ! इदमुद्घोषय -

खलहाणा । ताहे अट्ठमे वरिसे दुरूवगगामिल्लएहिं मल्लजुद्धमहे वट्टमाणो भाणगो भणिओ - 'उग्घोसेहि भो जस्स अम्हेहिं अवरद्धं तं खामेमो । जं च गहिअं तं देमो, मा अम्हसस्से दहउ ।' [जतो भाणएण उग्घोसियं । ततो] कुंभकारेण भाणगो भणिओ - भो ! इमं उग्घोसेहि -

"[27]अप्पिणह तं बइल्लं, दुरूवगा ! तस्स कुंभयारस्स ।
मा भे [28]डहीहि गामं, अन्नाणि वि सत्तवासाणि ।।" [निशिथभाष्य - ३१८१]

[28]भाणगेण उग्घोसिअं तं । तेहिं दुरूवगच्चेहिं सो कुंभकारो खामिओ, दिन्नो अ से बइल्लो । जइ तेहिं असंजएहिं अन्नाणीहिं हुंतेहिं खामिअं किमंग पुण संजएहिं नाणीहिं य [जं कयं तं सव्वं पज्जोसवणाए खामेयव्वं च, एवं करंतेहिं संजमाराहणा कता भवति] ।

।। इत्युपशमे सम्बन्धः ।।

पुनः कषायविषये श्रीगौतमपृष्टेन श्रीवीरेणादिष्टम् -

"[29]**कोहवसट्टे णं भंते ! जीवे किं बधइ ? किं पकरेइ ? किं चिणाइ ? किं उवचिणाइ ? गौतम ! कोहवसट्टे णं जीवे आउयवज्जाओ सत्तकम्मपगडीओ सिढिलबंधणबद्धाओ धणिय-बंधण-बद्धाओ पकरेइ, हस्सकालठिइयाओ दीहकालठिइयाओ पकरेइ, मंदाणुभावाओ तिव्वाणुभावाओ पकरेइ, अप्पपएसग्गाओ बहुप्पएसग्गाओ पकरेइ, आउयं च णं कम्मं सिय बंधइ, सिय नो बंधइ, अस्सायावेयणिज्जं च णं कम्मं भुज्जो-भुज्जो उवचिणाइ, अणाइयं च णं अणवदग्गं दीहमद्धं चाउरंतं संसारकंतारं अणुपरियट्टइ । एवं माण-माया-लोभवसट्टे ज्ञेयम् ।"**

एवं ज्ञात्वा क्रोधादीन् परिहृत्योपशमे मनो विधेयम् ।

[इइ उवसम]

---

१८. 'ऽइहिति' निशिथभाष्ये ।

27. 'अर्पयत तं वृषभं दुरूपकाः ! तस्य कुम्भकारस्य । मा भो ! दहिष्यसि ग्राममन्यान्यपि सप्तवर्षाणि ।।'

28. नायकेन उद्घोषितं तम् । तैः दुरूपकैः स कुम्भकारः क्षमितः, दत्तश्च स बइल्लः । यदि तैः असंयतैः अज्ञानीभिः क्षामितम्, किं पुनः संयतैः ज्ञानीभिश्च । [यत्कृतं तत्सर्वं पर्युषणायां क्षमितव्यं च, एवं कुर्वद्भिः संयमाराधना कृता भवति ।]

29. क्रोधवशार्त्तः भदन्त ! जीवः किं बध्नाति ? किं प्रकरोति ? किं चिनोति ? किमुपचिनोति ? गौतम ! क्रोधवशार्त्तो जीव आयुष्कवर्जाः सप्तकर्मप्रकृतीः शिथिलबन्धनबद्धाः धणियबन्धनबद्धाः प्रकरोति, अल्पकालस्थितिका दीर्घकालस्थितिकाः प्रकरोति, मन्दानुभावास्तीव्रानुभावाः प्रकरोति, अल्पप्रदेशाग्रा बहुप्रदेशाग्राः प्रकरोति, आयुष्कं च कर्म स्यात् बध्नाति, स्यात् नो बध्नाति, असातवेदनीयं च कर्म भूयः भूयः उपचिनोति, अनादिकं च 'अणवदग्गं' दीर्घाद्धं चतुरन्तं संसारकन्तारं अनुपरिवर्त्तिष्यति । एवं मान-माया-लोभवशार्त्तः ज्ञेयम् ।

[विवेग]

[२७-विवेकः]

अथ **विवेग** इति । स च द्विधा द्रव्यतो भावतश्च । द्रव्यतः स्वजनस्वर्णादित्यागः, श्रीजम्बूस्वामि-श्रीस्थूलभद्राभयकुमार-शालिभद्रादिभिरिव वज्रस्वामिनेव वा । यतः -

"[1]कोडीसएहिं धणसंचयस्स गुणसुभरियाए कन्नाए ।
न वि लुद्धो वयररिसी अलोभया एस साहूणं ।।" [उपदेशमाला-४७]

भावतश्च -

"[2]मिच्छत्तं वेअतिगं हासाईछक्कगं च नायव्वं ।
कोहाईण चउक्कं चउदश अब्भंतरा गंथी ।।" [प्रवचनसारोद्धार-७२१]

एतेषां त्यागः । अत्र सम्बन्धः -

।। अथ श्रीयशोभद्रसूरि-कुमारपालयोः पूर्वभवकथा ।।

पूर्णतल्लगच्छे श्रीदत्तसूरिः प्राज्ञः षट्त्रिंशत्शतप्रमाणग्रामे वागडदेशे वटपद्रपुरं समस्ति। तत्र प्राप्तः तत्स्वामी यशोभद्रराणकः श्रीमान् । तत्सौधान्तिके सुश्रावकैरुपाश्रयः प्रदत्तः । तत्र स्थिताः, रात्रावुन्मुद्रचन्द्रातपायां राणकेनासन्नस्थितत्वान्मुनय उपाश्रये निषिण्णा दृष्टाः । ततः समीपस्थ-श्रावकामात्यपार्श्वे पृष्टम्- क एते ? अमात्यः प्रोचे - 'देव ! महामुनयोऽमी विषमतममहाव्रतधारिणः ।' यतः -

[3]तरिअव्वो अ समुद्दो, बाहाहिं इमो महल्लकल्लोलो ।
नीसायअवालुआए, चावेयव्वो सया कवलो ।।१।।
[4]चंकमिअव्वं निसिअग्ग-खग्गधाराहिं अप्पमत्तेणं ।
पायव्वा य सहेलं, हुअवहजालावली सययं ।।२।। [पवज्जाविहाणकुलक -१०,११]

पुनरपि -

[5]"तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स अंतेवासी बहवे अणगारा भगवन्तो इरिआसमिआ,

---

1. कोटिशतैः धनसञ्चयस्य गुणसुभृतायां कन्यायाम् । नापि लुब्धो वैरर्षिः अलोभतैषा साधूनाम् ।
2. मिथ्यात्वं वेदत्रिकं हास्यादि-षट्कं च ज्ञातव्यम् । कोधादिनां चतुष्कं चतुर्दश अभ्यन्तरा ग्रन्थी ।।
3. तरितव्यश्च समुद्रो बाहुभ्यामयं महाकल्लोलः । निःस्वादवालुकायाश्चर्वितव्यः सदा कवलः ।।
4. चङ्क्रमितव्यं निशिताग्रखड्गधारायामप्रमत्तेन । पातव्या च सहेलां हुतवहज्वालावलीं सततम् ।।
5. तस्मिन् काले तस्मिन् समये श्रमणस्य भगवतो महावीरस्यान्तेवासिनो बहवोऽणगारा भगवन्तरिर्यासमिताः, भाषासमिताः, एषणासमिताः, आदानभाण्डमत्तनिक्षेपनासमिताः, उच्चारप्रस्त्रवणश्लेष्मजलशिङ्घाण-

भासासमिआ, एसणासमिआ, आयाणभण्डमत्त-निखेवणासमिआ, उच्चार-पासवण-खेल-जल्ल-सिंघाण-पारिट्ठावणासमिआ, मणगुत्ता, वयगुप्ता, कायगुत्ता, गुत्तिंदिया, गुत्तबंभयारी, अममा, अकिंचणा, छिण्णग्गंथा, छिण्णसोआ, निरुवलेवा, कंसपाई इव मुक्कतोआ, संखे इव निरंजणा, जीवे इव अप्पडिहयगई, जच्चकणगं पिव जायरूवा आदरिसफलग्गा इव पागडभावा, कुम्मो इव गुत्तिन्दिआ, पुक्खरपत्तं पिव निरुवलेवा, गगणमिव निरालम्बणा, अणिलो इव निरालया, चन्दो इव सोमलेसा, सूरो इव दित्ततेआ, सागरो इव गम्भीरा, विहग इव सव्वओ विप्पमुक्का, मंदरो इव अप्पकम्पा, सारयसलिलं इव विसुद्धहिअया, खग्गिविसाणं व एगजाया, भारण्डपक्खी व अप्पमत्ता, कुंजरो इव सोंडीरा, वसभो इव जायथामा, सीहो इव दुद्धरिसा, वसुंधरा इव सव्वफासविसहा, सुहुअहुआसणो इव तेअसा जलन्ता णत्थि णं तेसिणं भगवन्ताणं कत्थइ पडिबन्धो भवइ ।

[से य पडिबंधे चउव्विहे पण्णत्ते,] तं जहा - दव्वओ, खित्तओ, कालओ, भावओ । दव्वओ णं सच्चित्ताचित्तमीसिएसु दव्वेसु । खित्तओ-गामे वा, नगरे वा, रण्णे वा, खित्ते वा, खले वा, घरे वा, अंगणे वा । कालओ समए वा, आवलिआए वा, जाव [आणापाणुए वा थोवे वा क्षणे वा लवे वा मुहुत्ते वा अहोरत्ते वा पक्खे वा मासे वा] अयणे वा, अन्नयरे वा, जाव दीहकालसंजोगे वा । भावओ-कोहे वा, माणे वा, मायाए वा, लोहे वा, भए वा, हासे वा, एवं तेसिं न भवइ । तेणं भगवन्ता वासावासवज्जं अट्ठगिम्हहेमन्तिआणि मासाणि - गामे एगराईआ, णगरे पञ्चराईआ, वासीचन्दणसमाणकप्पा, समलेट्ठुकंचणा, समसुहदुक्खा, इहलोग-परलोग-अप्पडिबद्धा, संसारपारगामी, कम्मनिग्घायणट्ठाए अब्भुट्ठिआ विहरन्ति ।। श्रीओवाईआ उपांगे ।।

एवं तेषां सम्यग्गुणवर्णनश्रवणेन राणकस्य चित्तोल्लासो वन्दनं श्रद्धा च जाताः । रात्रौ तद्ध्यानमयः प्रातर्वन्दितुं गतः । वन्दित्वा यथोचितस्थानं विनयेनोपविष्टः । ततो भवाब्धितारिणीं सर्वसौख्यपादपसारणीं दुर्गतेर्वारणीं श्रीसूरीशो देशनां व्यधात् ।

पारिष्ठापनासमिताः, मनोगुप्ताः, वचनगुप्ताः, कायगुप्ताः, गुप्तेन्द्रियाः, गुप्तब्रह्मचारयः, अममाः, अकिञ्चनाः, छिन्नग्रन्थाः, छिन्नशोकाः, निरुपलेपाः, कांस्यपात्रीव मुक्ततोयाः, शङ्ख इव निरञ्जनाः, जीव इवाप्रतिहतगतयः, जात्यकनकमिव जात्यरूपाः, आदर्शफलका इव प्रगटभावाः, कुर्म इव गुप्तेन्द्रियाः, पुष्पकरपत्रमिव निरुपलेपाः, गगनमिव निरालम्बाः, अनिल इव निरालयाश्चन्द्र इव सौम्यलेश्याः, सूर्य इव दिप्ततेजसः, सागरमिव गम्भीराः, विहगमिव सर्वतो विप्रमुक्ताः, मन्दर इवाप्रकम्पाः, शारदसलिलमिव विशुद्धहृदयाः, खड्गविषाणमिव एकजाताः, भारण्डपक्षीवाप्रमत्ताः, कुञ्जर इव शोण्डीराः, वृषभ इव जातस्थामाः, सिंह इव दुर्द्धर्षाः, वसुन्धरा इव सर्वस्पर्शविसहाः, सुहुतहुताशन इव तेजसा ज्वलन्तः । नास्ति तेषां भगवतां कुत्रचित् प्रतिबन्धो भवति ।

[स प्रतिबन्धश्चतुर्विधः प्रज्ञप्तः] तद्यथा - द्रव्यतः, क्षेत्रतः, कालतः, भावतः । द्रव्यतः - सचित्ताचित्तमिश्रितेषु द्रव्येषु, क्षेत्रतः - ग्रामे वा नगरे वाऽरण्ये वा क्षेत्रे वा स्थले वा गृहे वाऽऽङ्गणे वा, कालतः - समये वा आवलिकायां वा यावत् [आणप्राणे वा स्तोके वा क्षणे वा लवे वा मुहूर्त्ते वाऽहोरात्र्यां वा पक्षे वा मासे वा] अयने वा अन्यतरस्मिन् वा यावत् दीर्धकालसंयोगे वा। भावतः - क्रोधे वा माने वा मायायां वा लोभे वा भये वा हास्ये वा, एवं तेषां न भवति । ते भगवन्ता वर्षावासं वर्ज्याष्टग्रीष्म-हेमन्तकानि मासानि ग्रामे एकरात्रिकाः, नगरे पञ्चरात्रिका वासीचन्दनसमानकल्पाः समलेष्टुकञ्चनाः समसुखदुःखा इहलोक-परलोकाप्रतिबद्धाः संसारपारगामिनः कर्मनिर्घातनार्थमभ्युपस्थिता विहरन्ति।

धर्मो मङ्गलमुत्तमं नरसुर-श्रीभुक्तिमुक्तिप्रदः ;
धर्मः स्निह्यति बन्धुवद्दिशति वा, कल्पद्रुवद्वांछितम् ।
धर्मः सद्‌गुणसंक्रमे गुरुरिव, स्वामीव राज्यप्रदः
धर्मः पाति पितेव वत्सलतया, मातेव पुष्णाति च ।।

ये दीनेषु दयालवः स्पृशति [१]यानल्पोऽपि न श्रीमदो ;
व्यग्रा ये च परोपकारकरणे, हृष्यन्ति ये याचिताः ।
स्वस्थाः सन्ति च यौवनोन्मद[२]महा - व्याधिप्रकोपेऽपि ये ;
तैः [३]कल्पैरिव कल्पितैः कलिभर - क्लान्ताधरा[४] धार्यते ।। [शाङ्गधरपद्धति-२२८]

इत्यादि देशनां श्रुत्वा प्रतिबुद्धेन राणकेन श्रावकत्वं प्रतिपन्नम् । गुरवो मासकल्पमेकं स्थित्वा विहृत्य परदेशं गताः । तावता शनैः शनैः वर्षाकालः समागात् । राणको धर्मप्रतिपत्त्या सदैव देवपूजादि-श्राद्धकृत्यपराण्यहानि गमयत्यप्रमत्ततया तदत्यये प्राप्ता शरत् । चारिक्षेत्राणि द्रष्टुं गतो राणकः । तावता षुण्ढानि ज्वालयन्ति भृत्यास्तेषु सर्प्पिण्येका गर्भभारालसा ज्वालादिभिर्दह्यमाना तडफडायमाना सिमिसियमाना राणकेन दृष्टा तदैवोत्पन्नदयो विरक्तश्च भवात् ।

"न सा दीक्षा, न सा भिक्षा, न तद्दानं न तत्तपः ।
न तद्ध्यानं न तन्मौनं, दया यत्र न विद्यते ।।

तत् श्रुतं यातु पातालं, तच्चातुर्य विलीयताम् ।
ते विशन्तु गुणा भूमौ, यत्र जीवदया नहि ।।"

हा ! हा ! संसारं धिग्गृहवासे कस्य कृते पापमियदाचर्यते । राज्यं हि दुष्पालं मायाजालं नरकफलम् । तस्मात्सर्वसंगपरित्यागो दयामूलम् । यतः -

[6]जीवदय सच्चवयणं, परधणपरिवज्जणं सुसीलं च ।
खंती पंचिन्दियनिग्गहो, अ धम्मस्स मूलाइं ।।" [दर्शनशुद्धिप्रकरण- ६१]

इति स्वश्रेयस्करत्वाद्विधेय एवेति ध्यायन् सौधमासीत् । निशि श्रावकमन्त्रिणं प्राकार्य रहो प्रक्षीत् । मम धर्म्मगुरवः श्रीदत्तसूरयः क्व विहरन्ति ? मंत्र्याह - 'डिंडुआणके,' विसृष्टो मन्त्री शेषपरिच्छदश्च, राणको मितश्च वारपरिवारः स्वकोशसारं हारमेकं गृहीत्वा शीघ्रं डिंडुआणकं प्राप्तः । श्रीगुरुवो दृष्टाः। परमश्रद्धया वन्दिताश्च । भववैराग्यादुद्विग्न पदोर्लगित्वा कथितं स्वपापं मनस्युद्वेगकरम् । गुरुभिर्भणितम् - राणक ! चारित्रं विना न छुटन्ति पापेभ्यो जीवाः । यतः -

---

6. जीवदया सत्यवचनं परधनपरिवर्जनं सुशीलं च । क्षान्तिः पञ्चेन्द्रियनिग्रहश्च धर्मस्य मूलानि ।।

१. 'यानुग्रो' हस्त० । २. 'यौवनोदयमहा...' हस्त० । ३. 'स्तम्भैरिव सुस्थितैः' शाङ्गधरपद्धतौ । ४. 'कलिभरक्रान्ता' हस्त० ।

[7]तवोगुणपहाणस्स, उज्जुमइ खंतिसंजमरयस्स ।
परीसहे जिणंतस्स, सुलहा सुगइ तारिसगस्स ।।

[8]पच्छा वि ते पयाया, खिप्पं गच्छन्ति अमरभवणाइं ।
जेसिं पिओ तवो संजमो अ, खंती अ बंभचेरं च ।।२८।।" [दशवैकालिक - ४/२७-२८]

राणकेन न्यगादि - 'सद्यो दीयतां हि तद्व्रतम्,' सूरिः 'ओमित्याह स्म ।' राणकेन डिंडुआणकीयश्राद्धाः समाकारिताः । हारोऽर्प्पितो, दिव्यः प्रासादः कार्यतामिति, तथाचरितं तैः, अद्यापि दृश्यते स यत्र राणकेन व्रतमात्तम् । नन्द्यामेव षट्विकृतिनियमम् । एकान्तरोपवासादि यावज्जीवम् । तस्य राणकस्य यशोभद्रस्य गीतार्थत्वात् सूरिपदं जातम् । श्रीयशोभद्रसूरिरिति नाम कृतम् । यः श्रीकुमारपालजीवस्य पूर्वभवे प्रतिबोधकः ।

यथा- मेदपाटपरिसरे पर्वतश्रेण्यां परमारः पल्लीशो जयताको राज्यमकरोत्परमन्यायप्रवृत्तिः । एकदा धनकनकसमृद्धा बलीवर्द्दश्रेणी तेन गृहीता । बलीवर्द्दाधिपतिः नष्टः। जयताकेन सर्वं लुण्टितम् । बलीवर्द्दाधिपतिस्तु मालवदेशं गत्वा केनापि प्रौढराज्ञा समं मिलित्वा सेनां गृहीत्वा तस्यां पल्ल्यां वेष्टिमकृत । तां पल्लीमाकीटमारिः कृता । जयताको नष्टः । तद्भार्या च हस्ते चटिता, सद्यस्कपूर्ववैरेण तस्या उदरं विदार्य पुत्रगर्भं भुतले आस्फाल्यावधीद्वणिज्यारकः । पल्लीग्रामादि प्रज्वाल्य पुनर्मालवं गतः । राज्ञा रुष्टेन पृष्टम् - विग्रहः कृतः ? कथितं तेन यथाकृतम् । राज्ञोक्तम्- हत्याद्वयकात्त्वमदृष्टव्यमुखो मदन्तिकं त्यज । निष्कासितो देशात् लोकनिन्दोच्छलिता, तापसीभूयोग्राज्ञानतपसा मृत्वा वणिज्यारको जयसिंहदेवो जातः। जयताकं त्वटव्यां षंडेरगच्छेशाः श्रीयशोभद्रसूरयो मिलिताः प्रोचुः यत्तव सर्वं गतम्, पुनरन्यायान् कुतः करोषि ? शृणु !

"अन्यायोपार्जितं वित्तं, दशवर्षाणि तिष्ठति ।
प्राप्ते षोडशमे वर्षे, समूलं च विनश्यति ।। [चाणक्यशतक - १५/६]

तेनोक्तम् -

बुभुक्षितः किं न करोति पापं, क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे ! प्रियदर्शनस्य, न गङ्गदत्तः पुनरेति कूपम् ।।

मानं मुञ्चति सेवतेऽन्त्यजजनं, दीनं वचो भाषते,
कृत्याकृत्यविवेकमाश्रयति नो, नापेक्षते स्वर्गतिम् ।

---

५. 'चैकादशे' चाणक्यशतके ।

7. तपोगुणप्रधानस्य ऋजुमतेः क्षान्तिसंयमरतस्य । परीषहान् जयतः सुलभा सुगतिस्तादृशस्य ।।

8. पश्चादपि ते प्रयाताः क्षिप्रं गच्छन्त्यमरभवनानि । येषां प्रियं तपः संयमश्च क्षान्तिश्च ब्रह्मचर्यं च ।।

भण्डत्वं विदधाति नर्त्तनकला-भ्यासं समभ्यस्यति;
दूष्पूरोदरपूरणव्यतिकरे, किं किं न कुर्याज्जनः ।।

सूरिभिः कस्यापि पार्श्वादाजीविकामात्रं दापितम्, तदानीं चौर्यलुण्टनादिनियमा दत्ताः । ततो जयताकस्तिलङ्गेषु उरङ्गलनगरे ओढरवणिज्यारकगृहे भोजनादिनाऽस्थात्, तत्राऽन्यदा यशोभद्रसूरयो विहरन्तः प्राप्ताश्चतुष्पथे मिलिता जयताकस्य, श्राद्धार्पितोपाश्रये स्थिताः । जयताकेन तत्र गत्वा मनःशुद्ध्या चौर्यनियमो गृहीतः । अन्येऽपि च नियमा गृहीताः। उत्सूरे ओढरगृहं गतस्तेन पृष्टः, प्राह - मम श्रीगुरुवराः प्राप्ताः सन्ति । तत्पार्श्वे नियमा गृहीताः । ओढरोऽप्युत्पन्नश्रद्धेव वक्त्यहमपि तान् वन्दिष्ये । जयताकेनोक्तम् - पुण्यात्पुण्यमिदं गतस्तत्रौढरो वन्दित्वा न्यषीदत् ।

"सर्वे निजसुखार्थिनो हि मनुजा, मोक्षे च नित्यं सुखम् ;
तन्मार्गेऽद्वितयीसुसाधुपदवीं, सुश्रावकत्वं तथा ।
आद्यः पञ्चमहाव्रतैस्तदितरः स्याद्, द्वादशान्यैर्व्रतैः ;
तन्मार्गमञ्चतां भवतु वोऽभीष्टार्थसिद्धिः सताम् ।।"

हिंसा त्याज्या नरकपदवी, नानृतं भाषणीयम् ;
स्तेयं हेयं सुरतविरतिः सर्वसंगान्निवृत्तिः ।
जैनो धर्मो यदि न रुचितः, पापं का वृत्तेभ्यः ;
सर्पिर्दुष्टं किमिदमियता, यत्प्रमेही न भुङ्क्ते ।।

तेनेत्यादिदेशना श्रुता, तत्त्वज्ञानमुन्मीलितम् । एतद्गुरुदक्षिणा गृह्यतामित्युक्ते ओढरेण, सूरिभिरुक्तम्-वयं निर्ममा मितपरिग्रहा धनादि न गृह्णीमः । अथात्याग्रह एव तर्हि श्रीमहावीरप्रासादकारापणं दक्षिणा । कारितः प्रासादः, ओढरस्य जयताकेन सह सहोदरत्वमिवास्ते । एकदा पर्युषणापर्वणि ओढरः सपरिवारश्चलितो जयताकेन समं देवगृहं प्रति । पुष्पाणि गृहीत्वा देवानां पूजा कृता । जयताकं प्रत्युक्तं तेन - इमाणि पुष्पाणि मे गृहीत्वा देवपूजां कुरु । जयताको जगाद - पुष्पाणि भवदीयानि नैभिः पूजायां कृतायां किमपि मे फलम्, किन्तु विष्टिरेव केवला वरं ममापि पञ्चवरटकाः सन्ति तत्पुष्पैः पूजयिष्यामि जिनेन्द्रम् । जयताकस्तदा स्वहार्दभावेन पूजयन् पुण्यमगण्यमुपार्ज्जयत् । तत ओढरजयताकौ धर्मशालायां श्रीगुरून् वन्दितुं जग्मतुः । उपवासः कृतो जयताकेनौढर-सङ्गत्या । यतः -

एके केचिद्यतिकरगतास्तुम्बकाः[६] पात्रलक्ष्मीम्;
गायन्त्यन्ये सरसमधुरं शुद्धवंशे विलग्नाः ।
एके केचिद्ग्रथितसुगुणा दुस्तरं तारयन्ति;
तेषां मध्ये ज्वलितहृदया रक्तमन्ये पिबन्ति ।।

६. 'पात्रसंज्ञां लभन्ते ।, पात्रतामानयन्ति' इति सुभाषितरत्नभाण्डागारे ।

द्वितीयदिने मुनिभ्यो दत्त्वा पारणं कृतम् । यतः -

आम्रे निम्बे सुतीर्थे कचवरनिचये, शुक्तिमध्येऽहिवक्त्रे;
औषध्यादौ विषाद्रौ [७]गुरुसरसि गिरौ, पाण्डुभूकृष्णभूम्योः ।
इक्षुक्षेत्रे कषायद्रुमवनगहने, मेघमुक्तं यथाम्भः;
तद्वत्पात्रेषु [८]दत्तं गुरुवदनभवं, वाक्यमायाति पाकम् ।। [नायाधर्मकहा - १७/६१]

जले तैलं, खले गुह्यं पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ।।२।। [चाणक्यशतक - १४/५]

एवं पुण्याढ्यः सन्मृत्वा त्रिभुवनपालस्य पञ्चग्रामाधिपत्यभाजे गृहे श्रीमूलराजवंशे श्रीकुमारपालनामा राजपुत्रोऽभूत् । [९]एवमुक्त्वा विरतासु देवीषु प्रभुभिः प्रोक्तं कोऽत्र प्रत्ययः । पुनर्देव्यः प्राहुः - उपराजं वदेः, तव नवलक्षतिलिङ्गशृङ्गारे देशे, उरङ्गले नगरे मानवान् प्रेषय । अद्याप्योढरवंशीयाः सन्ति । तेषां दासी स्थिरदेवी जीर्णा वृत्तान्तान् जानाति विवक्षति च । इदं श्रुत्वा देवीर्विसृज्य, गच्छन्तीभिर्देवीभिस्तत्रत्ये ओढरगृहे लप्स्यमानानि कथितानि विज्ञाय श्रीपत्तननगरे राजान्तिकं गताः प्रभवः । पृष्टास्तत्र राज्ञा, तथैव राज्ञोऽग्रे न्यगादि। नरप्रेषणात् सर्वं ज्ञातं श्रीजिनधर्मे स्थैर्यं जातम् । सिद्धसेनस्यापि वैरकारणमुपलब्धम्, पूर्वभवे गर्भपातात् न सिद्धराजस्य पुत्रः । पूर्वभवविरचित-श्रीजिनपूजोपार्जितं राज्यं श्रीकुमारपालस्य जातम् । यतः- 'देवच्चणेण रज्जं' इति वचनात् ।

।। इति यशोभद्रसूरि-कुमारपालयोः पूर्वभवकथा ।।

[इइ विवेग]

---

७. 'हिमगिरिशिखरे' इति ज्ञाताधर्मकथाङ्गे । ८. 'दानं' इति ज्ञाताधर्मकथाङ्गे । ९. कुमारपालसत्कान्यचरित्रेष्वत्र श्रीहेमचन्दसूर्याराधित-त्रिभुवनस्वामिनी-देव्याः सम्बन्धोऽयम् । - संपा० ।

[संवर]

[२८-संवरः]

अथ **संवरः** । इन्द्रिय-नोइन्द्रियगोपन संवरः । एतान्यसंवृतानि जीवस्य दुःख-फलानि । यतः-

"वशास्पर्शसुखास्वाद-प्रसारितकरः करी ।
आलानबन्धनक्लेश-मासादयति तत्क्षणात् ।।

पयस्यगाधे विचरन् गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो मीनः पतति निश्चितम् ।।

निपतन् मत्तमातङ्ग-कपोले गन्धलोलुपः ।
कर्णतालतलाघाताद् मृत्युमाप्नोति षट्पदः ।।

कनकच्छेदसंकाश-शिखाऽऽलोकविमोहितः ।
रभसेन पतन् दीपे शलभो लभते मृतिम् ।।

हरिणो हारिणिं गीति-माकर्णयितुमुद्धुरः ।
आकर्णाकृष्टचापस्य याति व्याधस्य वेध्यताम् ।।

एवं विषय एकैकः पञ्चत्वाय निषेवितः ।
कथं हि युगपत् पञ्च पञ्चत्वाय भवन्ति न ? ।। [योगशास्त्र ४/२८-३३]

अनिरुद्धमनस्कः सन् योगश्रद्धां दधाति यः ।
पद्मयां जिगमिषुर्ग्रामं स पङ्गुरिव हस्यते ।।

मनोरोधे निरुध्यन्ते कर्माण्यपि समन्ततः ।
अनिरुद्धमनस्कस्य प्रसरन्ति हि तान्यपि ।।

मनःकपिरयं विश्व-परिभ्रमणलम्पटः ।
नियन्त्रणीयो यत्नेन मुक्तिमिच्छुभिरात्मनः ।। *[योगशास्त्र ४/३७-३९]*

सर्वेषामाश्रवाणां तु निरोधः संवरः स्मृतः ।
स पुनर्भिद्यते द्वेधा द्रव्यभावविभेदतः ।।

यः कर्मपुद्गलादान-च्छेदः स द्रव्यसंवरः ।
भवहेतुक्रियात्यागः स पुनर्भावसंवरः ।।

येन येन ह्युपायेन रुध्यते यो य आश्रवः ।
तस्य तस्य निरोधाय स स योज्यो मनीषिभिः ।।

क्षमया मृदुभावेन ऋजुत्वेनाऽप्यनीहया ।
क्रोधं मानं तथा मायां लोभं रुन्ध्याद् यथाक्रमम् ।।

असंयमकृतोत्सेकान् विषयान् विषसंनिभान् ।
निराकुर्यादखण्डेन संयमेन महामतिः ।।

तिसृभिर्गुप्तिभिर्योगान् प्रमादं चाप्रमादतः ।
सावद्ययोगहानेनाऽविरतिं चापि साधयेत् ।।

सद्दर्शनेन मिथ्यात्वं शुभस्थैर्येण चेतसः ।
विजयेतार्तरौद्रे च संवरार्थं कृतोद्यमः ।।" [योगशास्त्र-४/७९-८५]

एवं ज्ञात्वा यतिसुखार्थिभिः संवरो विधेय एव । यथा वा [भगवतो महावीरस्य] दशभिरपि श्राद्धैः विंशतिवर्षाणि यावत् श्रीजिनधर्म आराधितः । तन्मध्ये चतुर्दश-वर्षानन्तरं षट्वर्षाणि यावत् सर्वगृहव्यापारपरिहारेण संवरकृतः । एकादश-प्रतिमाराधनादिबहुदुष्करतपः क्रिया च कृता । सर्वेषां मासिकसंलेखनाऽनशनं जातम् । प्रान्ते चावधिज्ञानमुत्पन्न-मानन्दवर्जमन्येषां नवानां देवपरिक्षा बभूव । आयुःसमाप्ते च ते दशाऽपि सौधर्मे कल्पे पृथक् पृथक् विमानेषु चतुःपल्यायुषो देवा अभूवन् । ततश्च्युत्वा च ते दशाऽपि महाविदेहक्षेत्रे महाराजानो भूत्वाऽवसरे दीक्षां गृहीत्वा शुक्लध्यानेन विमलकेवलज्ञानलक्ष्मीं प्राप्य सेत्स्यन्ति । साधूनां द्वादशसाधुप्रतिमाकरणं जिनकल्पप्रतिपत्तिः परिहारविशुद्धिकचारित्रप्रतिपत्तिश्च, एवमपि संवर एव ।

"[1]आयावयंति गिम्हेसु, हेमंतेसु अवाउडा ।
वासासु पडिसंलीणा, संजया सुसमाहिया ।।" [दशवैकालिक-३/१२]

अत्र शिष्यः [पृच्छति] - सर्वत्र सर्वेषां संवरश्चेत्फलसाधकस्तदा मुनीनां नवकल्पविहारोऽष्टौ [द्वादश-?] मासान् प्रोक्तः स कथं घटते ? विहारे संवरासम्भवात् । गुरुः [आह-] सत्यम्, उच्यते-विहारोऽपि साधूनां संवरमार्गेणैव युक्तियुक्त इति न दोषः ।

श्राद्धानामपि प्रतिदिन-चतुर्दशनियमग्रहणेच्छापरिमाणादिप्रतिपत्त्या संवरः । अत्र सम्बन्धः -

"गृहेऽपि वसतां नित्यमश्नतामपि श्रद्धया ।
मनःशुद्ध्या भवेद्धर्मस्तपसाऽपि न तां विना ।।" [ ]

उक्तं च -

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
[१]बन्धने विषयासङ्गि मुक्तेर्निर्विषयं [२]मनः ।।" [भगवद्गीता]
[2]मनमर[३]णे इंदियमरणं, इंदियमरणे मरंति कम्माइं ।
कम्ममरणेण मुक्खो, तम्हा मनमारणं कुज्जा ।।" [जैनसूक्तसन्दोह-१३०/६-७]

तथाहि -

।। अथ सूरनृप-सोममुनिसम्बन्धः ।।

पुरा सूरनृपः कुर्यावरूद्यानमागतम् । मुनिसोदरमाकर्ण्य तत्रागात्सपरिच्छदः ।।४।।
मुनिं प्रणम्य भावेन, स्फुटरोमाञ्चभूषणः । निशम्य तन्मुखाद्धर्मं, गतः स्वभवनं नृपः ।।५।।
पट्टराज्यपि सोत्कण्ठा, वन्दितं देवरं मुनिम् । आपृच्छ्य नृपतिं सायं, जग्राहेत्थमभिग्रहम् ।।६।।
सोमाभिधो मुनिः प्रात-र्मया सपरिवारया । वन्दित्वा पारयित्वा च, भोक्तव्यमिति नान्यथा ।।७।।
अत्रान्तराले नद्यस्ति, पुरस्योपवनस्य च । निशीथे सातिपूरेणा - गतागाधा वहत्यलम् ।।८।।
ते[४]नाक्षिप्तमना राज्ञी, प्रभाते निजवल्लभम् । पप्रच्छ कथमद्याऽसौ, पूर्यते मे मनोरथः ।।९।।
उवाच नृपतिर्देवी !, मा कार्षीः खेदमिदृशम् । येनेदं सुकरं स्वस्था, गच्छ त्वं सपरिच्छदा ।।१०।।

---

१. 'बन्धस्तु विषयासंगे' इति जैनसूक्तसंदोहे । २. 'मोक्षे निर्विषयं स्मृतः ।।' इति भगवद्गीतायाम् । ३. 'मनमरणिंदिय...' हस्त० । ४. 'तेनाश्चिलमना' हस्त० ।

1. आतापयन्ति ग्रीष्मेषु, हेमन्तेष्वप्रावृताः । वर्षासु प्रतिसंलीनाः, संयताः सुसमाधिताः ।।

2. मनमरणे इन्द्रियमरणं, इन्द्रियमरणे मरन्ति कर्माणि । कर्ममरणेण मोक्षस्तस्मात् मनमारणं कुर्यात् ।।

अर्वाक्तीरे नदीं देवीं, समाह्वानपुरस्सरम् । योजयित्वा करौ शुद्ध-मानसेदं वदेर्वचः ।।११।।
हे देवि ! नदि ! भर्त्ता मे, देवरव्रतवासरात् । आरभ्य ब्रह्मचारी चेन्मार्गं देहीति मे द्रुतम् ।।१२।।
तत् श्रुत्वा विस्मिता राज्ञी, दध्यौ किमिदमीदृशम् । असम्बद्धं नृपो ब्रूते, पञ्चमो लोकपालकः ।।१३।।
भ्रातृव्रतदिनादूर्ध्व-मस्य यत्पुत्रसन्ततिः । बभूव मयि तत्सर्वं, विदितं मे पतिव्रतम् ।।१४।।
अथवा किं विकल्पे, निकटः प्रत्ययोऽधुना । अन्यच्च निर्विकल्पाः स्युः, पतिवाक्ये पतिव्रताः ।।१५।।
यतः -
सती पत्युः प्रभोः पत्ति - र्गुरोः शिष्यः पितुः सुतः । आदेशे संशयं कुर्वन्, खण्डयत्ययं नो व्रतम् ।।१६।।
इति तुष्टा गता राज्ञी, सोपस्करपरिच्छदा । नदीतीरे मिलल्लोकः, सङ्कटीभूतभूतले ।।१७।।
तत्राहूय नदीं देवीं, कृतार्चा शुद्धमानसा । सा भतृकथितां सत्य - श्रावणामकृत स्फुटम् ।।१८।।
नदी च सहसा वाम - दक्षिणक्षिप्तवारिभिः । स्ताधीभूय ददौ पारं, गता राज्ञी परे तटे ।।१९।।
प्रणम्य विधिना तत्र, धन्यंमन्या मुनिं ततः । लब्धाशीर्मुनिना पृष्टा, नद्युत्तारविधिं सती ।।२०।।
सर्वमाख्याय वृत्तान्तं, सा पप्रच्छ मुनीश्वरम् । असम्भाव्या कथं भर्त्तु-र्घटते ब्रह्मचारिता ।।२१।।
सोऽप्याह श्रूयतां भद्रे !, यदाऽहं जगृहे व्रतम् । तदारभ्य विरक्तात्मा, व्रताकाङ्क्षी भृशं नृपः ।।२२।।
परं तादृग्न कोऽप्यासी-द्राज्यधूर्धरणक्षमः । तेनाऽसौ कुरुते राज्यं, व्यवहारेण नो धिया ।।२३।।
उक्तं च -

परपुंसि रता नारी, भर्त्तारमनुवर्त्तते ।
तथा तत्त्वरतो योगी, संसारमनुगच्छति ।।२४।। [ ]

तथैवं गृहवासेऽपि, पंकेऽब्जस्यैव तस्थुषः । निर्लेपमनसो राज्ञो, घटते ब्रह्मचारिता ।।२५।।
मुनिं नत्वा रता राज्ञी, वहन्ती परमां मुदम् । वनस्यैकतमे देशे, गत्वा वासितवत्यसौ ।।२६।।
कारयित्वा रसवतीं, स्वपरिच्छदहेतवे । पारयित्वा मुनिं पूर्णा - भिग्रहा बुभुजे स्वयम् ।।२७।।
आप्रष्टुं गतया देव्या, पुनः पृष्टो मुनिः कथम् । नद्युत्तार्यः मयेदानीं, मुनिराह प्रशान्तवाक् ।।२८।।
नदी देवी त्वया भण्या, यद्यसौ मुनिराव्रतात् । उपोषितश्चरेन्नित्यं, तदा मार्गं प्रयच्छ मे ।।२९।।
पुनर्विस्मयमापन्ना, राज्ञी नद्यास्तटे गता । श्रावयित्वा मुनेर्वाक्यं, नदीं तीर्त्वा गृहं ययौ ।।३०।।
राज्ञे निवेद्य तत्सर्वं, पप्रच्छ च कथं मुनिः । उपोषितः सोऽद्य स्वेन पारणं कारितो मया ।।३१।।

राजाख्यद्देवि ! मुग्धासि, धर्मतत्त्वं न विन्दसि । समचित्तो महात्माय-मशनेऽनशनेऽपि च ।।३२।।

अकृताकारितं शुद्ध-माहारं धर्महेतवे । अश्नतोऽपि मुनेर्नित्यमुपवास उदाहृतः ।।३३।।

[3] छुहवेअण वेआवच्च, संजम सुज्झाण पाण रक्खणट्ठा ।
इरिअं च विसोहेउं, भुञ्जइ न य रूवरसहेउं ।।३४।।

[4] अहव न जमिज्ज रोगे, मोहुदये सयणमाइउवस्सग्गे ।
पाणिदया-तवहेउं, अन्ते तणुमोअणत्थं च ।।३५।।

मनो मूलं वचो स्कन्धः, क्रिया शाखादिविस्तरः । धर्मवृक्षस्य तन्मूले, दृढे सर्वं प्रजायते ।।३६।।

स्वभर्तुर्देवरस्याऽपि, माहात्म्यं वीक्ष्य तादृशम् । अनुमोदनयैवात्मा, तया राज्या पवित्रितः ।।३७।।

।। इति संवरोपरि सूरनृप-सोममुनिसम्बन्धः ।।

[इइ संवर]

---

3. क्षुधावेदना-वैयावृत्य-संयम-सुध्यान-प्राणरक्षणार्थम् । इर्यां च विशोधितु भुनक्ति न च रूपरसार्थम् ।।

4. अथवा न जेमति रोगे मोहोदये स्वजनाद्युपसर्गे । प्राणिदया-तपहेत्वर्थमन्ते तनुमोचनार्थं च ।।

[भासासमिई]

[२९-भाषासमितिः]

अथ **भाषासमितिः** -

"[1]**सावज्जभासं न लविज्ज साहू, सुसावओ वावि विवेअजुत्तो ।**
जम्हा जिणिंदेहिं रहस्सभूआ, धम्मस्स भासासमिई पउत्ता ।।" [ ]

समितिस्तु प्रवृत्तिरूपा - प्रवर्तनम् -

"[2]**महुरं निउणं थोवं, कज्जावडियं अगव्वियमतुच्छं ।**
पुव्विं मइसंकलियं, भणंति जं धम्मसंजुत्तं ।।" [उपदेशमाला-७९]

कार्यहीनबहु-बहुजल्पनेन न काऽपि पुण्याप्तिः किन्तु नवीनासुकृतोपार्जनमेव । अन्यथा चतुर्ज्ञानवद्भिस्तीर्थकृद्भिः कथं न जल्प्यते ? चेज्जल्पना विना न शक्यते तदाऽपि मिताक्षरैरेव स्वल्पं जल्पनीयम् । यदुक्तम् -

"[3]**सो अत्थो वत्तव्वो जो भणइ अक्खरेहिं थेवेहिं ।**
जो पुण थोवो बहुअक्खरेहिं सो होइ निस्सारो ।।" [ ]

न वचनमात्रेण काऽपि कार्यसिद्धिः स्यात् । यतः -

"**वचनं हि केवलं प्रतिपत्तिस्तु फलैर्विभाव्यते ।**
वचनैरुपचारकोमलैः फलहीनैर्वद किं प्रयोजनम् ।।" [ ]

श्रीदशवैकालिके -

"[4]**वितहं पि तहामुत्तिं, जं गिरं भासए नरो ।**
तम्हा सो पुट्ठो पावेणं, किं पुणं जो मुसं वए ? ।।
[5]**तम्हा गच्छामो वक्खामो, अमुगं वा णे भविस्सइ ।**
अहं वा णं करिस्सामि, एसो वा णं करिस्सइ ।।

---

1. सावद्यभाषां न लपेत् साधुः, सुश्रावकोऽपि विवेकयुक्तः । यस्मात् जिनेन्द्रैः रहस्यभूता धर्मस्य भाषासमितिः प्रयुक्ता ।।
2. मधुरं निपुणं स्तोकं कार्यापतितमगर्वितमतुच्छम् । पूर्वं मतिसङ्कलितं भणन्ति यत् धर्मसंयुक्तम् ।।
3. सोऽर्थो वक्तव्यो यो भण्यते अक्षरैः स्तोकैः । यः पुनः स्तोको बहवक्षरैः, स भवति निःसारः ।।
4. वितथमपि तथामूर्तिं, यां गिरं भाषते नरः । तस्मात् स स्पृष्टः पापेन, किं पुनर्यो मृषा वदेत् ? ।।
5. तस्माद् गमिष्यामो वक्ष्यामः, अमुकं वा नः भविष्यति । अहं वा करिष्यामि, एष वा करिष्यति ।।

[6] एवमाइ उ जा भासा, एसकालंमि संकिया ।
संपयाइअमट्ठे वा, तं पि धीरो विवज्जए ।।" [दशवैकालिक-७/५-७]

योगशास्त्रेऽपि -

"ब्रूयाद्धियोपरोधाद्वा नासत्यं कालिकार्यवत् ।
यस्तु ब्रूते स नरकं प्रयाति वसुराजवत् ।।

न सत्यमपि भाषेत परपीडाकरं वचः ।
लोकेऽपि श्रूयते यस्मात् कौशिको नरकं गतः ।।

अल्पादपि मृषावादाद् रौरवादिषु संभवः ।
अन्यथा वदतां जैनीं वाचं त्वहह का गतिः ।।

ज्ञानचारित्रयोर्मूलं सत्यमेव वदन्ति ये ।
धात्री पवित्रीक्रियते तेषां चरणरेणुभिः ।।" [योगशास्त्र-२/६०-६३]

वाचाटैरपि परेषामाक्रोश-शाप-मर्मवचांसि[१] न वक्तव्यानि । यदुक्तम् -

"[7] मुहुत्त-दुक्खा उ हवन्ति कंटया, अओमया ते वि तओ सुउद्धरा ।
वाया दुरुत्ताणि दुरुद्धराणि, वेराणुबन्धीणि महब्भयाणि ।।" [द.वै.-९/३/७]

पृष्टाववर्णवादोऽपि त्याज्य एव ।

[8] अवण्णवायं च परम्मुहस्स, पच्चक्खओ पडिणीयं च भासं ।
ओहारणिं अप्पियकारिणिं च, भासं न भासेज्ज सया स पुज्जो ।।[द.वै.-९/३/९]

---

१. 'मर्मवचसां' हस्त० ।

6. एवमाद्या तु या भाषा, एष्यत्काले शङ्किता । साम्प्रतातीतार्थयोः वा, तामपि धीरो विवर्जयेत् ।।

7. मुहूर्त्तदुःखास्तु भवन्ति कण्टकाः; अयोमयास्तेऽपि तस्मात्सूद्धराः ।
वाचा दुरुक्तानि दुरुद्धराणि; वैरानुबन्धीनि महाभयानि ।।

8. अवर्णवादं च पराङ्मुखस्य; प्रत्यक्षतः प्रत्यनीकां च भाषाम् ।
अवधारिणीमप्रीतिकारिणीं च, भाषां न भाषेत सदा स पूज्यः ।।

निष्ठुरवचनमेकमप्युक्तमिहामुत्र चानर्थकरम् । यथा -

।। अथ महाशतकश्राद्धकथा ।।

राजगृहे पुरे महाशतकश्रेष्ठी चतुर्विंशतिस्वर्णकोटिस्वाम्यशीतिसहस्रगोधनः । रेवतीप्रमुखत्रयोदशभार्यः, रेवत्या अष्टौ स्वर्णकोट्यः, अशीतिसहस्रगोधनः। अपरासां सर्वासामेकैका स्वर्णकोटी, एकैकं च गोकुल-मेतावती ऋद्धिः स्वस्वपितृगृहसम्बन्धिनी ज्ञेया । महाशतकः श्रीवीरसमीपे श्रीजिनधर्मं प्रतिपन्नवान्। पुना रेवती न श्रद्धति, विषयलम्पटतया रेवत्या षट्स्वसपत्न्यो विषप्रयोगेन मारिताः । तासामृद्धिर्गृहीता तया । महाशतक एकदा एकादशश्राद्धप्रतिमामाराधयति । पुना रेवती तं प्रति सानुकूलोपसर्गान् करोति। स न क्षुभ्यति । षड्वर्षाणि प्रतिमामाराध्यानशनं प्रतिपन्नं शतकेन, तस्यावधिज्ञानं समुत्पन्नम् । रेवती मद्यपानं कृत्वोपसर्गान् करोति । महाशतकोऽवधिना दुश्चरितं जानाति नरकगमनं च । ततो महाशतको रेवतीं प्रति निष्ठुरवचनं वदति- 'रे पापे ! निर्लज्जे ! सपत्नीमारिके ! सप्तमदिने नरके यास्यसि त्वम् ।' रेवती तेन वचसा दूना स्वगृहे गता मृत्वा नरकं गता च । तावता [२]श्रीवीरो गौतमं प्रेषयति । गौतमस्तं प्रति कथयति - 'महाशतक ! श्रीवीरस्त्वां प्रति कथयति -,त्वया रेवतीं प्रति निष्ठुरवचनं प्रोक्तम्, तेन तव तपो जर्जरीभूतम्, त्वमालोचय तदा शुद्धः स्यात् । महाशतकस्तद्वचनपापमालोच्य सौधर्मदेवलोके गतः ।।

।। इति महाशतकश्राद्धकथा ।।

अतो भाषासमितौ यत्यम् । बहुजल्पतः प्राज्ञस्याऽपि स्खलनं स्यात् । यदुक्तम् -

"कस्य स्यान्न स्खलितम् ? पूर्णाः सर्वे मनोरथाः कस्य ?
कस्येह सुखं नित्यम् ? दैवेन न खण्डितः को वा ?" [सुक्तमुक्तावली-१८/२६]

यदि श्रीगौतमस्वामी आनन्दश्रावकस्यावधिज्ञानोत्पत्तौ ऊर्ध्वं सौधर्मं यावद्, अधो रत्नप्रभाद्यप्रस्तरस्थलोलुपनरकावासं यावत्, तिर्यक् तिसृषु लवणोदधौ ५०० [पञ्चशतानि] योजनानि, उत्तरस्यां हिमवत्प्रस्थं यावत्, आगमेनावधिपरिमाणाश्रद्दधानः श्रीवीरपार्श्वे गत्वा [पृष्टवन्तः] । गौतमेन पृष्टो भगवानाह-गौतम ! मिथ्यादुष्कृतं देहि । ततो गौतमेनानन्दपार्श्वे समागत्य मिथ्यादुष्कृतम् [दत्तम्] ।

।। अथ विमल-सहदेवकथा ।।

तथा कुशस्थलपुरे कुवलयचन्द्रः श्रेष्ठी, आनन्दश्री भार्या, पुत्रौ विमल-सहदेवौ । ज्येष्ठः पापभीरुः, कनीयान् विपरीतः । द्वावपि मुनिपार्श्वे श्राद्धधर्मं प्रतिपन्नौ । एकदा द्वावपि व्यवसायकृते देशान्तरे चलितौ । मार्गे पथिकेनैकेन मार्गं पृष्टो विमलो वक्ति, न जानामि, पथिकेनोक्तम् - त्वं क्व यास्यसि ? विमल आह - यत्र पण्यविक्रयो भविष्यति । पथिक आह - तव पुरस्य किं नाम ? विमल आह - पुरं नृपस्य, मम तु नास्ति ।

२. 'श्रीवीरे' हस्त० । ३. 'प्रच्छनेन' हस्त० ।

ततः पथिकस्तत्सार्थेन चलितः । मार्गे संमुखीनैः पथिकैरुक्तम् - विमल ! यत्र त्वं यास्यसि तत्रैतत्पण्यं नार्हति, त्रोटो भविष्यति, यदि श्रावस्त्यां यास्यसि तदा महान् लाभः । ततः श्रुत्वाऽपरे सार्थिकाः कियन्तः श्रावस्तीं प्रति प्रस्थिताः । विमलः पुनर्मार्गे मण्डूकीः सूक्ष्माः प्रचुरा वीक्ष्य न याति । यत्र तैस्त्रोटः कथितस्तत्रैव याति । मार्गैकस्मिन् ग्रामे लोकैः पण्यं याचितम् । जीर्णनिलनीली-मदन-मधु-लोह-लवण-प्रहरण-सन्नाहप्रभृति-पण्यविनिमयेन परं बहुलाभसम्भवेऽपि भ्रात्रा प्रेर्यमाणोऽपि पापभीरुतया नेच्छति तेषां विनिमयम् । ततो नवनीततापनेन तैर्घृतं ढौकितं, तदपि नेच्छति। ततोऽग्रतो गतः कस्मिंश्चिद् ग्रामे लोकैः सूत्रं याचितम् । विमलेनोक्तम्-सूत्रं तु सर्वत्राऽपि प्राप्यते । प्रायोऽल्पमूल्यं भवद्भिरतीवसादरैर्बहुमूल्येन कस्माद् गृह्यते । तैरुक्तम् - वयं धीवराः, अस्माकं ग्रामो जज्वले । जालानि सर्वाणि ज्वलितानि, वयं चौरपल्लीवासित्वेन क्वापि गन्तुं न पारयामः, तेन जालकरणाय बहुमूल्यमपि सूत्रं गृह्यमाणमस्ति इति । विमलश्चिन्तयति धिगस्तु पापद्रव्यस्य, तेषां सूत्रं न दत्ते लोभिना भ्रात्रा प्रेर्यमाणोऽपि । प्राप्तौ कनकपुरोद्याने । मध्याह्ने पथिकेन वह्निर्याचितः, विमलो न दत्ते ।

> महुमज्जमंसभेसज्ज[9] - मूलसत्थग्गिजन्तमन्ताइं ।
> न कदावि हु दायव्वं, सट्ठेहिं पावभीरूहिं ।।

ततः कुपितः पथिको राक्षसरूपं कृत्वा भापयति । उक्ति-प्रत्युक्ती ये येऽत्र । तावता दिव्यरूपः प्रत्यक्षः सुरो वक्ति - 'हे विमल ! इन्द्रेण तव पापभीरुत्वं प्रशंसितम्, तदनु मयेयं मण्डूकीविकरणादिका परीक्षा कृता,' अनिच्छतो विमलस्य वस्त्रे गरलोद्धारमणिं बद्ध्वा गतः । विमल-सहदेवौ भुक्त्वा पुरमध्ये गतौ । तावता पुरक्षोभः, पौराः पृष्टाः किमिदम् ? तैः प्रोचुः- 'अत्र राजा पुरुषोत्तमः, सुतोऽरिमल्लः, सोऽद्य सर्प्पेण दृष्टः ।' अत्रान्तरे पटहोद्घोषणा, यो राजपुत्रं जीवयति तस्यार्धराज्यं राजा दत्ते । सहदेवो वक्ति-'विमल ! मणिप्रभावात्कुमारं सज्जीकृत्यार्धराज्यं गृह्यते । विमल आह - 'वत्स ! [राज्यं] महदधिकरणम् ।' सहदेवो बलादपि मणिं गृहीत्वा कुमारं सज्जीकृतवान् । राजार्धराज्यं दत्ते । सहदेवो वक्ति - 'मम भ्रातुर्दीयताम् ।' विमलोऽधिकरणभीरुतया परिग्रहाधिक्यतश्च नाङ्गीकुरुते । सहदेवस्य दत्तम्, विमलाय श्रेष्ठिपदम्, पितरौ तत्राकारितौ । विमलः श्राद्धधर्ममाराधयति । सहदेवो राज्ये राष्ट्रे आकरे च करं कुरुते । अधिकरणानि मीलयति, रिपुदेशान् मूढयति । विमलाह - 'भ्रातः ! किमिदमारब्धम् ?

> वरमनलंमि[10] पवेसो, फणिमुहकुवरे वरं करो खित्तो ।
> वरं सपामयपीडा, न हु विरइविराहणा भाय ।।'

परं न लग्नं किमपि । एकदा सहदेवः केनाऽपि वैरिणा क्षुरिकया हतो मृतो गतः प्रथम नरके । अनन्तकालं भ्रान्त्वा शिवं गामी । विमलो देवलोके देवो जातो महाविदेहे शिवं गामी ।।

।। इति विमल-सहदेवकथा ।।

[इइ भासासमिई]

---

9. मधु-मद्य-मांस-भेषज-मूल-शस्त्राग्नि-यन्त्र-मन्त्रादीनि । न कदापि हु दातव्यं शाठ्यैः पापभीरुभिः ।।
10. वरमनले प्रवेशो फणिमुखविवरे वरं करोत्क्षिप्तः । वरं सपामापीडा न हु विरतिविराधना भ्रातः ! ।।

[जीवकरुणा]

[३०-जीवकरुणा]

अथ **जीवकरुणा**[१] । कोऽर्थः ? जीवानां प्राणिनां करुणा दया विधेया श्राद्धैर्यत्नतोऽपि ।

"[1]सम्मत्तधरो विहिणा, कयवयकम्मो गुरूण पायमूले ।
इह मुणिवरेहिं समए, सुसावओ देसिओ भावे ।।" [ ]

इह संविग्न-गीतार्थादिचतुर्भङ्ग्यां संविग्नगीतार्थपार्श्वविहितद्वादशव्रतश्रवण-[२]परिज्ञान-ग्रहण-प्रतिसेवनाभिः भावश्रावकः स्यात् । यदुक्तम् -

"[2]तत्थायन्नणजाणणगिण्हणपडिसेवणेसु उज्जुत्तो ।
कयवयकम्मो चउहा भावत्थो तस्सिमो होइ ।।" [धर्मरत्नप्रकरण-३४]

तत्र -

"[[३]सम्यक्त्वमूलानि] पञ्चाणुव्रतानि गुणास्त्रयः ।
शिक्षापदानि चत्वारि, [व्रतानि गृहमेधिनाम्] ।।" [योगशास्त्र - २/२]

तत्र यतिश्राद्धधर्मस्य[४] जीवदया जीवितत्वात् सर्वजीवरक्षणं प्रथमव्रतत्वेन प्रतिष्ठितम् । प्रथमं चास्य सर्वेषां व्रतानां जीवदयाङ्गभूतत्वात्, एतस्य पालने सर्वव्रतानां पालनात्, भङ्गे भङ्गसद्भावात्[५], सर्वदर्शनानां[६] सम्मतत्वात्, स्वर्गापवर्गादिनिखिलसौख्यमुख्यकारणाच्च तथाहि -

"[3]किं सुरगिरिणो गुरुअं, जलनिहिणो किं व हुज्ज गंभीरं ? ।
किं गयणाओ विसालं, को अ अहिंसासमो धम्मो ?।। [सम्बोधप्रकरण-११३५]
[4]मेरुगिरिकणयदाणं, धन्नाणं जो देइ कोडिरासीओ ।
इक्कं [७]हणेइ जीवं, न छुट्टए तेण पावेण ।।"

---

१. मुद्रितेषु पुस्तकेषु 'छज्जीवकरुणा' इति पाठो वर्तते परं हस्तप्रतवृत्तौ तु 'अ जीवकरुणा' [च जीवकरुणा] इति पाठ उपलभ्यते । वृत्यपेक्षया अयं पाठः स्वीकृतः । अत्र अ (च) शब्दः पूर्वकर्त्तव्यस्य सम्बन्धेन प्रयुक्तः । ० संपा० । २. 'परिजान-ग्रहण-प्रतिसेवना' हस्त० । ३. 'अणुव्रतानि पञ्च... चत्वारि' हस्त० । ४. '...धर्मस्यवदया जीविवितत्वात्' हस्त० । ५. सद्भावाते' हस्त० । ६. 'सर्वदर्त्रैनां' हस्त० । ७. 'वहेइ' हस्त० ।

1. **सम्यक्त्वधरः विधिना, कृतव्रतकर्म गुरूणां पादमूले । इह मुनिवरैः समये, सुश्रावकः देशितो भावे ।।**
2. **तत्राकर्णन-ज्ञान-ग्रहण-प्रतिसेवनेषूद्युक्तः । कृतव्रतकर्मा चतुर्द्धा भावार्थस्तस्यायं भवति ।।**
3. **किं सुरगिरेः गुरुकं जलनिधेः किं वा भवति गम्भीरम् ? किं गगनाद्विशालं कश्चाहिंसासमो धर्मः ।।**
4. **मेरुगिरिकनकदानं धन्येभ्यो यो ददाति कोटिराशीः । एकं हन्ति जीवं न छुट्यते तेन पापेन ।।**

लौकिकेऽपि पुराणादौ -

"कृपानदीमहातीरे, सर्वे धर्मास्तृणाङ्कुराः ।

तस्यां शोषमुपेतायाम्, कियन्नन्दन्ति ते चिरम् ।।" [सुक्तमुक्तावली-७१/५]

इदं हि मूलं धर्मस्य शेषस्तस्यैव विस्तारः । जीवदयाभिलाषिणातिपातस्वरूपम् अष्टोत्तरशतभेदैः ज्ञातव्यम् । यथा -

"[4]संरम्भ-समारम्भ-आरम्भा मण-वयण-कायतिगे गुणिया [नवा], नवपए चेव करण-कारणाणुमईहिं गुणिया सत्तविसा एए चेव कोह-माण-माया-लोहेहिं गुणिया अट्ठोत्तरसया [भेया] हवंति ।"

संरम्भादिस्वरूपमिदम् -

"[5.]संकप्पो संरंभो परितावकरो भवे समारंभो ।

आरंभो उद्दवओ तिविओ जोगो समक्खाओ ।।"

तत्र च प्राणिवधः २४३ [त्रिचत्वारिंशदधिकद्विशतः] विधो भवति । तथाहि -

"[6]नवविह[८]जिअवहकरणं [९]कारावणमणुमई य जोगेहिं ।

कालतिएण य गुणिओ पाणिवहो दुसयतेयालो ।।" [ ]

तत्र पृथिव्यपतेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रिया इति नवजीवभेदाः, मनोवाक्-कायैर्गुणिता जाताः २७ [सप्तविंशतयः], ते च करणकारणानुमतिभिर्गुणिताः ८१ [एकाशीतयः], ते चातीतानागतवर्तमानकालत्रयेण गुणिता जाताः २४३ [त्रिचत्वारिंशद्द्विशताः] भेदाः । कालत्रयेऽपि हिंसा सम्भवोऽस्तीति कालत्रयग्रहणम् । यदुक्तम् -

"[7]अइअं निंदामि पडिपुन्नं संवरेमि, अणागयं पच्चक्खामि ।"

---

८. 'नवहिं' हस्त० । ९. 'कारावण' हस्त० नास्ति ।

4. संरम्भ-समारम्भ-आरम्भाः मनो-वचन-कायत्रिके गुणिताः नवाः, नवपदे चैव करण-कारण-अनुमतिभिः गुणिताः सप्तविंशतयः, एते चैव क्रोध-मान-माया-लोभैः गुणिताः अष्टोत्तरशताः भेदाः भवन्ति ।

5. संकल्पः संरम्भः परितापकरो भवेत् समारम्भः । आरम्भ उद्द्रवतस्त्रिविधो योगः समाख्यातः ।।

6. नवविधजीववधकरणं कारापणमनुमतिश्च योगैः । कालत्रिकेन च गुणितः प्राणिवधो द्विशतत्रिचत्वारिंशत् ।।

7. अतितं निन्दामि, प्रत्युत्पन्नं संवृणोमि, अनागतं प्रत्याख्यामि ।।

अन्यत्राप्युक्तम् -

"[8]**भूजलजलणाणिलवणबितिचउपंचिंदिएहिं नव जीवा ।**
मणवयणकायगुणिया हवंति ते सत्तवीसे त्ति ।।
[9]**इक्कासीइ करणकारणाणुमईहिं ताडिया होइ ।**
सच्चिय तिकालगुणिया दुन्निसया हुंति तेयाला ।।" [सम्बोधप्रकरण-११२४-११२५]

लोकेऽपि -

"**क्रयेण क्रायको हन्ति, उपभोगेन खादकः ।**
घातको वधचित्तेन, इत्येष त्रिविधो वधः ।।"

न तु जीवस्यामूर्तत्वादनादिनिधनत्वाच्च कथं हिंसा सम्भवः ? सत्यं, 'जीवप्राणधारणे'ति-वचनाद्दशविधप्राणधारणं जीवनम् । तद्वियोजीकरणं हिंसेत्युच्यते । यदुक्तम् -

"**पञ्चेन्द्रियाणि त्रिविधं बलं च, उच्छासनिश्वासमथान्यदायुः ।**
प्राणा दशैते भगवद्भिरुक्ता-स्तेषां वियोजीकरणं तु हिंसा ।।"

सा हिंसा चतुर्धा द्रव्यभावाभ्याम् । तद्यथा - द्रव्यतो हिंसा भावतस्तु -

"[10]**जहा केइ पुरिसे मियवहपरिणामपरिणए मियं पासित्ता आयन्नाइड्ढियकोदंडजीवे सरं निसिरेज्जा, से अ मिए तेण सरेण विद्धे मए सिया । एसा दव्वओ हिंसा भावओ वि ।**"

द्रव्यतो न भावतो या, सा खल्वीर्यादिसमितस्य साधोः कारणे गच्छत इति । उक्तं च श्रीओघनिर्युक्तौ -

"[11]**उच्चालियंमि पाए ईरियासमियस्स संकमट्ठाए ।**
वावज्जेज्ज कुलिंगी मरिज्जं तं जोगमासज्ज ।।

---

8. भूजलज्वलनानिलवनद्वित्रिचतुःपञ्चेन्द्रियैः नवजीवाः । मनवचनकायगुणिता भवन्ति ते सप्तविंशतिरिति ।।
9. एकाशीतिः करणकारणानुमतिभिस्ताडिता भवन्ति । ते एव त्रिकालगुणिता द्विशतौ भवन्ति त्रिचत्वारिंशद् ।।
10. यथा कश्चित् पुरुषो मृगवधपरिणामपरिणतो मृगं दृष्ट्वा आकर्णाकृष्टकोदण्डजीवः शरं निसृजेत्, स च मृगस्तेन शरेण विद्धो मृतः स्यात् । एषा द्रव्यतो हिंसा भावतोऽपि ।
11. उच्चालिते पादे ईर्यासमितेन संक्रमणार्थम् । व्यापद्येत कुलिङ्गी म्रियेत तं योगमासाद्य ।।

[12] न य तस्स तन्निमित्तो बंधो सुहुमो वि देसिओ समए ।
अणवज्जो उपओगेण सव्वभावेण सो जम्हा ।। [ओघनिर्युक्ति-७४८,-७४९]
[13] वज्जेमि त्ति परिणओ संपत्तीए विमुच्चए वेरा ।
अवहंतोऽवि न मुच्चइ किलिट्ठभावो अवायस्स ।।" [ ]

या पुनर्भावतो न द्रव्यतः सोऽयम् -

[14] जहा केइ पुरिसे मन्द-मन्दपगासे पएसे संट्ठियं ईसिवलियकायं रज्जुं पासित्ता एस अहित्ति तव्वहपरिणामपरिणए निक्कड्ढियासिपत्ते दुयं दुयं छिंदेज्जा, एसा भावओ हिंसा न दव्वओ । इति तृतीयभङ्गः ।

न द्रव्यतो न भावतश्चेति शून्यः । यद्यपि पृथिव्यादीनां साक्षादङ्गोपाङ्गायोगेऽपि अङ्गोपाङ्गादिच्छेदानुसारिवेदना भवत्येव । तथा चोक्तं श्रीआचाराङ्गनिर्युक्तौ -

"[15] पायच्छेयण भेयण जंघोरु तहेव अंगुवंगेसु ।
जह हुंति नरा दुहिया पुढविक्काए तहा जाण ।।
[16] नत्थि य सि अंगुवंगा तयाणुरूवा य वेयणा तेसिं ।
केसिंचि उदीरंती केसिंचऽतिवायए पाणे ।।" [आचाराङ्गनिर्युक्ति-९७-९८]

"[17] जरजज्जरा य थेरी तरुणेणं जम्मपाणिमुट्ठिहया ।
जारिसी वेयणा देहे एगिंदिसंघट्टणा य तहा ।।" [रत्नसञ्चय-१२८]

अतोऽहिंसैव श्रेयस्करी । परमागमेऽप्येवम्[१०] -

"[18] सव्वे अरिहंता भगवन्तो एवमाइक्खंति, एवं भासंति, एवं[११] पण्णवेंति, एवं परूवंति,

---

१०. 'परमागमोऽप्येवं' हस्त० । ११. 'एवं पण्णवेंति' हस्त० नास्ति ।

12. न च तस्य तन्निमित्तो बन्धः सूक्ष्मोऽपि देशितः समये । अनवद्य उपयोगेन, सर्वभावेन स यस्मात् ।।

13. वर्जयामीति परिणतः सम्प्राप्त्या विमुच्यते वैरात् । अघ्नतोऽपि न मुच्यते क्लिष्टभावोऽपायस्य ।।

14. यथा कश्चित्पुरुषो मन्द-मन्दप्रकाशे प्रदेशे संस्थितामीषद्वलितकायं रज्जुं दृष्ट्वा एसोऽहिरिति तद्वधपरिणामपरिणतो निष्कृष्टासिपत्रो द्रुतं द्रुतं छिन्द्यात्, एषा भावतो हिंसा न द्रव्यतः ।

15. पादच्छेदन-भेदन-जंघोरुः तथैव अङ्गोपाङ्गेषु । यथा भवन्ति नरा दुःखिताः पृथिवीकाये तथा जानीहि ।।

16. न सन्ति च अङ्गोपाङ्गास्तदनुरूपा च वेदना तेषाम् । केषाञ्चितुदीरयन्ति केषाञ्चितिपातयेयुः प्राणान् ।।

17. जराजर्जरा च स्थविरा तरुणेन दक्षिणपाणिमुष्ठिहता । यादृशी वेदना देहे एकेन्द्रियसंघट्टना च तथा ।।

18. सर्वेऽर्हन्तो भगवन्त एवमाचक्षते, एवं भाषन्ते, एवं प्रज्ञापयन्ति, एवं प्ररूपयन्ति - सर्वे प्राणिनः सर्वे भूताः

सव्वे पाणा सव्वे भूआ सव्वे जीवा सव्वे सत्ता न हंतव्वा, न अज्जावेयव्वा[१२], न परियावेयव्वा, न परिघेतव्वा, न उद्दवेयव्वा, एस धम्मे सुद्धे निइए सासए समिच्च लोयं खेयण्णेहिं पवेइए ।"

[आचाराङ्ग-४/१]

अत्र च देशविरतस्य श्रावकस्य प्रथमव्रतप्रतिपत्तिप्रकारमाह -

"थुलगपाणाइवायं समणोवासओ पच्चक्खाइ, से पाणाइवाए दुविहे पन्नत्ते, तं जहा - 'संकप्पओ अ आरंभओ अ, तत्थ समणोवासओ संकप्पओ जावज्जीवाए पच्चक्खाइ, नो आरंभओ ।"

स्थूलाः-द्वीन्द्रियादयः, स्थूलत्वं चैतेषां सकललौकिकजीवत्वप्रसिद्धेः, [एतदपेक्षयैकेन्द्रियाणां सूक्ष्माधिगमेन जीवत्वसिद्धेरिति,] स्थूला एव स्थूलकास्तेषां प्राणाः-इन्द्रियादयः तेषामतिपातः [स्थूलप्राणातिपातः] तं [श्रमणोपासकः श्रावक इत्यर्थः] प्रत्याख्याति, तस्माद् विरमत इति भावना । स च प्राणातिपातो द्विविधः प्रज्ञप्तः, [तीर्थकरगणधरैर्द्विविधः प्ररूपित इत्यर्थः], सङ्कल्पजश्चारम्भजश्च, सङ्कल्पाज्जातः सङ्कल्पजः, मनसः सङ्कल्पाद् द्वीन्द्रियादिप्राणिनः मांसास्थिचर्म्मनखवालदन्ताद्यर्थं व्यापादयतो भवति, आरम्भाज्जातः आरम्भजः, तत्रारम्भो-हलदन्तालखननस्तत् [लवन] प्रकारस्तस्मिन् शङ्खचन्दण-कपिपीलिकाधान्यगृहकारकादिसङ्घट्टन-परितापापद्रावणलक्षण इति, तत्र [श्रमणोपासकः] सङ्कल्पतो यावज्जीवयापि प्रत्याख्याति, [न तु यावज्जीवयैव नियमत इति,] 'नारम्भज'मिति, तस्यावश्य-तयाऽऽरम्भसद्भावादिति, आह-एवं सङ्कल्पतः किमिति सूक्ष्मप्राणातिपातमपि न प्रत्याख्याति ?, उच्यते, एकेन्द्रिया हि प्रायो दुष्परिहाराः सद्मवासिनां सङ्कल्प्यैव सचित्तपृथ्व्यादिपरिभोगात् ।

उक्तं च -

"थूला सुहुमा जीवा संकप्पारंभओ अ ते दुविहा ।
सवराहनिरवराहा साविक्खा चेव निरविक्खा ।।१।।"

प्राणिवधो द्विविधः स्थूलसूक्ष्मजीवभेदात्, तत्र **स्थूला** द्विन्द्रियादयः **सूक्ष्मा**श्चात्रैकेन्द्रियाः पृथ्व्यादयः

---

१२. 'न परियावेयव्वा' हस्त० नास्ति ।

सर्वे जीवाः सर्वे सत्त्वा न हन्तव्याः, नाज्ञापयितव्याः, न परितापयितव्याः, न परिग्राह्याः, नापद्रावयितव्याः । एष धर्मः शुद्धो नित्यः शाश्वतः, समेत्य लोकं क्षेत्रज्ञैः प्रवेदितः ।

पञ्च बादरा, न तु सूक्ष्मनामकर्मोदयवर्त्तिनः, सर्वलोकव्यापिनस्तेषां वधाभावात् स्वयमायुःक्षयेणैव मरणात्, [अत्र च साधूनां द्विविधादपि वधान्निवृत्तत्वाद्विंशतिविशोपका जीवदया,] गृहस्थानां स्थूलप्राणिवधान्निवृत्तिर्न तु सूक्ष्मवधात्, पृथ्वीजलादिषु सततमारम्भप्रवृत्तत्वादिति [दशविंशोपकरूपमर्द्धं गतम्,] स्थूलप्राणिवधोऽपि द्विधा-**सङ्कल्पज आरम्भजश्च,** तत्र सङ्कल्पान्मारयाम्येनमिति मनःसङ्कल्परूपाद्यो जायते तस्माद्गृही निवृत्तो, न त्वारम्भजात्, कृष्याद्यारम्भे द्वीन्द्रियादिव्यापादनसम्भवात्, अन्यथा च शरीर-कुटुम्बभरणनिर्वाहाभावात्, [एवं पुनरर्द्धं गतम्, जाताः पञ्च विंशोपकाः,] सङ्कल्पजोऽपि द्विधा **सापराधो निरपराधश्च,** तत्र निरपराधान्निवृत्तिः सापराधे तु गुरुलाघवचिन्तनं यथा गुर्वपराधो लघुर्वेति, [एवं पुनरर्द्धे गतेऽस्या द्वौ विंशोपकौ जातौ,] निरपराधवधोऽपि द्वेधा-**सापेक्षो निरपेक्षश्च,** तत्र निरपेक्षान्निवृत्तिर्न तु सापेक्षात्, सापेक्षनिरपेक्षक्रिययोः सर्वत्र सापेक्षेणैव भवितव्यम्, न तु निरपेक्षेण तस्य दयापरिणामाभावात्।

प्राणातिपातविरमणे इहलोके राजपूज्यता-देवतासानिध्यादयोऽनेके गुणाः । तद्यथा -

।। अथ क्षेमामात्यकथा ।।

[19] पाडलिपुत्ते नगरे जियसत्तू राया, खेमो से अमच्चो चउव्विधाए बुद्धीए संपण्णो समणोवासगो सावगगुणसंपण्णो, सो पुण रण्णो हिउत्ति काउं अण्णेसिं दंडभडभोइयाणं अप्पितो, तस्स विणासणणिमित्तं खेमसंतिए पुरिसे दाणमाणेहिं सक्कारिंति, रण्णो अभिमरए पउंजंति, गहिता य भणंति हम्ममाणा-अम्हे खेमसंगता तेण चेव खेमेण णिउत्ता, खेमो गहितो भणति-अहं सव्वसत्ताणं खेमं करेमि किं पुण रण्णो सरीरस्स त्ति ?, तथावि वज्झो आणत्तो, रण्णो य असोगवणियाए अगाहा पुक्खरिणीसंछण्णपत्तभि समुणाला उप्पलपउमोपसोभिता, [20] सा य मगरगाहेहिं दुरवगाहा, ण य ताणि उप्पलादीणि कोइ उच्चिणिउं समत्थो, जो य वज्झो रण्णा आदिस्सति सो वुच्चति-एत्तो पुक्खरिणीतो पउमाणि आणेहित्ति, ताधे खेमो उट्ठेऊण नमोऽत्थु णं अरहंताणं भणित्तु जदिहं निरावराधी तो मे देवता साणेज्झं देंतु, सागारं भत्तं पच्चक्खायितुं ओगाढो, देवदासाण्णेज्झेणं मगरपुट्ठीठितो

19. पाटलिपुत्रे नगरे जितशत्रू राजा, क्षेमस्तस्य अमात्यश्चतुर्विधया बुद्ध्या संपन्नः श्रमणोपासकः श्रावकगुणसम्पन्नः, स पुना राज्ञे हित इति कृत्वाऽन्येषां दण्डभटभोजिकानामप्रियः, तस्य विनाशननिमित्तं क्षेमसत्कान् पुरुषान् दानसन्मानाभ्यां सत्कारयन्ति, राज्ञेऽभिमरकान् प्रयुञ्जन्ति, गृहीताश्च भणन्ति हन्यमानाः-वयं क्षेमसत्काः तेनैव क्षेमेण नियुक्ताः, क्षेमो गृहीतो भणति-अहं सर्वसत्त्वानां क्षेमं करोमि किं पुना राज्ञः शरीरस्येति ?, तथापि वध्य आज्ञप्तः, राज्ञश्चाशोकवनिकायामगाधा पुष्करिणी संछन्नपत्रबिशमृणाला उत्पलपद्मोपशोभिता,
20. सा च मकरग्राहैर्दुरवगाहा, न च तान्युत्पलादीनि कोऽप्युच्चेतुं समर्थः, यश्च वध्यो राज्ञाऽऽदिश्यते स उच्यते-इतः पुष्करिणीतः पद्मान्यानयेति, तदा क्षेम उत्थाय नमोऽस्तु अर्हद्भ्यो भणित्वा यद्यहं निरपराधस्तदा मह्यं देवता सान्निध्यं ददातु, साकारं भक्तं प्रत्याख्यायावगाढः, देवतासान्निध्येन मकरपृष्टिस्थितो बहून्युत्पलपद्मानि गृहीत्वोत्तीर्णः, राज्ञा हृष्टेन क्षामितः उपस्कृतश्च, प्रतिपक्षनिग्रहं कृत्वा भणितः-किं ते वरं ददामि ?, तेन निरुध्यमानेनापि प्रव्रज्या चरिता प्रव्रजितः, सुखानां भाजनं जातः ।

बहूणि उप्पलपउमाणि गेण्हित्तुत्तिण्णो, रण्णा हरिसितेण खामितो उवगूढो य, पडिपक्खणिग्गहं काऊण भणितो- किं ते वरं देमि ?, तेण णिरुंभमाणेण वि पव्वज्जा चरिता पव्वइतो । सुक्खाण भायणं जाओ ।

।। इति क्षेमामात्यकथा ।।

इदं चातिचाररहितमनुपालनीयम् । तथा चाह -

"थुलगपाणाइवायवेरमणस्स समणोवासएणं इमे पंच अइयारा जाणियव्वा, न समायरियव्वा । तं जहा - बंधे वहे छविच्छेए अइभारे भत्तपाणवुच्छेए त्ति ।"

स्पष्टम् । ['थूलगे'त्यादि, **स्थूलकप्राणातिपातविरमणस्य विरते**रित्यर्थः **श्रमणोपासकेनामी पञ्चातिचाराः 'जाणियव्वा'** ज्ञपरिज्ञया, न समाचरितव्याः-न समाचरणीयाः, तद्यथेत्युदाहरणोपन्यासार्थः, तत्र बन्धनं **बन्धः**-संयमनं रज्जुदामनकादिभिर्हननं **वधः** ताडनं कसादिभिः **छविः**-शरीरं तस्य **छेदः**-पाटनं करपत्रादिभिः भरणं भारः अतीव भरणम् **अतिभारः**-प्रभूतस्य पूगफलादेः स्कन्धपृष्ठ्यादिष्वा-रोपणमित्यर्थः, भक्तम्-अशनमोदनादि **पानं**-पेयमुदकादि तस्य च **व्यवच्छेदः**-निरोधोऽदानमित्यर्थः ।]

एतान् समाचरन्नतिचरति प्रथमाणुव्रतम्, तदत्रायं तस्य विधिः -

"बन्धो दुविधो-दुप्पदाणं चतुप्पदाणं च, अट्ठाए अणट्ठाए य, अणट्ठाए न वट्टति बंधेत्तुं, अट्ठाए दुविधो-निरवेक्खो सावेक्खो य, णिरवेक्खो णेच्चलं धणितं जं बंधति, सावेक्खो जं दामगंठिणो जं व सक्केति पलीवणगादिसुं मुंचितुं छिंदितुं वा तेण संसरपासएण बंधेतव्वं, एवं ताव चतुप्पदाणं, दुपदाणंपि दासो वा दासी वा चोरो वा पुत्तो वा ण पढंतगादि जति बज्झति तो सावेक्खाणि बंधितव्वाणि रक्खितव्वाणि य जधा अग्गिभयादिसु ण विणस्संति, ताणि किर दुपदचतुप्पदाणि सावगेण गेण्हितव्वाणि जाणि अबद्धाणि चेव अच्छंति, वहो तथा चेव,

21. बन्धो द्विविधो-द्विपदानां चतुष्पदानां च, अर्थायानर्थाय च, अनर्थाय न वर्त्तते बद्धुम्, अर्थाय द्विविधः- निरपेक्षस्सापेक्षश्च, निरपेक्षो यन्निश्चलं बध्नाति बाढम्, सापेक्षो यद्दामग्रन्थिना यश्च शक्नोति प्रदीपनकादिषु मोचयितुं छेत्तुं वा तेन संसरत्पाशकेन बद्धव्यम्, एवं तावत् चतुष्पदानां, द्विपदानामपि दासो वा दासी वा चौरो वा पुत्रो वाऽपठदादिर्यदि बध्यते तदा सापेक्षाणि बद्धव्यानि रक्षितव्यानि च यथाऽग्निभयादिषु न विनश्यन्ति, ते किल द्विपदचतुष्पदाः श्रावकेण ग्रहीतव्या येऽबद्धा एव तिष्ठन्ति, वधोऽपि तथैव, वधो नाम ताडनम्, अनर्थाय निरपेक्षो निर्दयं ताडयति, सापेक्षः पुनः पूर्वमेव भीतपर्षदा भवितव्यं मा घातं कुर्यात्, यदि कुर्यात् ततो मर्मं मुक्त्वा तदा लतया दवरकेण वा एकशो द्वित्रिर्वारान् ताडयति, छविच्छेदोऽनर्थाय तथैव निरपेक्षो हस्तपादकर्णनासिकादि निर्दयतया छिनत्ति, सापेक्षो गण्डं वा अरुर्वा छिन्द्याद्वा दहेद्वा, अतिभारो नारोपयितव्यः, पूर्वमेव या वाहनेनाजीविका सा मोक्तव्या,

वधो णाम तालणा, अणट्ठाए णिरवेक्खो णिद्दियं तालेति, सावेक्खो पुण पुव्वमेव भीतपरिसेण होतव्वं, मा हणण कारिज्जा, जति करेज्ज ततो मम्मं मोत्तूणं ताधे लताए दोरेण वा एक्कं दो तिण्णि वारे तालेति,

छविछेदो अणट्ठाए तधेव णिरवेक्खो हत्थपादकण्णणक्काइं णिद्दयत्ताए छिंदति, सावेक्खो गंडं वा अरुयं वा छिंदेज्ज वा डहेज्ज वा,

अतिभारो ण आरोवेतव्वो, पुव्वं चेव जा वाहणाए जीविया सा मोत्तव्वा, [22] ण होज्जा अण्णा जीविता ताधे दुपदो जं सयं उक्खिवति उत्तारेति वा भारं एवं वहाविज्जति, बइल्लाणं जधा साभावियाओवि भारातो ऊणओ कीरति, हलसगडेसु वि वेलाए मुयति, आसहत्थीसु वि एस विही,

भत्तपाणवोच्छेदो ण कस्सइ कातव्वो, तिव्वछुद्धो मा मरेज्ज, तधेव अणट्ठाए दोसा परिहरेज्जा, सावेक्खो पुण रोगणिमित्तं वा वायाए वा भणेज्जा-अज्ज ते ण देमित्ति, संतिणिमित्तं वा उववासं कारावेज्जा, सव्वत्थ वि जतणा जधा थूलगपाणातिवातस्स अतिचारो ण भवति तथा पयतितव्वं, णिरवेक्खबंधादिसु य लोगोवघातादिया दोसा भाणियव्वा ।"

"इह दुविहं वयं, भावओ दव्वओ य । तत्थ भावओ जया मारयामि त्ति विगप्परहिओ कोहाइ आवेसे पाय जीवघायं अविगणंतो बंधाइसु पयट्टइ, न य जीवविणासो होइ, तया दया अभावओ विरइनिरवेक्ख भावओ य वयभंगो, जीवविणासाभावाउ य सज्जं वयं, एवं भंगाभंगरूवो य इयरो होइ ।"

"न मारयामीति कृतव्रतस्य, विनैव मृत्युं क इहातिचारः ?
निगद्यते यः कुपितो वधादीन्, करोत्यसौ स्यान्नियमेऽनपेक्षः ।।"

---

22. न भवेदन्या जीविका तदा द्विपदो यं स्वयमुत्क्षिपति उत्तारयति वा भारं एवं वाह्यते, बलिवर्दानां यथा स्वाभाविकादपि भारादूनः क्रियते, हलशकटेष्वपि वेलायां मुञ्चति, अश्वहस्त्यादिष्वप्येष एव विधिः, भक्तपानव्यवच्छेदो न कस्यापि कर्त्तव्यः तीव्रक्षुन्मा म्रियेत, तथैवानर्थाय दोषाः (तस्मात्) परिहरेत्, सापेक्षः पुना रोगनिमित्तं वा वाचा वा भणेत्-अद्य तुभ्यं न ददामीति, शान्तिनिमित्तं वोपवासं कारयेत्, सर्वत्रापि यतना यथा स्थूलप्राणातिपात-स्यातिचारो न भवति तथा प्रयतितव्यम्, निरपेक्षबन्धादिषु च लोकोपघातादयो दोषा भणितव्याः ।

इह द्विविधं व्रतम्, भावतो द्रव्यतश्च, तत्र भावतो यथा मारयामि इति विकल्परहितः क्रोधाद्यावेशे प्रायो जीवघात-मवगणयन् बन्धादिषु प्रवर्तते, न च जीवविनाशो भवति, तदा दयाऽभावतो विरतिनिरपेक्षो भावतश्च व्रतभङ्गः, जीवविनाशाभावाच्च सत्यं व्रतम्, एवं भङ्गाभङ्गरूपश्चेतरो भवति ।

"मृत्योरभावान्नियमोऽस्ति तस्य, कोपाद्दयाहीनतया तु भग्नः ।
देशस्य भङ्गादनुपालनाच्च, पूज्या अतीचारमुदाहरन्ति ।।"

पडिवन्नपढमाणुव्वयस्सेमा जयणा -

"[23]परिसुद्धजलग्गहणं, दारुय-धन्नाइयाण य तहेव ।
गहियाण वि परिभोगो, विहिणा तसरक्खणट्ठाए ।।"

[24]जहाविहिवत्थगलियतसरहियनीरगहणं, दारुधन्नाईणं अनीलअजिन्नाणं अकीडविसुद्धाणं गहणं कायव्वं। जओ -

"[25]जयणा उ धम्मजणणी जयणा धम्मस्स पालणी चेव ।
तव्वुड्ढिकरी जयणा एगंतसुहावहा जयणा ।।
[26]जयणाए वट्टमाणो जीवो सम्मत्तणाणचरणाणं ।
सद्धाबोहासेवणभावेणाराहओ भणिओ ।।
[27]रागद्दोसविउत्तो, जोगो असढस्स होइ जयणाउ ।
रागद्दोसाणुगओ, जो जोगो सो अजयणाउ ।।"

भङ्गो एवम् -

"[28]जीववहं इच्छंतो, जइ बंधाई समायरइ को वा ।
जीववहे अवहे वा, तइया भंगो भवे नियमा ।।
[29]वहभावाभावे वि हु, कोहाईहिं जयाउ बंधाई ।
कुणमाणो जीववहं, करेइ तइया वि भंगो अ ।।"

---

23. परिशुद्धजलग्रहणं दारु-धान्यादीनां च तथैव । गृहीतानामपि परिभोगो विधिना त्रसरक्षणार्थम् ।।
24. यथाविधिवस्त्रगलितत्रसरहितनीरग्रहणम्, दारुधान्यादीनामनीलाजीर्णानाम्, अकीटविशुद्धानां ग्रहणं कर्तव्यम् । यतः
25. यतना तु धर्मजननी, यतना धर्मस्य पालनी चैव । तद्वृद्धिकरी यतना, एकान्तसुखावहा यतना ।।
26. यतनायां वर्तमानो जीवः सम्यक्त्वज्ञानचरणानाम् । श्रद्धाबोधासेवनभावेनाराधको भणितः ।।
27. रागद्वेषवियुक्तो योगोऽशठस्य भवति यतना । रागद्वेषानुगतो यो योगः साऽयतना ।।
28. जीववधमिच्छन् यदि बन्धादि समाचरति कोऽपि । जीववधेऽवधे वा तदा भङ्गो भवेत् नियमात् ।।
29. वधभावाभावेऽपि हु क्रोधादिभिः यतेत बन्धादि । कुर्वन् जीववधं करोति तदाऽपि भङ्गश्च ।।

एवं विज्ञाय दयापरिणतेनैव भाव्यं धर्मार्थिना ।

[30] "तं धम्मस्स तावमूलं, जीवदया वन्निया जिणिंदेहिं ।
ता तत्थ चेव पढमं, जइयव्वं धम्मकामेहिं ।।

[31] तं दाणं तं च वयं, तं च तवो सा य देवगुरूपूया ।
जीवाणं जत्थ दया, अन्नहा तं विणा सव्वं ।।

[32] चिरजीवियमारुग्गं, सोहव्वं कामभोगपिये संगो ।
कुलरूवजसो-सुपया दया महासालफलमेयं ।।" [ ]

एकेन्द्रियसङ्घट्टकृतकर्मोदये -

[33] "जहा उच्छुखंडाइं जंते तहा निपीलिज्जमाणो कम्मं छम्मासेण खविज्जा, एवं गाढे संघट्टे दुवालसेहिं संवत्सरेहिं, एवं अगाढपरियावणे वाससहस्सं, गाढपरियावणे दशवाससहस्सं, अगाढकिलावणे वासलक्खं, गाढकिलावणे दशवासलक्खाइं, उद्दवणे वासकोडी वि । एवं बेइंदियाईसु पि नेयं ।" इति महानिशीथे ।

।। अथ जीवदयायां कथा ।।

[34] सावत्थीए इक्खागू उवरिवरो राया । देवी पउमावई, पुत्तो अणन्तविओ पंचपुत्तसयाणं ज्येष्ठो जुवराया,

---

30. तद्धर्मस्य तावन्मूलं जीवदया वर्णिता जिनेन्द्रैः । तस्मात्तत्रैव प्रथमं यतितव्यं धर्मकामैः ।।

31. तद्दानं तद् च व्रतं तद् च तपः सा च देवगुरुपूजा । जीवानां यत्र दया अन्यथा तं विना सर्वम् ।।

32. चिरजीवितमारोग्यं सौभाग्यं कामभोगप्रियः सङ्गः । कुलरूपयशःसुपदा दया महाशालफलकमेतद् ।।

33. यथा इक्षुखण्डानि यन्त्रे तथा निपील्यमानः कर्म षड्मासेन क्षपयेत्, एवं गाढे सङ्घट्टे द्वादशैः संवत्सरैः, एवमगाढपरितापने वर्षसहस्रम्, गाढपरितापने दशवर्षसहस्रम्, अगाढकिलापने वर्षलक्षम्, गाढकिलापने दशवर्षलक्षानि, अपद्रावणे वर्षकोटिरपि, एवं द्वीन्द्रियादिष्वपि ज्ञेयम् ।

34. श्रावस्त्यामिक्ष्वाकुउपरिवरः राजा । देवी पद्मावती, पुत्रोऽनन्तवीर्यः पञ्चपुत्रशतानां ज्येष्ठो युवराजा । अन्यदा उपरिवरो पञ्चभिर्युवतिशतैः सहोद्याने क्रीडितुं गतः । तत्र पद्मावती, अमीतप्रभा, सुप्रभा, प्रभावत्यैताभिः चतुर्भिः भार्याभिः सह वसन्तकाले उद्याने सुदर्शनवाप्यामभ्यन्तरं क्रीडन्तं विद्युद्दाढेन व्योमविहारेण गतया मदनवेगया उपरिवरं राजानं दृष्ट्वा धन्य एष इति प्रशंसिते विद्युद्दाढेन रुष्टेनात्मनो भार्यां नगरं नीत्वा पुनः निवर्त्य महाशिलया सुदर्शनवाप्याः द्वाराणि च्छादिताः । राजा मिथ्यादृष्टिः मारितः । तस्मिन्नुद्याने सर्पो जातः । पद्मावतीदेवेन सर्पोऽपि बोधितः, सर्वत्यागं कृत्वा नागेषु किञ्चिदूनं द्विपल्यस्थितिः देवो जातः । ततोऽनन्तवीर्यो राजा निजपुत्रस्य सुबाहोः राज्यं दत्त्वा श्रुतसागरमुनिसकाशे निष्क्रान्तस्तपो कृत्वा सिद्धः ।

अन्नया उवरिवरो पंचहिं जुवइसएहिं सह उज्जाणे कीडिउं गओ, तत्थ पउमावई, अमीअप्पभा, सुप्पभा, पभावई, एआहिं चउहिं भज्जाहिं सह वसन्तकाले उज्जाणे सुदंसणवावीए अब्भंतरं कीलन्तं विज्जुदाढेण वोमविहारेण गयाए मयणवेगाए उवरिवरं रायं दट्ठुं धन्नो एस त्ति पसंसिए विज्जुदाढेण रुट्ठेण अप्पणो भज्जं नगरं नेऊण पुणो निअत्तिअ महासिलाए सुदंसणवावीए बारे ढक्किक्ता । राया मिच्छदिट्ठी मारिओ, तम्मि उज्जाणे सप्पो जाओ । पउमावईदेवेण सप्पो वि बोहिओ, सव्वचायं काओ नागेसु किंचूणं दुपलिअट्ठिई देवो जाओ । तओ अणन्तविरिओ राया नियपुत्तस्स सुबाहुस्स रज्जं दाउं सुअसायरमुणिसयासे निक्खन्तो तवं काउं सिद्धो ।

35 नागदेवो वि अन्नया नंदीसरमहिमाए सम्मत्ताए मन्दरचेइआणि वंदिउं आगओ, विज्जुदाढं विज्जं साहन्तं तत्थागयं दट्ठुं सकलत्तं समुद्दमज्जे छुभिअ मारेइ । तओ मओ पढमपुढविं गओ । किंचूणं दुप्पल्लाउओ नेरई जाओ । तओ उव्वट्टो तूणीमन्ते पव्वए वग्घो जाओ । नागदेवो वि उव्वट्टो हत्थिणापुरे कुरुवंसे विजयदत्त रण्णो विजयाए देवीए कुरुदत्तो नाम पुत्तो जाओ । तस्स अट्ठवासस्स पिआ रज्जं दाउं निक्खन्तो, कुरुदत्तो राया जाओ । तओ लाडदेसे तूणीमन्तपव्वयस्स पुव्वुत्तरदिसाए चन्दपुरी नयरी, चन्दकित्ती राया, चन्दलेहाए देवीए जिणमइपभिइओ सत्तधूआओ, तासि पच्छिमा अभयमई कण्णा, तं कुरुदत्तो मग्गइ । राया दाउं नेच्छइ। तओ कुरुदत्तो सव्वबलेण आगन्तुं चन्दपुरिं रोहिऊण ठिओ । एवं ठिअस्स महाजुज्झे पवत्ते । चन्दकित्तिस्स रण्णो मणिरयणकडयविभूसिओ हत्थो चक्कछिन्नो भूमीए पडिओ । सउलिआए गहिओ, आगासेण निज्जमाणो रायगिहोवरिठिआए अभयमईए पुरओ पडिओ । तं दट्ठुं तीए पुत्तिआए कहिअं । जहा-पुत्ति तुज्झ निमित्तं एत्तिआणं जीवाणं खओ वट्टइ त्ति भणीए कुमारीए कुरुदत्तो सयंवरिओ । तओ

---

35. नागदेवोऽप्यन्यदा नंदीश्वरमहिमायां समाप्तौ मन्दरचैत्यानि वन्दितुमागतः, विद्युद्दाढं विद्यां साधयन्तं तत्रागतं दृष्ट्वा सकलत्रं समुद्रमध्ये क्षिप्त्वा मारयति । ततो मृतः प्रथमपृथ्वीं गतः । किञ्चिदूनं द्विपल्यात् नैरयिको जातः । ततः उद्वर्तेस्तूणीमन्ते पर्वते व्याघ्रो जातः । नागदेवोऽपि उद्वर्तो हस्तिनापुरे कुरुवंशे विजयदत्तराज्ञो विजयायां देव्यां कुरुदत्तो नाम पुत्रो जातः । तस्याष्टवर्षस्य पिता राज्यं दत्त्वा निष्क्रान्तः, कुरुदत्तः राजा जातः । ततो लाटदेशे तूणीमन्तपर्वतस्य पूर्वोत्तरदिशायां चन्द्रपुरी नगरी, चन्द्रकीर्तिः राजा, चन्द्रलेखया देव्या जिनमतिप्रभृतयः सप्तदुहितरः, तासां पश्चिमाऽभयमतिः कन्या, तां कुरुदत्तो मार्गयति । राजा दातुं नेच्छति । ततो कुरुदत्तः सर्वबलेनागत्य चन्द्रपुरिं रुद्ध्वा स्थितः । एवं स्थितस्य महायुद्धः प्रवृत्तः । चन्द्रकीर्तेः राज्ञो मणिरत्नकटकविभूषितो हस्तश्चक्राच्छिन्नो भूमौ पतितः । शकुनिकया गृहीतः, आकाशेन नीयमाणः राजगृहोपरिस्थिताया अभयमत्याः पुरतः पतितः । तं दृष्ट्वा तया पुत्र्यै कथितम्, यथा - 'पुत्री ! तव निमित्तमियतां जीवानां क्षयो वर्तते ।' इति भणने कुमार्या कुरुदत्तः स्वयंवरितः । ततश्चन्द्रकीर्तिना दत्ता । ततोऽभयमतिं परिणेतुं स्थितस्य कुरुदत्तस्य लोकेन गत्वा कथितम् - 'महाराज ! तूणीमन्तगिरिपार्श्वे व्याघ्रेण सर्वो 'देश उपद्रुतः' इति । ततः कुरुदत्तेन सर्वबलेन गत्वा तत्र गिरौ व्याघ्रो वेष्टितः । सोऽपि गुहायां प्रविश्य स्थितः । यदा कथमपि मारयितुं न शक्तस्तदा गुहामध्ये तृणकाष्ठानि [इति कृत्वा] क्षुधितो दग्धः । मृतः सन् चन्द्रपुर्यां भरतब्राह्मणस्य विश्वदेव्यां भार्यायां पुत्रः कपिलो नाम जातः । तस्य भार्या कपिला नाम ।

चन्दकित्तीणा दिण्णा, तओ अभयमइं परिणेउं ठिअस्स कुरुदत्तस्य लोगेण गन्तूण कहिअं - 'महाराय ! तूणीमन्तगिरिपासे वग्घेण सव्वो देसो उद्दविउत्ति । तओ कुरुदत्तेण सव्वबलेण गन्तूण तत्थ गिरिंमि वग्घो वेढिओ । सो वि गुहाए पविसिउं ठिओ। जया कहवि मारेउं न तीरिओ तया गुहामज्झे तणकट्ठाइं छुहिअ दड्ढो । मओ सन्तो चन्दपुरीए भरहबंभणस्स विस्सदेवीए भज्जाए पुत्तो कविलो नाम जाओ । तस्स भज्जा कविला नाम ।

36
इओ अ कुरुदत्तो बहूणि वासाणि अभयमईए सह भोगे भुञ्जा तओ चन्दपुरीए हत्थिणपुरं गओ । तत्थ अभयमईए पण्डुदत्तो पुत्तो जाओ । अन्नया हत्थिणाउरसमीवे धरणिभूसणपव्वए अमिआसवाए आयरिओ सत्तसयमुणिपरिवारो आगओ । तप्पासे कुरुदत्तेण धम्मं सोऊण पुव्वभवा पुच्छिआ । तेण उवरिवरो सप्पो नागकुमारो कुरुदत्तो चत्तारि वि भवा कहिआ । तओ अभयमईए वि भयवं अप्पणो पुव्वभवो पुच्छिओ । तओ भगवया भणिअं । पुव्वभवे चन्दपुरीए इक्को वाहो साउलिओ गरुलवेग्गो नाम तस्स भज्जा तुमं गोमई नाम । अन्नया तत्थ समाहिगुत्ता आयरिया आगया । तप्पासे तुमं पाणिवह-महु-मज्ज-मंसाइविरइवयं घेत्तुं गया । पुणो तुज्झ भत्तारेण अडवीए पासेण बहु त्तित्तिरा बद्धा । ते तुमे दयाए मुक्का । तओ तेण क्षूरिअ [?] घराओ धाडिआ सन्ती अणसणेण मया चन्दलेहाए अभयमइ त्ति धूआ जाया । तओ सव्वसत्ताणं अभयं देमि त्ति डोहले रण्णा सविसए सव्वसत्ताऽभयदाणेण पूरीए । गुणं अभयमइ त्ति नामं कयं । तं सोउं विरत्ता सुव्वयारिया अन्तिए निक्खन्ता । कुरुदत्तो वि पुत्तस्स रज्जं दाउं अमिआसवमुणिसगासे निक्खन्तो ।

37
अन्नया विहरन्तो चन्दपुरीविसए गओ । तत्थ कविलबंभणखित्तमसाणे पडिमाए ठिओ । तओ कविलो पुव्वदिसाए छेत्ते भत्तं मज्झ आणेज्जाहि त्ति भज्जं भणिउं वाहओ गओ । तत्थ भत्ताभावे मुणिं पडिमाए ठिअं

---

36. इतश्च कुरुदत्तो बहूनि वर्षाणि अभयमत्या सह भोगान् भुक्त्वा ततश्चन्द्रपुर्याः हस्तिनापुरं गतः । तत्राभयमत्या पण्डुदत्तः पुत्रो जातः । अन्यदा हस्तिनापुरसमीपे धरणिभूषणपर्वतेऽमृताश्रव आचार्यः सप्तशतमुनिपरिवारः आगतः । तत्पार्श्वे कुरुदत्तेण धर्मं श्रुत्वा पूर्वभवाः पृष्टाः । तेन उपरिवरः, सर्पः, नागकुमारः, कुरुदत्तश्चत्वारोऽपि भवाः कथिताः । ततोऽभयमत्यापि भगवन्तमात्मानः पूर्वभवः पृष्टः । ततो भगवता भणितम् 'पूर्वभवे चन्द्रपूर्यामेको व्याधः साकुलितो गरुलवेगो नाम, तस्य भार्या त्वं गोमतिः नामा । अन्यदा तत्र समाधिगुप्ता आचार्या आगताः । तत्पार्श्वे त्वं प्राणिवध-मधु-मद्य-मांसादिविरतिव्रतं गृहीत्वा गता । पुनस्तव भर्तारेणाटव्यां पाशेन बहवस्तित्तिरा बद्धाः । ते त्वया दयया मुक्ताः । ततस्तेन व्याप्त [?] गृहात् निस्सारिता सत्यनशनेन मृता, चन्द्रलेखाया अभयमतिः इति पुत्री जाता । ततः सर्वसत्वेभ्योऽभयं ददामीति दोहदः राज्ञा स्वविषये सर्वसत्त्वाऽभयदानेन पूरितः । गौणमभयमतिरिति नाम कृतम् ।' तद् श्रुत्वा विरक्ता सुव्रतार्यान्तिके निष्क्रान्ता । कुरुदत्तोऽपि पुत्राय राज्यं दत्त्वाऽमृताश्रवमुनिसकाशे निष्क्रान्तः ।

37. अन्यदा विहरन् चन्द्रपुरीविषये गतः । तत्र कपिलब्राह्मणक्षेत्रस्मशाने प्रतिमया स्थितः । ततः कपिलः पूर्वदिशि क्षेत्रे भक्तं ममानयेति भार्यां भणित्वा वाहको गतः । तत्र भक्ताभावे मुनिं प्रतिमया स्थितं भणितः - मम भार्यायां भक्तं गृहीत्वाऽऽगच्छन्त्यां पृच्छमानायां भणिष्यसि । यथा - ब्राह्मणोऽन्यक्षेत्रं गतः, तत्र भक्तमानयेति कथयित्वा गतः । कपिला मध्याह्ने भक्तं गृहीत्वाऽऽगता, ब्राह्मणं क्षेत्रेऽपश्यन्ती मुनिं पृच्छति *यथा - 'भगवन् ! मम ब्राह्मणः कुत्र गतः ?' मुनिः मौनेन स्थितः । कपिलाऽपि भर्तारमपश्यन्ती भक्तं*

भणिअ मज्झ भज्जाए भत्तं घित्तुं आगयाए पुच्छन्तीए भणिहिसि । जहा बंभणो अन्नखेत्तं गओ । तत्थ भत्तं आणेज्जासि त्ति कहिऊण गओ । कविला मज्झण्हे भत्तं घेत्तूणा गया बंभणं खेत्ते अपिच्छन्ती मुणिं पुच्छइ । जहा-'भयवं मज्झ बंभणो कहिं गओ ?' मुणी मोणेणं ठिओ । कविला वि भत्तारमपिच्छन्ती भत्तं घेत्तुं घरे गया । कविलो वि मज्झण्हं जाव खेत्तं वाहित्ता पुणो तण्हाछुहापरिसन्तो कुद्धो घरे गन्तुं बंभणिं भणइ-'किं कारणं दुरायारि तुमं मज्झ भत्तं घित्तुं नागया । अहं मुणिस्स कहिअं गदो आसि।' तओ सा भणइ - 'सो मुणी मए बहुवारं पुच्छिओ परं तुण्हिको चेव ठिओ ।' एवं वुत्तो सो बंभणीए उवरि कोवं मुत्तूण मुणिस्स उवरि कोहाभिभूओ वेंटिअमग्गिं च घेतूण जत्थ मुणी पडिमाए अत्थिओ तत्थ गन्तुं तं मुणिवरं पायप्पभिदि जाव सिरं ताव वेंटिआए वेटिअ पुणो सिरे आहारं काउं अग्गी जालिओ । मुणी वि तं वेअणं सहिऊण केवलनाणी जाओ । तओ देवयागमणे कविलबंभणो भयवं पुव्वभवं पुच्छिअ पुणो धम्मं सोउं कुरुदत्तसगासे निव्विण्णो संजमे ठिओ त्ति ।

।। इति जीवदयायां कथा ।।

एवं जीवदयायां यतनीयम् ।

[इइ जीवकरुणा]

गृहीत्वा गृहे गता । कपिलोऽपि मध्याह्ने यावत् क्षेत्रं वोड्ढवा पुनस्तृष्णा-क्षुधापरिश्रान्तः क्रुद्धो गृहे गत्वा ब्राह्मणीं भणति - 'किं कारणं दुराचारी ! त्वं मह्यं भक्तं गृहीत्वा नागता ? अहं मुनिं कथयित्वा गतोऽऽसीद् ।' ततः सा भणति - 'स मुनिः मया बहुवारं पृष्टः परं तूष्णीक एव स्थितः । एवमुक्ते स ब्राह्मण्यामुपरि कोपं मुक्त्वा मुनेरुपरि क्रोधाभिभूतो वेण्टकमग्निं च गृहीत्वा यत्र मुनिः प्रतिमया स्थितस्तत्र गत्वा तं मुनिवरं पादप्रभृतिं यावच्छिरं तावद् वेण्टिकया वेण्टित्वा पुनः शिरसि आहारं कर्तुम् अग्निः ज्वालितः । मुनिरपि तां वेदनां सहित्वा केवलज्ञानी जातः । ततो देवतागमने कपिलब्राह्मणो भगवन्तं पूर्वभवं पृष्ट्वा पुनः धर्मं श्रुत्वा कुरुदत्तसकाशे निर्विण्णः संयमे स्थितरिति ।

[धम्मिअजणसंसग्गो]

[३१-धार्मिकजनसंसर्गः]

अथ **धम्मिअजणसंसग्गो** । धार्मिका ये जिनधर्ममर्मविदः सम्यक्तया तेषां संसर्गः परिचयः स कर्तव्यः । यतः -

"[1]**आययणसेवणाओ दोसा झिज्जंति वड्ढइ गुणोहो ।**
परगिहगमणं पि कलंकपंकमूलं सुसीलाणं ।।" [धर्मरत्नप्रकरण - ३९]

आयतनं धार्मिकजनमीलनस्थानम् । उक्तं च -

"[2]**जत्थ साहम्मिया बहवे, सीलवंता बहुस्सुया ।**
चरित्तायारसंपन्ना, आययणं तं वियाणाहि ।" [ओघनिर्युक्ति - ७८३]

तस्य सेवनात् दोषा मिथ्यात्वादयो हीयन्ते, गुणौघो वर्धते । अनायतनसेवनेन च वैपरीत्यम्, अनायतनं चेदम् -

"[3]**दंसणनिब्भेयणिया, चरित्तनिब्भेयणीया अणवरयं ।**
जत्थ पयट्टइ विगहा, तमणाययणं महापावं ।।"

तथा -

"न भिल्लपल्लीसु न चौरसंश्रये,
न पार्वतीयेषु जनेषु संवसेत् ।
न हिंस्रदुष्टाशयलोकसन्निधौ,
कुसङ्गतिः साधुजनस्य निन्दिता ।।"

"सतप्तायसि संस्थितस्य पयसो नामाऽपि न ज्ञायते,
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।

---

1. आयतनसेवनातो दोषाः क्षीयन्ते वर्द्धते गुणौघः । परगृहगमनमपि कलङ्कपङ्कमूलं सुशीलानाम् ।।
2. यत्र साधर्मिका बहवः शीलवन्तो बहुश्रुताः । चारित्राचारसम्पन्ना आयतनं तं विजानीहि ।।
3. दर्शननिर्भेदनीया चारित्रनिर्भेदनीयाऽनवरतम् । यत्र प्रवर्तते विकथा तमनायतनं महापापम् ।।

स्वातौ सागरशुक्तिसंपुटगतं तन्मौक्तिकं जायते,
प्रायेणाधममध्यमोत्तमगुणाः संवासितो जायते ।।"

यथा श्रीजम्बूस्वामिसंसर्गश्चौरप्रभवस्य, यथा वा श्रीस्थूलभद्रसंसर्गो वेश्यायाः, यथा वाऽऽर्द्रकुमारस्य श्रीअभयकुमारसंसर्गः, एतेषां धार्मिकाणामेव संसर्गे तत्त्वनिपुणाश्चारित्र-देशविरतिभाजोऽभूवन् । अत एव कुमतीनामनाचारिणां कदाग्रहिणां संसर्गेण धर्मवतामपि धर्महानिः स्यान्न वृद्धिः, अत एवेते त्याज्यतयोक्ताः। सुसाधवः सेव्या एव, ते सेविताः परमपददायकाः स्युः । तद्यथा -

"[4]सा उण धम्मकहा नाणाविहजीवपरिणामभावविभावणसव्वोवायनिऊणेहिं जिण-वरिंदेहिं चउव्विहा भणिआ । तं जहा - अक्खेवणी-१, विक्खेवणी-२, संवेअजणणी-३, निव्वेअजणणी ४ । तत्थ अक्खेवणी मणोणुकूला, विक्खेवणी मणोपडिकूला, संवेगजणणी नाणुप्पत्तिकारणं, निव्वेअजणणी वेरुग्गुप्पत्ती [कारणं] । भणियं च गुरुणा सुहम्मसामिणा -

[5]अक्खेवणि अक्खित्ता, पुरिसा विक्खेणीइ विखित्ता ।
संवेअणी संविग्गा, निव्विन्ना तह चउत्थीए ।।

[अथ अक्खेवणी]

[6]जहा तेण कविलकेवलिणा अरण्णं पविसिऊण पंचचोरसयाइं रास-नच्चणच्छलेण महामोहगहगहिआइं अक्खिविऊण इमाए चच्चरीए संबोहिआणि । अवि अ -

[7]संबुज्झह किं न बुज्झहा एत्तिए वि मा किंचि मुज्झहा ।
कीरउ जं करिअव्वयं पुण दु[चु]क्कइ तं मरिअव्वयं ।। इति ध्रुवयं ।।

---

4. सा पुनः धर्मकथा नानाविधजीवपरिणामभावविभावनसर्वोपायनिपुणैः जिनवरेन्द्रैश्चतुर्विधा भणिता । सा यथा - आक्षेपनी, विक्षेपनी, संवेगजननी, निर्वेदजननी । तत्राक्षेपनी मनोऽनुकुला, विक्षेपनी मनःप्रतिकुला, संवेगजननी ज्ञानोत्पत्तिकारणम्, निर्वेदजननी वैराग्योत्पत्तिः । भणितं च गुरुणा सुधर्मस्वामिना -
5. आक्षेपण्या आक्षिप्ता पुरुषा विक्षेपण्या विक्षिप्ता । संवेदन्या संविग्ना निर्विण्णा तथा चतुर्थ्या ।।
6. यथा तेन कपिलकेवलिनाऽरण्यं प्रविश्य पञ्चचौरशताः रास-नर्तनच्छलेन महामोहग्रहग्रहीता आक्षिप्यानया चर्चया सम्बोधिताः । अपि च -
7. सम्बुध्यथ किं न बुध्यथ एतावतपि मा किञ्चित् मुह्यथ । करोतु यद् कर्तव्यं पुनः भ्रश्यते तन् मरितव्यम् ।। इति ध्रुवपदम् ।।

8 कसिणकमलदललोअणंचलरेहन्तओ,
पीणपिहुल-थण-कडिअलभारकिलन्तउ ।
तालविलिरलयावलिकलयलसद्दओ,
रासयंमि जइ लब्भइ जइ जुवईसत्थओ ।।

संबुज्झह० ।। तओ [विक्खेवणी] विक्खित्ता...

9 असुइ-मुत्त-मल-पवाह-रुवयं, वंत-पित्त-वस[१]-मज्ज-फोफसं ।
मेअ-मंस-बहु-हड-करंडयं, चम्ममित्तपच्छाइयजुवइ-अंगयं ।।

संबुज्झह० । तओ [संवेअणी]संविग्गा...

10 कमलचंदनालुप्पलकंति समाणयं,
मूढएहि उवमिज्जइ जुवइ-अंगयं ।
थोवयं पि भणह तत्थ रसणिज्जयं,
असुईअं तु सव्वं चिअ ईअ पच्चक्खयं ।।"

संबुज्झह० ।। तओ [निव्वेअणी]निव्विन्ना...

11 जाणिऊण एअं चिअ असारए,
असुइ-मित्तरमणूसवकयवावारए ।
कायंमि मा गलसग्गह भवसयकारए,
विरम विरम मा हिंडह भवसंसारए ।।

संबुज्झह० ।।

---

१. 'दुग्गंधिसहाविवरूवयं । मेअ-मज्ज-वस-पुप्फोस हडी करंकयं रम्ममित्त पच्छायण जुवई सत्थयं ।। हस्त० ।'

8. कृत्स्नकमलदललोचनांचलराजन्; पीनपृथुलस्तनकटीतलभारक्लान्तः ।
तालविलिरलतावलिकरतलशब्दकः, रासे यदि लभ्यते यदि युवतिसार्थकः ।। सम्बुध्यथ... ।

9. अशुचि-मूत्र-मल-प्रवाहरूपकं वान्त-पित्त-वसा-मज्जा-फोफसम् ।
मेद-मांस-बहुहड्डुकरण्डकं चर्ममात्रप्रच्छादितं युवत्यङ्गम् ।। सम्बुध्यथ... ।

10. *कमलचन्दनोत्पलकान्तिसमानकं, मूढैरुपमियते युवत्यङ्गकम् ।*
स्तोकमपि भणत तत्र रसनीयकं, अशुचिकं तु सर्वमेविति प्रत्यक्षकम् ।। सम्बुध्यथ... ।

11. ज्ञात्वा एतदेवासारके, अशुचिमात्ररमणोत्सवकृतव्यापारके ।
काये मा गलासद्ग्रहं भवशतकारके, विरम विरम मा हिण्डत भवसंसारके ।। सम्बुध्यथ... ।

[12]एवं च जहा कामे निव्वेओ तह कोह-लोह-माण-मायाईणं कुतित्थाणं च समकालं चिअ सव्वभाव-विभावएण गुरुणा सव्वत्थुणा हारगायण पंच वि चोरसयाइं संभरिअ पुव्वजम्मवुत्तं ताइं पडिवन्नसमणलिंगाणि तहा कयं जहा संयमपवन्नाइंति ।।

इति ४ कथास्वरूपं श्रीउत्त० ल० [२]वृत्तौ ।

एवं धार्मिकाणां श्राद्धानां संसर्गान्मिथ्यादृष्टिनामपि सम्यक्त्वादिश्रीजिनधर्मप्राप्तिः स्यात् । यथा -

।। अथ वरुणश्राद्धस्य कथा ।।

चम्पायां कूणिको राजा, हल्लविहल्लौ भ्रातरौ, तौ सेचनकगन्धहस्तिसमारुढौ दिव्यकुण्डल-हार-वस्त्र-विभूषितौ दृष्ट्वा कूणिकभार्या पद्मावती नृपं प्रैरयत् । राज्ञा तौ याचितौ, तद्भयात्तौ वैशाल्यां चेटकनृपस्य स्वमातामहस्यान्तिकं गतौ । कूणिकेन दूतप्रेषणेन याचितौ । चेटको नार्प्पयत् । कूणिको भित्रमातृकैः कालादिदशभ्रातृभिर्युतः प्राप्तो वैशाल्याम् । तत्रैकैकस्य त्रीणि त्रीणि सहस्राणि गजानामश्वानां रथानां च, पत्तीनां तिस्रस्तिस्रः कोट्यः । कूणिकस्याप्येवम् । ततश्चेटकोऽपि अष्टादशगणराजयुत आगतः । चेटकस्य अष्टादशगणराज्ञां च सैन्यमानं कूणिकवत् । ततो युद्धं लग्नम् । हल्लविहल्लौ विभंगज्ञानिसेचनकगजारूढौ कूणिकसैन्ये रात्र्यवस्कन्दं दत्वा गजाश्वरथाद्यानयत । एकदा कूणिककारितां मार्गे उपरिच्छन्नखादिराङ्गारखातिकां विभङ्गेन ज्ञात्वा ताभ्यां प्रेरितोऽपि न चलति हस्ती । त्वदर्थं युद्धमारब्धं त्वं चेदृश इति ताभ्यामाक्रुष्टस्तौ दूरे क्षिप्त्वा हस्ती खातिकायां पतित्वा मृत्वाद्यनरके उत्पन्नः । ततो हल्लविहल्लौ देवतया श्रीवीरसमीपे तौ दीक्षां प्रपन्नौ। अनुत्तरविमाने चोत्पन्नौ। चेटकः प्रतिपन्नव्रतत्वेन दिनमध्ये एकमेव शरं मुञ्चति, अमोघबाणश्च सः । कूणिकस्य गरुडव्यूहः, चेटकस्य सागरव्यूहः, दशदिनैश्चेटकेनैकैकशरेण दशाऽपि कालादयो हताः । तुर्य नरके उत्पन्नास्ततो विदेहे सेत्स्यन्ति । तज्जनन्यो वीरपार्श्वे प्रव्रजिताः । एकदा दशदिग्विजयार्थमष्टमभक्तेन पूर्वभवसंगतिकौ कार्त्तिकश्रेष्ठिभवे शक्रस्य कूणिको मित्रमभूत्, पूरणतापसावस्थायां चमरस्यासौ मित्रं सौधर्मेन्द्रचमरेन्द्रावाराधितौ । चेटकं श्रावकमहं न हन्मीति शक्रेण वज्रकवचोऽभेद्यो दत्तः, चमरेण महाशिलाकण्टक-रथमुशलाभिधौ सङ्ग्रामौ च । यत्र तृणादिनाप्यभिहतस्य गजाश्वादिर्महाशिलाकण्टकेनेवाह-तस्य वेदना स्यात्, स सङ्ग्रामोऽपि तथा, यत्र रथोऽनश्वोऽसारथिरनारोहक एव मुशलेन युक्तः परिधावन् कल्पान्त इव जनक्षयं करोति स तथा,

---

२. श्रीउत्तराध्ययनस्य वृत्तिषट्कं दृष्टमस्माभिः परं न दृष्टान्यक्षराण्यमूनि । - संपा० ।

12. एवं च यथा कामे निर्वेदस्तथा क्रोध-लोभ-मान-मायादिनां कुतीर्थानां च समकालमेव सर्वभावविभावनेन गुरुणा सर्वस्थेम्ना गायनं पञ्चापि चौरशतानि सम्भार्य पूर्वजन्मवृत्तं तानि प्रतिपन्नश्रमणलिङ्गानि तथा कृतं यथा संयमप्रपन्नानीति ।

[13] "महासिलाकण्टए णं भन्ते ! संगामे कइ जणसयसाहस्सीओ हयाओ?" गोयमा ! चउरासीइं जणसयसाहस्सीओ हयाओ, भन्ते ! [मणुया निस्सीला निग्गुणा निम्मेरा निप्पच्चक्खाणपोसहोववासा रुट्ठा परिकुविया समरवहिया अणुवसंता कालमासे कालं किच्चा कहिं गया ?] कहिं उववण्णा ? गोयमा ! उसण्णं नरयतिरिक्खजोणिएसु उववण्णा ।।

[14] रहमुसले णं संगामे कइ जणसयसाहस्सीओ हयाओ ? गोयमा ! छण्णउतिं जणसयसाहस्सीओ हयाओ । ते णं भन्ते ! मणुआ कहिं गया ? गोयमा ! तत्थ णं दससाहस्सीओ एगाए मच्छिआए कुच्छिंसि उववण्णा । एगो देवलोए, एगो मणुस्से सुकुले, सेसा नरय-तिरिएसु उववण्णा । बहुजणो भंते ! अन्नमन्नस्स एवमाइक्खइ, जं संगामे मया देवलोए उववज्जन्ति । से कहमेअं भन्ते ? गोयमा ! जं बहुजणो एवमाइक्खइ तं मिच्छा, अहं पुण एवमाइक्खामि । जहा वेसालीए नयरीए वरुणे नामं नागनत्तूए अड्ढे जाव समणोवासए, [अभिगयजीवाजीवे जाव समणे निग्गंथे फासु-एसणिज्जेणं असण-पाण-खाइम-साइमेणं वत्थपडिग्गह-कंबल-पायपुंछणेणं पीढ-फलग-सेज्जा-संथारएणं ओसहभेसज्जेणं पडिलाभेमाणे] छट्ठं-छट्ठेणं अणिखित्तेणं तवोकम्मेणं अप्पाणं भावेमाणे विहरइ ।

[15] अण्णया रायाभिओगेणं रहमुसले संगामे आणत्ते समाणे वरुणे छट्ठभत्तिए अट्ठमभत्तं वट्टेत्ता, हयगयरह जाव संणद्धे संगामंमि आगच्छइ । कप्पइ मे पुव्विं जे पडिहणइ से पडिहणित्तये, नो सेसे, एवं अभिग्गहं अभि-

---

13. महाशिलाकण्टके भदन्त ! सङ्ग्रामे कति जनशतसाहस्त्रयो हताः ? गौतम ! चतुरशीतिः जनशतसाहस्त्रयो हताः । भदन्त ! [मनुजा निश्शीलाः, निर्गुणाः, निर्मर्यादाः, निष्प्रत्याख्यानपौषधोपवासाः, रुष्टाः, परिकुपिताः, समरहताः, अनुपशान्ताः, कालमासे कालं कृत्वा कुत्र गताः ?] कुत्रोपपन्ना : ? गौतम ! अवसन्नं नरक-तिर्यग्योनिकेषूपपन्नाः ।

14. रथमुसले भदन्त ! सङ्ग्रामे कति जनशतसाहस्त्रयो हताः ? गौतम ! षण्णवतिः जनशतसाहस्त्रयो हताः । ते भदन्त ! मनुजा कुत्र गताः ? गौतम ! तत्र दशसाहस्त्रय एकस्या मत्स्याः कुक्षौ उपपन्नाः । एको देवलोके, एको मनुष्ये सुकुले, शेषा नरक-तिर्यग्सु उपपन्नाः । बहुजनो भदन्त ! अन्योन्यस्य एवमाचक्षते, यद् सङ्ग्रामे मृता देवलोके उपपद्यन्ते । तत् कथमेतत् भदन्त ! ? गौतम ! यद् बहुजनः एवमाचक्षते तद् मिथ्या । अहं पुनः एवमाचक्षे, यथा - वैशाल्यां नगर्यां वरुणो नाम नागनप्तृक आढ्यो यावत् श्रमणोपासकः [अभिगतजीवाजीवो यावत् श्रमणान् निर्ग्रन्थान् प्रासुक-एषणीयेनाशन-पान-खाद्य-स्वाद्येन वस्त्र-पतद्ग्रह-कम्बल-पादप्रोञ्छनेन पीठ-फलक-शय्या-संस्तारकेण औषध-भैषज्येन प्रतिलाभयन् षष्ठ-षष्ठेणानिक्षिप्तेन तपःकर्मणाऽऽत्मानं भावयन् विहरति ।

15. अन्यदा राजाभियोगेन रथमुसले सङ्ग्रामेऽऽज्ञप्तः सन् षष्ठभक्त्याऽष्टमभक्तमनुवर्तते, हय-गज-रथ-यावत् सन्नाहः सङ्ग्रामेऽऽगच्छति । कल्पते मम पूर्वं यः प्रहन्ति तं प्रतिहन्तुं न शेषानेवमभिग्रहमभिगृह्णाति, सङ्ग्रामयति । ततः स वरुणेन युद्धं कृते सति प्रहतो गाढप्रहारीकया । अस्थामः, अबलो यावत् सङ्ग्रामात् निष्क्रामति । दर्भसंस्तारकं संस्तृणोति । पूर्वाभिमुखः सपर्यंकनिषण्णः करतल-यावत् अवादीत् - नमोऽस्तु अर्हद्भ्यो भगवद्भ्यो यावत् सिद्धिगतिनामधेयं स्थानं सम्प्राप्तेभ्यः, नमोऽस्तु श्रमणाय भगवते महावीराय यावत् सर्वं व्युत्सृष्टालोचित-प्रतिक्रान्तरुद्धरितो भावशल्यः कालगतः ।

गिण्हित्ता संगामेइ। तए णं से वरुणोणं झुज्जं करिन्ते पहण गाढप्पहारीकए, अत्थामे अबले जाव संगामाओ निक्खमइ । एगन्तमवक्कमइ । दब्भसंथारगं संथरइ, पुरच्छाभिमुहे संपलियंकनिसण्णे करयलजाव वयासी - नमोऽत्थु णं अरिहंताणं भगवंताणं जाव सिद्धिगइ-नामधेयं ठाणं संपत्ताणं, नमोऽत्थु णं समणस्स भगवओ महावीरस्स जाव सव्वं वोसिरिअ आलोइअ पडिक्कन्ते उद्धरिअ भावसल्ले कालगए ।

[16]तए णं वरुणस्स पिअबालवयंसए एगे जाव तत्थागच्छइ, जाव वयासी, जाइं मम पिअबालवयंसस्स वरुणस्स सीलाइं जाव पच्चक्खाणपोसहोववासाइं ताइं ममं पि भवन्तु त्ति कट्टु समाहीए कालगए, सुकुले पच्चायाए विदेहे सिज्झिस्सइ । वरुणे नागनत्तुए सोहम्मे कप्पे अरुणाभविमाणे चउपलिओवमाऊदेवे उववण्णे । महाविदेहे सिज्झिस्सइ । तए णं वरुणं कालगयं जाणित्ता, अहासण्णिहिएहिं वाणमन्तरदेवेहिं दिव्वसुरभि - गन्धोदकवासे जाव दिव्वे निनाए कए । तओ तं दिव्वं देवड्ढिं पासित्ता बहुजणो अन्नमन्नस्स एवमाइक्खइ । जं संगामे मया देवलोए उववज्जन्ति । भगवती ७ शतक उद्देश ९ ।

।। इति वरुणश्राद्धस्य कथा ।।

यथा वरुणधार्मिकश्राद्धसंसर्गेण तन्मित्रस्य सुधर्मप्राप्तिः ।।

[इइ धम्मिअजणसंसग्गो]

---

16. ततो वरुणस्य प्रियबालवयस्यः एको यावत् तत्रागच्छति यावदवादीत् - यानि मम प्रियबालवयस्यस्य वरुणस्य शीलानि यावत् प्रत्याख्यानपौषधोपवासास्तानि ममाऽपि भवन्तु, इति कृत्वा समाधिना कालगतः । सुकुले प्रत्याख्यातो विदेहे सेत्स्यति । वरुणो नागनप्तृकः सौधर्मे कल्पेऽरुणाभविमाने चतुःपल्योपमायुः देवः उत्पन्नः । महाविदेहे सेत्स्यति । ततो वरुणं कालगतं ज्ञात्वा यथासन्निहितैः वाणमन्तरदेवैः दिव्यसुरभिगन्धोदकवासांसि यावत् दिव्यो निनादः कृतः । ततस्तां दिव्यां देवर्द्धिं दृष्ट्वा बहुजनोऽन्योन्यस्य एवमाचक्षते । यद् सङ्ग्रामे मृता देवलोके उपपद्यन्ते ।

[करणदमो]

[३२-करणदमः]

अथ **करणदमः** । करणानि-इन्द्रियाणि तेषां दमः स्ववशीकरणम् । एतावता मुत्कलानि मोक्तव्यानि । यदुक्तमुपदेशमालायाम् -

"**निहयाणि[1] हयाणि य इंदियाणि घाएहऽणं पयत्तेणं ।**
अहियत्थे निहियाइं, हियकज्जे पूयणिज्जाइं ।।" [उपदेशमाला-३२८]

अत्र शिष्यप्रश्नः- मुत्कलमुक्तैर्निजेन्द्रियैर्जीवाः स्वेच्छया यथेष्टं स्वकरणोचितं सुखमनुभवन्तो न केनाऽपि निवार्यन्ते, न बन्ध्यन्ते न पीड्यन्ते च । ततः कस्माद्दांतत्वोपदेशः ? वत्स ! मैवं वद, शृणु ।

"**अदान्तैरिन्द्रियहयै-श्चलैरपथगामिभिः ।**
आकृष्य नरकारण्ये, जन्तुः सपदि नीयते ।।
इन्द्रियैर्विजितो जन्तुः, कषायैरभिभूयते ।
वीरैः कृष्टेष्टकः पूर्वम्, वप्रः कैः कैर्न खण्ड्यते ? ।।
कुलघाताय पाताय, बन्धाय च वधाय च ।
अनिर्जितानि जायन्ते, करणानि शरीरिणाम् ।।" [योगशास्त्र-४/२५-२७]

स्वेन्द्रियनियन्त्रणे त्वयं लाभः । यदुक्तम् -

"**जितेन्द्रियत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते ।**
गुणप्रकर्षेण जनोऽनुरज्यते, जनानुरागप्रभवा हि सम्पदः ।।" [सु. मु.-५१/२]

न हि जितेन्द्रियत्वं सर्वथा सर्वेषामिन्द्रियाणां निरोध एव, किन्तु तद्विषयेषु राग-द्वेषनिरोधः । पुरातनैरपि मुनीन्द्रैरिन्द्रियाणां स्व-स्वविषयनिरोध एव विरचितः । अन्यथा श्रीस्थूलभद्रप्रमुखाणां वेश्यादिगृहस्थितानां वेश्याप्रदत्तषट्विकृत्याहारभुजां कथं शुद्धिः ? श्रीआचाराङ्गेऽपि तथैवोक्तेः ।

---

1. निहतानि हतानि चेन्द्रियाणि घातयत प्रयत्नेन । अहितार्थे निहतानि हितकार्ये पूजनीयानि ।।

"[2]न सक्का न सोउ सद्दा, सोतविसयमागया ।
रागदोसा उ जे तत्थ, ते भिक्खू परिवज्जए ।।
[3]न सक्का रूवमद्दट्ठुं, चक्खुविसयमागयं ।
रागदोसा उ जे तत्थ, ते भिक्खू परिवज्जए ।।
[4]न सक्का गंधमग्घाउं, नासाविसयमागयं ।
रागदोसा उ जे तत्थ, ते भिक्खू परिवज्जए ।।
[5]न सक्का रसमस्साउं, जीहाविसयमागयं ।
रागदोसा उ जे तत्थ, ते भिक्खू परिवज्जए ।।
[6]न सक्का फासमवेएउं, फासविसयमागयं ।
रागदोसा उ जे तत्थ, ते भिक्खू परिवज्जए ।।" [आचाराङ्ग-२/३/१७९]

अत्रेन्द्रियपञ्चकथा यथा -

कर्णेनोक्तम् - 'उन्नतोऽहं विज्ञानताहेतुः, शास्त्रस्थानम्, संसारे प्रथमविषयोपभोगस्थानम्, जन्मनि प्रथमं शब्दः श्राव्यते, सर्वदिग्भ्यः श्रावी ।'

अपरैरुक्तम् - 'त्वं सच्छिद्रो मध्यकुटिलः, अन्तर्मलिनः ।'

अथ नेत्रम् - 'अहं सच्छत्रं सतेजः सस्नेहम् ।'

अन्यैरुक्तम् - 'त्वं हृदये मलिनम्, कातरम्, सजलम् ।'

अथ नासिका - 'उन्नता, प्रतिष्ठाहेतुः, सरला, माध्यस्थमेव सर्वतः, सर्वेन्द्रियमध्ये मुखमण्डनं नासिका।'

अन्यैरुक्तम् - परमन्तर्मलिना, हृद्शून्या, द्विमुखा, वादिते शुभकार्यनिवारका ।

अथ स्पर्शनम् - अहं सर्वेन्द्रियाणां मूलभूतम्, ममेन्द्रियमुख्यता दीयताम् ।

अन्यैरुक्तम्- मा ब्रूहि त्वं बीभत्सम् ।

---

2. न शक्या न श्रोतुं शब्दाः श्रोत्रविषयमागताः । रागद्वेषौ तु यौ तत्र तौ भिक्षुः परिवर्जयेत् ।।
3. न शक्यं रूपमद्रष्टुं चक्षुर्विषयमागतम् । रागद्वेषौ तु यौ तत्र तौ भिक्षुः परिवर्जयेत् ।।
4. न शक्यो गन्ध आघ्रातुं नासाविषयमागतः । रागद्वेषौ तु यौ तत्र तौ भिक्षुः परिवर्जयेत् ।।
5. न शक्यो रसः अस्वादयितुं जिह्वाविषयमागतः । रागद्वेषौ तु यौ तत्र तौ भिक्षुः परिवर्जयेत् ।।
6. न शक्यः स्पर्शः अवेदयितुं स्पर्शविषयमागतः । रागद्वेषौ तु यौ तत्र तौ भिक्षुः परिवर्जयेत् ।।

अथ जिह्वा - अहं सरागा, विषयाधिका, रसज्ञा, सर्वपोषका ।

अन्यैरुक्तमस्याः प्रतिष्ठा योग्या, ओष्ठौ प्राकारः, अग्राशिनो द्वात्रिंशद्दन्ताः, सर्वेन्द्रियाणि [वदन्ति-] शिक्षैवम्- मात्राधिकं न वक्तव्यं न च भोक्तव्यम्, तवोपराधेऽस्माकमपि क्षतिः, अस्मत्क्षये तवापकीर्तिश्च नाशश्च, अस्यां जितायां सर्वमपि जितम् । यतः -

"[7]अक्खाण रसणी कम्माण मोहणी तह वयाण बंभवयं ।
गुत्तीण य मणगुत्ती चउरो दुक्खेण घिप्पंति ।।
जिह्वे प्रमाणं जानीहि, भोजने वचने तथा ।
अतिभुक्तमतीवोक्तं, प्राणिनां प्राणघातकम् ।।
जिह्वाग्रे वसते विद्या, जिह्वाग्रे च सरस्वती ।
जिह्वाग्रे बन्धमोक्षश्च, जिह्वाग्रे परमं पदम् ।।"

अपरेषामेक एव विषयो जिह्वायास्तु विषयद्वयम्, जल्पनं भोजनं च । वचनं विमृश्य यत्र यदुचितं तत्तदेव वक्तव्यम्, शोभापि तथैव । यतः -

"[१]कागकिसिउं ते धन हरइ, जीभतणइ ह ल्लोह लइ जग अप्पणउं करेइ ।।"

भोजनेऽपि यत्कुलोचितं बह्वसावद्यं मात्रया च भोक्तव्यम् । अजितेन्द्रियत्वे फलाफलं श्रीस्थानाङ्गोक्तम्-

"[8]चउहिं ठाणेहिं निग्गंथाण वा निग्गंथीण वा अस्सिं समयंसि अतिसेसे नाणदंसणे

---

१. अयं श्लोकस्यार्थः सम्यग् न ज्ञायतेऽतः स्वमत्या संशोध्यः । सम्पा० ।

7. अक्षाणां रसना कर्माणां मोहस्तथा व्रतानां ब्रह्मचर्यम् । गुप्तीनां च मनोगुप्तिश्चतस्रो दुःखेन गृह्यन्ते ।।

8. चतुर्भिः स्थानैः निर्ग्रन्थानां निर्ग्रन्थीनां वाऽस्मिन् समयेऽतिशेषं ज्ञान-दर्शनं समुत्पादयितुकाममपि न समुत्पद्यते, तद्यथा-अभीक्ष्णमभीक्ष्णं स्त्रीकथाम्, भक्तकथाम्, देशकथाम्, राजकथां कथयिता भवति-१, विवेकेन, व्युत्सर्गेण नो सम्यगात्मानं भावयिता भवति-२, पूर्वरात्रापररात्रकालसमये नो धर्मजागरिकां जागरयिता भवति-३, प्रासुकस्य, एषणीयस्य, उञ्छस्य, सामुदानिकस्य नो सम्यग्गवेषयिता भवति-४, इत्येतैश्चतुर्भिः स्थानैः निर्ग्रन्थानां निर्ग्रन्थीनां वा यावत् नो समुत्पद्यते ।
चतुर्भिः स्थानैः निर्ग्रन्थानां निर्ग्रन्थीनां वाऽतिशेषं ज्ञान-दर्शनं समुत्पादयितुकामं समुत्पद्यते, तद्यथा - स्त्रीकथाम्, भक्तकथाम्, देशकथाम्, राजकथां नो कथयिता भवति, विवेकेन व्युत्सर्गेण सम्यगात्मानं भावयिता भवति, पूर्वरात्रापररात्रकालसमये धर्मजागरयिकां जागरयिता भवति, प्रासुकस्य, एषणीयस्य, उञ्छस्य, सामुदानिकस्य सम्यग्गवेषयिता भवति । इत्येतैश्चतुर्भिः स्थानैः निर्ग्रन्थानां निर्ग्रन्थीणां वा यावत् समुत्पादयितुकामः समुत्पद्यते ।

समुप्पज्जिउकामे वि न समुप्पज्जेज्जा, तं जहा–अभिक्खणं अभिक्खणमित्थिकहं भत्तकहं देसकहं रायकहं कहेत्ता भवति १, विवेगेणं विउसग्गेणं[२] णो सम्ममप्पाणं भावित्ता भवति २, पुव्वरत्तावरत्तकालसमयंसि णो धम्मजागरित्तं जागरतित्ता भवति ३, फासुयस्स एसणिज्जस्स उंछस्स सामुदाणियस्स णो सम्मं गवेसित्ता भवति ४, इच्चेतेहिं चउहिं ठाणेहिं निग्गंथाण वा निग्गंथीण वा जाव नो समुप्पज्जेज्जा ।

चउहिं ठाणेहिं निग्गंथाण वा निग्गंथीण वा अतिसेसे णाणदंसणे समुप्पज्जिउकामे समुप्पज्जेज्जा, तं जहा-इत्थीकहं भत्तकहं देसकहं रायकहं णो कहेत्ता भवति, विवेगेणं विउसग्गेणं सम्ममप्पाणं भवित्ता भवति, पुव्वरत्तावरत्तकालसमयंसि धम्मजागरितं जागरतित्ता भवति, फासुयस्स एसणिज्जस्स उंछस्स सामुदाणियस्स सम्मं गवेसित्ता भवति, इच्चेतेहिं चउहिं ठाणेहिं णिग्गंथाण वा णिग्गंथीण वा जाव समुप्पज्जिउकामे समुप्पज्जेज्जा ।"

षट्सु [रसेसु] चेन्मनो नियन्त्रितं तदाऽपरेन्द्रियदमः सुकर एव । यतः -

"[9]मणमरणे इंदियमरणं, इंदियमरणे मरंति कम्माइं ।
कम्ममरणेण मुक्खो, तम्हा मणमारणं बिंति ।।"

अत्र कथा -

।। अथ मनोदमने मन्त्रीकथा ।।

कश्चनाऽपि राजा साधुगुणरक्तः साधुं स्तौति - 'अहो ! एते मुनीन्द्रा इन्द्रियदमनपरा मनोनियन्त्रणपराः' इत्यादि । तन्मन्त्री मिथ्यादृक्कथयति - 'देव ! मनो न जीयते केनाऽपि, कथमपि,' स तु मनोनियन्त्रणं सर्वथा न मन्यते । ततो राज्ञा सर्वथा पर्यवसापनाय तद्गृहमध्ये प्रच्छन्नं मञ्जूषान्तः स्वनामाङ्कममूल्यं मुद्रारत्नं देशान्तरादागतं श्राद्धमहेभ्यपार्श्वात्क्षेपितम् । ततो राज्ञा पटहो दापितः । यः कश्चनाऽपि राज्ञो मुद्रारत्नमधुना स्वयमेव समानीय समर्पयति तस्य न दोषः । पश्चाद्यस्य पार्श्वे निःसरिष्यति तस्य चौरदण्ड इति । ततः प्रतिगृहं शोधयति, प्रथममात्मीयं गृहम्, ततः क्रमेण सेनान्यमात्यादीनाम्, ततो मन्त्रिगृहम्, तत्र मञ्जुषान्तः लब्धं मुद्रारत्नम्, राजा रुष्टः । चौरो निग्रहायार्प्पितो दण्डपाशिकानाम्, अमात्यादिभिरभ्यर्थ्य किमपि दण्डं कृत्वा मुच्यत इत्यादि पर्यवसापितो नृपः । ततो राजाह - 'यद्ययं जलभृतकच्चोलकं हस्तद्वयेन गृहीत्वा नगरं परितः परिक्रम्यागच्छति, जलबिन्दुरपि यदि भूमौ न पतति तदा जीवितमेतस्य मन्त्रिणो नान्यथा । ततो

---

२. 'विवेकेने' ति- अशुद्धादित्यागेन, 'विउस्सग्गेणं'ति कायव्युत्सर्गेण ।

9. मनोमरणे इन्द्रियमरणमिन्द्रियमरणे म्रियन्ते कर्माणि । कर्ममरणेण मोक्षस्तस्मात् मनोमारणं ब्रुवन्ति ।।

मन्त्रिणो हस्ते जलकच्चोलकमर्पितम्। असिकरौ घातकौ द्वौ पुरुषावुक्तौ च, यदास्य मनोव्याक्षेपाज्जलबिन्दुरपि भूमौ पतति तदा खड्गघातेन खण्डशः करणीय एवेति । ततः स्थाने स्थाने नाटकानि मण्डापितानि । ततः क्रमेण नगरं परितः परिभ्रम्य राज्ञः सभायामागतः । ततो राज्ञा पृष्टम् - 'भो मन्त्रिन् ! क्वाऽपि किमपि दृष्टम् ? मन्त्रिणोक्तम् 'देव ! न दृष्टं किमपि ।' राजाह - 'कस्मान्न दृष्टम् ?' ततो मन्त्री कथयति - 'मम मनो जलभृतकच्चोलक एव स्थितं नान्यत्र । ततो राज्ञा बोधितः । मानितं च मनोनियन्त्रणं तेन मन्त्रिणा । यथा तस्य मन्त्रिण एकमनोनिरोधेन सर्वेन्द्रियरोधः । कर्णाभ्यां गीतवाद्यनिनादाश्रवणम्, लोचनाभ्यां नाटकाप्रेक्षणम्, घ्राणेन गन्धापरिज्ञानम् जिह्वया स्वादावेदनम्, स्पर्शनेन्द्रियेण शीततापाद्यननुभूतिस्तथा सर्वेषामपि ज्ञेयम् ।

।। इति मनोदमने मन्त्रीकथा ।।

अथ स्पर्शनेन्द्रिये सम्बन्धः -

।। अथ मूलराजकथा ।।

पुरा पत्तने मूलराजेन त्रिपुरुषः प्रासादः कारितः । तच्चिन्तार्थं कमप्यालोकमानेनैकान्तरपारणे पञ्चग्रासीकृत्सांघटिकयोगो दृष्टः । तं नन्तुं यावत् याति तावत्तेन तृतीयद्वारेणास्वस्थेन राजानं वार्त्तयितुं ज्वरः कन्थायां मुक्तः । कन्थाकम्पं प्रावीक्ष्य पृष्टे, सद्भावे प्रोक्ते, विस्मितो राजाह-'यद्येवं शक्तिस्तर्हि सर्वथा [ज्वरः] किं न स्फेटयति । स आह -

"उपतिष्ठन्तु मे रोगा, ये केचित्पूर्वसञ्चिताः ।
आनृण्ये गन्तुमिच्छामि, तच्छम्भोः परमं पदम् ।। [प्रबन्धचिन्तामणि]

"नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि ।
अवश्यमेव हि भोक्तव्यं, कृतं कर्म शुभाशुभम् ।।" [ ]

ततस्तत्समर्थयितुं नृपेणोक्तम्, स आह -

"अधिकारात्त्रिभिर्मासै - र्मठापत्यात्त्रिभिर्दिनैः ।
शीघ्रं नरकवाञ्छा चेद्दिनमेकं [दिनं भव] पुरोहितः ।।" [प्रबन्धचिन्तामणि]

इत्यादि जानन् कथं लोभेनाभिभूये । ततो नृपस्ताम्रशासनं मण्डकवेष्टितं कृत्वा भिक्षागतस्य तस्य पत्रपुटेऽमोचयत्। सोऽज्ञानान्मठं प्रत्यावृत्तः सरस्वती तद्दिने पूरान्तर्मार्गं न दत्ते ।

"सर्वः स्वात्मनि गुणवान्, सर्वः परदोषदर्शने कुशलः ।
सर्वस्य चास्ति वाच्यं, न चात्मदोषान् वदति कश्चित् ।।" [ ]

तथापि स चोत्तमत्वेनाजन्म स्वानेव दोषान् पश्यन् विमृशन् पात्रं पश्यंश्च ददर्श ताम्रशासनं कुब्जश्च । राजा तु क्षान्त्वा सान्त्वनायागतो नमति । तावत्तेनोचे - मया दक्षिणहस्तेन गृहीतं [भवत्ताम्रशासनं] कथमन्यथा स्यात् ? यतः -

"[10]पत्थरे रेहा विहडइ, घडीअ मुहुत्तेहिं जं न दीहेहिं ।
सप्पुरिसाण न लुप्पइ, पडिवन्नं जाव जीवंमि ।।"

वयजल्लदेवनाम्नः स्वशिष्यस्यार्प्पितम् । स भूपमाह - चेन्मे सदाङ्गोद्वर्त्तनाय जात्यकुंकुमपलान्यष्टौ, कस्तूरीपलानि चत्वारि, कर्पूरपलानि दश, पञ्चशतनागवल्लीपत्रम्, द्वात्रिंशद्वाराङ्गनास्तासां ग्रासं सितच्छत्रं च ददासि, तदा चिन्तकत्वं स्वीकुर्व्वे । राज्ञा सर्वं प्रपन्नम् । तत्र नियुक्तः, एवं भुञ्जानोऽपि स ब्रह्मचारी त्रिधा शुद्ध्या।

यतः - अन्यदा श्रीहेमसूरीणां मानदानपरे श्रीसिद्धराज्ञि गुणद्वेषी चाचिगपुरोधाः प्राह -

"विश्वामित्रपराशरप्रभृतयो ये चाम्बुपत्राशिन-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
आहारं सघृतं पयो दधियुतं भुञ्जन्ति ये मानवा-
स्तेषामिन्द्रियनिग्रहः कथमहो दम्भः समालोक्यताम् ।।" [उपदेशप्रासादव्या० ३२]

तस्मिन्नुक्ते श्रीहेमसूरिराह -

"सिंहो बली द्विरदसूकरमांसभोजी, संवत्सरेण रतिमेति किलैकवारम् ।
पारापतः खरशिलाकणमात्रभोजी, कामी भवत्यनुदिनं ननु कोऽत्र हेतुः ।।" [उपदेशप्रासादव्या० ३२]

एकदा मूलराजपत्न्या निशि परीक्षितुमारब्धस्तदा ताम्बूलप्रहारेण तां कुष्टिनीं चक्रे । अनुनीतः सन् स्वोद्वर्त्तनविलेपनात्स्नानोन्मृष्टपयःप्रक्षालनाच्च तां सज्जीचक्रे ।।

।। इति मूलराजकथा ।।

अथेन्द्रियादमने दृष्टान्तः ।

न नृपादिपदैर्नैव लक्ष्म्या न च कुलादिभिः।
महान्तः किन्तु यः पुण्यैर्महान् पुण्यप्रकाशवत् ।।

।। अथ चन्द्रशेखरराजकथा।।

वाणारसी नगरी, चन्द्रशेखरः राजा मिथ्यादृक्, गुणप्रभसूरिपार्श्वे शाठ्येन जगति को महानिति स्वं महान्तं मन्यमानः पप्रच्छ । गुरुः प्राहः - 'न नृपादिपदै०' ।। राजाह - 'किं प्रमाणम् ?' गुरुः प्राह -

10. प्रस्तरे रेखा विघटति घटिक-मुहूर्त्तैः यन्न दिवसैः । सत्पुरुषाणां न लुप्यति प्रतिपन्नं यावज्जीवे ।।

'वटवृक्षस्य दूरस्याधो विभ्राम्यन्नयं मूलीवाहकप्रमाणम् ।' राजाह - 'कथम् ?' गुरुः प्राह - 'अयं दारिद्र्यभग्नो निर्वेदमापन्नः, क्वचिद्गिरौ भृगुपातं कुर्वन् कायोत्सर्गस्थऋषिणा निषिद्धः । तद्गुहास्थजिनप्रतिमां त्वं पूजय सदा । भवतो भव्यं भावि । इत्युपदेशेन स तामर्चयति । तत्पुण्यबलात्तवापुत्रस्य साधिकनवमास्या राज्याधिपः पुत्रो भावी ।' राजाह - 'सरोषमहं कीदृशो भविष्यामि ?' गुरुः प्राह - सर्पदंशमृत्युना सञ्चारकस्य स्वस्य मध्ये मेहरो भावी । इदं श्रुत्वा गुरुपार्श्वे तलारक्षकान् मुक्त्वा रोषात्तं जघान । स मृत्वा वाणारस्यामेव जिनरङ्गव्यवहारिणो जिनश्रियः कुक्षाववतीर्णः, परं सदन्तः, जातमात्र एव वक्ति - 'राजाऽहं नाऽत्र गृहे स्थास्यामि ।' भयात्पित्रा बहिरुद्याने मुक्तः । राज्ञा सर्पभयादुभयोः पार्श्वयोः समर्थरक्षकपुंधृतझोलिकायां बालवत्तिष्ठति । द्वयोर्वैरिणोर्विद्याधरयोर्युद्धं, विद्याभिमन्त्रितकुसुमपातः । राज्ञा परिमलाढ्यं तदाघ्रायि । घ्राणश्वासयोगेनोत्पन्नसर्प्पेण दष्टो मृतः । सञ्चारके मेहरः । देवताधिष्ठितगजादिपञ्चकमुद्याने गतम् । बालकोपरिपूर्णकलशढालनम्, राज्यम्, जातिस्मरणं समये प्रतिमां दृष्ट्वा, स्वमारकस्याऽपि राजजीवस्य प्रतिबोधाय सर्वत्र गृहद्वारशाखायां पटवादनपूर्वकं 'न नृपादी'ति श्लोकल्लेखनम्, सप्तभवान् भ्रान्त्वा राजाऽपि मनुजोऽभूत् । श्लोकार्थं विचारयतस्तस्य जातिः। देवार्चापुण्येन द्वादशमे स्वर्गे गतः । ततश्च्युत्वा विदेहे नृपः सिद्धः । मूलीवाहकजीवः राज्यं प्रतिपाल्य सिद्धः ।।

।। इति चन्द्रशेखरराजकथा ।।

[इइ करणदमो]

[चरणपरिणामो]

[३३-चरणपरिणामः]

अथ **चरणपरिणामः** । चरणं चारित्रं तत्र परिणामः श्रद्धा भावावासना[१] तस्यां यतनीयम् । यथा -

"त्यक्तसङ्गो जीर्णवासा, मलक्लिन्नकलेवरः ।
भजन् माधुकरीं वृत्तिं, मुनिचर्यां कदा श्रये ? ।।
त्यजन् दुःशीलसंसर्गं, गुरुपादरजः स्पृशन् ।
कदाहं योगमभ्यस्यन्, प्रभवेयं भवच्छिदे ? ।।
महानिशायां प्रकृते, कायोत्सर्गे पुराद् बहिः ।
स्तम्भवत् स्कन्धकर्षणं, वृषाः कुर्युः कदा मयि ? ।।
वने पद्मासनासीनं, क्रोडस्थितमृगार्भकम् ।
कदाऽऽघ्रास्यन्ति वक्त्रे मां जरन्तो मृगयूथपाः ? ।।
शत्रौ मित्रे तृणे स्त्रैणे, स्वर्णेऽश्मनि मणौ मृदि ।
मोक्षे भवे भविष्यामि, निर्विशेषमतिः कदा ? ।।
अधिरोढुं गुणश्रेणिं निःश्रेणीं मुक्तिवेश्मनः ।
परानन्दलताकन्दान् कुर्यादिति मनोरथान् ।।
इत्याहोरात्रिकीं चर्या-मप्रमत्तः समाचरन् ।
यथावदुक्तवृत्तस्थो गृहस्थोऽपि विशुध्यति ।।" [योगशास्त्र-३/१४१-१४७]

श्रीस्थानाङ्गेऽपि साधूनाश्रित्य -

[1]तिहिं ठाणेहिं समणे णिग्गंथे महानिज्जरे महापज्जवसाणे भवति, तं जहा—कया णं अहं अप्पं वा बहुं वा सुयं अहिज्जिस्सामि-१, कया णं अहमेकल्लविहार-पडिमं उवसंपज्जित्ता

---

१. 'भावासना' हस्त० ।

1. त्रिभिः स्थानैः श्रमणो निर्ग्रन्थो महानिर्जरो महापर्यवसानो भवति, तद्यथा - कदा खलु अहमल्पं वा, बहु वा, श्रुतमध्येष्ये, कदा खलु अहमेकाकिविहारप्रतिमामुपसम्पद्य विहरिष्यामि, कदा खलु अहमपश्चिममारणान्तिक-संलेखना - जोषणाजोषितो भक्तपानप्रत्याख्यातः, पादोपगतः कालमनवकांक्षन् विहरिष्यामि, एवं स्वमनसा, स्ववचसा, स्वकायेन जागरयन् निर्ग्रन्थो महानिर्जरो महापर्यवसानो भवति ।

णं विहरिस्सामि-२, कया णं अहमपच्छिममारणंतित-संलेहणा-झूसणाझूसिते भत्तपाणपडियाइक्खिते पाओवगते कालं अणवकंखमाणे विहरिस्सामि-३, एवं समणसा सवयसा सकायसा जागरमाणे निग्गंथे महानिज्जरे महापज्जवसाणे भवति ।

श्राद्धानाश्रित्य -

"[2]**तिहिं ठाणेहिं समणोवासते महानिज्जरे महापज्जवसाणे भवति, तं जहा–कया णमहमप्पं वा बहुं वा परिग्गहं परिचइस्सामि १, कया णं अहं मुंडे भवेत्ता अगारातो अणगारितं पव्वइस्सामि २, कया णं अहं अपच्छिममारणंतियसंलेहणाझूसणाझूसिते भत्तपाणपडियातिक्खिते पाओवगते कालं अणवकंखमाणे विहरिस्सामि ३, एवं समणसा सवयसा सकायसा जागरमाणे समणोवासते महानिज्जरे महापज्जवसाणे भवति ।**"

इयं भावना ज्ञेया ।

भरतस्य भरताधिपत्यभोक्तुर्यत्केवलज्ञानमन्तःपुरमध्ये आदर्शगृह एवोत्पन्नं तद्भावनाया माहात्म्यम् । यन्मरुदेवास्वामिन्या गजारूढाया एव केवलोत्पत्तिस्तत्राऽपि भावनैव ।

"[3]**कइया संविग्गाणं, गीयत्थाणं गुरूण पयमूले ।**
सयणाइसंगरहिओ, पव्वज्जं संपवज्जिस्सं ? ।।
[4]**कइया सारणवारण-चोयणपडिचोयणाई सम्ममहं ।**
कम्मि वि पमायखलिए, साहूहिं कयं सहिस्सामि ? ।।
[5]**कइया कालविहाणं, काउं आयंबिलाइतवोकम्मं ।**
कयजोगो जुग्गसुयं, अंगोवंगं पढिस्सामि ? ।।" [चारित्रमनोरथमाला-२,६,१२]

---

2. त्रिभिः स्थानैः श्रमणोपासको महानिर्जरो महापर्यवसानो भवति, तद्यथा-कदा खलु अहमल्पं वा, बहुं वा परिग्रहं परित्यक्ष्यामि-१, कदा खलु अहं मुण्डो भूत्वा अगाराद् अनगारितां प्रव्रजिष्यामि-२, कदा खलु अहमपश्चिममारणान्तिक-संलेखना- जोषणाजोषितो भक्तपानप्रत्याख्यातः पादोपगतः कालमनवकांक्षन् विहरिष्यामि-३, एवं स्वमनसा, स्ववचसा, स्वकायेन जागरयन् श्रमणोपासको महानिर्जरो महापर्यवसानो भवति ।

3. कदा संविग्नानां गीतार्थानां गुरूणां पादमूले । स्वजनादिसङ्गरहितः प्रव्रज्यां सम्प्रव्रजिष्यामि ? ।।

4. कदा सारणावारणाचोदनाप्रतिचोदनादि सम्यगहम् । कस्मिन्नपि प्रमादस्खलिते साधुभिः कृतं सहिष्यामि ?।।

5. कदा कालविधानं कृत्वाऽऽचाम्लादितपःकर्म । कृतयोगो योग्यश्रुतमङ्गोपाङ्गं पठिष्यामि ? ।।

ये चान्तकाले प्रव्रज्यार्थिनो वेषं प्रपूजयन्ति तेषामपि प्रव्रज्याप्रतिपत्तिसाध्यं फलं संभवति । यतः -

[6]आलोअणापरिणओ, सम्मं संपट्ठिओ गुरुसगासे ।
जइ अंतरा वि कालं करिज्ज आराहओ तह वि ।। [पुष्पमाला - ३६५]

[7]तित्थयरगुणा पडिमासु नत्थि निस्संसयं वियाणंतो ।
तित्थयरेत्ति नमंतो सो पावइ निज्जरं विउलं ।। [आवश्यकनिर्युक्ति-११३०]

श्रीआवश्यके । कल्याणमन्दिरस्तोत्रेऽपि -

आत्मा मनीषिभिरयं त्वदभेदबुद्ध्या,
ध्यातो जिनेन्द्र ! भवतीह भवत्प्रभावः ।
पानीयमप्यमृतमित्यनुचिन्त्यमानम्,
किं नाम नो विषविकारमपाकरोति ? ।। [कल्याणमन्दिर-१७]

अत्र कथा -

"[8]वाससहस्सं पि जई, काऊणं संजमं सुविउलं पि ।
अंते किलिट्ठभावो, न विसुज्झइ कंडरीओ व्व ।।
[9]अप्पे वि कालेणं, केइ जहागहियसीलसामन्ना ।
साहंति नियय़कज्जं, पुंडरीयमहारिसि व्व जहा ।।" [उपदेशमाला-२५१-२५२]

पुण्डरीककण्डरीकौ पौण्डरिकिण्यां पुरि राजानौ [२]भ्रातरावभूताम् । अन्यदा कश्चित्सूरिराययौ । [३]तद्धर्मदेशनया प्रतिबुद्धः पुण्डरीकः [४]प्रविव्रजिषुर्लोकानाहूय सहोदरमुवाच-भवन्तं राज्येऽभिषिच्य प्रव्रजामीति । सोऽब्रवीत्, तत्किं मया नरके यातव्यम् ? अलं मे राज्येन, अहमपि प्रव्रजामि। प्रभुराह-कृत्यमिदं भवादृशाम्, किन्तु दुःशक्यमिति । तेनोक्तं न किञ्चिद् दुष्करं समर्थानां,

---

२. 'महापद्मराजपद्मावतीदेव्योरङ्गजातौ ।' ३. 'तद्धर्मेन' हस्त० । ४. 'प्रविव्रजिषुः' हस्त० नास्ति ।

6. आलोचनापरिणतः सम्यक् सम्प्रस्थितो गुरुसकाशे । यद्यन्तरापि कालं कुर्यात् आराधकस्तथाऽपि ।।
7. *तीर्थकरगुणाः प्रतिमासु न सन्ति निःसंशयं विजानन् । तीर्थकरः इति नमन् स प्राप्नोति निर्जरां विपुलाम् ।।*
8. वर्षसहस्रमपि यतिः कृत्वा संयमं सुविपुलमपि । अन्ते क्लिष्टभावो न विशुध्यति कण्डरीकरिव ।।
9. अल्पेनापि कालेन केचित् यथागृहीतशीलश्रामण्याः । साधयन्ति निजककार्यं पुण्डरीकमहर्षिरिव यथा ।।

[10] "ता तुंगो मेरुगिरी, मयरहरो ताव होइ दुत्तारो ।
ता विसमा कज्जगइ, जाव न धीरा पवज्जंति।। [पवज्जाविहाणकुलक - २२]

[11] ता विच्छिन्नगयणं, तावच्चिअ जलहिणो अ गंभीरा ।
ता गुरुआ कुलसेला, धीरेहिं न जातु लिज्झति ।।" [ ]

ततो वार्यमाणोऽपि स निष्क्रान्तः, अनायकं राज्यमित्यन्यो भ्राता वारितो लौकैः । पश्चाद् बहुकालं प्रव्रज्यां विधायान्यदा दुस्सहतया परीषहोपसर्गाणां विचित्रत्वात्कर्मपरिणतेः, अनादिभवाभ्यस्ततया विषयलोलतायाः,[५] जातभग्नव्रत-परिणामः[६] कण्डरीकोऽचिन्तयदधितिष्ठामि तत्प्राक्प्रतिपन्नं राज्यमित्याकूतेनागच्छत्स्वपुरम्, स्थितो बहिरुद्याने, निवेदितस्तत्पालेन राज्ञे, किमेकाकी ? इति विमर्शात्कतिचिदाप्तपुरुषपरिकरः समागतो राजा । दृष्टोऽव-लम्बिततरुशाखापात्रो दूर्वावितानोपरिवर्ती स तेन । ततो लक्षिततदभिप्रायो राजामात्यादीनुवाच-मया वार्यमाणेनानेनाग्राहि व्रतम्, अधुनाऽयं राज्यं गृह्णातु, वयं पुनरेतदिति[७] वदता च ददिरे तस्मै राज्यचिह्नानि, जगृहे तल्लिङ्गम् । जगाम गुर्वभिमुखम्, इतरोऽपि राज्यविष्टरमध्यास्य तद्दिन एव भूयो भक्षयित्वोत्पन्नविसूचिको रारट्यमानो भ्रष्टप्रतिज्ञोऽद्रष्टव्योऽयमिति लोकैर्निन्दनादुल्लसिततीव्ररौद्रध्यानो मृत्वा गतः सप्तमनरक-पृथिवीम्। पुण्डरीकः पुनर्गत्वा गुर्वन्तिकं करोमि निष्कलङ्कं संयममित्याविर्भूततीव्रशुभपरिणामोऽनु-चितानुपानत्काऽवनिगमनेन गलच्चरणरुधिरः समुदीर्णक्षुत्पिपासापरीषहस्तथाप्यविचलितसत्त्वस्तद्दिन एव मृत्वा गतः[८] सर्वार्थसिद्धिमिति ।।

।। इति पुण्डरीक-कण्डरीककथा ।।

एवं तस्य तद्दिन एव सर्वार्थसिद्धगमने प्रधानं कारणं परिणाम एव । यदुक्तम् -

[12] **एगदिवसं पि जीवो, पव्वज्जमुवागओ अनन्नमणो ।**
जइ वि न पावइ मोक्खं, अवस्स वेमाणिओ होइ ।। [उपदेशमाला-९०]

।। अथ श्रीस्कंदमुनिसम्बन्धः ।।

कार्त्तिकपुरेऽग्निर्नृपः वसुमती राज्ञी पुत्र्यः - बन्धुमती, शिवसेना, श्रीमती, स्वयम्प्रभा, लक्ष्मीवती, कृत्तिका चेति । अन्यदा कृत्तिका रक्तेन पित्रैव परिणीता । गर्भे नवमासिके शरोवनोद्यानवाप्यां

---

५. 'विषयलोलतया च' हस्त० । ६. 'परिणामः' हस्त० नास्ति । ७. व्रतम् । ८. धर्मं गृहीत्वा ततो गुर्वन्तिके पुनर्व्रतं गृहीत्वा सर्वार्थसिद्धौ गतः इति ।

10. तावत् तुङ्गो मेरुगुरिः, मकरध्वजस्तावद् भवति दुस्तरः ।, तावत् विषमा कार्यगतिः, यावत् धीरा न प्रव्रजन्ति ।।

11. तावदविच्छिन्नगगनं, तावदेव जलधयश्च गंभीरा । तावद् गुरुकाः कुलशैला, धीरैः न जातु लज्ज्यते ।

12. एकदिवसमपि जीवः प्रव्रज्यामुपागतोऽनन्यमना । यद्यपि न प्राप्नोति मोक्षमवश्यं वैमानिको भवति ।।

स्नानदोहदो जातः । जातः पुत्रः । स्वामिनो कार्त्तिकेय इति नाम । वीरश्रीश्च पुत्री । सा रोहीडकपुरस्य क्रौञ्चनृपाय दत्ता । कार्त्तिकेयश्चतुर्दशवर्षो जातः । अन्यदा वसन्तेऽन्यकुमाराणां मातामहशालेभ्यः प्राभृतागमं दृष्ट्वा मातरं पृष्ट्वा ज्ञातस्वरूपो वैराग्यात्प्रव्रजितोऽनुरागेण पित्रा धार्यमाण-शतशलाकश्वेत-च्छत्रोऽभूत् । सोऽन्यदा गतः किष्किन्धपर्वतम्, तत्र पाण्डूनकनगरे रात्रौ प्रतिमायां स्थितः मेघो वृष्टः । जलं मुनिशरीरं प्रक्षाल्य महाद्रहे प्रविष्टं सर्वौषधं जातम् । तेण[13] लोगो ण्हाओ । सव्ववाहीहिं मुच्चइ । ततो दक्षिणापथे तत्तीर्थजातम्, अन्यदा मुनिः रोहीडकं गतः । क्रौञ्चनृपगृहे भिक्षार्थं प्रविष्टः । तत्र वीरश्रिया भगिन्या गवाक्षस्थया तं दृष्ट्वा भ्रातृस्नेहात्प्ररुन्नम् । राज्ञा रुदन्तीं दृष्ट्वाऽज्ञातपरमार्थेन क्रोधाद्गवाक्षस्थेनैव गृहान्निर्गच्छन्मुनिः पृष्टौ शक्त्या हतः । तओ[14] तक्खणामेव सोरिविज्जाए पुव्वसिद्धाए दक्षिणावहे महायरेणं मोरिअखंडिपव्वए नीओ । तत्थ सो समाहिणा मओ दिवंगओ । तस्स पएसस्स सामिगिहमिति संज्ञा जाता । तयाए[९] इच्चेव विज्जाए रओहरणं भाउआओ आणीय पाडियं । वीरश्रीरपि हा भ्रातः ! ते भगिनीपतिना भव्यमातिथेयं कृतमित्यादि व्यलपत् । ततो ज्ञातस्वरूपः क्रौञ्चनृपो हा ! धिग्मामविमृश्यकारिणमित्यादि स्वं निन्दन् प्रव्रजितः । वीरश्रीरपि तपः कृत्वा त्रिवर्षैरुत्तमार्थमाराध्य दिवंगता । क्रौञ्चनृपोऽपि ।

।। इति चरणपरिणामे स्कन्दमुनिसम्बन्धः ।।

[इइ चरणपरिणामो]

।। इति प्रबोधदीपिकायां चतुर्थप्रस्तावः ।।

---

९. अत्र 'तयाएई चेव विज्जएकारोहणं भाउआई आय उप्पाइआ ।' पाठो दृश्यते परं भ्रष्टोऽयं पाठः सम्बन्धेन शुद्धीकृतः । सम्पा० ।

13. तेन लोकः स्नातः । सर्वव्याधिभिः मुच्यते ।

14. ततस्तत्क्षणामेव सौर्यविद्यया पूर्वसिद्धया दक्षिणपथे महादरेण मौर्यखण्डपर्वते नीतः । तत्र स समाधिना मृतः, दिवंगतः । तस्य प्रदेशस्य स्वामिगृहमिति संज्ञा जाता । तदा एतया चैव विद्यया रजोहरणं भ्रात्रोः आनीय पातितम् ।

।। अथ पञ्चमगाथाव्याख्याने प्रबोधदीपिकायां पञ्चमः प्रस्तावः ।।

अथ पञ्चमी गाथा -

[1]संघोवरि बहुमाणो, पुत्थयलिहणं पभावणा तित्थे ।
[2]सड्ढाण किच्चमेअं, निच्चं सुगुरूवएसेणं ।।

[सङ्घोपरि बहुमानः, पुस्तकलेखनं प्रभावना तीर्थे ।
श्राद्धानां कृत्यमेतत्, नित्यं सुगुरूपदेशेन ।।]

[सङ्घोवरि बहुमाणो]

[३४-सङ्घोपरि बहुमानः]

सङ्घः साधु-साध्वी-श्रावक-श्राविकारूपश्चतुर्विधः **तस्योपरि बहुमानं** हार्दभक्तिः, सा विधेया । सङ्घादन्यत्तत्किमपि वस्तु नास्ति यन्महदुच्यते । यतः -

"उर्वी गुर्वी तदनु जलदः सागरः कुम्भजन्मा,
व्योमायातौ रविहिमकरौ तौ च यस्यांहिपीठे ।
स प्रौढश्रीर्जिनपरिवृढः सोऽपि यस्य प्रणन्ता,
स श्रीसङ्घस्त्रिभुवनगुरुः कस्य न स्याद् नमस्यः ? ।।"

---

१. विचारसत्तरीग्रन्थे चतुर्थगाथास्थाने 'संघोवरि बहुमाणो, पुत्थयलिहणंमि पभावणा तित्थे । नवखित्ते धणववणं, समाईयमुभयकालम्मि ।। इति पाठस्तथा अस्याः पञ्चमगाथायाः स्थाने 'परिग्गहमाणाभिग्गह, इक्कारसपडिम-भावणया । सव्वविरई-मणोरह, एमाइ सड्ढकिच्चाइं ।।'
श्री महेन्द्रसूरिविरचितायां विचारसप्ततिकायाम् चतुर्थ-पञ्चमगाथास्थाने 'संघोवरि बहुमाणो, धम्मिअ-मित्ती पभावणा तित्थे । नवखित्ते धणववणं, पुत्थयलिहणं विसेसेण ।।" परि xx इक्कारससड्ढपडिम-फासणया । सव्व xx किच्चाइं ।।' इति पाठः ।

२. 'जिणसासणंमि राओ, णिच्चं सुगुरूण विणयपरो ।।' इति सम्बोधप्रकरणे ।

अत्र श्रीवस्तुपालमन्त्रिसम्बन्धः । तथाहि -

नागपुरीयसा०- देल्हासुतः सा०-पूनडः श्रीमोजदीनसुरत्राणबीबी[प्रेमकला-]प्रतिपन्न-बान्धवोऽश्वपतिगजपतिनरपतिमान्योऽस्ति, तेन श्रीशत्रुञ्जय[३]प्रथमयात्रा सं० १२७३ वर्षे बिब्बेरपुरात् कृता, द्वितीया सुरत्राणादेशात् सं० १२८६ वर्षे नागपुरात् कर्तुमारब्धा, तत्र १८०० शकटानि, बहवो महीधराः, माण्डलिग्रामासन्ने यावदायातस्तावत्संमुखमागत्य तेजपालेन धवलक्कमानीतः श्रीसङ्घः, श्रीवस्तुपालः संमुखमागात् । श्रीसङ्घधूली पवनानुकूल्यतो यां यां दिशमनुधावति तां तां गच्छति । सङ्घजनैरभाणि- मन्त्रीश ! इत इता रजः, इत इतः पादोऽवधार्यताम् । मन्त्रिणा चोक्तम्- इदं रजः पुण्यैः स्प्रष्टुं लभ्यते । अस्मिन् स्पृष्टे पापरजो दूरे नश्यति। यतः -

श्रीतीर्थपान्थरजसा विरजीभवन्ति, तीर्थेषु च भ्रमणतो न भवे भ्रमन्ति ।
द्रव्यव्ययादिह नराः स्थिरसम्पदः स्युः, पूज्या भवन्ति जगदीशमथार्चयन्तः ।।

[४]मन्त्रिपूनडौ गाढालिङ्गनप्रियालापौ संवृत्तौ, सरस्तीरे सङ्घः स्थितः ।

रात्रौ मन्त्रिणा कथापितं सा० पूनडाय-'प्रातर्श्रीसङ्घेनास्मदावासे भोक्तव्यम् ।' तथेत्यादृतम् । भोजनमण्डपे रसवती निष्पन्ना, प्रातरायाति नागपुरीयाः, सर्वेषां पादप्रक्षालनं तिलकं च वस्तुपालः स्वयमेव करोति स्म, एवं द्विप्रहरी लग्ना । मन्त्री तथैवानिर्विण्णः । तदा तेजपालेन विज्ञप्तम्- देव ! अन्यैरपि [५]सङ्घभक्तिः कारयिष्ये यूयं भुङ्ध्वम्, तापो भावी, मन्त्री- मैवं वद, पुण्यैरयमवसरो लभ्यते । तदा गुरुभिः कथापितम्-

जेण[1] कुलं आयत्तं तं पुरिसं आयरेण रक्खिज्जा ।
न हु तुंबम्मि विणट्ठे अरया साहारया हुन्ति ।।

तदनु [६]मन्त्रिणैकं काव्यं गुरुभ्यः प्रहितम् -

"अद्य मे फलवती पितुराशा मातुराशिषि शिखाऽङ्कुरिताऽद्य ।
यद्युगादिजिनयात्रिकलोकं पूजयाम्यहमशेषमखिन्नः ।।"

एवं भोजयित्वा परिधाप्य च रञ्जितः श्रीसङ्घः ।

।। अथ साधर्मिक सङ्घबहुमाने आभूसम्बन्धः ।।

---

३. 'आद्यायात्रा' हस्त० । ४. 'सा० पूनडमन्त्रिणाः' हस्त० । ५. 'देवभक्तिः' हस्त० । ६. 'मन्त्रिणेदंकाव्यं श्रीगुरूणां' हस्त० ।

1. येन कुलमायतं तं पुरुषमादरेण रक्षेत । न हु तुम्बे विनिष्टेऽऽरकाः साधारका भवन्ति ।।

यथा थारापद्रासन्ने कस्मिंश्चिद्ग्रामे कोऽपि धन्यभूत् । स चाभूरिति प्रसिद्धे सुते बालक एव विपन्नः । ततो जननी निर्धनतया तत्रानिर्वहमाणा तं स्वसुतमादाय बहुव्यवहारिप्रवरे थारापद्रे कस्याऽपि व्यवहारिणो गृहासन्ने स्थाने तेन प्रतिपन्नभगिनीभावात्तस्थौ। सुतश्च तद्गृहे पशुरक्षणप्रमुखं यथोचितकर्मादि करोति। परं रूपवान् वचनचातुर्य-लोकप्रियत्व-भाग्यवद्दशादिगुणवांश्च शनैः पाणिग्रहणयोग्योऽभूत् । प्रतिपन्नमातुलप्रसिध्या च जने प्रसिद्धिमान् [अभूत्] ।

अन्यदा श्रीस्तम्भनतीर्थतः केनापि व्यवहारिणा बहुग्रामेषु विवाहमेलनाय भ्राम्यन्ता शकुनाभावादि-नाऽसम्पद्यमानतत्प्रयोजना थारापद्रप्रवेशे [७]काह्लरिखडकनावसरे वैकालिकायोत्थापनावसरे काह्लर्युपरि त्रिकलशीकृताध्वमारोप्यागच्छामीति तेनैवाभूकेन व्याहृते सुशब्दः शकुनोऽयमिति मनसिकृत्य तस्मिन्नेव गृहे गते समाजग्मुः । तन्मातुलेन कृतादरास्तत्रैव तस्थुः । तस्य शकुनस्याभिधायकं तमेव ज्ञात्वा तेनैव सह विवाहं मेलयामासुः । भोजिताश्च मातुलेन आभूजनन्याश्चामिलन् । तद्गृहं कर्तनाद्युपस्कारादिमन्निर्धनं प्रेक्ष्य खिन्ना अपि गम्भीरत्वेन किमपि नोचुर्विरुद्धम्, किन्तु टंकसहस्रादि विवाहाय विलोक्यते यद्ग्राह्यं विस्तरेण जनन्या यात्राद्युत्सवाश्च कार्याः इत्यादिशोभनमेव ते प्रोचुः । तावता ग्राममध्ये वार्त्ता विसृता । जनैरुक्तम्-'एवंविधे ग्रामे सत्यपि भवद्भिरेवं किं कृतम् ?' तावता तत्रत्यराज्ञाऽपि वार्त्ता श्रुता । आभूराकारितस्तद्भाग्यवृष्टेन राज्ञोक्तम्- 'चतुर्द्दिनी शुल्कं वर्षमध्ये मया तव मुक्तम् ।' आभूर्हृष्टः । तावता तद्भाग्यात् खण्डादिबालदिरागता, तेन सम्मुखं गत्वा रूप्यमुद्रा सत्यङ्काराद्यर्प्पयित्वा गृहीता, अपरं च वस्त्वर्प्पिता । शुल्कं च राज्ञो न दत्तम्, इत्यादि युक्त्या टंकसहस्राण्यर्जितानि सविस्तरो विवाहमहो जज्ञे । शनैः शनैर्द्रव्यकोट्यो जाताः ।

यथा-लघुकाश्मीरे थारापद्रे श्रीश्रीमालीसङ्घवी–आभूः पश्चिममण्डलीकबिरुदधारी प्राघूर्णकसाधर्मिक-वात्सल्यभोजनदानं विना न भुङ्क्ते [सं०-आभूरित्यादिगुणवर्णनं कृतम्, ततः] तद्गुणश्रवणचमत्कृतेन तत्परीक्षार्थं प्रच्छन्नवृत्त्या पृथक् पृथक् वर्त्मना सङ्केतितदिने समकालं द्वात्रिंशत्सहस्रसाधर्मिकसङ्घेन सार्द्धं श्रीझाञ्झणोऽविच्छिन्नप्रयाणैरश्ववारैर-ज्ञातागमनस्वरूपः समागतश्चतुर्दशीदिने सङ्घवी–आभूप्रधाने गृहीतपौषधे निसीहीत्रिकुर्वाणो जिनालये देवान्नत्वा शालायां गुरून् वन्दित्वातिष्ठन्। सं० आभूलघुभ्रात्रा जिनदासेन निमन्त्रितः दुग्धपादप्रक्षालनपूर्वमासनेषूपवेशितः, सं०–आभूर्नमस्कारं गुणन् गृहं समागतः । लघुभ्रात्रा पृष्टः, 'भ्रातः ! स्थालानि कीदृशानि कर्षयामि ?।' सङ्घपतिनोक्तम्–'स्वर्णरूप्यमयान्येव ।' तदा पञ्च पञ्चशती पङ्क्तौ पङ्क्तौ स्वर्णरूप्यमयानि मण्डितानि । एवं याममध्ये सकलोऽपि श्रीसङ्घो भोजितः परिधापितश्च पञ्चवर्णपट्टदुकूलमटीभिः । तदनु सङ्घवी-झाञ्झणः सङ्घवी-आभूपादयोर्लग्नः । मदीयोऽपराधः क्षन्तव्यः, किं सुवर्णे श्यामिका लगति ? त्वं भाग्यवान्, यस्येदृशमौदार्यमित्यादि सं०-आभूगुणोपबृंहणां कृत्वा मण्डपं प्राप ।

[इइ संघोवरि बहुमाणो]

---

७. काल्हरी-कल्हरी = तृणानां राशिः, घासनो ढगलो इति भाषायाम् । - संपा० ।

[पुत्थयलिहणं]

[३५-पुस्तकलेखनम्]

पुत्थयलिहणं । पुस्तकानां श्रीजिनागमानां लेखनम्, तत्र महालाभं ज्ञानावरणीय-कर्मनिर्जरात्मकत्त्वाद्विज्ञाय यथाशक्तिः यतनीयं सर्वैः श्राद्धैः साधुभिश्च पठन-पाठन-शोधन-भाण्डागारसारादिविधौ च । यतः -

"लेखयन्ति नरा धन्याः, ये जैनागमपुस्तकान् ।
ते सर्ववाङ्मयं ज्ञात्वा, सिद्धिं यान्ति न संशयः ।।

न ते नरा दुर्गतिमाप्नुवन्ति, न मूकतां नैव जडस्वभावम् ।
नैवाऽन्धतां बुद्धिविहीनतां च, ये लेखयन्त्यागमपुस्तकानि ।।"

श्रीजिनागमस्य लेखनं वाचनं स्वयं लिखनं पठनं पाठनं सारकरणादि च सर्वं सफलमेव ।

"ये लेखयन्ति जिनशासनपुस्तकानि,
व्याख्यानयन्ति च पठन्ति च पाठयन्ति ।
शृण्वन्ति रक्षणविधौ च समाद्रियन्ते,
ते मर्त्यदेवशिवशर्म नरा लभन्ते ।।" [सुक्तमुक्तावली-४२/२]

भक्तपरिज्ञायां श्राद्धकृत्ये -

"[1]अह हुज्ज देसविरओ सम्मत्तरओ रओ अ जिणवयणे ।
तस्स वि अणुव्वयाइं आरोविज्जंति सुद्धाइं ।।

[2]अनियाणोदारमणो हरिसवसविसट्ठकंचुयकरालो ।
पूएइ गुरुं संघं साहम्मिअमाइ भत्तीए ।।

[3]निअदव्वमपुव्वजिणिंदभवणजिनबिंबवरपइट्ठासु ।
विअरइ पसत्थपुत्थयसुतित्थतित्थयरपूआसु ।।

---

1. अथ भवेद्देशविरतः सम्यक्त्वरतो रतश्च जिनवचने । तस्याप्यनुव्रतान्यारोप्यन्ते शुद्धानि ।।
2. अनिदानोदारमना हर्षवशविसर्पद्रोमाञ्चकञ्चुककरालः । पूजयति गुरुं सङ्घं साधर्मिकादि च भक्त्या ।।
3. निजद्रव्यमपूर्वजिनेन्द्रभवनजिनबिम्बवरप्रतिष्ठासु । वितरति प्रशस्तपुस्तकसुतीर्थतीर्थकरपूजासु ।।

4
जइ सोऽवि सव्वविरईकयानुराओ विसुद्धमइकाओ ।
छिन्नसयणाणुराओ विसयविसाओ विरत्तो अ ।।
5.
संथारयपव्वज्जं पव्वज्जइ सोऽवि निअम निरवज्जं ।
सव्वविरइप्पहाणं सामाइअचरित्तमारुहइ ।।" [भक्तपरिज्ञा-२९-३३]

यथा स्वज्ञानावरणीयकर्मनिर्जरार्थिना पश्चिममण्डलीकश्रीआभूसङ्घपतिना एककोटिटङ्कव्ययेन सरस्वतीभाण्डागारे सर्वागमप्रतिरेका सौवर्णाक्षरा, द्वितीया सर्ववर्तमानग्रन्थानां मष्यक्षरमयी प्रतिर्लेखिता, तथा ३६० आत्मसदृशाः श्राद्धाः कृताः, तेनैव च भूनेतामहांकूग्रामयोः अन्ये सामान्याः कोरणीरहिताः ८४ प्रासादा निष्पद्यन्ते इत्येतावद्द्रव्यव्ययौ द्वौ प्रासादौ कारितौ । संस्तारकदीक्षाक्षणे सप्तकोटीद्रव्यव्ययः सप्तक्षेत्र्यां चक्रे तेन ।

यथा वा सा० पेथडः । तत्स्वरूपं चेदम् -

नमिआडदेशे नान्दरीनगरे नरसिंहो राजा, नानाकः प्रधानः, नागलदेवेश्या इत्यादि द्वात्रिंशन्नकाराः ख्याताः । तत्र सुवर्णसिद्धिमान् प्रवाहेन सौवर्णकदानी कणयगिरिबिरुदो देदाको व्यवहारी । तत्सुतः स्वेच्छया लीलया वाणिज्याद्यनभिज्ञः पेथडाभिधो जातः । स स्वल्पद्रव्यः पितरि मृते दुर्ग्गादिशुभविहागे मण्डपे प्राप्तः । लवणादि वाणिज्येन 'लूणिउ पेथडः' इति ख्यातः । क्रमेण जयसिंहराज्ञो मन्त्री जातः । तेन भृगुकच्छे भारतीकोशोऽलिखि ताम्रपूठांरीरीकीलकदुकूलवेष्टनकपट्टसूत्रमयदवरकाद्यलङ्कृतबाहुदण्डपुस्तकरूपः ।

श्रीपत्तनगरे आभडेन नानापुस्तकानि लेखितानि । चतुरशीतिवर्षायुःप्रान्ते धर्मविहिकावाचने भीमप्रियः ९८ [अष्टनवति-] लक्षा व्ययिताः श्रुत्वा च साधुर्विषण्णः प्राह - 'हा ! कृपणेन मया एककोट्यपि न व्ययिता । तदा तस्यासपालादिपुत्रैरुक्तम्- कोटी तदा पूर्णा यद्यष्टोत्तरेति, तैर्दशलक्षास्तदैव सप्तक्षेत्र्यां व्ययिताः, एवमष्टोत्तरकोटी जाता । अष्टौ पश्चाद्धर्मव्यये मानिताः सोऽनशनात्स्वर्गतः ।

सम्प्रत्यपि अनेकैः श्राद्धजनैर्भाण्डाकाराः सर्वशास्त्रमया लेखिताः सन्ति । श्रीपत्तने व्य० खीमसीसहसाभ्याम्, पा० पासवीररामादेवादिभिः । अहम्मदे मंसुन्द्रगदाभ्याम्, वत्सेरादेवाजीवाभ्याम् । पुरा श्रूयते एकदा श्रीहेमसूरिर्जिनशासनोन्नतिपरायणो राज्ञः

4. यदि सोऽपि सर्वविरतिकृतानुरागो विशुद्धमतिकायः । छिन्नस्वजनानुरागो विषयविषाद्विरक्तश्च ।।
5. संस्तारकप्रव्रज्यां प्रव्रजति सोऽपि नियमान्निरवद्याम् । सर्वविरतिप्रधानं सामायिकचारित्रमारोहति ।।

पुत्थयलिहणं ~~~

[पभावणा तित्थे]

[३६-प्रभावना तीर्थे]

अथ **पभावणा तित्थे**त्ति । प्रकृष्टा भावना [प्रभावना], भावना स्वार्थसाधनी, प्रभावना तु स्वार्थ-परार्थयोरपि । यदुक्तम् -

"जगति विदितमेतद्भावनारूपधर्मा-
दधिकगुणवतीयं वर्णसंख्यातिगा च ।
निजमनसि निविष्टा स्वप्रबोधे पटिष्ठा,
स्वपरजननिबोधे प्रत्यलान्याप्रयुक्ता ।।"

तित्थं चाउव्वण्णो [तीर्थं चतुर्विधः] सङ्घः शासनं वा, तस्मिन्महामहकरणश्रीतीर्थयात्रा-प्रासादप्रतिमाप्रतिष्ठा-श्रीजिनस्नात्रमह-सविस्तर-महाध्वजप्रदान-१७भेदविधिसत्यापन-प्रतिग्राम-प्रतिनगर-प्रतिगृह-केवलसम्यक्त्वमोदक-सनाणक-सभाजनमोदक-घृत-गुड-खण्डादि-लम्भन-तपस्तपन-तदुद्यापनढौकन-श्रीसङ्घभक्ति-साधर्मिकवात्सल्य-श्रीगुरुप्रवेशमहादिकरण-सर्वजनविज्ञातधर्मकरणीयैस्तीर्थस्य प्रभावना श्राद्धानां युक्तिमती । यतः -

"प्रतिवर्षं सहर्षेण निजवित्तानुमानतः ।
पूजनीयाः सधर्माणो धर्माचार्याश्च धीमता ।।
पुत्रजन्मविवाहादि-मङ्गलानि दिने दिने ।
परं भाग्यवतां पुंसां श्रीसङ्घार्चादिमङ्गलम् ।।"

श्रीआवश्यकेऽप्युक्तम्-

"वित्ती[1] उ सुवण्णस्स बारस अद्धं च सयसहस्साइं ।
तावइयं चिय कोडी पीतीदाणं त चक्किस्स ।।
एयं[2] चेव पमाणं णवरं रययं तु केसवा दिंति ।
मंडलिआण सहस्सा पीईदाणं सयसहस्सा ।।

---

1. वृत्तिस्तु सुवर्णस्य द्वादश अर्द्धं च शतसहस्राणि । तावत्य एव कोट्यः प्रीतिदानं तु चक्रवर्त्तिनाम् ।।
2. एतदेव प्रमाणं नवरं रजतं तु केशवाः ददति । माण्डलिकानां सहस्राणि प्रीतिदानं शतसहस्राणि ।।

[3]भत्तिविहवाणुरूपं अण्णेऽवि य देंति इब्भमाईया ।
सोऊण जिणागमणं निउत्तमणिओइएसुं वा ।।"

फलमपि -

"[4]देवाणुअत्ति भत्ती पूया थिरकरण सत्तअणुकंपा ।
साओदय दाणगुणा पभावणा चेव तित्थस्स ।।" [आवश्यकनिर्युक्ति-५८०-५८३]

तथा-

ततो मासपूर्त्यनन्तरं गच्छासन्नस्थाने आयाति, आचार्यास्तु तत्प्रवृत्तिमन्विच्छन्ति । ततो नृपादीन्निवेद्यते प्रतिपालिततपःक्रमः साधुरिहायातस्ततो विभूत्या तस्योपरि चन्द्रोदयधारणं नान्दीतूर्यास्फालन-सुगन्धवासप्रक्षेपादिरूपया। तत्रेमे गुणाः -

"[5]उब्भावणा पवयणे, सद्धाजणणं तहेव बहुमाणो ।
ओहावणा कुतित्थे, जीअं तह तित्थवृद्धि अ ।।" [व्यवहारभाष्य-८००]

प्रवचनस्योत्प्राबल्येन भ्राजमानं प्रकाशनम् । अन्येषां साधूनां श्रद्धाजननम्, वयमप्येवं कुर्मो येन महती शासनप्रभावना भवति । श्राद्ध-श्राविकाणामन्येषां च शासनोपरि बहुमानः । कुतीर्थानामपभ्राजना तत्रेदृशां महासत्त्वानामभावात् । जीतमेतद्यत्समाप्तप्रतिमानुष्ठानः सत्करणीयः । तीर्थवृद्धिः प्रवचनस्य ह्यतिशयं वीक्ष्य बहवः संसाराद्विरज्यन्ते प्रव्रज्यां च प्रतिपद्यन्ते । श्री व्यवहारभाष्यवृत्तौ ।

नृपादिभिः श्रीसङ्घेन चाभिनन्द्यमानः प्रवेश्यते, तस्य बहुमानार्थमन्येषां श्रद्धावृद्ध्यर्थं प्रभावनार्थं च ।

केऽपि कथयिष्यन्ति प्रभावकाः श्रीजिनाज्ञाविराधकास्तन्नासम्भाव्यमानमस्ति । तथापि ये केऽपि प्ररूपयन्तः सन्ति ते प्रष्टव्याः, 'क्वाप्यागमादिशास्त्रेषु प्रभावका दुर्गतिगामिनः कैर्दृष्टाः श्रुता वा ? तत्प्रकाश्यत। नो चेत्, प्ररूपका एव श्रीजिनाज्ञाफलं प्राप्स्यन्तीति

---

3. भक्तिविभवानुरूपमन्येऽपि च ददाति इभ्यादयः । श्रुत्वा जिनागमनं नियुक्तानियोजितेभ्यो वा ।।
4. देवानुवृत्तिः भक्तिः पूजा स्थिरकरणं सत्वानुकम्पा । सातोदयो दानगुणाः प्रभावना चैव तीर्थस्य ।।
5. उद्भ्राजना प्रवचने, श्रद्धाजननं तथैव बहुमानम् । अपभ्राजना कुतीर्थे, जीवं तथा तीर्थवृद्धिश्च ।।

सम्भाव्यम् ।' यतः सिद्धान्तादावाराधकतया ज्ञापिताः सन्त्यष्टधा । तथा हि -

"[6]पावयणी धम्मकही, वाई नेमित्तिओ तवस्सी अ ।
विज्जा सिद्धो अ कई अट्ठेव पभावगा भणिआ ।।" [प्रवचनसारोद्धार-९३४]

वर्तमानकालोचितश्रीआगमज्ञाता धारकश्चतुर्विधश्रीसङ्घरूपतीर्थप्रवर्त्तकः श्रीसूरिः प्रावचनिकः । व्याख्यानलब्धिवान् सम्यक्ज्ञानप्रकाशनेन भव्यजीवप्रतिबोधको धर्मकथकः । कर्कशतरतमतर्कशास्त्रकुशलः प्रत्यक्षादिप्रमाणकुशलता-परवादिनिर्द्धोष्टन-राजसभालब्धजयपत्रो वादी, अत्र मल्लवादी दृष्टान्तः । अतीतानागताद्यष्टाङ्गनिमित्तवेत्ता महत्श्रीसङ्घकार्ये निमित्तप्रयुञ्जको नैमित्तिकः, अत्र बहवो वारत्तकादिसम्बन्धाः । पक्षक्षपण-मासक्षपण-षाण्मासिकाष्टमासिक-सांवत्सरिकान्तानि विकृष्टतपांसि तेषां बलोत्पन्नसामर्थ्यः प्रभावकस्तपः शक्तिमान्, अत्र विष्णुकुमारादिसम्बन्धः । जाप-होमासनादिमहाकष्टैः साधितोऽनेकमन्त्राद्याम्नायैर्विद्यावान्, आर्यखपुटादिसम्बन्धः । अञ्जनचूर्णादृशीकरण-सुवर्णसिद्धि-निधिप्रगटीकरण-व्योमोत्पतन-पादलेपादिकाः जानाति, जिनगृहप्रतिमा-श्रीसङ्घप्रौढकार्ये प्रकाशयति स सिद्धः, अत्र पादलिप्तसूर्यादिसम्बन्धः । काव्यकलाकुशलो नानाविधशास्त्रनिष्पादननिपुणस्तद्बलेन राज्ञः प्रतिबोधश्रीसङ्घप्रौढकार्यसंसाधकः कविः, अत्र सिद्धसेनदिवाकरादिसम्बन्धः -

।। अथ श्रीजीवदेवसूरिसम्बन्धः ।।

जगत्[१]प्राणः[२] पुरा देवो जगत्प्राणदायकः । स्वयं सदाऽनवस्थानः स्थानमिच्छन् जगत्यसौ ।।
वायटाख्यं महास्थानं गुर्जरावनिमण्डनम् । ददौ श्रीभूमिदेवेभ्यो बह्मभ्य इव मूर्तिभिः ।।(युग्मम्)
शालातालकसम्बन्ध-निवेशेन तदा मरुत् । निदधे बह्मशालायां चैत्ये च परमेष्ठिनम् ।।
मलयाद्रौ यथा सर्वे चन्दनन्ति महीरूहः । ब्राह्मणा वणिजश्चात्र तथासन् वायटाख्यया ।।
अभूज्जातिः स्फुरज्जातिपुष्पसौरभनिर्भरा । सरसालिभिराराध्या तन्नाम्ना सर्वमूर्द्धगा ।।
धर्मदेवः श्रियां धाम श्रेष्ठी तत्रास्ति विश्रुतः । साक्षाद्धर्म इव न्यायार्जितद्रव्यप्रदानतः ।।

---

१. वायुः। २. प्रथमतः षष्टश्लोकस्थाने हस्तप्रतौ 'पुरा वायुदेवः स्वयं सदानवस्थानः स्थानं जगच्छन् गुर्जरावनिमण्डलं वायटाख्यया प्रसिद्धाऽऽभूवन् । तत्र पुरे वायरजातिमुख्यः श्रेणी जज्ञे ।'

6. प्रावचनिको धर्मकथिको वादी नैमित्तिकस्तपस्वी च । विद्यावान् सिद्धश्च कविः अष्टौ एव प्रभावका भणिताः ।।

पभावणा तित्थे ~~~

प्रभुर्न्यषेधयत् तत्र साधुसाध्वीकदम्बकम् । उदीच्यां दिशि गच्छन्तं स्वीकृतायां कुयोगिना ।।

धर्मकर्मनियोगेन साध्वीयुगमगात् ततः । तत्र कासारसेतौ च तिष्ठन् योगी ददर्श तत् ।।

ततः सन्मुखमागत्य लाघवादेकस्या मूर्ध्नि चूर्णं चिक्षेप ।

तस्य सा पृष्ठतो गत्वा पार्श्वे निविविशे ततः । वृद्धयोक्ता न चायाति धिक्कष्टं पूज्यलङ्घनम् ।।

सा शीघ्रं श्रीगुरुपार्श्वे वृत्तान्तं व्यजिज्ञपयत् । सूरिराह मा विषीद । अत्र कार्ये वयं भलिष्यामहे ।

ततः कुशमयं तत्र पुत्रकं ते समार्पयन् । चतुर्णां श्रावकाणां च शिक्षित्वा तेऽप्यथो ययुः ।।

निर्गत्य च बहिश्चैत्याच्छित्त्वा तस्य कनिष्ठिकाम् । तत्पार्श्वगाः करं तस्य ददृशुस्ते निरङ्गुलिम् ।।

पृष्टः कस्मादिदं जातमकस्मादिति सोऽवदत् । ऊचे तैर्मुच्यतां साध्वी बहुप्रत्यूहकारिणी ।।

अमानयति तां वाचं तत्र ते पुत्रकाङ्गुलिम् । द्वितीयां पश्यतस्तस्याछिन्दन् साऽप्यत्रुटद् द्रुतम् ।।

तत आहुः अद्यापि साध्वीं मुञ्च, नो चेच्छिरः छेत्स्यामि ।

सम्यग् भीतस्ततः सोऽपि प्राह नीरेण सिच्यताम् । अस्याः शिरस्ततो यातु निजं स्थानमनाकुला ।।

तथा कृते च तैः साध्वी तत्र साऽभूत् सचेतना । आगत्य च निजं स्थानं सा बालाऽऽलोचनां ललौ ।।

ततो भीतो देशान्तरं ययौ योगी ।

इतः श्रीविक्रमादित्यः शास्त्यवन्तीं नराधिपः । अनृणां पृथिवीं कुर्वन् प्रवर्तयति वत्सरम् ।।

वायटे प्रेषितोऽमात्यो लिम्बाख्यस्तेन भूभुजा । जनानृण्याय जीर्णं चापश्यच्छ्रीवीरधाम तत् ।।

तत् स उद्दधार ।

संवत्सरे प्रवृत्ते सषट्सु वर्षेषु पूर्वतः । गतेषु सप्तमस्यान्तः प्रतिष्ठां ध्वज-कुम्भयोः ।।

श्रीजीवदेवसूरिभ्यस्तेभ्यस्तत्र व्यधापयत् । अद्याप्यभङ्गं तत्तीर्थममूदृग्भिः प्रतिष्ठितम् ।।

इतश्च वायटे वणिग् मुख्यो लल्लः श्रेष्ठी अस्ति ।

महामहेश्वरः कोटिसंख्यद्रव्येण भास्वरः । महादानं मुदा सोऽदात् सूर्यग्रहणपर्वणि ।।

तथा होमं समारब्धवता तेन यायजूकारुत्विजश्च बहवः समाहूताः । तानभ्यर्च्य होमः प्रावर्त्यत ।

तत्र कुण्डोपकण्ठेऽहिस्तदूर्ध्वस्थाम्लिकाद्रुमात् । धूमाकुलाक्षियुग्मोऽसौ फटत्फटिति चापतत् ।।

आदातुमेष भोगीन्द्रः स्वयमागत आहुतीः । वाचालेषु द्विजेष्वेवं कोऽपि वह्नौ तमक्षिपत् ।।

पभावणा तित्थे ~~~

द्रव्याभावोद्भवा चिन्ता कार्य्या लल्ल ! नहि त्वया । द्रव्यं ते तदधिष्ठात्र्यः पूरयिष्यन्ति पुष्कलम् ।।

उत्कीलने समारब्धे निशि शुश्रुविरे स्वंराः । नोत्कील्यमित्यवज्ञाते निपतन्त्यत्र लोष्टकाः ।।

पुनः पूज्यानां ज्ञापितम्, ध्याने कृते साक्षाद्देवी आगता । आह च - कन्याकुब्जराज्ञो दुहिता निजे सुखादिकादेशे गुर्जरे तिष्ठन्ती ।

म्लेच्छभङ्गभयादत्र कुपेऽहं न्यपतं तदा । अभूवं भूम्यधिष्ठात्री मृत्वा स्वं चास्ति मे बहु ।।

ततः स्वाङ्गास्थिशल्यानि नानुमन्ये विकर्षितुम् । ममाननुमतौ कोऽपि किंचित् कर्तुं नहि प्रभुः ।।

ततो गुरुरेनामन्वनयत् सातङ्गीः सुधाभिः शाताऽभूत् ।

अवोचद् यदि मामत्राधिष्ठात्रीं कुरुताधुना । तद्द्रव्यसहिताभूमिर्धर्मस्थानाय गृह्यताम् ।।

गुरुभिः प्रतिपन्ने च चैत्ये निवृत्तिते वरे । ते देवकुलिकां तस्या योग्यां पृथगचीकरन् ।।

भवनदेवीति आख्या च कृता । अथ जिनधर्मरक्तं लल्लं ज्ञात्वा विप्रा जैनेषु द्वेषं चक्रुः । ततस्ते गोचरचर्यादौ गच्छतां साधूनामुद्वेगं कुर्वन्ति । साधुभिस्तत्स्वरूपे प्रोक्ते गुरुः प्राह- 'क्षमावशातुपसर्गा विलीयन्ते, इदं नस्तत्त्वम् ।' अन्यदा विप्रा आलोच्य काञ्चिन्मरणोन्मुखीं सुरभिं चरणेषूत्पाट्योत्पाट्य श्रीवीरचैत्यान्तः प्रावेशयन् । निशिगतप्राणां तां मत्वा ते बहिस्थाः प्राहुः-'अत्र जैनमहिमा कोऽपि विलोक्यः जैनानां विडम्बना वा ।' ब्राह्मे मुहूर्त्ते यतयोऽङ्गणे प्राप्तास्तां परासुं ददृशुः । तैर्गुरुणां निवेदिते तत्स्वरूपे गुरवोऽक्षुभ्यन्तोऽङ्गरक्षायै साधून् मुक्त्वा ध्यानं भेजुः । अन्तर्मुहूर्त्तेन सा धेनुः स्वयमुत्थाय चैत्याद्बहिर्निगत्य बह्मभवनोन्मुखं गच्छन्ती विप्राणां विस्मयाद्वैतं कुर्वन्ती दृष्टा । यावत्पूजकः प्रातर्द्वारमुद्घाटयति तावत्शीघ्रं सुरभिर्बह्ममन्दिरेऽऽविशत्, बहिःकर्षन्तं शृंगयुगलेन प्रपात्य गर्भागारे प्रविश्य बह्मपुरोऽपतत् । गुरवो ध्यानं मुमुचुः । पूजको झल्लरीनादान्महास्थानममेलयत् । आगता विप्रादयः, हाहाकारः सर्वेषां मतिमूढताश्चर्यगुरुभयानि । ही ही मतिभ्रमो वा स्वप्नो वायम् । यद् गौर्मृताऽत्रैवागता च । वायोः कीर्त्तिर्वायुनैव गता । हा उच्चल्यते इतः । अन्ये प्राहुः - 'तव डिम्भैर्विराधिता जैनर्षयः ।' अन्ये प्राहुः - 'न मम किन्तु तवे'त्यादि मिथः कलहाः, निपुणाः प्राहुः - 'चैत्यस्था गुरवः शरणं प्रपद्यन्ते तदा कोऽपि शुभसम्भवः । प्रणामं विना प्राकृतोऽपि कोऽपि न प्रशन्नो भवति, किममानुषसामर्थ्यः ।' एवंमेकमतीभूय श्रीवीरमन्दिरे प्राप्ताः । हस्तौ शीर्षे योजयित्वा बहुभक्तिविनयपूर्वकं श्रीगुरुन् विज्ञपयामासुः । इत्युक्तेऽपि गुरौ तुष्णीके लल्लो जीतकाशी प्राह - 'जैनेषु द्विष्टैर्विशिष्य तु मयि भवद्भिरसूययापराधा[१०] भृशं क्रियन्ते, तथापि यदि यूयं किञ्चिद्दण्डं मर्यादारूपं *प्रतिपद्यध्वे तदाऽहं पूज्येभ्यः किञ्चिद्विज्ञपयामि ।' विप्राः प्राहुः - 'युक्तमवोचः।'*

'स्वरुच्या साम्प्रतं जैनधर्मे सततमुत्सवान् । कुर्वतां धार्मिकाणां न कोऽपि विघ्नान् करिष्यति ।।

---

१०. '...द्भिसूरयाय...' हस्त० ।

पभावणा तित्थे ~~~

भवतां विदेशगमने भिक्षाचरत्वमात्रमेव ननु ।' सूरिराह- 'राजन् इयन्ति दिनानि भवत्प्रेमतः सन्दानमिवासीत्। आपृष्टोऽसि गच्छामो वयम् ।' नृपः प्राह- 'स्वपुरान्न दास्यामि भवतो गन्तुम् ।' सूरिः प्राह - 'केन वयं यान्तो निषिध्यामहे ?' इत्युक्त्वा स्वाश्रयं ययौ सूरिः । राजा नगरद्वाराणि सर्वाण्यपि नरै रुरोध । इतश्च गुरवः सान्ध्यक्रियां कृत्वा ध्यानेन तस्थुः । प्राणनिरोधाद्विद्याबलाच्च ते गगनाध्वना पल्लीनाम्नीं पुरीं प्रापुः । प्रातर्विलोक्यतेऽदृष्टे च राजा दध्यौ, 'किं मित्रं गत एवायं सदा शिथिलमोहः, परमीदृक् कलानिधिः पुनः कथं प्राप्यः ? मन्दपुण्योऽहमिति । इतश्च ततः पल्लीवासिविप्रैः पत्तने राजा जयसिंहो व्यज्ञपि । अमुके तिथौ, नक्षत्रे, वारे दिने च श्रीवीरसूरयोऽत्र प्राप्ताः । राजा दध्यौ, नर्मैव मे विकृतम् । तद्रात्रावेवासौ व्योममार्गेण पल्यां ययौ । उत्कण्ठितेन राज्ञा तदाकरणार्थं प्रहिताः प्रधानाः पल्लीं प्रापुः । प्रकाशितं तदग्रे ते नृपस्य तद्वियोगदुःखादि । उदासीनस्था गुरवः प्राहुः- 'स्वविद्याबलं ज्ञातुं वयं प्रागपि विजिहीर्षवः, स्थानस्थैर्न ज्ञायते तत् । राजा उच्चावचं तु वचः सहकारिकारणम् । ततो देशेषु विहृत्य भवत्पुरे आगमिष्यामश्चेत्पुनः, प्रधानैर्महाग्रहकरणेन प्रतिपन्नं गुरुभिः पत्तनागमनम् ।'

महाबौद्धपुरे बौद्धान्वादे जित्वा बहूनथ । गोपालगिरिमागच्छन् राज्ञा तत्रापि पूजिताः ।।

परप्रवादिनस्तैश्च, जितास्तेषां च भूपतिः । छत्रचामरयुग्मादि-चिह्नान्यदान्मुदा ।।

राज्ञा कारितास्ते, गोपगिरिभूपार्पितं छत्राद्यप्रेषयन् सत्वरम्, स्वयं तु शनैर्नागपुरमार्गेण पत्तनासन्नचारूपग्रामे प्रापुः । तावन्तं पन्थानं यावद् भूपकृतप्रवेशमहा गुरवः पत्तनं प्रापुः । अथात्र वादिसिंहाख्यः सांख्यवादी समागतः । पत्रावलम्बने तस्याऽयं श्लोकः -

"उद्धृत्य बाहू किल रारटीति; यस्यास्ति शक्तिः स च तावदैतु ।
मयि स्थिते वादिनि वादिसिंहे; नैवाक्षरं वेत्ति महेश्वरोऽपि ।।"

श्रीकर्णबालमित्रं श्रीवीराचार्यकलागुरुर्गोविन्दाचार्योऽस्ति, तत्पार्श्वे प्रच्छन्नवेषेण राज्ञा आगत्य पृष्टम्- भगवन् ! वादिसिंहेन सह वादः करिष्यते ? गोविन्दाचार्यैरुक्तम्-वीरस्तं प्रातर्जेष्यति सभायाम् । प्रातर्भूपेन वादिसिंह आकारितः प्राह निःस्पृहत्वदम्भेन वयं कस्मात् तत्रागच्छामो निःसङ्गाः ?, राजा चेत् कौतुकी तदा पादचारेणात्रागमिष्यति । राज्ञा कौतुकात् तथैव कृतम् । सांख्यपार्श्वे गोविन्दाचार्यः सभ्यतयाऽऽकारितः, तत्र प्राप, अपरेऽपि वीराचार्यप्रमुखा विदुराः । राजाऽऽह-'को वक्ताऽत्र ?' श्रीगोविन्दाचार्यः प्राह- 'श्रीवीराचार्यः ।' सांख्यः प्राह- 'एष दुग्धगन्धमुखो मया सह किं वदिष्यति ? ।' राजाऽऽह-'त्वन्मदधत्तूरविभ्रमो दुग्धादेव विलेष्यते ।'

इति श्रुत्वा स उर्ध्वहस्तस्थशिराः सुप्त एवोपन्यासमवहीलया चक्रे । तदनु वीरः प्राह-गद्यात् पद्याद् वा वच्मि ?, छन्दाऽलङ्कारावपि कथय । सांख्यः प्राह-'भो बाल ! गौर्जराडम्बरो मत्पुरो न क्रियते । चेत् ते शक्तिरस्त्येव तदा मत्तमयूरच्छन्दसा निह्नवालङ्कारेण च वद ।' वीरः-'गिरां देव्यास्त्वयेव मयाऽऽशातना न क्रियते' इत्युक्त्वा ऊर्ध्वीभूय सर्वानुवादपूर्वं प्रत्युपन्यासं चक्रे, सांख्योऽपि तदासनस्थोऽभूत् । श्रीवीरे मत्तमयूरच्छन्दसा

पभावणा तित्थे ~~~

संतिकरस्तवनिर्मितविनिवारित-निखिलदेशमारिभयाः ।
श्रीमुनिसुन्दरगुरवः प्रभावकाः शासनोद्योताः ।।१।।

तपगणसुरगिरिशिखरे सुरपादपसंनिभत्वमभिदधतः ।
श्रीरत्नशेखरगुरुप्रवराः शिष्ये हितार्थकराः ।।२।।

अभवन् भृगुपुरविदितप्रभावविभवाः कलिन्दिकाकलिताः ।
नानागमार्थगर्भितशास्त्रैरिहमूर्त्तिमन्तोऽपि ।।३।। युग्मम् ।।

तत्पट्टालङ्कृतिकृतिनिपुणाः **श्रीलक्ष्मीसागर**गुरवः ।
तैर्न्यस्ताः सौवपदे जाताः **श्रीसुमतिसाधु**वराः ।।

सम्प्रति तेषां पदे वपुः प्रसर्प्पत्प्रभावः भृशपटवः ।
नन्दन्तु चिरं सङ्घे गणपाः **श्रीहेमविमला**ख्याः ।।

श्रीरत्नशेखरगुरूत्तमशिष्यमुख्या आबाल्यकालगुणगौरवलब्धवर्णाः ।
श्रीसूरिराज-**जिनहंसमु**नीशहंसास्तेषां विनेय-परमाणुरिमां लिलेख ।।

इति मन्नह जिणाण आणं इति कुलकस्य वृत्तिर्नटीपद्रनगरे तपागच्छाधिराज-श्रीश्रीश्री-हेमविमलसूरि-विजयराज्ये पोषमासे शुक्लपक्षे प्रतिपद्दिने बुधे सकलानूचानशिरोवतंसस्व-यशोनिर्जितराजहंस-श्रीश्रीश्री-**जिनहंससूरि**शिष्य-भूजिष्येण [सुशिष्येण] **पं. राजमाणिक्यगणि**ना स्व-परोपकारविनोदाय सादरं लिखिता।।

।। श्रीरस्तु ।। ।। कल्याणमस्तु ।। ।। शुभं भवतु ।।

स्वस्ति संवत् एकसप्ततिः अधिकः पञ्चदशशत १५७१ वर्षे वैशाखमासे कृष्णपक्षे तृतीया ३ बुधे । भट्टमेदपाटज्ञातीयेन नटपद्रवास्तव्य-जोसीकडूआ-लिखितम् ।। छ ।। शुभमस्तु ।। ।। छ ।। ।। श्रीरस्तु ।। ।। कल्याणमस्तु।।

संवत् १६३८ वर्षे श्रीखरतरगच्छे श्रीपत्तननगरे श्रीजिनचन्द्रसूरिभिः पाठनार्थः ।।

परिशिष्टः-१

'मन्नह जिणाणं आणं' स्वाध्यायवृत्तौ समुद्धृतानां प्राकृतपद्यानां अकारादिक्रमः ।

पद्याऽद्यपदम्	विषयः	ग्रन्थनामादिकम्	पृष्ठम्
अंगंमि पढमपूआ	जिनपूजा	उपदेशतरङ्गिणी, चै. महाभाष्य-१९९	२४९
अंगग्गभावभेया	जिनपूजा	चैत्यवन्दनभाष्य-१०	२४९
अंगपच्चंग	शीलम्	दशवैकालिक-८/५८	१८१
अंगुट्ठमुट्ठिगंठीघर	प्रत्याख्यानम्	आवश्यकनिर्युक्ति-१५७८	१३४
अंगुट्ठे मेलविउं	कायोत्सर्गः	आवश्यकनिर्युक्ति-१५४७ वृत्ति	१२७
अंगुलिभमुहाओऽवि	कायोत्सर्गः	प्र.सारोद्धार-२१६०, आ.नि.१५४७ वृत्ति,	१२७
अंतिमकोडाकोडीइ	मिथ्यात्वम्	गु.स्था.क्र.-२२ वृत्ति, वि.आ.भा.-११९४,	३०
अंतोमुहुत्तमित्तं	कायोत्सर्गः	आवश्यकनिर्युक्ति-१४६३	११९
अईअं निंदामि	जीवकरुणा	पाक्षिकसूत्र	३१२
अईयं निंदामि	सामायिकम्	पाक्षिकसूत्र	८२
अकसिणपवत्तगाणं	जिनपूजा	महानिशिथ-३/००, पञ्चवस्तु-१२२४ आ.भा. ९९४, पञ्चाशक-४/४२,	२४२
अक्खरस्स अणंतभागो	मिथ्यात्वम्		
